Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Baroda

General Editor :
A. N. Jani,
M.A., Ph.D., D.Litt.,
Kāvyatīrtha,
Director, Oriental Institute

No. 166

श्रीशक्तिसङ्गमतन्त्रम् ।

चतुर्थो भागः ।

छिन्नमस्ताखण्डः ।

ntra

श्रीस्कन्दमहापुराणम् । चतुर्थो भागः । वैष्णवखण्डः ।

Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Baroda

General Editor :
A. N. Jani,
M.A., Ph.D., D.Litt.,
Kāvyatīrtha,
Director, Oriental Institute

No. 166

सत्यं शिवं सुन्दरम्

श्रीशक्तिसङ्गमतन्त्रम् ।

चतुर्थो भागः ।

छिन्नमस्ताखण्डः ।

ŚAKTISAṄGAMA TANTRA

Volume IV

CHINNAMASTĀKHAṆḌA

Edited by

Late Dr. B. Bhattacharyya
Ex-Director,
Oriental Institute,
Baroda

and

Pandit Vrajavallabha Dvivedi
Professor of Yoga and Tantra,
Sampurnanand Sanskrit University,
Varanasi

Oriental Institute
Baroda
1978

First Edition : 1978
Copies : 500

Published with the Financial Aid of the University Grants Commission, the Government of Gujarat and the M. S. University of Baroda.

Price Rs. 49/-

Copies can be had of :—

The Manager,
UNIVERSITY PUBLICATIONS SALES UNIT,
M. S. University of Baroda Press (Sadhana Press),
Near Palace Gate, Palace Road, Baroda-390001

Printed by Shri Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), near Palace Gate, Palace Road, Baroda and published by Dr. A. N. Jani, Director, Oriental Institute, The Maharaja Sayajirao University of Baroda, Baroda, May, 1978.

FOREWORD

I have great pleasure in putting before the world of scholars the last part of the *Śaktisaṅgamatantra* designated as the *Chinnamastā-khaṇḍa*, edited by Late Dr. B. Bhattacharyya and Pt. Vrajavallabha Dvivedi. The first part of the *Śaktisaṅgamatantra* called *Kālī-khaṇḍa* was published in 1932 (as G.O.S. No. 61); the second called *Tārā-khaṇḍa* was published in 1941 (as G.O.S. No. 91) and the third called *Sundarī-khaṇḍa* was published in 1947 (as G.O.S. No. 104). All these three *khaṇḍa*s were edited by the then Director Dr. B. Bhattacharyya. The fourth part was thus a longfelt desideratum. Dr. Bhattacharyya had promised to write a detailed introduction to this work when the entire work was ready for print. But unfortunately Dr. Bhattacharyya could not survive to fulfil his promise. The work, left incomplete by Dr. B. Bhattacharyya was, therefore, entrusted to Pt. Vrajavallabha Dvivedi, Prof. of Yoga and Tantra in the Sampurnananda Sanskrit University at Varanasi, who kindly accepted to edit the present work jointly and to write a detailed introduction.

It is gratifying that Prof. Dvivedi has fulfilled the expectation of Dr. Bhattacharyya by writing a learned introduction in Sanskrit to the present volume. Prof. Dvivedi, a well-known scholar and adept in the field of *Tantraśāstra*, has very successfully done full justice to this *tantra* in his learned introduction which is divided into two parts. In the first part, after giving information about the manuscript-material, he discusses the topics such as the origin, special features, date and place of the *Śaktisaṅgamatantra*, its divisions etc. This is followed by a list of works referred to in the present work. Thereafter he discusses the earlier and later *tantra*s and the scope of the present work. This is followed by the detailed information on seven *paryāya*s and the divisions such as *Kādi*, *Hādi* and *Kahādi* and the three traditions viz. *Kerala*, *Dakṣiṇa* and *Vāma*. After this the learned editor has given information on different *Sampradāya*s (religious sects) as outlined in the present work.

In the second part of the introduction the learned editor has discussed the principal tenets of *Tantra* as taught in the present work. After giving the brief outline of the *Śākta* philosophy he discusses the several *Yoga*s, *Praṇavopāsanā*, place of *Guru* and *Mantrasiddhi*, *Prāṇāyāma*, *Bhūtaśuddhi*, *Prāṇapratiṣṭhā* and *Nyāsa*s. This is followed by technical description of the nature of external worship, of threefold *Karma*, the fixing of time, the divinity and her different forms, other minor divinities, *Dīkṣā* and *Abhiṣeka*, the *Yantra*s, *Śaktipūjana*, *Kumārīpūjana*, *Latāsādhana*, the *Cakra*s and the *Pīṭha*s and the rites of offering *arghya* etc. The five well-known *makāra*s, different flowers, different varieties of rosaries and the usual order of worship as well as *Siddhi*s are discussed in details.

This will show how the learned author covers the entire range of topics of *tantra-śāstra* in his learned introduction. We are highly grateful to Prof. Dvivedi for his scholarly introduction which, it is hoped, will prove useful to the scholars in the field as well as to those interested in the history of *Śākta* religion in India.

Dr. Bhattacharyya, in order to preserve secrecy of certain rituals, used to replace certain words in the text by asterisks. Prof. Dvivedi followed this precedent and has omitted certain words and has put x x x. I have, however, deemed it proper to replace these words in the Appendix No. 4 so that the text may become intelligible to the students of the religion of the *tantra*s and of the erotic sculpture and painting.

I thank the University Grants Commission and the Government of Gujarat for giving financial help towards the publication of this Volume.

I also express my sense of gratitude to my friend Shri Ramanlal J. Patel, Manager, Shri Bansilal Shah, Deputy Manager and other members of the M. S. University Press for taking personal interest for expediting the publication of the present Volume.

Oriental Institute, Baroda.
February 21, 1978.

A. N. Jani
Director

विषय-सूची

Foreword v

उपोद्घात-भागः

पूर्वार्धः

	पृष्ठाङ्काः
संस्करणे उपयुक्ता मातृकाः	१
शक्तिसंगमतन्त्रस्य सरस्वतीभवनस्था मातृकाः	३
शक्तिसंगमतन्त्रावतारः	३
शक्तिसंगमतन्त्रस्य वैशिष्ट्यम्	५
शक्तिसंगमावतारकालो देशश्च	८
शक्तिसंगमे खण्डविभागः	९
शक्तिसंगमे स्मृता ग्रन्थाः	१०
अक्षोभ्यकक्षपुट्यादिषट्कम्	१०
अङ्ककोशः	११
अनुत्तरगुणार्णवः	११
अर्णवादिद्वादशकम्	११
आगम-पुराणे	१२
उड्डीशद्वयम्	१२
उत्तराम्नायः	१२
कादितन्त्रादिपञ्चकम्	१३
कादिहादिविनिर्णयः	१३
कामरूपागमादिचतुष्टयम्	१३
कालिकागमः	१३
कालिकापरिशिष्टम्	१४
कालिकाम्नायतन्त्रम्	१४
कालिकासंहिता	१४
कालिकासाधनम्	१४
कालीक्रमागमः	१४
कालीपुराणम्	१४
कुलार्णवादिसप्तकम्	१५
कोटिविनायकः	१५
गोपालपाञ्चरात्रादिसप्तकम्	१५

	पृष्ठाङ्काः
चित्तस्कन्ध-त्रिस्कन्धे	१६
तन्त्रार्णवः	१६
तारासूक्तम्	१६
देवीपरम्परा	१६
नीलसारस्वततन्त्रम्	१७
पूर्वतन्त्रम्	१७
मन्त्रसिद्ध्यभिधागमः	१७
मुण्डरहस्यम्	१७
यामलम्	१७
रहस्यम्	१८
लक्षणसंग्रहः	१८
वर्णोद्धारतन्त्रम्	१८
वाराहीसंहिता	१८
व्यङ्कटेशाख्यम्	१८
शक्तियोगक्रमः	१८
शिवतत्त्वम्	१९
श्रीमतोत्तरतन्त्रम्	१९
श्रीमत्पञ्चकतन्त्रम्	१९
सप्तशती	१९
सर्वतन्त्रम्	१९
साधनापटलः	१९
सिद्धमतम्	१९
सिद्धिकेरलः	२०
सूर्यसिद्धान्तः	२०
प्राचीनार्वाचीनविभागः	२०
शास्त्रविस्तरः	२१
आगमग्रन्थसंख्या	२२

	पृष्ठाङ्काः
पर्यायसप्तकम्	२३
देशपर्यायः	२३
कालपर्यायः	२४
आम्नायपर्यायः	२५
विद्यापर्यायः	२६
दर्शनपर्यायः	२६
षड्दर्शनानि	२६
आयतनपर्यायः	२७
आगमपर्यायः	२७
कादिहादिकहादिविभागः	२८
केरलादित्रिविधसम्प्रदायः	३०
दक्षिणवामभेदौ	३२
समेदोपभेदाः सम्प्रदायाः	३३
सम्प्रदायानामुत्तरोत्तरं गरीयस्त्वम्	३४
अन्तर्भावः	३४
भेदोपभेदाः	३४
परस्परनिन्दा तस्याः प्रयोजनं च	३४
नानाविधाः सम्प्रदायाः	३५
वैदिकपरम्परानुपालनम्	३६
शङ्कराचार्यप्रवर्तितो दशनामिसम्प्रदायः	३६
सप्तविधोऽवधूतः सम्प्रदायः	३८
आर्हतसम्प्रदायः	३९
कापालिकः सम्प्रदायः	३९
कालामुखः सम्प्रदायः	४०
कौलः सम्प्रदायः	४०
गाणपत्यः सम्प्रदायः	४१
घोरः सम्प्रदायः	४१
चण्डः सम्प्रदायः	४१
चान्द्रः सम्प्रदायः	४१
चीनः सम्प्रदायः	४२
चैतन्याख्यः सम्प्रदायः	४२
दिव्या वीराः पशवश्च	४३
दौर्गः सम्प्रदायः	४४
पाशुपतः सम्प्रदायः	४४
पाषण्डः सम्प्रदायः	४४
बौद्धः सम्प्रदायः	४१
भैरवाख्यः सम्प्रदायः	४५
विलासाख्यः सम्प्रदायः	४५
वैष्णवाख्यः सम्प्रदायः	४५
शाक्तः सम्प्रदायः	४७
शैवः सम्प्रदायः	४७
सौरः सम्प्रदायः	४७
स्मार्तः सम्प्रदायः	४७
स्वायम्भुवः सम्प्रदायः	४८
सम्प्रदायपरम्परा	४८

उत्तरार्धः

द्विविधा वरिवस्या	५१
शक्तिसंगमीयं दर्शनम्	५१
षड्विधो योगः	५४
भावयोगः	५५
मन्त्रयोगः	५६
प्रणवोपासना	५६
गुरुः	५७
मन्त्रसिद्धिप्रक्रिया	५८
पञ्चविधः प्राणायामः	५९
भूतशुद्धिः	५९
प्राणप्रतिष्ठा	५९
षडङ्गादयो न्यासाः	६०
बाह्यवरिवस्यास्वरूपं भेदाश्च	६०
त्रिविधं कर्म	६१
रात्रिनिर्णयस्तिथिनिर्णयश्च	६२
मुख्या उपास्या देवताः	६२
दश महाविद्याः	६३
दशमहाविद्यानां क्रमदशकम्	६३

	पृष्ठाङ्काः		पृष्ठाङ्काः
कुल्लुकादिसमाराधनम्	६४	लतासाधनम्	७६
मतान्तरम्	६४	वेश्यासाधनम्	७७
काली तारा च	६४	चक्रदशकम्	७७
सुन्दरी नित्या च	६६	पञ्चचक्रक्रमः	७७
बटुकोऽन्ये भैरवादयश्च	६७	दशविद्यादीनि चक्राणि	७८
अधिकारी	६८	पीठानि	७८
दीक्षाभिषेकौ	६८	कौलतीर्थानि	७९
स्त्रीदीक्षा	७०	आसनानि	७९
त्रिविधो मेरुः	७१	अर्घ्यः पात्रं तर्पणं पानं च	८०
वह्निमेरुः (कुण्डानि)	७१	मकारपञ्चकम् अनुकल्पाश्च	८२
यन्त्रमेरुः	७२	पुष्पनिर्णयः	८३
श्रीचक्रं श्रीयन्त्रं वा	७३	मालाभेदाः	८३
प्रस्ताराः	७३	सामान्यपूजाक्रमः	८४
अष्टार्गलचक्रम्	७४	उत्पाताः कौतुकानि सिद्धयश्च	८५
शक्तियोगः	७५	सिद्धीनां नामानि	८६
शक्तिपूजनम्	७५	उपसंहारः	८६
कुमारीपूजनम्	७६	कृतज्ञताप्रकाशः	९०

ग्रन्थभागः

				पृष्ठाङ्काः
१	विषयनिर्देशो नाम प्रथमः पटलः	...	...	१–१०
२	विद्यापीठनिर्णयो नाम द्वितीयः	...	...	११–२०
३	शक्तिसमाराधनं नाम तृतीयः	...	...	२१–३८
४	पुष्पनिर्णय-अनुकल्पविधिर्नाम चतुर्थः	...	...	३९–४९
५	छिन्नोत्पत्तिनिर्णयो नाम पञ्चमः	...	...	५०–६४
६	कालपर्याय-जयन्तीनिर्णयो नाम षष्ठः	...	...	६५–७४
७	पर्यायाम्नायादिनिर्णयो नाम सप्तमः	...	...	७५–८८
८	यन्त्रप्रस्तारादिनिर्णयो नामाष्टमः	...	...	८९–१०६
९	कुण्डलीयोग-मालाभेदो नाम नवमः	...	...	१०७–११४
१०	सामान्यभाषाविवरणं नाम दशमः	...	...	११५–१२५
११	पुष्प-होम-ब्रह्मजालादिनिरूपणं नामैकादशः	...	...	१२६–१३५

परिशिष्टानि

१ शक्तिसंगमे समागतानि ग्रन्थनामानि १३७–१३८

२ शक्तिसंगमे समागतानि तान्त्रिकमतमतान्तराणि १३९–१४२

३ शक्तिसंगमे संदृष्टा विशिष्टा शब्दा विषयाश्च १४३–१५५

४ शब्दपूर्तिः १५७–१५८

५ शुद्धिपत्रम् १५९–१६१

उपोद्घातः

पूर्वार्धः

अथायं समुपाह्रियते शक्तिसंगमाख्यस्य प्रथितचरस्य शाक्ततन्त्रस्य छिन्नमस्ताख्यश्चतुर्थः खण्ड-रतन्त्रागमशास्त्ररसिकानां चिरकालं यावदस्य प्रकाशनं प्रतीक्षमाणानां विदुषां पुरतः। अस्य ग्रन्थस्य कालीखण्डाख्यः प्रथमो भागः १९३२ ई. वर्षे, ताराखण्डाख्यो द्वितीयो भागः १९४१ ई. वर्षे, सुन्दरी-खण्डाख्यश्च तृतीयो भागः १९४७ ई. वर्षे प्रकाशित आसीत्। ततः परं ग्रन्थस्यास्य संपादकाः श्रीमन्तो विनयतोषभट्टाचार्यमहोदया भगवत्यास्त्रिपुरसुन्दर्या धाम मणिपुरमधिगतवन्त इति हेतोः प्रकाशनमवरुद्धम्। त्रिंशद्वर्षानन्तरमधुना चतुर्थो भागः प्रकाश्यते। नित्याषोडशिकार्णवसम्पादनेन चिरमाराधिताया भगवत्याः कृपालवेनावशिष्टोऽयं कार्यभारो मह्यमर्पितः शोधसंस्थानाधिकारिभिरितीमं भगवत्या अनुज्ञापनसिवाङ्गी-कृत्याहमत्र प्रवृत्तः। C D N इत्येवं संकेतितानां तिसृणां मातृकाणां साहाय्येन, यासां हि परिचयस्तृतीय-खण्डप्रस्तावनायां प्रथमे पृष्ठे दृश्यते, श्रीभट्टाचार्यमहोदयैश्चतुर्थस्य खण्डस्यापि सम्पादनम्—"चतुष्षष्टि-कलावेत्ता कवीनां मालिका पुरः" (३. १४५) इति ग्रन्थपर्यन्तमकारि, सम्पूर्णा च पाण्डुलिपिः पाठसंकलनेन सज्जीकृता। सेयं सम्पादिता पाठसंकलनेन सज्जीकृता च पाण्डुलिपिर्मत्सविधे प्रेषिता तदानीन्तनैः शोधसंस्थाननियामकैः श्रीभोगीलालसांडेसरामहोदयैः। अस्य खण्डस्य चतस्रो मातृका वाराणसीस्थे सरस्वतीभवनपुस्तकालये सन्तीति परिज्ञाय ताभिः पाठसंकलनायापि तैरनुमतिः प्रदत्ता। एवं सप्तमातृकाणामाधारेण सम्पूर्णोऽयं खण्डः संपाद्याधुना प्रकाश्यते।

संस्करणे उपयुक्ता मातृकाः

C D N इत्येवं संकेतितानां तिसृणां मातृकाणां विषयेऽनुपदमेवोक्तमस्माभिः। चतस्रश्च सरस्वतीभवनस्था मातृकाः SA SB SC SD इत्येवं संकेतिताः। तासां परिचयोऽत्र प्रदीयते—

SA — २३९३१ संख्याका, १-८५ पत्रात्मिका केवलं छिन्नमस्ताखण्डस्यैषा मातृका १०.८″×४.१″ आकारं बिभर्ति। अत्र प्रतिपृष्ठमष्टौ पङ्क्तयः, प्रतिपङ्क्ति ३६ अक्षराणि सन्ति। देवनागरीलिपिमयी तूलपत्राधारा सम्पूर्णेयम्। लिपिकालोऽत्र नोट्टङ्कितः।

SB — २३९३६ संख्याका, १-५६ पत्रात्मिका मातृकेयं १३″×४.८″ आकारं धारयति। अत्र प्रतिपृष्ठं १० पङ्क्तयः, प्रतिपङ्क्ति च ५० अक्षराणि वर्तन्ते। देवनागरीलिपिमयी तूलपत्राधारा सम्पूर्णेयमपि मातृका लिपिकालशून्या। छिन्नमस्ताखण्डस्यैव मातृकेयं **तारासूक्तनाम्ना** विवृता मुद्रिते सूचीग्रन्थे।

SC — २४५२७ संख्याका, १-७८ पत्रात्मिका केवलं छिन्नमस्ताखण्डस्यैवेयमपि मातृका ९.८″×४.३″ आकारं धत्ते। अत्र प्रतिपृष्ठं ७ पङ्क्तयः, प्रतिपङ्क्ति ३६ अक्षराणि सन्ति। देवनागरीलिपिका तूलपत्राधारा सम्पूर्णेयं मातृका १८२१ वैक्रमे वत्सरे, १६८६ शालिवाहनशके लिपीकृता वाराणस्याम्[1]।

---

१ अत्र मातृकासमाप्तौ—"मन्मथनामसंवत्सरे चैत्रकृष्णे पञ्चम्यां भौमवासरे तद्दिने अगस्तीत्युपनाम्ना रामात्मजेन यादवेनेदं पुस्तकं लिखितं स्वार्थं परोपकारार्थं च। शुभं भवतु" इति, तत्र परं भिन्नाक्षरेषु—अगहन कृष्णपक्ष तिथि ७ वार मंगर गीरधारीलाल शहर बनारस बाग वरीयार सीध पीअरी" इति च दृश्यते।

SD — ६७१३९ (२०/१९९) संख्याकेयं मातृका खण्डचतुष्टयात्मकस्य सम्पूर्णस्य ग्रन्थस्य । अत्र १-४८, २, ४९-६२; १-५०; १-३१, ३६-५५; १—१०७+२, १—२+४ पत्राणि सन्ति । १३.५″×५″ इत्याकारवतीयम् । अत्र प्रतिपृष्ठं १० पङ्क्तयः, प्रतिपङ्क्ति च ४३ अक्षराणि सन्ति । लिपिरस्या मातृकाया मैथिली वर्तते । तूलपत्राधारेयं मातृका १९५४ वैक्रमे वत्सरे तीरमुक्तदेशे वागमतीतटे पुरुषोत्तमपुर्यां लिपीकृता । अत्र तृतीयः खण्डोऽपूर्णो विद्यते । ग्रन्थस्य विस्तृता विषयानुक्रमणी वर्ततेऽत्र ।

अत्र SA SC इत्यनयोर्मातृकयोरतीव साम्यं वर्तते । SD संकेतिता च मातृका न केवलं नकेषु स्थलेष्वशुद्धीः परिमार्जयति, किन्तु वैशिष्ट्यमन्यदपि विद्यतेऽस्याः । अत्र हि चतुर्थः खण्डो द्वितीयत्वेन द्वितीयश्च खण्डश्चतुर्थत्वेन स्थापितः[२] । किन्तु मूलग्रन्थविरुद्धमेतत् । अत्र हि—“ अनादिकाल्या रचितं तारारूपं द्वितीयकम् । तृतीयं सुन्दरीरूपं चतुर्थी छिन्नमस्तका ॥ ” (I १.१५) इति स एव क्रमः प्रतिपाद्यते, येन हि ग्रन्थोऽयं प्रकाशितः । तर्हि किमस्य व्युत्क्रमस्य कारणम् ? अत्रैवं प्रतिभाति—तारासूक्तं[३] षट्शाम्भवरहस्यं संमोहनतन्त्रं चास्यैव तंन्त्रस्य भागविशेषा इति यथावसरं सप्रमाणं प्रतिपादयिष्यते । SB संकेतिता मातृका तारासूक्तनाम्ना विवृतेत्यधुनैवोक्तम् । तारासूक्तनाम्नैवापराऽप्येका मातृका सरस्वतीभवनपुस्तकालये विद्यते केवलमेकादशपटलमात्रस्य मैथिलीलिपिलिखिता[४] । अत्रापि चतुर्थः खण्डो द्वितीयत्वेन स्थाप्यते । श्रीमता हरप्रसादशास्त्रिणा स्थलद्वये[५] संमोहनतन्त्रं विवृतम् । संमोहनतन्त्रमेतत् शक्तिसंगमस्य चतुर्थात् खण्डादभिन्नमेव । किन्तु तत्रत्यायां पुष्पिकायामपि ‘ द्वितीयखण्डे ’ इत्येव दृश्यते । अत्र शक्तिसंगमतन्त्रस्य संमोहनतन्त्रस्य च कश्चन संबन्धोऽस्मिन् व्युत्क्रमे कारणं स्यात् ।

तन्त्रस्यास्याखिलभारतीयं विस्तारं ज्ञापयितुं पूर्वतनसम्पादकमहोदयैः प्रथमखण्डप्रस्तावनायां शक्तिसंगमतन्त्रस्य नैकासां मातृकाणां विवरणं प्रकाशितानां ग्रन्थसूचीनामाधारेण समुपस्थापितम् । तत्र सूचीनामप्रकाशनाद् वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवनग्रन्थालयस्थानां मातृकाणां परिचयस्तत्र न दृश्यते । अत्र चतुर्णामपि खण्डानां बहवो हस्तलेखा उपरि विवृतेभ्यो भिन्ना अपि शक्तिसंगमतन्त्रनाम्ना, तारासूक्तनाम्ना, षट्शाम्भवरहस्यनाम्ना वा सुरक्षिताः सन्ति । तेषामत्र संक्षिप्तः परिचयः समुपस्थाप्यते[६] ।

---

२ “ समाप्तोऽयं द्वितीयः खण्डः । शुभं भवतु । संवत् १९५४ चैत्रकृष्णतृतीयायां गुरुवारसमन्वितः । शक्तिसंगमनामाख्यं गोवर्धनलिपीकृतम् । तीरभुक्तदेशे वागमतीतटे पुरुषोत्तमपुरनगर्याम् ” इति हि तत्रत्या पुष्पिका । ताराखण्डसमाप्तौ चैवं दृश्यते—“ इति चतुर्थः खण्डो ग्रन्थश्च । शाके खपञ्चवस्वेके द्वितीये श्रावणे सिते । तृतीयायां शनौ स्वार्थं लिखनं च समापितम् ॥ गणनाथेन सद्वृत्त्या श्रोत्रियेण सुमन्त्रिणा । पालीवंशावतंसेन मैथिलेन द्विजन्मना ” इति ।

३ शक्तिसंगमोद्धृतग्रन्थपरीक्षायां प्रवृत्तैरस्माभिः सरस्वतीभवनपुस्तकालये षट्शाम्भवरहस्यस्य मातृकाद्वयं दृष्टम् । उभे अप्येते मातृके तृतीयखण्डस्य विद्येते । अनुपदमेवैते विव्रियेते ।

४ गणनाथेन १८४७ शकसंवत्सरे काश्यां लिखितैषा मातृका । अस्यापि विवरणमनुपदमेव प्रदीयते ।

५ नेपालदरबारपुस्तकालयसूचीपत्रे (भा. II, पृ. १८३) कालिकातातो मुद्रिते संस्कृतग्रन्थविवरणे च (भा. I, पृ. ४००) विवृतमेतत् । राजेन्द्रलालमित्रकृते संस्कृतग्रन्थविवरणे (भा. I, पृ. ३७१) तु भिन्नमेव संमोहनतन्त्रं विवृतम् । सरस्वतीभवनपुस्तकालये स्थितं च ९५१५९ (३०/३७) संख्याकं संमोहनतन्त्रं तस्मादपि भिन्नम् ।

६ मेधादीक्षा–क्रमदीक्षाप्रभृतीनामत्रत्यानामवान्तरप्रकरणानामपि बहवो हस्तलेखा अत्र सन्ति । विस्तरभयात्ते नात्र विवृताः ।

शक्तिसंगमतन्त्रस्य सरस्वतीभवनस्था मातृकाः

क्रमाङ्कः	मातृकासंख्या	पत्रसंख्या	लिपिः	लिपिकालः	विवरणम्
१	२३९२२	१–१२७,१२९–१८१	देवनागरी		द्वितीयः खण्डः
२	२३९३०	१–९९	,,	सं. १७८४	प्रथमः खण्डः
३	२४५२५	१–३१, ३१–७८	,,		तृतीयः खण्डः
४	२४५२६	१–३२, ३२, ३२, ३२-३५	,,	सं. १७८८	प्रथमः खण्डः
५	२४५३६	१–६३	,,		प्रथमः खण्डः
६	२४६५८	१–४०	,,		तृतीय खण्डः (षट्शाम्भवरहस्यम्)
७	२४९२७	१–५१, ५३–१०३	,,		द्वितीयः खण्डः
८	२४९७८	१–६९	,,		षट्शाम्भवरहस्यम्
९	२६००९	१–६	,,		प्रथमः खण्डः
१०	२६१९१	१–२४=२५, २६-६८	,,		प्रथमः स्वण्डः
११	५५६९२(१३/८०)	१–७७	,,	सं. १८५१	तृतीयः खण्डः
१२	६१६०५(०/९२)	१–१८१	,,		द्वितीयः खण्डः
१३	६१६०६(०/९१)	१–५४	,,	सं. १७८८	प्रथमः स्वण्डः
१४	६१६१३(०/९७)	१-६१	,,		द्वितीय स्वण्डः
१५	६२०६६(४/१८५)	१–५२	,,		प्रथमः खण्डः
१६	६७१५७ (झ) (२१/२)	१–४	मैथिली	श. १८४७	तारासूक्तम् (एकादशपटलमात्रम्)
१७	७२१०९(४/१३२)	१–१६२	देवनागरी		द्वितीयः पटलः
१८	९५९०५(१८/२५)	१–७२	,,		षट्शाम्भवरहस्यम्

शक्तिसंगमतन्त्रावतारः

ग्रन्थारम्भे शक्तिसंगमतन्त्रावतारं प्रार्थयन्त्या देव्या उच्यते यद् हे देवाधिदेव शङ्कर ! लक्षकोट्यर्बुदानि तन्त्राणि, तन्त्रार्णवादिकम्, तन्त्रराजः, रसायनम्, विविधाः सिद्धयश्च मया श्रुतानि । मन्त्रसिद्ध्यभिधागमे चतुःखण्डेन संयुक्तं शक्तिसंगमतन्त्रं यत् त्वया सूचितं तदेवाधुना मे वद इति । भगवान् शिवो वदति यन्मया खण्डाष्टकसमुज्ज्वलस्तन्त्रराजः पूर्वमुक्तः । पूर्वार्धोत्तरार्धरूपेण स भिद्यते । पूर्वार्धः कादिसंज्ञः, उत्तरार्धश्च हादिसंज्ञो भवति । कादौ हादौ च प्रत्येकं खण्डचतुष्टयं वर्तते । प्रत्येकस्मिन् खण्डे षट्त्रिंशत्पटलान्यध्याया वा, प्रतिपटलं च शतं श्लोका भवन्ति । आहत्य प्रतिखण्डं ३६०० श्लोका विराजन्ते[७] ।

७ कलिकातातः प्रकाशिते मनोरमाख्यव्याख्यासहिते कादिमतापरनामतन्त्रराजतन्त्रे षट्त्रिंशत्पटलानि प्रतिपटलं च शतं श्लोकाः सन्ति । आहत्य ३६०० श्लोकात्मकोऽयं ग्रन्थः षोडशनित्यानां प्रतिपादकः ।

एवं परिमाणा अष्टौ खण्डास्तत्र भवन्ति षष्टिसाहस्रिकं[८] बृहत्तन्त्रराजाख्यया प्रसिद्धं शक्तिसंगमतन्त्रं चात्र राजते, यत्र काली-तारा-सुन्दरी-छिन्नमस्ताख्याश्चत्वारः खण्डाः सन्ति। ६७२ वत्सरान्ते दिव्यौघद्वारतो बौद्धपाषण्डनाशार्थं सम्प्रदायस्थापनार्थं चास्याविर्भावो भवतीति[९]।

प्रकरणस्यास्यायमभिप्रायः प्रतीयते यत् पूर्वार्धोत्तरार्धभिन्नं खण्डाष्टकान्वितं तन्त्रराजतन्त्रम्, षष्टिसाहस्रिकं बृहत्तन्त्रराजाख्यया प्रसिद्धं शक्तिसंगमं च संक्षिप्य नूतनस्य शक्तिसंगमस्यावतारोऽधुना क्रियत इति। अत एवाग्रे (I २. ९७-१००) तन्त्रराजद्वयं स्मर्यते। प्रथमं तन्त्रराजमेवात्र खण्डाष्टकसमन्वितं नि[१०]त्याषोडशतन्त्राख्ययाऽभिधीयते, यस्य हि पूर्वार्धोत्तरार्धे कादिहादिमतत्वेन प्रसिद्धे, मिलित्वा तु यद् विरा[११]ड्मतनाम्ना प्रख्यायते। अपरं च कहात्मकं चतुःखण्डसमायुक्तं पञ्चाशदध्यायैर्युक्तं षट्कपञ्चकसंयुतं च शक्तिसंगमनाम्ना प्रसिद्धम्। द्वितीये खण्डेऽपि—"नित्याश्लिष्टं कादिमतं परिभाषामयं महत्। शक्तिसंगमनामानं महाकादिमतं शिवे॥" (१.१३९) इत्येवमुपर्युक्ते द्वे अपि तन्त्रे स्मर्येते। अग्रेऽपि (II ५८. ७८-७९) प्रथमस्तन्त्रराजः कादिमतनाम्ना स्मृतः। तृतीये खण्डेऽपि—"शक्तिसंगमतन्त्रादौ मेरुस्थाने च सूचितम्" (१०.१) इत्यत्र प्राचीनं शक्तिसंगमतन्त्रं सूच्यते। चतुःखण्डसमायुक्ते शक्तिसंगमे तन्त्रे, शाम्भवे, सिद्धमतकेऽपि च यन्नोक्तं तदत्र प्रतिपाद्यते (I ५.९९-१००) इत्युक्त्याऽपि प्राचीनात् शक्तिसंगमतन्त्रादस्य पृथक्त्वं संसिध्यति।

अत्र—"तारासूक्ते प्रकाशिताः" (I ६.१४४), "तारासूक्ते प्रकाशितः" (I ८.८८) इति, "सूक्ते पूर्वं प्रकीर्तितम्" (II १.१२२), "सूक्ते संकलितं देवि" (II १.२६) इति च वचनैस्तारासूक्तापरनामधेयस्य छिन्नमस्ताख्यस्य खण्डस्य स्थितिः प्रथमद्वितीयखण्डाभ्यां प्राङ् निश्चीयते। "तृतीयखण्डे देवेशि सर्वमेतत्प्रकीर्तितम्" (I ६. १०७) इत्यनेन वचनेन तृतीयखण्डस्यापि प्रथमखण्डात् प्राक् स्थितिः

---

८ सम्पादकमहोदयेन षष्टिसाहस्रिक (I १.१४) शब्दः प्रश्नचिह्नाङ्कितः, किन्तु सरस्वतीभवनस्थिततृतीयखण्डमातृका (२४९७८) पुष्पिकासु 'षष्टिसहस्रे शक्तिसंगमे' इत्येवं दर्शनात् प्राचीनं शक्तिसंगमतन्त्रं षष्टिसहस्रश्लोकात्मकमासीदिति, "दिव्यौघरचितो ग्रन्थो गुरुद्वारो भविष्यति (I १. १३) इत्युक्त्या च गुरुपरम्परायां तस्य प्रचार आसीदिति च निश्चीयते।

९ चतुर्थे खण्डे (८. ६०-११५) बौद्धोत्सादनकार्यार्थं द्विव्यौघद्वारतो मर्त्यरूपधृक् शङ्करोऽवतीर्ण इति वर्ण्यते। उभयोरनयोर्वर्णनयोस्तुलनया शङ्करावतारकालो बृहत्तन्त्रराजापरनामप्राचीनशक्तिसंगमावतारकालश्च समान एवेति निश्चेतुं शक्यते।

१० अष्टपटलात्मको ग्रन्थः सेतुबन्धाख्यया व्याख्यया समलङ्कृत्य नित्याषोडशिकार्णवतन्त्रनाम्ना भास्कररायेण ख्यापितः पुण्यपत्तनीयआनन्दाश्रममुद्रणालयतः प्रकाशित उपलभ्यते। ग्रन्थसूचीषु कादिमतापरनामतन्त्रराजतन्त्रमेव नित्याषोडशतन्त्रनाम्ना विक्रियते। ऋजुविमर्शिनीकारशिवानन्देन तु—"मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः" (पृ. ३) इत्येवं पञ्चपटलात्मकं वामकेश्वरतन्त्रं वामकेश्वरीमतनाम्ना जयरथटीकया सह काश्मीरग्रन्थमालायां मुद्रितं नित्याषोडशिकार्णवनाम्ना ख्यापितम्। तन्त्रमेतद् बहुरूपाष्टकशास्त्रसारभूतमित्यर्थरत्नावलीकारो विद्यानन्दो (पृ. ४) वदति। बहुरूपाष्टकतन्त्राणि तन्त्रालोकविवेक (पृ. ४२-४३) धृतश्रीकण्ठ्यां संहितायां निर्दिष्टानि। बहुरूपाष्टकशास्त्रेणानेन खण्डाष्टकसमन्वितस्य नित्याषोडशतन्त्रस्य कश्चन संबन्धो वर्तते न वेति साम्प्रतं को नाम जानीयात्?

११ महाकादिमतनाम्नाऽप्ययं वर्ण्यते (II १.१३९; IV ७.७३)। एवं चात्रत्यो विराड्मतशब्दो महाकादिमतस्यैव पर्यायः। त्रिविधषट्कर्मप्रदर्शनावसरे (I ८. १०२-१०९) विरूपाक्षमतं विराण्मतं चोट्टङ्कितम्। अत्र द्वितीयं मतं शक्तिसंगमसंमतमिति वक्तुं शक्यते।

सिद्ध्यति । एवमेव—" वेधः पञ्चविधो देवि पूर्वमेव प्रकाशितः " (I ६.१०१) इत्यनेन द्वितीयखण्डस्य प्रथमखण्डात् प्राक् स्थितिर्निश्चीयते, यत्र हि (II ३४.११) पञ्चविधो वेधः प्रकाश्यते । चतुर्थे खण्डे च दृश्यते—" देशद्वयव्यवस्था तु पूर्वतन्त्रे प्रकीर्तिता " (IV २. ३२) इति । एषा च देशव्यवस्था तृतीये खण्डे व्याख्याता दृश्यते । एवं च चतुर्थे खण्डे तृतीयखण्डस्य स्मरणात् सर्वप्रथमं तृतीयखण्डस्य, ततः प्रथमद्वितीयखण्डयोश्चतुर्थखण्डस्य स्मरणाच्चतुर्थस्य, प्रथमे च खण्डे द्वितीयखण्डविषयसूचनात् ततो द्वितीय-खण्डस्य, सर्वान्ते च प्रथमखण्डस्याविर्भावः समजायत – इति यद्यपि पाश्चात्यपद्धत्या साधयितुं शक्यते, तथापि—" श्रीदेव्युवाचेत्यस्य विमर्शांशेन स्वात्मानं पृच्छतीत्यर्थः । श्रीभैरव उवाचेत्यस्यापि प्रकाशांशेन स्वात्मानमुत्तरयतीत्यर्थः । प्रकृते लिटा कथितं भूतत्वं तु वक्तव्यस्य सदातनत्वात् । अत एव तन्त्रराजे उत्तरपटलेषु वक्ष्यमाणोऽप्यर्थः पूर्वपटलेषु प्रोक्त इति भूतार्थकपदेनैव तत्र तत्र निर्दिश्यते " इति [१२]भास्कररायधृतपद्धत्या यथास्थितेनैव क्रमेण ग्रन्थस्याविर्भावः समभूदित्यङ्गीकर्तव्यम्, ग्रन्थारम्भे तथैव प्रतिपादनात् । एतच्चानुपदमेवास्माभिः प्रदर्शितम् । अनेनापि बृहत्तन्त्रराजाख्यस्य षष्टिसाहस्रिकस्य वेदखण्डसमायुक्तस्य शक्तिसंगमाख्यस्य तन्त्रस्य दिव्यौघरचितस्य गुरुद्वारकमुपस्थितिस्तदा सूच्यते, यदा हि संक्षिप्तस्यास्य शक्तिसंगमतन्त्रस्यावतारः समजायत ।

शक्तिसंगमतन्त्रस्य वैशिष्ट्यम्

" शक्तिसंगमयोस्तन्त्रं तत्र संक्षेपतो मतम् " (I ६०.३०) इत्यत्रास्य स्वरूपं वैशिष्ट्यं च प्रतिपाद्यते । शाम्भवे, सिद्धमतकेऽपि च यन्नोक्तं तदत्र चतुःखण्डयुते शक्तिसंगमे तन्त्रे प्रतिपादितम् (I ५.९९-१००); शक्तिन्यास–चक्रन्यासयोरन्यत्र भिन्नता वर्ण्यते, शक्तिसंगमतन्त्रे तु सर्वमेकमेव (I ११.२६-२७); शक्तिसंगमोक्ता दीक्षा शाम्भवाख्याभिधीयते (II ८.१०) इत्येवं ग्रन्थस्यास्य वैशिष्ट्यं तत्र तत्र स्वयमेव ख्यापितं भगवता । श्रीशिवपार्वतीसंवादरूपे, पटलसमाप्तिपुष्पिकानुसारं क्वचित् श्रीमदक्षोभ्यमहोग्रतारासंवादरूपे, श्रीमदक्षोभ्यतारासंवादरूपे, कालकालिसंवादरूपे वैतस्मिन् तन्त्रे प्राधान्येन प्रष्ट्री भगवती समाधाता च भगवान् शिवो वर्तते, किन्तु क्वचिद् विपर्यासोऽपि दृश्यते । यथा ताराखण्डारम्भेऽन्यत्रापि च यत्र क्वचन आदिनाथः प्रष्टा उपदेष्ट्री च श्रीकाली विराजते । [१३]शिवोपदिष्टानि तन्त्राण्यागमपदेन, शक्त्युपदिष्टानि च निगमपदेन प्रख्यायन्ते । अत एव कुलचूडामणिर्निगमपदेन विशेषितः । किन्तु प्राचीनेषु क्रमागमेषु नैष विभागोऽनुसृतः । तत्र शक्त्युपदिष्टा अपि क्रमशास्त्रग्रन्था आगमपदेनैव परिचीयन्ते । वाराहीतन्त्रोक्तो विभागः शक्तिसंगमतन्त्रेऽपि नाङ्गीकृतः । अत्र हि निगमागमशब्दयोः पर्यायत्वेन प्रयोगो दृश्यते । एतच्चागमसंख्याविवरणावसरे प्रदर्शयिष्यते ।

प्रायोऽशीतिसंख्याकानां ग्रन्थानां सार्धशताधिकसम्प्रदाय-मत-क्रम-मार्गादीनां च परिचायकस्य अस्य ग्रन्थस्य वैशिष्ट्यमङ्गीकर्तव्यमेव । [१४]प्राचीनेषु तन्त्रेषु नास्य परिगणनं स्मरणं वेत्येतावता नास्य महत्त्वं

१२ पुण्यपत्तनीय-आनन्दाश्रमग्रन्थमालायां प्रकाशिते नित्याषोडशिकार्णवसेतुबन्धे (१.१३) वचनमेतद् द्रष्टव्यम् ।

१३ " आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे । मतं च वासुदेवस्य तस्मादागमनुच्यते ॥ निर्गतं गिरिजावक्त्राद् गतं च गिरिशश्रुतौ । मतं च वासुदेवस्य तस्मान्निगमुच्यते ॥ " इति वचनमेतत् श्रीमच्चिन्ताहरणचक्रवर्तिकृतौ ' दी तन्त्राज़ः स्टडीज ऑन देयर रिलीजन एण्ड लिटरेचर ' (पृ. २ टि.) इत्यत्रोद्धृतं द्रष्टव्यम् ।

१४ ' प्राचीनार्वाचीनविभागः ' इति शीर्षके प्रकरणे विषयोऽयं द्रष्टव्यः ।

हीयते । अन्यत्रानुपलब्धानामनेकेषां ग्रन्थनाम्नां तद्विषयाणां लुप्तप्रायाणामनेकेषां सम्प्रदायानामाचार्याणां च विशिष्टानां मतानामत्र समुपलम्भाद् ग्रन्थोऽयं तान्त्रिकविश्वकोशस्य महिमानं धत्ते। "पूर्वमेव प्रकाशितः" (I ६.१०१), "पूर्वमेव मयेरितान्" (I ६.१०६), "पूर्वमेव प्रकाशिताः" (I ८.२), "पुरोदिताः" (IV १०.६९) इत्यादिनाऽपि प्राचीनेषु ग्रन्थेषु प्रतिपादिता विषयाः पुनरत्र स्मार्यन्ते प्रतिपाद्यन्ते वेति सूच्यते। एवमेव [15]केचित्पदेनाप्यत्र मतान्तराणामुल्लेखो विहितः।

अस्मादेव वैशिष्ट्यादयं न कस्याप्येकस्य सम्प्रदायस्य ग्रन्थ इति वक्तुं शक्यते। अत्र हि प्रायः सर्वेष्वेव प्रकरणेषु विभिन्नेषु सम्प्रदायेषु कृतपदानां सूक्ष्मतमानां विषयाणां विश्लेषणं दरीदृश्यते। यद्यपि पटलसमाप्तिपुष्पिकासु विषयनिर्देशोऽपि विद्यते, किन्तु तद्भिन्नानामपि नैकेषां विषयाणां तत्र वर्णनं समस्ति। त एव विषयाः पटलान्तरेषु खण्डान्तरेषु च प्रतिपादिताः। प्रसङ्गेऽस्मिन् "पुनरुक्तिर्न मन्तव्या विद्याभेदाद्विशेषता" (I ५.१०१) इत्युक्तिरवश्यमेव स्मृतिपदवीमानेतव्या। एवमेव "शून्यं कृष्णस्वरूपकम्" (I २.४२), "साधना शवमुण्डस्य सिंहासनमितीरितम्" (II ११.४६), "गले पादस्य निक्षेपः सिंहासनमितीरितम्" (II १४.१६) "केवलं मन्त्रजापस्तु नाम इत्यभिधीयते" (II ४६ ४३), इत्यादीनां केषाञ्चन शब्दानां पारिभाषिकोऽर्थो व्यक्तीकृतो दृश्यते, यो हि प्रायोऽन्यत्र दुर्लभ [16]एव।

ग्रन्थेऽस्मिन् प्रश्नवाक्येषु विशिष्टा शैली स्वीकृता। प्रायो हि तन्त्रान्तरेषु प्रश्नवाक्ये जिज्ञासितस्य विषयस्य स्पष्ट उल्लेखो भवति। अत्र तु "देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम्" इत्येवं प्रायः सर्वत्र रहस्यात्मक एव प्रश्नः समुपस्थाप्यते, स्वेच्छया समाधीयते चैव भगवता शिवेन।

प्राचीनेषु तन्त्रेषु यथा दार्शनिका विचारा योगशास्त्रीयाश्च प्रक्रिया विस्तरेण प्रतिपाद्यन्ते, न तथा नवीनेषु तेषु। तन्त्रस्यास्य आविर्भावकालोऽर्वाचीन इति कृत्वा सैव स्थितिरत्राप्यवलोक्यते। चतुर्थखण्डसमाप्तौ षण्ढानां वन्ध्यानामपस्मारब्रह्मराक्षसादीनां च वर्णनमप्रासङ्गिकमिव प्रतीयते, किन्तु ततः प्राग् द्विविधशाबरमन्त्रप्रतिपादनानन्तरम्—"तेन शाबरमन्त्रेण सर्वदोषान् निवारयेत्" (११.९५) इत्युक्तेः के के दोषा शाबरमन्त्रप्रभावेण परिहृता भवन्तीति विषयस्यास्य प्रतिपादनमुखेनैव तेषां दोषाणां वर्णनमत्र कृतमिति मन्तव्यम्।

ग्रन्थस्य समाप्तौ "इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि" (IV ११.१०६) इति वाक्यं वर्तते। साकाङ्क्षमेतद् वाक्यम्, न ग्रन्थसमाप्तिद्योतकम्। सर्वासामभीष्टानां शङ्कानां समाधाने जाते हि तन्त्रसमाप्तौ देवी प्रसन्ना सती स्वकीयं सन्तोषमभिव्यनक्ति। यथा विज्ञानभैरवसमाप्तौ—"देवदेव महादेव परितृप्तास्मि शङ्कर॥ रुद्रयामलतन्त्रस्य सारमद्यावधारितम्। सर्वशक्तिप्रभेदानां हृदयं ज्ञातमद्य च॥

---

१५ सूर्यग्रहणविषयकवेधविचारे (II १४.३९), सूर्यग्रहणसमये भोजनकालनिर्णयावसरे (II १४.४४), नित्याप्रकरणेऽक्षरोदयविचारे (III ३.४१), मन्त्रध्यानप्रकरणे (III ३.१४२), पुरश्चरणविचारे (III ३.६८; ६.१६), मन्त्रपीठपूजनप्रकरणे (III ११.१४३) च केचित्पदेन मतान्तराणि प्रदर्श्यन्ते।

१६ ग्रन्थस्यास्य वैशिष्ट्यमन्ते स्थापितेन परिशिष्टत्रयावलोकनेन ज्ञायेत। तत्र हि ग्रन्थानां मतमतान्तराणां विशिष्टानां विषयाणां च चतुर्ष्वपि खण्डेषु प्रतिपादितानां स्थानानि सूचितानि। विशिष्टानां केषाञ्चन शब्दानामपि तृतीये परिशिष्टे समावेशः कृतः।

इत्युक्त्वाऽऽनन्दिता देवी कण्ठे लग्ना शिवस्य तु ॥ " इति अत्र तु तथा न दृश्यते । एवमेव "प्रोक्तः स्पर्शः किमिच्छसि ", " इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ", " ...कथिता किमन्यच्छ्रोतुमिच्छसि " इत्यादीनि प्रथम–द्वितीय–तृतीयखण्डसमाप्तिवाक्यान्यपि साकाङ्क्षाण्येव । एतच्च शक्तिसंगमतन्त्रानन्तरमन्यस्यापि तदनुस्यूतस्य तन्त्रस्यावतारः समजायतेत्यस्य सूचकमिति वयं तर्कयामः ।

अत्रेदं बोध्यम्—तन्त्रग्रन्थानां पटलाध्यायादिसमाप्तिस्थेषु पुष्पिकावाक्येषु अतीव वैविध्यं दरीदृश्यते, विशेषणवाक्यानि च तत्र नानाविधानि संयोज्यन्ते । तेषामर्थावबोधः संगतिश्चात्यन्तं दुरूहौ प्रतीयेते । अत्रोदाहरणरूपेण शक्तिसंगमतन्त्रस्य मुद्रितपुस्तकमेवावलोक्यताम् । अत्र हि प्रथमे खण्डे श्रीशक्तिसंगममहातन्त्रराजे उत्तरभागे प्रथमखण्डे (उत्तरखण्डे प्रथमभागे) श्रीमदक्षोभ्यमहोग्रतारासंवादे, श्रीमदक्षोभ्यतारासंवादे वेति वाक्यं प्रायः सर्वत्र दृश्यते । वाक्यमेतत् क्वचिद् उत्तरकेरले, षट्शाम्भवे, तारासूक्ते, सिद्धितन्त्रे इति विशेषणैः संयोज्यन्ते । चतुर्थे खण्डे च तारासोपाने, तारासूक्ते इति विशेषणे दृश्येते । कलिकातास्थ–एशियाटिकसोसाइटीसूची[१७]ग्रन्थे वर्ण्यते यत् प्रथमखण्डस्य द्वादश–चतुर्दशपटलयोः, द्वितीयखण्डस्य २५, ४०, ५१, ५२, ५३ पटलानाम्, चतुर्थखण्डस्य च ४-१० पटलानां पुष्पिकावाक्येषु [१८]तारासूक्तमिति विशेषणं दृश्यते । एवमेव सरस्वतीभवनस्थासु तृतीयखण्डमातृकासु श्रीषट्शाम्भवे, श्रीषट्शाम्भवरहस्ये, कालिकालसंवादेऽथवा शिवपार्वतीसंवादे, उद्दण्डभैरवीये, षष्टिसहस्रे, शक्तिसंगमे इत्यादीनि विशेषणानि संयोजितान्यवलोक्यन्ते । चतुर्थखण्डीयसरस्वतीभवनस्थयोर्मातृकयोर्द्वयोः ६७१३९ (२०/१९९), ६७१५.७(झ) (२१/२) इति संख्याकयोः खण्डसमाप्तौ ' समाप्तोऽयं द्वितीयः खण्डः ' इति दृश्यते । संमोहनतन्त्रमातृकयोरपि " इति श्रीमदक्षोभ्यमहोग्रतारासंवादे संमोहनतन्त्रे द्वितीयखण्डे ब्रह्मजातिवर्णने दशमः पटलः " इत्येवंविधायां पुष्पिकायां द्वितीयखण्डसमाप्तिरेव सूच्यते । एवमेतेषां पुष्पिकावाक्यानां व्यत्यासादेक एव ग्रन्थो नामचतुष्टयं धत्ते, विशेषणानां च केषाञ्चन नाभिप्रायः स्पष्टीभवति । एवमेव मतोत्तरनामा ग्रन्थः पुष्पिकाव्यत्यासादेव गोरक्षसंहितानाम्नाऽपि प्रसिध्यति प्र[१९]काश्यते च । नेपालमातृकासु हि " श्रीमतोत्तरमहामन्थाने श्रीमतोत्तरे श्रीकण्ठनाथावतारिते चन्द्रद्वीपनिर्गते विद्यापीठे योगिनीगुह्ये कुमारिकाखण्डे श्रीमतसारगर्भनिर्णये श्रीचतुर्विंशतिसाहस्रसंहितायां सारसमुच्चये श्रीमतोत्तरे " इत्येवंविधानि पुष्पिकावाक्यानि समवलोक्यन्ते, गोरक्षसंहितानाम्ना मुद्रिते पुस्तके तु " इति श्रीमहामन्थानविनिर्गते सप्तकोट्यर्बुदे स्वच्छन्दशक्त्यावतारिते गोरक्षसंहितायां शतसाहस्रमतान्तर्गतश्रीमतोत्तरखण्डे कादिभेदे कुलकौलिनीमते नवकोट्यवतारभेदे श्रीकण्ठनाथावतारिते विद्यापीठे योगिनीगुह्ये " इति । एवंविधैः पुष्पिकावाक्यैर्नानाविधाः प्रश्नाः सूचनाश्च समुपस्थाप्यन्ते । तेषां निर्णयोऽतीव प्रयत्नसापेक्षस्तथापि तन्त्रवाङ्मयेतिहासविदां महते उपकाराय स्यादित्येतावदेवोक्त्वा साम्प्रतं विरम्यते ।

---

१७ तन्त्रग्रन्थसूची, भा. VIII, ख. १, पृ. १४१, १९३९ ई. संस्करणे ।

१८ सरस्वतीभवने शक्तिसंगमतन्त्रचतुर्थखण्डस्य मातृकाद्वयं तारासूक्तनाम्नैव स्थापितम् । तच्च पूर्वं विवृतमेव । इतो भिन्ने अपि द्वे मातृके तारासूक्तनाम्नैव तत्र दृश्येते । ते च उग्रतारास्तोत्रस्य स्त इति ।

१९ सरस्वतीभवनग्रन्थमालायां गोरक्षसंहितानाम्ना ई. १९७६ वर्षे प्रकाशितः ११० संख्याङ्कितो ग्रन्थो मतोत्तरादभिन्न इति वक्ष्यतेऽस्माभिर्ग्रन्थविवरणे ।

शक्तिसंगमतन्त्रस्यावतारकालो देशश्च

"शङ्करोत्पत्तितो देवि महाकलियुगे शिवे। वर्षसाहस्रकस्यान्ते त्रिंशद्वर्षोत्तरं शिवे॥ तन्त्रस्यास्य महेशानि प्रकाशोऽत्र भविष्यति।" (IV ८. २१७-२१८) इत्येवमत्र तन्त्रस्यास्य प्रकाशकालः प्रदर्श्यते। भगवत्पादस्य शङ्कराचार्यस्य उत्पत्तिश्च एवमत्र वर्णिता—'षट्शतीवत्सरान्ते तु द्विसप्तत्युत्तरं शिवे। आविर्भवति देवेशि दिव्यौघद्वारतः शिवे। बौद्धपाषण्डनाशार्थं सम्प्रदायार्थमेव च।" (I १.१६-१७) इति। शङ्कराचार्योत्पत्तिरेवात्र वर्णितेति यद्यपि स्पष्टतया नात्र प्रतीयते, किन्तु चतुर्थखण्डीयशङ्करोत्पत्तिप्रकरणस्य तुलनया सैवात्र वर्णितेति निश्चीयते। अत्र वैक्रमः संवत्सरो यदि गृह्येत, तर्हि ६७२ वर्षेषु व्यतीतेषु शङ्कराचार्यस्योत्पत्तिः स्वीकर्तव्या। ततश्च १०३० वर्षानन्तरमस्य तन्त्रस्य प्रकाशः समजायत, अर्थादस्य तन्त्रस्याविर्भावः १७०२ वैक्रमवत्सरेषु व्यतीतेषु समभूत्। तदनुसारं १६४५ ई. वर्षे तन्त्रमिदं स्वकीये तन्त्रसारे समुद्धृतम्, अस्मिंश्च तन्त्रे निम्बार्क-रामानन्द-राधावल्लभ-हरिव्यासस्सम्प्रदायानामुल्लेखो वर्तते इति कृत्वा श्रीमता भट्टाचार्यमहोदयेन प्रथमखण्डप्रस्तावनायामस्य तन्त्रस्याविर्भावकालः १५८१ ई. वर्षो निर्धारितः (पृ. v-vii)।

अत्र तैर्गोकुलेशः सम्प्रदायो न समालोचितः। पुष्टिमार्गसंस्थापकानां वल्लभाचार्याणां पौत्रेण गोकुलनाथेन हि सम्प्रदाय एष संस्थापितः। [२०]डॉ० सुरेन्द्रनाथदासगुप्तमहोदया गोकुलनाथस्य स्थितिं १५५४ ई. वर्षतः १६४३ ई. यावन्निर्धारयन्ति। सम्राजो जहांगीरस्य समये (१६०५-१६२७ ई.) तैः स्वकीयः सम्प्रदायः संस्थापित इत्यनुश्रूते। अतश्च १६४५ ई. वर्षे शक्तिसंगमतन्त्रस्याविर्भावः संजात इत्युचितमेव प्रतिभाति। श्रीभट्टाचार्यमहोदयाः कृष्णानन्दस्य आगमवागीशस्य तन्त्रसारकर्तुः समयः १६०७ ई. समीपस्थ इति निर्धारयन्ति। श्री[२१]चिन्ताहरणचक्रवर्तिमहोदयाः प्रतिपादयन्ति यत् कृष्णानन्दश्चैतन्य समकालिकः (१४८५-१५३३ ई.) इत्यनुमीयते, यद्यपि केचन विद्वांसस्तमतीव परवर्तिनं साधयन्तीति। अस्यां स्थितौ कृष्णानन्देन शक्तिसंगमस्थानि वचांस्येवोद्धृतानि चेत् तस्य कालः शक्तिसंगमाविर्भावकालादुपर्युक्तात् पश्चात्तन एव स्वीकर्तव्यः।

"समाप्ते फाल्गुने मासे कृष्णैकादशिका या" (IV ६. २२), "श्रावणे चाष्टमी शुक्ला बुधरोहिणीसंयुता। वज्रयोगे मध्यरात्रौ पूर्णः कृष्णो हरिः स्वयम्॥" (IV ६.६४) इत्यादिभिर्वाक्यैर्जयन्तीप्रकरणे पठितैर्ज्ञायते यत् तन्त्रस्यास्याविर्भावो विन्ध्यदक्षिणवर्तिनि कस्मिंश्चित् प्रदेशे संजात इति। उत्तरे हि भारते फाल्गुनमाससमाप्तौ शुक्लैकादशिका समापतति। एवमेव भाद्रकृष्णाष्टम्यां भगवतः श्रीकृष्णस्य जयन्ती मान्यते।

श्रीमता[२२] चिन्ताहरणचक्रवर्तिमहोदयेन तन्त्राणां कालविषये कर्तृविषये च युक्तियुक्तो विमर्शः समुपस्थापितः। तत्रोद्धृतैः कूर्मभागवत-पराशरपुराणादीनां पाञ्चरात्रप्रामाण्य-आगमप्रामाण्यप्रभृतिग्रन्थानां

---

२० ए हिस्ट्री आफ इण्डियन फिलासफी भा. IV, ३७४ इत्यत्रावलोकनीयमेतत्।

२१ श्रीचक्रवर्तिमहोदयानामुपर्युक्ते ग्रन्थे ६६ पृष्ठे वचनमेतद् द्रष्टव्यम्।

२२ उपर्युक्ते ग्रन्थे 'दी एज एण्ड ऑथरशिप आफ दी तन्त्राज्' इति शीर्षके प्रकरणे (पृ. १९-२८) विचारितमेतत्।

च वचनैर्वैष्णवागमाः शैवागमाश्च मानवकृतय इति सिध्यति, किन्तु वचनेष्वेषु साम्प्रदायित्वारोपं को नाम निवारयेत् । अथवा " न निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम् " इति न्यायेन प्रश्न एष समाधातुं शक्येत । यथाश्रुतग्रहणे हि सुन्दोपसुन्दन्यायेन सर्वेषामप्रामाण्यमेवापतेत । वेदागमपुराणादिशास्त्राणां कालविषये कर्तृविषये च द्विविधा दृष्टिः साम्प्रतं प्रचरति—अपौरुषेयाणि दिव्यानि मुनिभाषितानि वा शास्त्राणीति प्राच्या, सर्वाणि समये समये मानवैरेव निर्मितानीति च प्रतीच्या। कस्मिंश्चिद् विशिष्टे देशे काले च तेषां तेषां शास्त्राणां प्रचारोऽवलोक्यते । दीर्घकालनिरन्तरसत्कारासेवितेनाभ्यासेन शुद्धान्तःकरणानां योगिनां चेतस्सु शब्दब्रह्मवर्त्मना परापश्यन्त्यादिक्रमेण शास्त्राणामवतारो देशकालानुरोधी प्रवर्तत इति तु तन्त्रागमसंमतः पन्थाः । अत एव पर्यायसप्तकप्रकरणे देशपर्याये कालपर्याये च बहूनां तन्त्राणामवतारोऽत्र निरूप्यते । " गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः । प्रश्नोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत् ॥ " इति च प्रतिपाद्यते योगिनीहृदयदीपिकोद्धृते (पृ. २) महास्वच्छन्दवचने । " रौद्रा रुद्रैः शिवाविष्टैरुद्गीर्णा न स्वबुद्धितः " (१.४३) इति मृगेन्द्रागमचर्यापादवचनमप्यत्रावधेयम् ।

श्रीकण्ठ्यां संहितायां नित्याषोडशिकार्णवे सर्वोल्लासतन्त्रोद्धृततोडलोत्तरतन्त्रे च प्रदर्शितासु चतुष्षष्टितन्त्रनामावलीषु न दृश्यते शक्तिसंगमतन्त्रस्य नाम । [23]महासिद्धसारतन्त्रे विष्णुक्रान्ता-रथक्रान्ता-अश्वक्रान्ताभेदेन प्रत्येकं चतुष्षष्टितन्त्राणि परिगणितानि । तत्र रथक्रान्ताविभागेऽस्य नाम दृश्यते । अतोऽनुपदमेव प्रदर्शितः शक्तिसंगमावतारकाल एतदनुगुण एव ।

शक्तिसंगमे खण्डविभागः

काली-तारा-सुन्दरी-छिन्नमस्ताख्याश्चत्वारः खण्डा अत्र सन्ति । एतेषु प्रायः काली-सुन्दरीखण्डयोः, तारा-छिन्नमस्ताखण्डयोश्च न केवलं विषयाः साम्यं भजन्ते, अपि तु तत्प्रतिपादकानां बहूनां श्लोकानामावृत्तिरपि दृश्यते । प्रथमयोः प्राधान्येन सामान्या बाह्यवरिवस्या, अपरयोश्च शाक्ती बाह्यवरिवस्या प्रतिपादिता । अभिनवगुप्तसमुद्धृतेषु ग्रन्थेषु काल्यास्त्रिपुरसुन्दर्याश्च समाराधनविधिरवलोक्यते, तारायाश्छिन्नमस्तायाश्च तत्र क्वापि चर्चा नास्ति । साधनमालाभूमिकायां (पृ. cxxii) विरूपाक्षस्य छिन्नमुण्डासाधननामा ग्रन्थः सूच्यते । साधनमालायां तु न दृश्यते छिन्नमुण्डायाश्छिन्नमस्ताया वा नाम । तारा गुह्यसमाजतन्त्रेऽपि वर्णिता । पद्मान्तक-पार्श्वनाथ-पद्मावती-मञ्जुघोष-वैरोचनाष्टकप्रभृतिशब्दानां विशिष्टं वर्णनं बौद्ध-जैनतन्त्रग्रन्थेषु वर्तते । षड्दर्शनेष्वत्र बौद्धानां जैनानां च समावेशो विहितः । एवं च तान्त्रिकान् सर्वान् सम्प्रदायान् समाहृत्य चतुःखण्डोऽयं ग्रन्थोऽवतारमाप भूतले देशकालानुरोधमनुसृत्य । प्रायश्चतुर्ष्वपि खण्डेषु काली-तारा-सुन्दरी-छिन्नमस्ताख्याश्चतस्रः शक्तयोऽत्र [24]सततं स्मर्यन्ते । तन्नामभिरेवात्र खण्डविभागः कृतः । नामदर्शनेन नैतदभिमन्तव्यं यत्तस्मिन् तस्मिन् खण्डे तस्यास्तस्या देव्याः समाराधनं समुपदिश्यत इति, किन्तु सर्वेष्वपि खण्डेषु सर्वासामप्यासां देवीनां दशविद्याप्रसङ्गेन समानमानमेव वर्णनं कृतं विद्यते ।

---

२३ तन्त्राभिधानप्रस्तावनायां डा. उडरफलिखितायां २-४ पृष्ठेषु नामान्येतानि द्रष्टव्यानि, म. म. श्रीगोपीनाथकविराजकृते ' तान्त्रिक साहित्य ' इत्याख्ये च हिन्दीभाषामये संकलनग्रन्थे भूमिकायां २२-२३ पृष्ठयोः ।

२४ II ९. ४४-४६; १०. ३३, ४१-४२; ४६.३२; III ४. ५१; IV १०. २-३ इत्यादिस्थलेषु चतसृणामेतासां शक्तीनां नामानि सहैव दृश्यन्ते ।

खण्डत्रयस्य विशिष्टानां विषयाणां वर्णनं तत्तखण्डप्रस्तावनासु द्रष्टव्यम्। चतुर्थखण्डविषयाणां विस्तृतः परिचयोऽपि संमोहन[२५] तन्त्रविवरणेषु दृश्यते। खण्डस्यास्य वैशिष्ट्यं पर्यायसप्तकरूपेण तान्त्रिकवाङ्मय-परिगणने, दशविद्यानामवताराणां च जयन्तीनां विवरणे सविशेषमभिव्यज्यते। अष्टमे पटले शाङ्करदश-नामिसम्प्रदायो वर्णितः, नवमे च दार्शनिका योगसंबन्धिनश्च विचारा दर्शनार्हाः सन्ति। एते च यथा-वसरमत्र व्याख्यास्यन्ते। सर्वप्रथममत्र स्मृतानां ग्रन्थानां परिचयः समुपस्थाप्यते।

शक्तिसंगमे स्मृता ग्रन्थाः

शक्तिसंगमे चतुर्ष्वपि खण्डेषु स्मृतानां ग्रन्थानां नामावली परिशिष्टे द्रष्टव्या। ग्रन्था एतेऽत्र समस्ततया व्यस्ततया च प्रमाणत्वेनोद्धृता उपलभ्यन्ते, अर्थात् केषुचित्प्रकरणेषु अनेके ग्रन्थाः सहै-वोद्धृताः, अन्यत्र च स्वातन्त्र्येण कस्यचनैकस्य ग्रन्थस्योद्धृतिर्दृश्यते। अत्र सर्वेषामेतेषां ग्रन्थानां यथासम्भवमुपलब्धः परिचयः प्रदीयते। द्विरुक्तिवर्जनाय प्रकरणसंगतये च सामस्त्येनोद्धृता ग्रन्थाः सहैव विव्रियन्ते।

अक्षोभ्यकुक्षपुट्यादिषट्कम्

"शिवताण्डवतन्त्रे तु यन्त्रं (न्त्र) सिद्धयभिधे परे॥ अङ्कार्णवसर्वस्वे तु अङ्कचूडामणावपि। अक्षोभ्यकक्षपुट्यां च खेचरीसिद्धिनामनि। संक्षेपेण मया प्रोक्तं विस्तरोऽत्र प्रदर्शितः" (II ५४.४१-४३) इत्येवं रत्नपीठ (यन्त्र) प्रकरणे शिवताण्डवादयः षड् ग्रन्थाः स्मर्यन्ते। ग्रन्थेष्वेतेषु संक्षेपेण प्रोक्तो विषय एवात्र विस्तरेण प्रदर्शितो भगवता। अक्षोभ्यतन्त्र–अक्षोभ्यसंहिता–कक्षपुट–कक्षपुटी–कक्षपुटी-विद्या–कक्षपुटीविधानप्रभृतीनां ग्रन्थानां सत्त्वेऽपि **अक्षोभ्यकक्षपुटीनामा** कोऽपि ग्रन्थः कुत्राप्युद्धृतो न दृश्यते। **अङ्कचूडामणि–अङ्कार्णवसर्वस्वखेचरीसिद्धि-यन्त्रसिद्धिनामकानां** ग्रन्थानामपि सैव स्थितिर्वर्तते। खेचरीसिद्धिनामा ग्रन्थश्चतुर्थे खण्डेऽपि यन्त्रप्रकरणे एव (IV ८.१६७) स्मर्यते। तत्र 'खेचरीसिद्धिनामके चूडामणौ' इत्येवमुल्लेखः साभिप्रायः प्रतीयते। **शिवताण्डवतन्त्रस्य** बहवो हस्तलेखा विभिन्नेषु ग्रन्थागारेषु समुपलभ्यन्ते। तृतीये खण्डे त्रिविधस्वप्नमन्त्रनिरूपणावसरे (३.९४-१०१) ताण्डवचक्रस्य शिवताण्डव-चक्रस्य च समुल्लेखो वर्तते। शिवताण्डवतन्त्रेण कोऽपि संबन्धो विवरणस्यास्य वर्तते न वेत्यस्य निर्णयो ग्रन्थावलोकनानन्तरमेव कर्तुं पार्येत। तृतीये खण्ड एव —"सर्वेषां लक्षणं देवि कथितं शम्भुताण्डवे" (११.२३) इत्युच्यते। **अश्वपति-गजनायक-नरनायकप्रभृतीनां** लक्षणानि शम्भुताण्डवे प्रोक्तानीति प्रकरणेनानेन ज्ञायते। **शम्भुताण्डवमिदं** शिवताण्डवतोऽभिन्नमेव स्यात्।

अक्षोभ्येण निर्मिता कक्षपुटी अक्षोभ्यकक्षपुटीनाम्ना प्रसिद्धा। "कामरूपागमे नाम्नि मते चाक्षोभ्यनिर्मिते" (II ११. ३७) इत्यनेन **कामरूपागमोऽप्यक्षोभ्यनिर्मित** इति प्रतीयते। अत्र

---

२५ नेपालदरबारपुस्तकालयसूचीपत्रे (भा. II, पृ. १८३), कालिकातातो मुद्रिते श्रीहरप्रसादशास्त्रिसंदृब्धे संस्कृतग्रन्थविवरणे (भा० I, ४००) च संक्षेपेण, डा० श्रीप्रबोधचन्द्रबागचीकृते 'स्टडीज इन दी तन्त्राज्' इत्याख्ये ग्रन्थे (पृ. ९६-१०१) 'कल्चरल हॅरिटेज आफ इण्डिया' इत्याख्यस्य ग्रन्थस्य चतुर्थे खण्डे मुद्रिते 'इवोल्यूशन आफ दी तन्त्राज्' इति शीर्षके बागचीमहोदयानामेव निबन्धे (पृ. २२०-२२२) च विस्तरेणात्रत्या विषया वर्ण्यन्ते।

चतुर्ष्वपि खण्डेषु अक्षोभ्यमतेन नानाविषया विवेचिताः। अक्षोभ्यकक्षपुटी-कामरूपागमसदृशानामक्षोभ्येण प्रकाशितानां ग्रन्थानामाधारेणैव तथा कृतं स्यात्।

अङ्ककोशः

तन्त्राणां देशव्यवस्था नामानि च मया (भगवता शिवेन) पूर्वमङ्ककोशे प्रकाशितानीति—" देशव्यवस्था तन्त्राणां नामानि परमेश्वरि ॥ अङ्ककोशे महेशानि मया पूर्वं प्रकाशितम्।" (IV ५.५६-५७) अनेन वचनेन ज्ञायते। अस्य ग्रन्थस्याप्यन्यत्र कुत्राप्युल्लेखो न दृश्यते।

अनुत्तरगुणार्णवः

अनुत्तरगुणार्णवेऽस्मिन् शिवशक्त्योरभेद इति विषयोऽयं देव्या शिवायोपदिष्ट इति सूच्यते (III ३.८६) इत्यत्र। अयमपि ग्रन्थः क्वापि नोपलभ्यते।

अर्णवादिद्वादशकम्

दशविद्योत्पत्तिप्रसङ्गेऽर्णवः, कुलचन्द्रोदयः, डामरम्, तरङ्गिणी, पातञ्जलम्, प्रकाशः, भास्करः, विमर्षिणी, शेखरः, संहिता, सिद्धान्तसारः, सूक्तमित्येते द्वादशग्रन्था उद्धृताः। तथा हि—" उत्पत्तिर्दशविद्यानां देवानामपि पार्वति ॥ सूक्ते संकथितं देवि द्वयोराम्नायभेदतः। पातञ्जले विमर्षिण्यां सारे सिद्धान्तसम्मते ॥ कुलचन्द्रोदये देवि भास्करे शेखरे तथा। तरङ्गिण्यर्णवे देवि प्रकाशे संहिताविधौ ॥ अन्यानि डामरादीनि तत्रापि कीर्तिताः प्रिये।" (II २. २५-२८) इति। एतेषु **अर्णव-डामर-तरङ्गिणी-प्रकाश-भास्कर-विमर्षिणी-शेखर-संहिता-सूक्त**शब्दा न स्वातन्त्र्येण ग्रन्थानां वाचकाः, किन्तु अर्णवाद्यन्तानां ज्ञानार्णव-भूतडामरसदृशानां ग्रन्थानां सूचकाः प्रतिभान्ति। अतोऽत्र निश्चेतुं न शक्यते यत् केष्वर्णवादिषु ग्रन्थेषु दशविद्योत्पत्तिप्रसङ्गो व्याख्यात इति, कानि च तेषां यथार्थानि नामानीति च। आगमसंख्याविवरणे पर्यायसप्तकप्रकरणे चार्णवाद्यन्तानि नानातन्त्राणि परिगणितानि। तत्र शाक्तेष्वर्णवादिग्रन्थेष्वेष विषयो व्याख्यातः स्यात्।

" अर्णवाः सर्वसामान्याः सर्वधर्मेषु तद्गतिः " (II १.१५९) इति, " अर्ण[२६]वानां च विंशतिः " (II ५८.२५) इति चार्णवानां विषये किमपि ज्ञायते। अर्णवान्तेषु ग्रन्थेषु **कुलार्णव-ज्ञानार्णव-तन्त्रार्णव-समयार्णवा** अत्र स्मृताः। ते च यथावसरं विवरिष्यन्ते। उपर्युक्तेषु ग्रन्थेषु **कुलचन्द्रोदयस्य** नामान्यत्र क्वापि न दृश्यते। डामरान्तः कोऽपि ग्रन्थो नात्र समुद्धृतः। चतुर्थे खण्डे (२.२) डामरद्वयगोचरा उड्डीशद्वयगोचराश्च महामन्त्राः स्मृताः, पुष्पभेदाः शिवेन यामलादिके डामरे च गोपिता अत्र प्रकाश्यन्ते (५. २०-२१) इति च वर्ण्यते। डा[२७]मरग्रन्थानां हस्तलेखास्तान्त्रिकसाहित्ये (पृ. २२७-

---

२६ शाक्ते कालपर्यायेऽर्णवानां नवकम्, शैवे वैष्णवे च एकैकः, सौरेऽर्णवत्रयमिति चतुर्दश अर्णवा अत्र परिगण्यन्ते।

२७ तन्त्रालोकविवेकधृत (पृ. ४२-४३) श्रीकण्ठीयचतुष्षष्टिभैरवागमेषु शिखाष्टकविभागे पञ्चमं डामरं तन्त्रं पठ्यते। डा० प्रबोधचन्द्रबागची निर्दिष्टेषु कम्बुजशिलालेखीयेषु चतुर्षु तन्त्रेषु त्रीणि वीणा-शिव-संमोह-शिरश्छेदाख्यानि तन्त्राणि शिखाष्टकविभागीयान्येव।

२२८), आफ्रेख्ट-सूच्यां (I, पृ. २१४) च निर्दिष्टाः । तरङ्गिणी-प्रकाश-भास्कर-विमर्षिणी-शेखराणां विषयेऽन्यत् किमपि न ज्ञायते, न चैतदन्तानि नामान्यत्र दृश्यन्ते । कस्याश्चन तरङ्गिण्या हस्तलेखस्य आफ्रेख्ट-सूच्यां (I, पृ. २२८), विमर्षिण्याश्च हस्तलेखस्य तान्त्रिकसाहित्ये (पृ. ५९६) विवरण-मुपलभ्यते । पातञ्जलतन्त्रस्य क्वापि निर्देशो नास्ति । अत्रैव (II १.१९) कौमुदी-चन्द्रिका-सारस्वतशब्दैः सह पातञ्जलस्योल्लेखो दृश्यते । साहचर्यादेते ग्रन्था व्याकरणशास्त्रस्येति प्रतिभाति, किन्तु पातञ्जले शास्त्रे दशविद्योत्पत्तिप्रसङ्गस्याभावात् पातञ्जलं तन्त्रं ततो भिन्नमेवाङ्गीकरणीयम् । फलतो महासाहचर्यादेते शब्दा अपि विभिन्नानां तन्त्रभेदानामभिधायका मन्तव्याः । कालिकासंहिता, वाराहीसंहिता, श्रीमूर्तिसंहिता, सुरेन्द्रसंहिता चात्र स्मृताः । कस्यां संहितायां दशविद्योत्पत्तिप्रसङ्गो वर्णित इति न वक्तुं पार्येत । देवनाथेन तन्त्रकौमुद्यां सिद्धान्तसारः समुद्धृतः, पुरश्चर्यार्णव-आगमकल्पलता-वीरशैवागमेषु चास्योल्लेखो वर्तते (ता., पृ. ७०१; आ. I, पृ. ७२२) । आम्नायानामुत्तम-मध्यम-कनिष्ठभेदा अत्र (II १.११५-१२१) वर्ण्यन्ते । तत्रैवोच्यते—" सूक्ते पूर्वं प्रकीर्तितम् " (II १.१२२) इति । दशविद्योत्पत्तिप्रसङ्गे स्मृतात् सूक्तात्, अत्रैव स्मृतात् तारासूक्ताचास्यामेद इति तारासूक्तविवरणावसरे वक्ष्यते ।

आगम-पुराणे

जयन्तीप्रकरणे प्रतिपाद्यते यत्पुराणादिषु विविधा अवतारा विस्तरेण प्रतिपाद्यन्त इति । ततः परमुच्यते—" आगमेऽपि पुराणानि सन्त्येव प्रियवादिनि " (IV ६.७७) इति । कालपर्यायतन्त्रेषु पुराणानामुपपुराणानां च संख्या प्रदर्श्यते । एतेन ज्ञायते यदागमतन्त्रयोः स्वतन्त्राणि पुराणानि भवन्ति । यथाऽत्रैव (IV ६.७८) कालीपुराणं स्मर्यते, यत्र हि बटुकस्य भैरवाणां चोत्पत्तिराख्याता । ईदृशानामेव पुराणानां विषयेऽत्रोक्तं यदागमेऽपि पुराणवाङ्मयतो भिन्नानि स्वतन्त्राणि पुराणानि सन्त्येवेति । एवं चागम-पुराणशब्दावत्रत्यौ न ग्रन्थयोर्वाचकौ, किन्तु तज्जातीयस्य वाङ्मयस्य प्रातिनिध्यं कुर्वाते । 'स्टडीज इन दी उपपुराण्स' इत्याख्ये ग्रन्थे भागद्वयात्मके डा० आर. सी. हाजरामहोदयेनेदृशानामेव सौर-वैष्णव-शाक्तानां पुराणानां विस्तृतः परिचयो दत्तः ।

उड्डीशद्वयम्

उड्डीशद्वयगोचरा डामरद्वयगोचराश्च महामन्त्रा अत्र (IV २.२) स्मर्यन्ते । तत्रोड्डीशद्वयेन डामरद्वयेन चैतदन्ताः के ग्रन्था अभिप्रेता न परिज्ञायते । उड्डीशतन्त्र-कुलोड्डीश-क्रियोड्डीश-महोड्डीश-रावणोड्डीशप्रभृतीनां ग्रन्थानां हस्तलेखा मुद्रिताश्च केचन ग्रन्थाः साम्प्रतमुपलभ्यन्ते । एतादृशेषु ग्रन्थेषु पठिता विशिष्टा मन्त्रा एवात्राभिप्रेताः स्युः ।

उत्तराम्नायः

सिता नित्या उत्तराम्नाये विख्याता, शिवेन शतधा पूजिता च (III १८.५२) । अत्र उत्तराम्नायशब्द आम्नायस्य वाचको ग्रन्थस्य वेति न निश्चेतुं शक्यते । उत्तराम्नायतन्त्रम्, उत्तराम्नाये योनिगह्वरम् इत्यादीनां ग्रन्थानां नामानि [२८]बृहद्ग्रन्थसूच्यां दृश्यन्ते ।

---

२८ 'न्यू कैटलागस कैटलागरम्' इत्याख्यो मद्रपुरीतः प्रकाश्यमानो बृहत्सूचीग्रन्थः । भा. II, पृ. ३१४ इत्यत्र दृश्यन्ते नामान्येतानि । अग्रे ग्रन्थोऽयं 'न्यू.' इत्येवं संकेतयिष्यते ।

कादितन्त्रादिपञ्चकम्

अत्र दीक्षाप्रतिपादनावसरे प्रोच्यते—"कादितन्त्रोक्तमार्गेण पूर्णदीक्षा प्रकीर्तिता ॥ बृहत्-श्रीक्रमतन्त्रोक्ता ऊर्ध्वाम्नायस्वरूपिणी । सुधाशाम्भवतन्त्रोक्ता शान्तिनिर्वाणरूपिणी ॥ परातापडवतन्त्रोक्ता शाम्भवाख्या प्रकीर्तिता । शक्तिसंगमतन्त्रोक्ता शाम्भवाख्या प्रकीर्तिता ॥" (II ८.८-१०) इति । एतेषु **शक्तिसंगमं** तन्त्रं विवृतपूर्वम् । **कादितन्त्रस्य** विषयेऽत्रैव—"कादौ यक्षिणीयक्षमण्डलं निगदितम्" (III १६.६५) इति दृश्यते । अत्र कादिशब्देन कादितन्त्रं गृह्यते कादिसम्प्रदायो वेत्यस्य निर्णयः कादि-तन्त्रे यक्षिणीयक्षमण्डलस्य प्रतिपादनं वर्तते न वेति दर्शनानन्तरमेव वक्तुं शक्येत । मनोरमाख्यव्याख्यया सहितं मुद्रितं तन्त्रराजापरपर्यायकादिमततन्त्रमेव कादितन्त्रनाम्नाऽपि परिचायितं तान्त्रिकसाहित्ये (पृ. ९८-१००)। एतदेव षोडशनित्यातन्त्रमित्यपि तत्रैवोच्यते । बृहद्ग्रन्थसूच्यामपि (न्यू. III, पृ. ३३८-३४०) ग्रन्थस्यास्य मातृकाणां परिचयो वर्तते । **बृहच्छ्रीक्रमसंहिता** (ता. पृ. ४२५) इत्यत्र वर्णिता । संहितैषा बृहच्छ्रीक्रमतन्त्रतोऽभिन्नैव स्यात् । **परातापडव-सुधाशाम्भवतन्त्रयोस्तु** न क्वापि सूचना कुत्रापि लभ्यते ।

कादिहादिविनिर्णयः

"एतत्कथाविस्तरस्तु कादिहादिविनिर्णये ॥ पूर्वं विस्तरतो देवि मया तत्परिकीर्तितम् ॥" (I ६. १२७-१२८) इत्यत्र ग्रन्थोऽयं स्मर्यते, न चाप्यन्यत्र क्वापि समुद्धृतोऽयम् ।

कामरूपागमादिचतुष्टयम्

बगलाक्रमनिर्णये सृष्टि-स्थिति-संहारक्रमेण त्रिविधा पूजा वर्णिता (II ११.६)। तत्र केरलीया सृष्टिक्रमपूजा **गर्भकौलागमानुसारम्**, गौडीया स्थितिमार्गीया **गुप्तकौलागमानुसारम्**, संहारक्रमपूजा च **कामरूपागमानुगुणं** विधेयेति प्रोक्तम् । गौडागममवलम्ब्य सांख्यायनमुनिः स्वकीये आगमे स्थित्यर्चा प्रतिपादितवानित्यप्युक्तमत्र (II ११.७-९)। अत्र **सांख्यायनतन्त्रं** भगवतोऽभिप्रेतं स्यात्, यस्य हि भूयांसो हस्तलेखाः समुपलभ्यन्ते । अक्षोभ्यनिर्मिते कामरूपागमे हवनमार्जनादिका पुरश्चर्या प्रोक्ता (II १०.३७) इत्यत्रैव प्रतिपाद्यते । शि[२९]वतत्त्वरत्नाकरे परिगणितेषु चतुष्षष्टितन्त्रेषु कामरूपतन्त्रं दृश्यते (न्यू. III. पृ. ३५६)। तदभिन्नमेतद्भिन्नं वेति कथं निर्णेतुं पार्येत । गर्भकौलागममातृकापरिचयः (ता., पृ. १७४; न्यू. V, पृ. ३२३) इत्यत्रोपलभ्यते । गुप्तकौलागमस्य तु कोऽपि परिचयः क्वापि न दृश्यते ।

कालिकागमः

पारे परार्धमनु अनन्ताख्या संख्या कालिकागमे प्रतिपादिता (II १.९), सौख्यानन्दो मुक्तिरिति च तत्रैव प्रतिपाद्यते (II ५.११)। कालिकागमे त्रिधा दर्भः प्रकथितः (II ६३.१४),

---

२९ मद्रपुरीतः १९२७ ई. वर्षे प्रकाशिते चतुर्थे पृष्ठे द्रष्टव्यम् ।

पत्न्यै भर्तृकृता दीक्षा च न दोषावहेति निर्णीतम् (IV ११.१६)। इत्येवं चतुर्षु स्थलेषु ग्रन्थोऽयमुद्ध्रियते। न्यू. IV, पृ. ५० इत्यत्र विव्रियते यद् मद्रपुरीये राजकीयपुस्तकालये कालिकागमस्य मातृका वर्तत इति।

कालिकापरिशिष्टम्

आसनप्रकरणे मुण्डविवरणे मुण्डरहस्यप्रोक्तविधानतो भिन्नं विधानं कालिकापरिशिष्टे परिकीर्तितम् (II ९.१५) इत्यत्रोच्यते। अन्यत्र क्वापि नोपलभ्यते ग्रन्थस्यास्य परिचयः।

कालिकाम्नायतन्त्रम्

मेरुभेदादिविज्ञानं महासिद्धशैवके ऊर्ध्वाम्नाये कालिकाम्नायतन्त्रे प्रकीर्तितम् (I ६.५५-५६) इति ग्रन्थस्यास्य परिचयोऽत्र दृश्यते। अन्यत्र तु क्वाप्यस्य चर्चा नास्ति।

कालिकासंहिता

राजदन्तविषयकं कालिकासंहितामतान्तरमत्र (II ९.३७) वर्ण्यते। कवीन्द्राचार्यसूच्यामस्य ग्रन्थस्य समुल्लेखो वर्तत इति न्यू. IV, पृ. ५५ इत्यत्र द्रष्टव्यम्।

कालिकासाधनम्

नाडीसाधने पुंसि स्त्रियां च प्रकारभेदः कालिकासाधने स्मृतः (IV १०.५२) इत्येवं स्मर्यते ग्रन्थोऽयम्। अन्यत्र तु क्वाप्यस्य समुल्लेखो नोपलभ्यते।

कालीक्रमागमः

कालीक्रमागमोक्तेन विधिना समाराधिता कालिका ध्रुवं फलदा भवतीत्यत्र (II १.१५८) वर्ण्यते। ता., पृ. १२२; न्यू. IV, पृ. ७३ इत्यनयोः स्थलयोः कालीक्रमाख्यस्य ग्रन्थस्य परिचय उपलभ्यते।

कालीपुराणम्

कालीपुराणे बटुकस्य भैरवाणां चोत्पत्तिराख्यातेत्यत्र वर्ण्यते। (IV ६.७८)। कालीपुराणमातृकायाः कालिकातातो मुद्रितेन कालिकापुराणेन साम्यं वर्तते (ता., पृ. १२६)। कालिकापुराणमेतद् मुम्बापुरीस्थवेङ्कटेश्वरयन्त्रालयतोऽपि [३०]मुद्रितम्। प्राचीनेषु निबन्धादिग्रन्थेषूद्धृतं कालीपुराणं कालिकापुराणं वेतो भिन्नमिति सप्रमाणं साध्यते डा० आर. सी. [३१]हाजरामहोदयेन। प्राचीनमिदं कालिकापुराणं वाराणसीतः

३० स्टडीज इन दी उपपुराण्स, भा. २, पृ. ५२० अवलोकनीयम्।

३१ तत्रैव पृ. १९४-२५९ द्रष्टव्यानि।

प्रकाशनार्थं संक्रियते। नवीनं कालिकापुराणमपि १९७२ ई. वर्षे वाराणसीस्थ चौखम्बासंस्कृतसंस्थानतः प्राकाश्यत। अस्योत्तरभागे कामाख्यातीर्थस्य भैरवादीनां चोत्पत्तिवैशद्येन वर्णनं दृश्यते।

कुलार्णवादिसप्तकम्

"कादिः काली महाशक्तिर्हादिस्त्रिपुरसुन्दरी॥ कादिहादिप्रभेदेन द्विधाम्नायार्थसंहतिः। कुलार्णवे तन्त्रकौले वीरचूडामणावपि॥ सिद्धान्ते त्रैपुराख्ये च तथा ज्ञानार्णवद्वये। श्रीमूर्तिसंहितायां च तथैव समयार्णवे॥" (II १. १२२-१२४) इत्यत्र वर्ण्यते यत् कुलार्णवादिसप्ततन्त्रेषु कालीत्रिपुरसुन्दर्योरुभयोरुपासनाविधिः प्रदर्श्यत इति। अन्यत्र (II १.१५८-१५९) तु कालीक्रमागमोक्तेन कालिका, कुलार्णवोक्तसन्मार्गाच्च सुन्दरी फलदा भवतीत्युच्यते। एतेषु **कुलार्णव-ज्ञानार्णव** तन्त्रे मुद्रिते उपलभ्येते। ज्ञानार्णवद्वयमित्युक्त्या एतन्नामकं ग्रन्थद्वयं प्रसिद्धमासीदिति प्रतिभाति। बौद्धेषु जैनेषु च तन्त्रेषु ज्ञानार्णवतन्त्रमुपलभ्यते। **तन्त्रकौलस्य** तु क्वापि निर्देशो नोपलब्धः। **त्रिपुरासिद्धान्तस्य** परिचयः (ता., पृ. २७७; आ. I, पृ. २३८) इत्यत्र, वीरचूडामणेश्च (ता., पृ. ६०२) इत्यत्र द्रष्टव्यः। श्रीमूर्तिसंहितायाः क्वापि निर्देशो न दृश्यते। समयार्णमातृकानामको ग्रन्थः पूर्णानन्देन समुद्धृत इति (आ. I, पृ. ६९७) इत्यत्र दृश्यते। **समयार्णवस्यैव** मातृका तेन दृष्टा स्यात्।

कोटिविनायकः

भूकम्प-धूम्रकेतुप्रभृतिदुश्चिह्न(उत्पात)लक्षणानि कोटिविनायके ग्रन्थे वर्णितानीत्युच्यतेऽत्र (III ११. २)। अन्यत्र क्वापि ग्रन्थस्यास्य परिचयो नोपलभ्यते।

गोपालपाञ्चरात्रादिसप्तकम्।

"सुरेन्द्रसंहिता देवि तथा षट्शाम्भवः शिवे। गोपालपाञ्चरात्रं च षडन्वयमतं तथा॥ श्रीगोपीपरिशिष्टं च मोहशक्तीश्वरस्तथा। षट्शाम्भवरहस्यं च क्रमादेते प्रकीर्तिताः॥ एतद्ग्रन्थक्रमाद् देवि विवेचनमुदीरितम्।" (I ८. ८३-८५) इति दृश्यते। पटलेऽस्मिन् वैष्णवाः पाशुपताश्च सम्प्रदायाः सलक्षणभेदं व्याख्याताः। उपर्युक्तानां ग्रन्थानामाधारेण विवेचनमिदमुदीरितमिति भगवतोच्यते। एतेषु सुरेन्द्रसंहिता, गोपालपाञ्चरात्रम्, श्रीगोपीपरिशिष्टं च पाञ्चरात्राणामन्ये च शाम्भवानां ग्रन्थाः प्रतीयन्ते। षट्शाम्भव-षडन्वयमतयोश्चर्चाऽन्यत्रापि विद्यते। तथा हि—प्रथमे खण्डे षट्शाम्भवानुसारं पीठविचारः (३. २०-२९) क्रियते। एवमेव नामदाने विधिरयं सम्प्रदायक्रमेण शाम्भवे पूर्वमीरितः (५.९९) इत्युच्यते। "चत्वराणां पताकानां तथा षट्शाम्भवस्य च। तोरणानां लक्षणं तु कथ्यते शृणु साम्प्रतम्॥" (१०. ५९-६०) इत्यत्र षट्शाम्भवस्यापि लक्षणं प्रतिज्ञातम्, किन्तु तन्नात्र दृश्यते। अस्यां स्थितौ चत्वरादीनां लक्षणं षट्शाम्भवानुसारमत्र प्रदीयत इति वचनस्यास्याभिप्रायो नेयः। चतुर्थे खण्डेऽप्येकत्र (१०.५२) षट्शाम्भवे काली, तारा, छिन्नमस्ता च नाडीत्रयरूपेण व्याख्याता, अपरत्र (१०.५७) च चतुर्धा भूतशुद्धिरिति शक्तिसंगमनिर्णयः, अत्रापि मनबाहुल्यं शाम्भवादौ स्फुटं व्याख्यातमित्युक्तम्। शक्तिसंगमेऽत्र तन्त्रे षट् शाम्भवसम्प्रदायानुसारमेव नैके विषया व्याख्याताः। "शक्तिसंगमतन्त्रोक्ता दीक्षा शाम्भवाख्या (II ८.१०) इति स्पष्टमत्र प्रतिपाद्यते। षडन्वयमतविषयेऽप्यत्र—"षडन्वये महेशानि ते च प्रोक्ता मया तव" (III ३.१९८) इत्यादिना षडन्वयमतानुसारं चन्द्रसूर्याग्नित्रयस्य वृत्तित्रितयस्य च विवेचनमुपस्थाप्यते। एतेषु **गोपालपाञ्चरात्र-श्रीगोपीपरिशिष्ट-षट्शाम्भव-षडन्वयमत**विषये न कापि सूचनाऽन्यत्र क्वाप्युपलभ्यते। मोहचू(शू)रोत्तरनामा ग्रन्थः (ता., पृ. ५३०)

इत्यत्र विव्रियते । मोहशक्तीश्वराद्यमभिन्नो भिन्नो वेति ग्रन्थावलोकनानन्तरमेव वक्तुं पार्येत । षट्-[३२]शाम्भवरहस्यविषये पूर्वमेवोक्तम् । सुरेन्द्रसंहिताविवरणं च (ता., पृ. ७०९) इत्यत्र द्रष्टव्यम् ।

चित्तस्कन्ध-त्रिस्कन्धे

" भूगोलो हि महेशानि त्रिः(त्रि)स्कन्धे सूचितो मया ।...चित्तस्कन्धे महेशानि ब्रह्माण्डाख्यः प्रकीर्तितः । " (I २. १२-१३) इत्येवमत्र दृश्यते । अत्र त्रिस्कन्धपदेन सिद्धान्त-संहिता-होराख्य-स्कन्धत्रयोपेतं ज्योतिःशास्त्रमभिधीयते । तत्र हि भूगोलस्य विस्तरेण वर्णनमुपलभ्यते । 'चित्तस्कन्धे' इत्यत्र 'चतुःस्कन्धे' इति पाठान्तरं वर्तते । एष एव पाठः सरस्वतीभवनस्थासु सर्वासु मातृकासु दृष्टः । चतुःस्कन्धपदेन खण्डचतुष्टयात्मकं षष्टिसाहस्रिकं शक्तिसंगमतन्त्रमेवाभिप्रेतमिति प्रतिभाति । तत्र हि विस्तरेण ब्रह्माण्डस्य वर्णनमक्रियत । तत एव संक्षिप्यात्र ब्रह्माण्डस्य वर्णनं कृतमिति चित्तस्कन्ध-त्रिस्कन्ध-शब्दौ न ग्रन्थयोर्वाचकावित्यङ्गीकर्तव्यम् ।

तन्त्रार्णवः

ग्रन्थारम्भे तन्त्रार्णवादीनि लक्षकोट्यर्बुदसंख्याकानि सर्वाणि तन्त्राणि श्रुतानीति देवीवचनं (I. १. ३-४) दृश्यते । अत्र केवलं तन्त्रार्णवस्यैव नामपरिग्रहणादस्य तन्त्रस्य वैशिष्ट्यं किमप्यभिव्यज्यते । सरस्वती-भवने १००२५३ (३१/६९) संख्याका वंगलिपिमयी मातृकाऽपूर्णा समुपलभ्यते । गोरक्षदत्तसंवादरूप-स्तन्त्रमहार्णवोऽपि तत्र १०६४०३ (३०/१०) संख्याको वर्तते । तन्त्रसारे समुद्धृत एष ग्रन्थ इति (ता., पृ. २४८) इत्यत्र वर्णितम् ।

तारासूक्तम्

केरलसम्प्रदायस्य भेदास्तारासूक्ते प्रकाशिताः (I ६.१४४) इति, मुण्डी त्रिंशद्विध इति तारासूक्ते प्रकाशितः (I ८.८८) इति चात्र दृश्यते । अत्र तारासूक्तपदेन शक्तिसंगमतन्त्रस्य छिन्नमस्ताख्यः खण्डश्चतुर्थः परामृश्यते । २३९३६ संख्याकोऽस्य हस्तलेखः सरस्वतीभवनपुस्तकालये तारासूक्तनाम्नैव स्थापितः । चतुर्थादिपटलपुष्पिकासु सर्वत्र तारासूक्तमिति नाम दृश्यते । एवमेव " सूक्ते पूर्वं प्रकीर्तितम् " (II १. १२२), " सूक्ते संकथितं देवि " (II २.२६) इत्यत्रापि तारासूक्तमेवाभिप्रेतम् । कादि-हादिप्रभेदेन हि तत्राम्नायविभागो विस्तरेण प्रदर्श्यते ।

देवीपरम्परा

प्रथमखण्डस्य षष्ठे पटले १३५-१८९ इत्येतेषु पटलसमाप्तिस्थेषु श्लोकेषु नानाविधाः सम्प्रदायाः प्रदर्शिताः । तत्रैव " देवीपरम्परायां तु संक्षेपेण प्रकाशितम् " (I ६.१८४) इति दृश्यते । सोऽयं [३३]ग्रन्थः क्वापि विवृतो नास्माभिर्दृष्टः ।

---

३२ षट्शाम्भवरहस्याख्ये शक्तिसंगमस्य तृतीयखण्डे वैष्णवाः पाशुपताश्च भेदोपभेदाः संक्षेपेण वर्णिताः सन्ति ।

३३ सम्प्रदायपरम्परासु देवीपरम्परा शिवपरम्परा चेति परम्पराद्वयं प्रवर्तेत इति व्याख्यास्यते यथावसरम् । एवं चात्रत्यो देवीपरम्पराशब्दः । सम्प्रदायवाचको ग्रन्थवाचको वेति सन्देहेऽनयेन वचनेन ग्रन्थवाचक एव सिध्यति, संक्षेपेण प्रकाशितमिति वचनात् ।

नीलसारस्वततन्त्रम्

नीलसारस्वते तन्त्रे शक्तिपातः पञ्चधा परिकीर्तितः (I ३. ५२) इति, प्रधानोक्तं कर्म सर्वत्र प्रसरतीत्यस्योदाहरणं नीलसारस्वते तन्त्रे द्रष्टव्यम् (III ३. १४६) इति चात्र दृश्यते। नीलसरस्वतीतन्त्रं मन्त्रमहार्णवे तन्त्रसारे च समुद्धृतमिति (ता., पृ. ३४४) इत्यत्र वर्णितम्। नीलसारस्वततो नीलसरस्वती-तन्त्रमिदमभिन्नमेव[३४] स्यात्।

पूर्वतन्त्रम्

पूर्वतन्त्रेषु दीप्तानित्या संगुप्ता (III १६. २) इति, देशद्वयव्यवस्था पूर्वतन्त्रे प्रकीर्तिता (IV २. ३२) इति चात्र दृश्यते। तत्र 'पूर्वतन्त्रेषु' इत्यस्य 'प्राचीनेषु तन्त्रेषु' इत्यभिप्रायः प्रतीयते, प्राचीनेषु तन्त्रेषु संगुप्ता दीप्ता नित्या साम्प्रतमस्मिन् तन्त्रे प्रकाश्यत इति। कस्यचन पूर्वतन्त्रस्य परिचयः (ता., पृ. ३८७; आ. I, पृ. ३४४) इत्यत्र दृश्यते। श्रीपूर्वतन्त्रं महार्थमञ्जरीपरिमले चतुर्षु स्थलेषु (पृ. ९६, १०९, ११८, ११९) समुद्धृतं वर्तते। प्राचीनं तत् तन्त्रम्। अत्र तृतीयखण्डे सप्तमे पटले देशव्यवस्था व्याख्याता दृश्यते। पूर्वतन्त्रपदेन किमत्र तृतीयः खण्ड एव परामृष्टः?

मन्त्रसिद्ध्यभिधागमः

शक्तिसंगमनामकं तन्त्रराजोत्तमोत्तमं मन्त्रसिद्ध्यभिधागमे पूर्वं सूचितं भगवता देव्यै (I १. ६) इति, मन्त्रसिद्ध्यभिधागमेऽष्टादशतन्त्राणि भवन्ति (IV ७. ११२) इति चात्र दृश्यते। अत्र प्रथमेनो-द्धरणेन कस्यचन ग्रन्थस्य द्वितीयेन च तदभिधेयस्यागमस्य बोधो भवति। एतन्नामकः कोऽपि ग्रन्थः सूची-ग्रन्थेषु क्वापि नोपलब्धः। आगमपर्याये चान्यैर्भेदैः सह मन्त्रसिद्ध्यभिधागमोऽपि वर्णितः।

मुण्डरहस्यम्

आसनप्रकरणे मुण्डासनविवरणे मुण्डरहस्यानुसारी एकः प्रकारः, अपरश्च कालिकापरिशिष्टानुसारी (II ९.८-१६) इति दृश्यते। कालिकापरिशिष्टं पूर्वं व्याख्यातम्। मुण्डरहस्यमातृकाऽद्यावधि क्वापि नोपलब्धा, न चोद्धरणेभ्योऽपि तज्ज्ञायत इति सूचीग्रन्थावलोकनतोऽवसीयते।

यामलम्

पुष्पभेदाः शिवेन यामलादिके डामरे च गोपिता इह प्रकाश्यन्ते (IV ५. २०-२१) इत्यनेन ज्ञायते यत् पुष्पभेदप्रकरणमेतद् यामल-डामरादितन्त्रेषु नैव वर्णितमिति। अत्र यामल-डामरादयः शब्दा न कस्यचन ग्रन्थस्य, किन्तु प्रायः यामल-डामरान्तनाम्नां तन्त्राणां वाचका इत्युक्तमेव डाम[३५]रपदविवरणे।

---

३४ नीलसरस्वतीतन्त्रस्य ५१४०१ संख्याकाऽपूर्णा खण्डिता च मातृका सरस्वतीभवने समुपलभ्यते। यावदुपलब्धभागे शक्तिपातः प्रधानोक्तमिति न्यायश्चेत्युभावप्येतौ विषयौ न दृश्येते।

३५ चतुष्षष्टिभैरवागमेषु डामरं तन्त्रं पञ्चम इति विवृतमेतत् २७ संख्याकायां टिप्पण्याम्।

रहस्यम्

शक्तिसंगमतन्त्रस्य ताराखण्डे पानसंकेताख्ये त्रयस्त्रिंशत्तमे पटले षोडशसम्प्रदायास्तर्पणक्रमानुसारेण वर्णिताः । अन्ये भेदास्तु विस्तरेण रहस्ये परिकीर्तिताः (II ३३. ३०) इति च तत्रैवोक्तम् । रहस्यतन्त्रम् (ता., पृ. ५५१) इत्यत्र सूच्यते । आगामिकास्तान्त्रिकाश्चानेके ग्रन्था उपनिषदश्च रहस्यनाम्ना स्मर्यन्ते । तेन कतरस्य तान्त्रिकग्रन्थस्यात्र ग्रहणमिति निर्णयः कर्तुमशक्यः ।

लक्षणसंग्रहः

लक्षणसंग्रहे दशोत्तरक्रमेण संख्या परार्धान्तं निरूपिता (II १. १३) इत्यत्रास्य नाम दृश्यते । ग्रन्थोऽयमाफ्रेख्टसूच्यां (I, पृ. ५३५) विवृतो दृश्यते ।

वर्णोद्धार (तन्त्रम्)

ककार आदिवर्णः, हकारश्चरम इत्यत्रार्थे प्रत्ययो वर्णोद्धारे भविष्यति (III ३. ६६)। अत्र भविष्यतीति वचनादस्य ग्रन्थस्याविर्भावोऽपि शक्तिसंगमकाल एव संजात इति प्रतीयते । मन्त्रमहार्णवे ग्रन्थोऽयमुद्धृतः (ता., पृ. ५८४)। आफ्रेख्टसूच्यां (I, पृ. ५५८) प्रदर्श्यते यद् वर्णोद्धृतितन्त्रं प्राणतोषिण्यां द्वितीये पटले समुद्धृतं वर्तत इति ।

वाराहीसंहिता

वाराहीसंहिताक्रमात् खड्गपूजनं विधेयम् (II ६९. ३१) इत्युच्यते । वाराहीसंहिता चेयं पुरश्चर्यार्णवे समुद्धृता (ता., पृ. ५९१) वाराहीतन्त्रस्य द्विप्रकारस्य विवरणमपि (ता., पृ. ५९०–५९१; आ. I, पृ. ५६५) इत्यत्र दृश्यते । एतयो वाराहीसंहिता–वाराहीतन्त्रयोर्भिन्नाभिन्नत्वनिर्णयः प्रयत्नसापेक्षः ।

व्यङ्कटेशाख्यम्

सूर्योदयकालिकवारानुसारं ग्रहो ग्राह्य इति मतमेतत् शिवेन व्यङ्कटेशाख्ये केरले प्रतिपादितम् (III ११. ४२)। ईदृशस्य कस्यचन ग्रन्थस्य विवरणं सूचीग्रन्थेषु क्वापि नोपलभ्यते ।

शक्तियोगक्रमः

भगवता शिवेन ग्रस्तोदयविधिर्ग्रस्तास्तनिर्णयश्च शक्तियोगक्रमे पूर्वमेव प्रोक्तः (II १७. ५५)। नास्यापि क्वचनोपलब्धिरद्यावधि संजा[३६]ता ।

---

३६ ग्रस्तोदयग्रस्तास्तविधिरत्र "संयोगो ग्रहनं(णं) देवि" (II १४.२९-४९)" इत्यादिना वर्ण्यते । तेन संभाव्यते शक्तियोगक्रमपदेनास्यैव प्रकरणस्य निर्देशः स्यात् । एवं च नायं स्वतन्त्रः कश्चन ग्रन्थ इति वक्तुं शक्यते ।

शिवतत्त्वम्

शिवतत्त्वे सूचितानि दशविद्यानामादीनि विस्तरेणेह (II १. ३६) प्रतिपाद्यन्ते । शिवतत्त्वनामा कश्चन वेदान्तग्रन्थः (आ. I, पृ. ६४८) इत्यत्र सूच्यते । वेदान्तग्रन्थे दशविद्यानाम्नामुल्लेखोऽप्रासङ्गिक एव स्यात् । यदि तु भ्रमवशात् शैवागमग्रन्थो वेदान्तविभागे स्थापितः स्यात्तदापि ग्रन्थयोरनयोर्भिन्नाभिन्नत्वनिर्णयो दशविद्यावर्णनोपलब्धिसापेक्ष इति ।

श्रीमतोत्तरतन्त्रम्

श्रीमतोत्तरतन्त्रोक्तकवचावरणैर्युता महाकाली वर्णिताऽत्र (II ३१. ९) । श्रीमतोत्तरं मतोत्तरं चाभिन्नमेव तन्त्रम् । नित्याषोडशिकार्णवोपोद्घाते (पृ. ४३) विवृतमेतदस्माभिः । मतोत्तरमातृकाविवरणानां वाराणसेयसंस्कृतविश्वविद्यालयप्रकाशितखण्डितगोरक्षसंहितापुष्पिकावाक्यानां च समानतामुपलक्ष्यास्माभिरुभयोरनयोर्ग्रन्थयोरैक्यं समनुमीयते ।

श्रीमत्पञ्चकतन्त्रम्

नवचक्रात्मकमहासंवर्तकेश्वरं श्रीमत्पञ्चकतन्त्रेषु विस्तरेण प्रकाशितेन विधिना पूजयेत् (III १. ५१) । अत्र बहुवचनमादरातिशयद्योतकम् । सूचीग्रन्थेषु नोपलभ्यते क्वापि सूचनाऽस्य ग्रन्थस्य विषये ।

सप्तशती

सप्तशत्यामैक्यभावना प्रधाना (IV ११. ६१) । सप्तशती चैषा दुर्गासप्तशतीतोऽभिन्नैव भारते आबालवृद्धं प्रसिद्धा ।

सर्वतन्त्रम्

धूमावतीविधिः सर्वतन्त्रे विस्तरेण प्रदर्शितोऽत्र संक्षेपेण प्रतिपाद्यते (III २१. ५९) । सर्वतन्त्रमिदमन्यत्र क्वापि सूचीग्रन्थेषु न सूच्यते क्वचन समुद्धृतमपि ।

साधनापटलः

साधनापटले वेश्यासाधनविधिः प्रोक्तो विस्तरेण (IV ३. १६२) । अस्य ग्रन्थस्य द्वितीये चतुर्थे च खण्डे केषुचित् पटलेषु विधिरीदृशो वर्ण्यते । तेषु कश्चन पटलोऽत्र परामृश्यतेऽथवा कस्यचनान्यस्य ग्रन्थस्य साधनापटलनामको भागोऽत्र परामृष्टः, उत साधनापटलनामा कश्चन स्वतन्त्रो ग्रन्थ एवात्राभिप्रेत इति नाधुना वक्तुं पार्यते । एतन्नामकः कश्चन ग्रन्थस्तु न दृश्यते सूचीषु ।

सिद्धमतम्

नामदाने विधिरयं सम्प्रदायक्रमेण शाम्भवे सिद्धमतकेऽपि च प्रोक्तः (I ५.१००) । सिद्धामत-

सिद्धामृत-सिद्धयोगिनीमतप्रभृतिनामभिः प्रसिद्धो ग्रन्थोऽभिनवगुप्तादिभिः प्राचीनैराचार्यैः सादरं स्मर्यते। अत्र स्मृतात् सिद्धमताद्भिन्नमभिन्नं वैतदिति निर्णयः प्रयत्नसापेक्षः। सिद्धायोगेश्वरीतन्त्रस्य मातृका नेपाल-पुस्तकालये समुपलभ्यते। अत्रापि ग्रहणप्रकरणे सिद्धेश्वरीमतं प्रदर्शितम् (II १७.९)।

सिद्धिकेरलः

" सिद्धिकेरले। पूर्वं संसूचितं ते यत् तदद्य कथ्यते शृणु " (I ३.३१) इति वचनात् सिद्धि-केरलाख्यः कश्चन ग्रन्थः तु प्रतीयते। सूचीग्रन्थेषु तु क्वापि चर्चाऽस्य नास्ति।

सूर्यसिद्धान्तः

सूर्यसिद्धान्तानुसारं प्राचीनिर्णयः कथं भवतीत्यत्र (II १८.२०) सूच्यते। सूर्यसिद्धान्तोऽयं ज्योतिःशास्त्रस्य ग्रन्थ इत्यवधेयम्।

एवमत्र विवृतेष्वेषु ग्रन्थेषु सूर्यसिद्धान्तो ज्योतिःशास्त्रस्य, सप्तशती च मार्कण्डेयपुराणान्तर्गतो ग्रन्थ इति सुप्रथितम्। लक्षणसंग्रहोऽपि ज्योतिःशास्त्रस्यैव ग्रन्थः प्रतीयते। अन्ये च सर्वेऽपि ग्रन्था वैष्णव-शैव-शाक्त-बाद्धसम्प्रदायेषु विभक्तस्य तान्त्रिकवाङ्मयस्य सन्ति। एतेषु [३७]कुलार्णव-डामर-तन्त्रराज-पूर्वत[३८]न्त्र-मतोत्तर-सिद्धा[३९]मताख्यानां तन्त्राणां नामानि प्राचीनासु तन्त्रनामावलीषु दृश्यन्ते, किन्तु मतोत्तरं विहाय पञ्च प्राचीनानि तन्त्राण्यत्र नैव स्मृतानीति संभाव्यते। [४०]उड्डीश-उत्तर-कुलार्णव-ज्ञानार्णव-डामर-तन्त्रराज-पूर्वतन्त्र-बृहच्छ्रीक्रम-वर्णोद्धति-वाराही-शिव[४१]तन्त्राख्यानि सर्वोल्लासादिसूचीष्ववर्चीनासु समुपलभ्यन्ते। तान्येवात्र समुद्धृतानि स्युः। तत्राभिनवगुप्तकालादेकादशशताब्दीतः प्रागवतीर्णानि तन्त्राणि प्राचीनानि, तत्परवर्तीनि कालेऽवतीर्णानि च तन्त्राण्यर्वाचीनानि मन्तव्यानि।

प्राचीनार्वाचीनविभागः

वैखानस-पाञ्चरात्र-भागवताख्येषु त्रिविधेषु वैष्णवागमेषु पठिताः सात्त्वत-जयाख्य-अहिर्बुध्न्य-प्रभृतयः संहिता हयशीर्षपाञ्चरात्र-अग्निपुराण-आगमप्रामाण्य-श्रीभाष्य-पाञ्चरात्ररक्षाप्रभृतिग्रन्थेषु समुद्धृताः

---

३७ नेत्रतन्त्रोद्योते (भा. २, पृ. १६-१७, १२५) समुद्धृतस्य कुलार्णवस्य तन्त्रालोकविवेके च बहुशः स्मृतस्य तन्त्रराजभट्टारकस्य वचनानि मुद्रितयोः कुलार्णव-तन्त्रराजतन्त्रयोर्नोपलभ्यन्ते।

३८ नित्याषोडशिकार्णवपरिपठितचतुष्षष्टितन्त्रेषु लक्ष्मीधरेण भास्कररायेण च—" पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरम्। तन्त्रं वैशेषिकं ज्ञानं वीरावलि तथा परम्॥" इत्येष श्लोकः पठ्यते। वामकेश्वरीमतविवरणे प्राचीनायां बडोदामातृकायां चैष नास्ति। कुलचूडामणिनिगमे तु वर्ततेऽसौ। अतोऽत्रत्यानि पूर्वपश्चिमादीनि तन्त्राणि न प्राचीनानि। वामकेश्वरीमतपठितानि नामान्येव प्राचीनानि मन्तव्यानि।

३९ अश्वक्रान्ताविभागे सिद्धातन्त्रं दृश्यते। तत्र नामदानविधेर्वर्णनं संभाव्यते, न प्राचीने सिद्धामततन्त्रे, प्राचीनेषु तन्त्रेषु शब्दानामेतादृशानामप्रयोगात्। अथवा शाम्भवे सिद्धमतके (I ५. ९९-१००) इति शाम्भव-सिद्धमतसम्प्रदाययोर्वाचकौ, न ग्रन्थनामनी।

४० नित्याषोडशिकार्णवतन्त्रनामावल्यां क्रियोड्डीशतन्त्रं पठ्यते।

४१ अश्वक्रान्ताविभागे शिवतन्त्रं पठ्यते। शिवतत्त्वमस्मादभिन्नं भिन्नं वेति विचार्यम्।

प्राचीनाः सन्ति । पाशुपतानां लकुलीशपाशुपतानां च आचार्याणां विस्तृता नामावली सिद्धान्ताश्च पुराणादिषु लकुलीशपाशुपतग्रन्थेषु चोपलभ्यन्ते । पाशुपतसूत्र-कौण्डिन्यभाष्य-गणकारिकाप्रभृतयो ग्रन्थाश्च के[४२]चन दृश्यन्ते । दशाष्टादशभेदभिन्नौ शैवरौद्रागमौ २०७ संख्याकोपागमसहितौ रौरवा[४३]गमप्रथमभागधृतसारिण्यां प्रदर्शितौ । शिवस्य पञ्चवक्त्रेभ्यो निर्गतेषु पञ्चस्रोतस्सु ऊर्ध्ववक्त्रान्निर्गतो विभागोऽयं सिद्धान्तनाम्ना प्रसिद्धः । पूर्ववक्त्रतोऽष्टाविंशतिर्गारुडानि तन्त्राणि, दक्षिणवक्त्रतश्चतुष्षष्टिभैरवागमाः, पश्चिमवक्त्रतो भूततन्त्राणि, उत्तरवक्त्रतश्च चतुर्विंशतिर्वामतन्त्राणि विनिर्गतानि । एतानि सर्वाण्यागम[४४]पञ्चकनाम्नाऽभिधीयन्ते । एतेभ्य आगमग्रन्थेभ्योऽतिरिक्ता उग्रज्योतिरादीनामष्टादशपद्धतिकाराणां भाष्यकारवृत्तिकारादीनां च ग्रन्थाः समुपलभ्यन्ते । बौद्धतन्त्राणां विशालो ग्रन्थराशिर्भोटभाषायामनूदित उपलभ्यते, प्रकाशिताश्च केचन ग्रन्थाः संस्कृतभाषामया अपि । श्रीकण्ठ्यां संहितायां चतुष्षष्टिभैरवागमाः परिगणिताः, समुपस्थापिता चान्या चतुष्षष्टितन्त्रनामावली नि[४५]त्याषोडशिकार्णवे । एतदतिरिक्तं कुल-क्रम-त्रिकाद्यागमानां विशालं वाङ्मयं तन्त्रालोकतद्विवेकयोः, स्पन्दप्रदीपिका-महार्थमञ्जरीपरिमलसदृशेषु च ग्रन्थेषु [४६]समवलोक्यते । सर्वमेतत् प्राचीनं तान्त्रिकं वाङ्मयम् ।

सर्वोल्लासतन्त्रोद्धृततोडलोत्तरतन्त्रानुसारिणी चतुष्षष्टितन्त्रनामावली, महासिद्धसारतन्त्रोद्धृता विष्णुक्रान्ता-रथक्रान्ता-अश्वक्रान्ताविभागेषु विभक्ता त्रिविधा चतुष्षष्टितन्त्रनामावली चार्वाचीनाऽभिमन्तव्या । आसु नामावलीषु पूर्ववर्णितानां प्राचीनानां तन्त्राणामुल्लेखो विरल एव दृश्यते । प्राचीनासु तासु नामावलीषु तोडलोत्तरं महासिद्धसारं वा तन्त्रं कुत्रापि न दृश्यते, का कथा तर्हि तयोर्वर्णितासु नामावलीषु परिगणितानां तन्त्राणाम् ! शक्तिसंगमतन्त्रस्य रथक्रान्ताविभागे परिपाठात्, प्रायोऽर्वाचीनानामेव तन्त्राणामत्रोद्धरणात्, तन्त्रावतारकालस्य परवर्तिनोऽत्र स्पष्टं प्रतिपादनाच्चार्वाचीनेषु तन्त्रेषु समावेशे सत्यपि नास्य हीयते महत्त्वम् । अत्र हि लुप्तप्रायाणां परःशतानां सम्प्रदायानां मत-क्रम-मार्गादीनां च सूक्ष्ममन्तरं स्पष्टीक्रियते, विशालस्य तान्त्रिकवाङ्मयस्य च परिचयः समुपस्थाप्यते । एतच्चाग्रे स्पष्टीभविष्यति ।

शास्त्रविस्तरः

अत्र कालीखण्डे प्रदर्शितं यत् सुन्दरीद्वारि ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः, शिक्षा-कल्प-व्याकरण-छन्दो-ज्योतिर्निरुक्तमिति षडङ्गकम्, षड्दर्शनानि, कादिहादिमतेन अष्टादशभेदाः षडाम्नायाः,

---

४२ श्रीमता डा० कान्तिचन्द्रपाण्डेयमहोदयेन शैवदर्शनबिन्दुनामके वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशिते ग्रन्थे लकुलीशपाशुपतग्रन्थानां परिचयः २९-३३ पृष्ठेषु प्रदत्तः ।

४३ ग्रन्थोऽयं पाण्डिचेरीतः १९६१ ई. वर्षे श्री. एन. आर. भट्टमहोदयेन सम्पाद्य प्रकाशितः ।

४४ नेपालराजकीयपुस्तकालयतः प्रकाशिते (२०२३ वि. वत्सरे) वैरोचनकृतप्रतिष्ठालक्षणसारसमुच्चये (२. १०७-१३२) आगमपञ्चकमेतद् वर्णितम् ।

४५ नित्याषोडशिकार्णवस्था चतुष्षष्टितन्त्रनामावली विभिन्नेषु तान्त्रिकमतेषु तदानीन्तनेषु प्रथितानि कानिचन तन्त्राणि समाहृत्य निष्पादितेति नित्याषोडशिकार्णवोपोद्घाते (पृ. २३-३१) द्रष्टव्यम् ।

४६ सर्वेषामेतेषां मतमतान्तराणां ग्रन्थग्रन्थकाराणां च विस्तृतः परिचयोऽस्माभिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतो योगतन्त्रग्रन्थमालायां प्रकाशयिष्यमाणे लुप्तागमसंग्रहद्वितीयभागोपोद्घाते प्रदास्यते ।

षट्शाम्भवम्, उपवेदचतुष्कं च तिष्ठन्ति। तत्र [४७]ऋग्वेदाद् धनुर्वेदस्य, यजुर्वेदादायुर्वेदस्य, सामवेदाद् गान्धर्ववेदस्य, अथर्ववेदाच्च निग[४८]माख्यस्योपवेदस्य प्रादुर्भावो भवति। पुराणानि, उपपुराणानि, उपनिषदः, सूक्तादीनि, वार्तिकद्वयम्, तन्त्रराजद्वयम्, शक्तिसंगमाख्यं तन्त्रमित्यादीन्यपि सर्वाण्यत्र विराजन्ते (I २. ७३-१००)। अग्रे–" पुराणन्यायमीमांसासांख्यपातञ्जलस्तथा। वेदान्तो व्याकृतिर्देवि धर्मशास्त्राङ्गमिश्रिताः ॥ छन्दो ज्योतिर्वैद्यकादि विद्या एताश्चतुर्दश। " (I ५. २०-२१) इत्येवं चतुर्दश विद्याः प्रतिपादिताः। ताराखण्डेऽपि " आगमे बहवो भेदाः " (II ५. ४८-५४) इत्यादिना त इमे भेदा वर्णिताः।

आगमग्रन्थसंख्या

अत्रैव–" एकं दशं शतम् " इत्यादिना " पारे परार्धं च तथा चातः संख्या न विद्यते। अनन्तं तत्तदग्रे स्यादित्युक्तं कालिकागमे ॥ दशोत्तरक्रमाज्ज्ञेया संख्या चैषा महेश्वर " (II १. ४-१०) इत्यन्तेन ग्रन्थेन कालिकागमानुसारम्, " एकं दश शतम् " इत्यादिना " दशोत्तरक्रमेणैव संख्या लक्षणसंग्रहे " (II १. ११-१३) इत्यन्तेन ग्रन्थेन च लक्षणसंग्रहानुसारं दशोत्तरगुणनेन संख्या व्याख्याता। " द्वात्रिंशदक्षरं यत्र स ग्रन्थेति निगद्यते। सैव श्लोकेति गदितस्तारानेत्रसमुद्भवः ॥ " (II १. १४) इत्यत्र च श्लोकस्य परिमाणमुत्पत्तिश्च वर्णिते। अत्रैव –" पञ्चाशद्वै महा[४९]भारो ग्रन्थसंख्या प्रकीर्तिता " (II १. ११) इत्येवमागमवाङ्मयस्य विस्तरः परिसंख्यातः। अस्मिन् विस्तृते आगमवाङ्मये च या[५०]मल-डामर-तन्त्र-अर्णव-चूडामणि-चिन्तामणि-कल्पतरु-कल्प-कामधेनु-पारिजात-अमृत-दर्पण-सोपान-संहिता-उपसंहिता–मूलावतार-उपपुराण-रहस्य-बृहद्रहस्य–उज्जालक-हृदय-कौमुदी-चन्द्रिका–पातञ्जल-सारस्वत–उपतन्त्र–बृहत्तन्त्राणां समावेशो भवति (II १. १५-२१)। पञ्चाशन्महाभारविस्तृतेऽस्मिन् वाङ्मये षड्[५१]विंशतिमहाभारमितं वाङ्मयं

---

४७ चरणव्यूहसूत्रे चतुर्थखण्डे मधुसूदनसरस्वतीविरचिते प्रस्थानभेदाख्ये लघुग्रन्थे च ऋग्वेदस्य आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य अर्थशास्त्रम् उपवेदत्वेन स्वीक्रियते। " अर्थशास्त्रमपि बहुविधम्—नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपशास्त्रं चतुष्षष्टिकलाशास्त्रं च " इति प्रस्थानभेदकारा आहुः। एवं चाथर्ववेदस्य शस्त्रशास्त्राणि स्थापत्यवेदो वा उपवेद इति वचनमपि समञ्जसम्। आयुर्वेदविदस्तु अथर्ववेदस्योपवेदमायुर्वेदमाहुः।

४८ निगमागमशब्दौ प्रायः साम्प्रतं वैदिकवाङ्मयस्य तान्त्रिकवाङ्मयस्य च वाचकौ। अन्यत्र शिवोपदिष्टानि तन्त्राण्यागमपदेन, शक्त्युपदिष्टानि च निगमपदेनाभिधीयन्ते (१३ संख्याकाऽत्रत्या टिप्पणी द्रष्टव्या)। शक्तिसंगमतन्त्रे तु निगमागमशब्दौ पर्यायत्वेन प्रयुक्तौ। तथा च निगमाख्योपवेदस्येत्यस्य तन्त्रशास्त्रस्येत्यर्थः। " निगमाद्याम एव च " (IV ८.११०) इत्यत्रापि निगमशब्दस्तन्त्रशास्त्रपर्यायत्वेन प्रयुक्तः। आगमग्रन्थसंख्या (II १. १०), आगमसन्दोहः (II १. २३), आगमे बहवो भेदाः (II ५.४८) इत्यादिषु च स्थलेष्वागमशब्दस्तस्मिन्नेवार्थे प्रयुक्तः।

४९ कालीखण्डे—" पञ्चाशद्वै महाभागे निगमः " (I २. ७९) इति पाठो लक्ष्यते। अत्र ' महाभागे ' इत्यपपाठः, ' महाभारो ' इति हि पाठेन भाव्यम्। अत्र निगमशब्द आगमपर्याय एव।

५० अत्रत्या यामल-डामरादयः शब्दास्तदन्तानां रुद्रयामल-भूतडामरादीनां तन्त्रग्रन्थानां विभागेष्वेतेषु विभक्तस्य विशालस्य तान्त्रिकवाङ्मयस्य च बोधकाः सन्ति।

५१ " तत्त्वसंख्यामहाभारः " (I २. ८४) इति, " षट्त्रिंशत्संख्यकं भुवि " (II १.२२) इति च मुद्रितः पाठो न समञ्जसः, षष्टिमहाभारसंख्यापत्तेः। अग्रे " षड्विंशति भुवि स्थितम् " (III ३. ९३) इति स्पष्टं प्रतिपादनात्।

भुवि, मनु (चतुर्दश) महाभारसंख्याकं स्वर्गलोके, दशमहाभारसंख्याकं च पाताले विराजते (II १. २२-२३)। तत्र स्वर्गे सुन्दरीगृहे, पाताले पद्मिनीगृहे, मर्त्यलोके च सिद्धानां नवनाथानां देवानामोघसन्निधौ सरस्वतीगृहे च क्रमात् तिष्ठति निगमाख्यं वाङ्मयमेतत् (I २.८३-८५) । अस्मिन् विस्तृते वाङ्मये च शैव-शाक्त-गाणपत्य-सौर-वैष्णव-महावीर-पाशुपत-वीरवैष्णव-वीरशैव-चान्द्र-स्वायम्भुव-पाञ्चरात्र-जैन-चीन-बौद्ध-कौल-अवधूत-दिव्य-गारुड-केरल-शाबरसम्प्रदायाः समाविशन्ति (II १. २४-३२; ५८. ५५-५६)। अग्रे (II २. १८-२१) शाबर-केरल-शैव-वैष्णव-सौर-गाणप-चान्द्र-स्वायम्भुव-चीनागमानां ग्रन्थपरिमाणं पद्ममात्रकमुक्तम् । नवलत्रर्बुदकोट्योऽङ्गमन्त्राः, त्रिंशन्निखर्वषड्-वृन्द--पञ्चत्रिंशत्पद्मपरिमाणाश्च मन्त्रा भवन्तीत्यप्यत्र प्रतिपादितम् । बिन्दुप्रस्तारभेदात्, अङ्गभेदात्, भाषा-भेदात्, देशभेदात्, सप्तपर्यायभेदात्, आगमभेदात्, आम्नायभेदात्, नाथसिद्धादिभेदाच्च तेषामानन्त्यं भवति । अत एव कालीखण्डे सागरवत् पर्यायाणां मतानां चानन्तता प्रोक्ता (I ५. ८-९) सुन्दरीखण्डे(III ३. ९०-९४) तु पञ्चाशन्महापद्मा ह्यागमग्रन्था ईरिताः। तत्रत्यानां मन्त्राणां संख्या च " त्रिंशन्निखर्वषड्वृन्दनवलत्रर्बुदकोटयः " प्रतिपादिता । भूर्लोकादिषु तेषां विस्तरस्तु पूर्ववदेवोक्तः ।

पर्यायसप्तकम्

सप्तपर्यायभेदात् तन्त्राणां मन्त्राणां चानन्तता भवतीत्यधुनैवोक्तम् । पर्यायसप्तकमेतच्चतुर्थे खण्डे विस्तरेण व्याख्यातम् । देश-काल-आम्नाय-विद्या-दर्शन-आयतन-आगमभेदेन सप्त पर्याया भवन्ति । कस्मिन् देशे क आचारः, कः क्रमः, को मार्गः, कानि तन्त्राणि ? सर्वमेतद् देशपर्यायविज्जानाति । कस्मिन् काले का विद्या कथं जाता किमात्मिका च सेति तत्तन्त्राचारयोगेन कालपर्यायवान् जानाति । कस्याम्नाये किमाचारः, किं रूपम्, किं वैशिष्ट्यम्, कति तन्त्राणि यामलादिकं चेत्याम्नायपर्याये प्रतिपाद्यते । का विद्या, किमाचारा, कलौ किं स्वरूपिणी, किं गुणा ? इत्यादीनां निर्णयो विद्यापर्याये विद्यते। किं दर्शनम्, किमाचारात्मकम्, कानि तन्त्राणि ? इत्येतेषां ज्ञानं दर्शनाख्यपर्यायेण भवति । किमायतनम्, कथं जातम्, कियत् तन्त्राणि, आचारः कीदृशः ? इत्येतेषां बोधकः पर्याय आयतनाख्यो भवति । को वाऽऽगमः, कथं जातः, किमाचारः, के मन्त्रा अङ्गमन्त्राश्च, पारम्पर्यं कीदृशम्, कियत् तन्त्राणि, कीदृशी च सिद्धिरत्र प्राप्यते ? इत्येतेषां पदार्थानां निर्णायको भवत्यागमाख्यः पर्यायः । कादिहादिमतत्वेन सर्वमेतद्विभज्यते, यतो हि कादिपर्याये हादिपर्याये च क्वचिद् भेदो भवति (IV २. ३३-४६) ।

पर्यायनिर्णयप्रकरणं प्रस्तुवता हि परमेश्वरेण शिवेन " कादिहादिमतत्वेन देशानां द्विविधा गतिः " इत्युक्त्वा कादौ हादौ च सम्प्रदाये पृथक् पृथक् षट्पञ्चाशद्देशा नामग्राहं वर्णिताः, एषा देशद्वयव्यवस्था [५२]पूर्वतन्त्रे प्रकीर्तिता इति च चर्चितम् (IV २. १५-३३)। अग्रे देशद्वयव्यवस्था तन्त्राणां नामानि च अङ्ककोशे पूर्वं प्रकाशितानि (IV ५. ५६-५७) इति भाषितम् । अत्रापि तृतीये खण्डे षट्पञ्चाशद्देशानां नामानि तत्सीमासहितानि प्रतिपादितानि सन्ति (III ७. १५-७२) । एतदाधारो देशाख्यः पर्यायः ।

१. देशपर्यायः

अयं देशपर्यायः प्राक्-प्रत्यग्-दक्षिण-उदग्भेदेन, केरल-काश्मीर-गौड-विलासभेदेन च चतुर्धा विभज्यते । अङ्गादिमालवान्तं केरलः, महदेशं समारभ्य नेपालान्तं काश्मीरः, सिलहट्टं समारभ्य सैन्धवान्तं

५२ ' शक्तिसंगमे स्मृता ग्रन्थाः ' इति प्रकरणे पूर्वतन्त्रविवरणं द्रष्टव्यम् ।

गौडः सम्प्रदायः प्रवर्तते । विलासाख्यश्च सम्प्रदायः सर्वगः परिकीर्तितः । तत्र देशपर्याये चीने शतं तन्त्राणि, उपतन्त्राणि च सप्त भवन्ति । द्रविडे विंशतन्त्राणि पञ्चविंशतिश्च उपतन्त्राणि, जैनेऽष्टादश तन्त्राणि विंशतिश्च उपतन्त्राणि, केरले षष्टितन्त्राणि पञ्चाशदुपतन्त्राणि, काश्मीरे शततन्त्राणि दश चोपतन्त्राणि, गौडे द्विसप्ततन्त्राणि षोडश चोपतन्त्राणि सन्ति । उक्तासु चतुर्षु दिक्षु ऊर्ध्वां पश्चिमीं षष्ठीं च पातालसंज्ञिकां परिगणय्य सम्पन्नेषु षडाम्नायेषु सकल-निष्कलक्रमेण, शाक्त-शैवक्रमेण च "येन वक्त्रेण यज्जप्तं स एवाम्नाय ईरितः। समेदा त्रिपुरा देवि तथा सम्पत्प्रदा शिवे ॥ महेश्वरं तत्पुरुषं शैवं दर्शनमेव च । पूर्वाम्नायो महेशानि दक्षिणं शृणु यत्नतः ॥" (IV ५. ५९-६०) इत्येवमादिना विभिन्नानां सम्प्रदायानां तदुपास्यानां देवतानां च समावेशो विहितः । "देशपर्यायभेदेन सर्वं संकथ्यते ध्रुवम्" इत्यादिना "देशाभिधः समाख्यातस्तद्देशस्था तु देवता" (IV ५.४०-७२) इत्यन्तेन ग्रन्थेन सोऽयं देशाख्यः पर्यायो व्याख्यातः ।

२ कालपर्यायः ।

"अथ प्रवक्ष्ये देवेशि कालपर्यायसाधनम्" (IV ५.७३) इत्यादिना आपटलान्तम्, षष्ठे च पटले सम्पूर्णे सोऽयं कालपर्यायो व्याख्यातः । अत्र हि प्राधान्येन दशविद्यानां गणेशादीनां दशावताराणां च जयन्तीः समुपवर्ण्य दक्ष-वामभेदेन समुचिते काले दश विद्यानामन्यासां च देवतानां समाराधनं कर्तव्यम्, तदर्थं च श[53]कुनविचारोऽपि विधेय इत्युक्तम् । ततः—"कालपर्यायमार्गे तु तन्त्राणां गणनां शृणु" (IV ६.९३) इत्यादिना आपटलान्तं कालपर्याये स्वीकृतानां तन्त्राणां परिसंख्या[54]नमेवं विहितम्—

शाक्ते कालपर्याये ६४ तन्त्राणि, ३२६ उपतन्त्राणि, ३०० संहिताः, चूडामणिशतम्, अर्णवानां नवकम्, डामराणां चतुष्टयम्, यामलानामष्टकम्, द्वे सूक्ते, पुराणषट्कम्, उपवेदा दिवाभिधम्, कक्षपुटीत्रयम्, विमर्षिणीत्रयम्, कल्पाष्टकम्, कल्पलताद्वयम्, चिन्तामणित्रयम् इत्येवं विस्तृतस्य वाङ्मयस्य समावेशो भवति ।

---

५३ शनिप्रदोषे शकुनविचारः (I ८. ९६-१०१), महाशकुनविचारश्च (IV ६. ८८-९३) अत्र वर्ण्यते ।

५४ तन्त्राणां परिसंख्यानमीदृशं म. म. श्रीगोपीनाथकविराजमहोदयैः 'तान्त्रिक साहित्य' इत्याख्यग्रन्थभूमिकायां २४-२५ पृष्ठयोः, डा० प्रबोधचन्द्रबागचीमहोदयैश्च 'कल्चरल हेरिटेज आफ इण्डिया' इत्याख्यस्य ग्रन्थस्य चतुर्थे खण्डे मुद्रिते 'इवोल्यूशन आफ दी तन्त्राज्' इति शीर्षके निबन्धे २२१-२२२ पृष्ठयोः क्रियते । एतच्च विवरणं नेपालराज्योपलब्धप्राचीनसंमोह(संमोहन)तन्त्राधारेण कृतम्, न तु मुद्रितेन संमोहनतन्त्रेणेति तत्रैव (पृ. २२१) टिप्पण्यां डा० बागचीमहोदया लिखन्ति । मुद्रितं संमोहनतन्त्रं नास्माभिरवलोकितम् । त्रिविधस्य संमोहनतन्त्रस्य परिचयः पूर्वमेव प्रदत्तः शक्तिसंगमचतुर्थखण्डविवरणावसरे । मुद्रितं संमोहनतन्त्रमेतेष्वन्यतमं भिन्नं वेति न वक्तुं शक्यते, किन्तु श्रीबागचीमहोदयैः 'स्टडीज इन दी तन्त्राज्' (पृ. ९६-१०१) इत्यत्र विस्तरेण विवृतं संमोहनतन्त्रं शक्तिसंगमचतुर्थखण्डादभिन्नमेवेति निभालयन्तु विपश्चितः । एवं च नैतत् कम्बुजशिलालेखे स्मृतं संमोहनतन्त्रं भवितुमर्हति ।

'तन्त्र साहित्य' इत्यत्र कृते विवरणे शैव-वैष्णव-गाणपत्य-सौरतन्त्राणां परिगणनं दृश्यते, शाक्तविभागीयानि तन्त्राणि नात्र समुपस्थापितानि । तथैव दृश्यते डा० बागचीकृते विवरणेऽपि । तैर्बौद्धतन्त्राणि पञ्चमे विभागे परिगणितानि । एष च विभागो न दृश्यते शक्तिसंगमतन्त्रस्य चतुर्थे खण्डे । शाक्तविभागश्चात्र सर्वप्रथमं परिगण्यते । परिगणिततन्त्रसंख्यास्वपि क्वचन वैभिन्न्यमवलोक्यते । पाठभेदप्रयुक्तमेतद्वैशिष्ट्यं स्यात् । प्रस्तुतं संमोहनतन्त्रं शक्तिसंगमचतुर्थखण्डादभिन्नमेवेति तथ्येन पूर्वमपरिचयादधुना च समयाभावादत्रत्यः पाठसंवादः पश्चात् कदाचिद् भविष्यति ।

शैवे कालपर्याये ३२ तन्त्राणि, ३२५ उपतन्त्राणि, संहितात्रयम्, अर्णव एकः, यामलद्वयम्, डामरत्रयम्, उड्डालकमेकम्, उड्डीशद्वयम्, कल्पाष्टकम्, संहिताष्टकम्, चूडामणिद्वयम्, विमर्षिणीद्वयम्, अवतारकमेकम्, बोधपञ्चकम्, सूक्तपञ्चकम्, चिन्तामणिद्वयम्, पुराणनवकम्, उपपुराणत्रयम्, कक्षपुटीद्वयम्, कल्पद्रुमत्रयम्, कामधेनुद्वयम्, सद्भावत्रयम्, तत्त्वपञ्चकम्, क्रमद्वयं च विराजन्ते ।

वैष्णवे कालपर्याये ७५ तन्त्राणि, २०५ उपतन्त्राणि, २० कल्पाः, संहिताष्टकम्, अर्णवमेकम्, कक्षपुटीपञ्चकम्, चूडामण्यष्टकम्, चिन्तामणिद्वयम्, उड्डालयुग्मम्, उड्डीशयुग्मम्, डामरद्वयम्, यामलमेकम्, पुराणपञ्चकम्, तत्त्वत्रयम्, बोधत्रयम्, विमर्षिणीत्रयम्, अमृत-तर्पण-कामधेनु-कल्पद्रुमाणामेकमेकं परिगण्यन्ते ।

सौरे कालपर्याये ३० तन्त्राणि, ११४ उपतन्त्राणि, संहिताचतुष्टयम्, उपसंहिताद्वयम्, पुराणपञ्चकम्, कल्पदशकम्, कक्षपुटीद्वयम्, तत्त्वानां त्रितयम्, विमर्षिणीपञ्चकम्, चूडामणिपञ्चकम्, चिन्तामणिद्वयम्, डामरमेकम्, यामलमेकम्, उड्डालपञ्चकम्, अवतारद्वयम्, उड्डीशद्वयम्, अर्णवत्रयम्, दर्पण-अमृतयोरेकैकं समावेशमर्हन्ति ।

गाणपत्ये कालपर्याये ५० तन्त्राणि, २५ उपतन्त्राणि, पुराणद्वयम्, अमृतद्वयम्, सागरत्रयम्, दर्पणत्रयम्, अमृतपञ्चकम्, कल्पनवकम्, कक्षपुटीत्रयम्, विमर्षिणीत्रयम्, तत्त्वयुग्मकम्, उड्डालयुग्मकम्, उड्डीशयुग्मकम्, चूडात्रयम्, चिन्तामणित्रयम्, डामरमेकम्, यामलमेकम्, पञ्चरात्राष्टकं च भवन्ति ।

एवं द्वयोः पटलयोः (५-६) देशकालपर्यायौ निर्वर्ण्य पुनरपि सप्तमे पटले २६ श्लोकेषु बटुकमतेन महामूर्तिमतेन च षडाम्नायदेवता व्याख्याताः, अयं कालपर्यायो देशपर्यायश्च कादिहादिमतयोः समान इति च प्रतिपादितम् ।

३ आम्नायपर्यायः

' आम्नायाख्यं शृणु प्रिये " (IV ७.२६) इत्यादिनाऽऽम्नायाख्यः पर्यायो वर्ण्यते । बाला पञ्चदशी षोडशी च पूर्वाम्नायप्रगोचराः सन्ति । एवमेवाग्रेऽपि प्रत्येकमाम्नायविभागे तास्ता देवताः प्रदर्श्य तन्त्राणामुपतन्त्राणां च संख्या एवं प्रदर्शिता—पूर्वाम्नाये तन्त्राणां चतुष्षष्टिः, उपतन्त्राणि च ६७० सन्ति । दक्षिणाम्नाये चतुश्शतं तन्त्राणि, ३७५ उपतन्त्राणि भवन्ति । यामलादं च कालपर्यायवदत्रापि भवति । पश्चिमाम्नाये षण्णवत्युपतन्त्राणि तन्त्राणि च सन्ति । उत्तराम्नाये ९२५ तन्त्राणि, ३६४ उपतन्त्राणि च विद्यन्ते । ऊर्ध्वाम्नाये चतुष्षष्टितन्त्राणि, पञ्चाशीत्युपतन्त्राणि च सन्ति । पातालाम्नाये १०५ तन्त्राणि, उपतन्त्राणां च नेत्रसप्तशती विद्यते । अयमाम्नायविभागो दीक्षाम्नायपदेनाभिधीयते (IV ७.३७) ।

प्रथमे खण्डे पञ्चाम्नाया वर्णिताः । तत्र केरल ऊर्ध्वाम्नायः, काश्मीरः पश्चिमाम्नायः, विलासाख्यो वैष्णवाख्यश्च दक्षिणाम्नायः, चैतन्याख्यः पूर्वाम्नायः, गौडश्च उत्तराम्नाय इत्युच्यते (I ४.६७-६८) । पूर्व-पश्चिम-दक्षिण-उत्तर-अधस् (पाताल)-ऊर्ध्वभेदेन षडाम्नायानां नामानि द्वितीये खण्डे (II ४.४-

वर्णितानि । ष[५५]डाम्नायमन्त्राणाम्, अ[५६]ष्टादशाम्नायमन्त्राणां चैकत्र (I ६.९७) चर्चा विद्यते। अन्यत्र च " षड्दर्शनस्य षण्मन्त्रा ऊर्ध्वाम्नाये प्रकीर्तिताः " (II ४.४) इत्युक्तम्।

४ विद्यापर्यायः

" समयाम्नायनाम्ना तु विद्याम्नायः प्रकीर्तितः " (IV ७. ३८-४७) इत्यादिना विद्यापर्यायः प्रतिपाद्यते। अयमपि षडाम्नायेषु विभज्यते। अत्र पूर्वं पूर्वाम्नायादिदेवताः परिगणय्य तन्त्राणामुपतन्त्राणां च संख्या प्रदर्शिता। तत्र पूर्वाम्नाये दश तन्त्राणि पञ्च उपतन्त्राणि, दक्षिणाम्नायेऽष्टौ तन्त्राणि नवसंख्योपतन्त्राणि, पश्चिमाम्नाये विंशति तन्त्राणि उपतन्त्राष्टकम्, उत्तराम्नाये शतं तन्त्राणि नवोपतन्त्राणि, ऊर्ध्वाम्नाये विंशतितन्त्राणि उपतन्त्रत्रयम्, पातालाम्नाये च नवतन्त्राणि उपतन्त्रद्वयं च सन्ति।

५ दर्शनपर्यायः

शततन्त्रसमन्वितमुपतन्त्राष्टकयुतं च शाक्तं दर्शनं पूर्वे, पञ्चाशत्तन्त्रसंयुतं पञ्चोपतन्त्रात्मकं च शैवं दर्शनं दक्षिणे, दक्षिणाचारसंकुलं तत्त्व(३६)संख्यकतन्त्रसमन्वितं तत्त्वसंख्यकोपतन्त्रयुतं च वैष्णवं दर्शनं पश्चिमे, तन्त्रसप्ततिसंयुतमुपतन्त्रत्रयमण्डितं च गाणपं दर्शनमुत्तरे, तन्त्रद्वादशसंयुतं दशोपतन्त्रयुतं च सौरं दर्शनमूर्ध्वे, शततन्त्रसमायुक्तं त्रिषष्ट्युपतन्त्रराजितं च बौद्धं दर्शनं पाताले आम्नाये प्रतितिष्ठति। हादिमतानुसारेण विभाग एष प्रदर्शितः। कादिमतानुसारं च शैवं दर्शनं पूर्वे, वैष्णवं दक्षिणे, गाणपं पश्चिमे, सौरमुत्तरे, शाक्तं च ऊर्ध्वाम्नाये समावेशमर्हति (IV ७.४८-५८)।

षड्दर्शनानि

अत्र—" शाक्तं शैवं गाणपत्यं वैष्णवं सौरबौद्धकम् " (I ५.६) इति, " शाक्तं शैवं वैष्णवं च सौरं गाणपमेव च। बौद्धं च देवदेवेशि दर्शनानि च षट् क्रमात्॥ " (II ४.३) इति, " शाक्तं वैष्णवशाम्भवम्। गाणपं सौरं बौद्धं च षड्दर्शनमितीरितम् " (II ५. ५३-५४) इत्येवं षड्दर्शनानि यानि प्रतिपादितानि तेषामेव तन्त्रोपतन्त्रवाङ्मयस्य परिगणनं विहितम्। एषु सर्वेष्वपि वचनेषु शाक्त-शैव-वैष्णव-गाणपत्य-सौर-बौद्धानां तान्त्रिकाः सम्प्रदायाः षड्दर्शनपदेनाभिहिताः। प्रथमे खण्डे षड्दर्शनानीमानि तारा-त्रिपुरा-छिन्नाभेदेन विवृतानि। तद्यथा—

शाक्तं शैवं गाणपतं सौरं वैष्णवमेव च॥
बौद्धं च देवदेवेशि ताराषड्दर्शनानि च।

---

५५ चतुर्थे खण्डे षडाम्नाया इमे विस्तरेण वर्णिताः। अन्येष्वपि खण्डेषु षडाम्नाया नवाम्नायाश्च वर्ण्यन्ते। षडाम्नायस्य मन्त्राणां प्रस्तारगणना (III १.१८२-१९१) इत्यत्र द्रष्टव्या।

५६ कादि-हादिप्रभेदेन द्विधा ह्याम्नायपद्धतिः प्रवर्तते। उत्तम-मध्यम-अधमभेदेन पुनरप्येते विभज्येते। विभागत्रयस्यास्य प्रत्येकं पुनरपि उत्तम-मध्यम-अधमभेदेन विभागे कृते कादौ हादौ च नव नव विभागाः, संकलनयाऽष्टादशविभागा आम्नायस्य भवन्ति। अष्टादशाम्नाया एते (II १. ११५-१२३; ४. १-१४; IV ५. ४१-४२) इत्यत्र वर्ण्यन्ते।

वैदिकं चैव सौरं च गाणपत्यन्तमेव च ॥
बौद्धं तु देवदेवेशि त्रिपुरादर्शनानि च ।
चान्द्रं स्वायम्भुवं जैनं चीनं नीलं महेश्वरि ॥
छिन्नाषड्दर्शनान्येव कीर्तितानि त्रिधा शिवे । इति ।
(I २.८५-८८)

अत्र ताराषड्दर्शनानि पूर्वोक्तान्येव । त्रिपुराषड्दर्शनेषु वैदिकसम्प्रदायस्य आवापः, वैष्णवसम्प्रदायस्य चोद्वापः क्रियते । गाणपत्यन्तपदेन हि तत्र शाक्तशैवगाणणानां ग्रहणं भवति । अत्र वैदिकमतेन सह बौद्धमतमप्यङ्गीक्रियते । छिन्नाषड्दर्शनेषु पञ्चैव परिगणितानि । बौद्धं मतं तत्र संस्थाप्य षड्दर्शनसंख्या पूरयितुं शक्यते । षड्दर्शनस्य षण्मन्त्राणामत्रोर्ध्वाम्नाये समावेशः कृतः (II ४.४), तासु तासु दीक्षासु दशविद्याप्रभेदजा एते मन्त्रा द्रष्टव्याः श्रोतव्याश्चेत्यपि तत्र (I ६.९८) प्रतिपादितम् ।

६ आयतनपर्यायः

आयतनपर्यायो नैवात्र कुत्रापि व्याख्यातः । " पञ्चायतनवद् भवेत् " (IV ७.५३) इत्युक्त्या स्मार्तः [५७]पञ्चायतनविभागोऽत्र स्मृतः स्यादिति संभाव्यते । अथवा कादिमतानुसारं प्रदर्शिते दर्शनपर्याये पञ्चैव दर्शनानि व्याख्यातानि । तान्येव पञ्च आयतनविभागत्वेन स्वीकर्तव्यानि । एतदनु दिव्याम्नाय-विद्याम्नाय-सिद्धाम्नाय--रत्नाम्नाय (महाम्नाय)-मण्डलाम्नाय-रसातलाम्नाय [५८]पञ्चकृत्याम्नाय- कालिकाम्नायाः (IV ७.५९-१५६) बटुकाम्नायश्च (IV ७.१६१-१६५) विस्तरेण प्रतिपादिताः । तेषु दिव्याम्नायस्य द्विविधं व्याख्यानं दृश्यते । सर्वे चेमे षडाम्नायेषु विभज्य व्याख्याता विशेषजिज्ञासुभिर्मूल एव द्रष्टव्याः ।

७ आगमपर्यायः

उपरि वर्णितो रत्नाम्नाय एव आगमाभिधः पर्यायोऽन्तिमः कथ्यते । (IV ७. ९३-९४) । तत्र चीनागमेऽक्षोभ्यतन्त्रयुतानि सप्त तन्त्राणि, बौद्धागमे एकविंशत्तन्त्राणि उपतन्त्राष्टकं च, जैनागमे

---

५७ पञ्चायतनशब्दोऽत्र बहुशः प्रयुक्तो दृश्यते, किन्तु स कुत्रापि न व्याख्यातः । पञ्चानामुपास्यदेवतानामायतनानां समाहारः पञ्चायतनमिति व्युत्पत्त्यनुसारं शक्ति-शिव-विष्णु-सूर्य-गणेशभेदेन भिन्नेषु शक्तिपञ्चायतनादिषु मध्ये शक्तिप्रभृतीनां तच्चतुर्दिक्षु चान्यासां देवतानामायतनान्यत्र स्थाप्यन्ते । देवप्रतिष्ठाग्रन्थेषु विस्तारोऽस्यावलोकनीयः । कृष्णानन्देन तन्त्रसारेऽपि वर्णितोऽयम् ।

५८ अत्र (IV ७. १३५-१४०) वर्णितः पञ्चकृत्याम्नायः कुलार्णवेऽपि भङ्ग्यन्तरेण व्याख्यातः । तथा हि—" पूर्वाम्नायः सृष्टिरूपः स्थितिरूपस्तु दक्षिणः । संहारः पश्चिमो देवि उत्तरोऽनुग्रहो भवेत् ॥ मन्त्रयोगं विदुः पूर्वं भक्तियोगं च दक्षिणम् । पश्चिमं कर्मयोगं च ज्ञानयोगं तथोत्तरम् । पूर्वाम्नायस्य संकेताश्चतुर्विंशतिरीरिताः । दक्षिणाम्नायसंकेताः पञ्चविंशतिरीरिताः । पश्चिमाम्नायसंकेता द्वात्रिंशत् समुदाहृताः । विदुः षट्त्रिंशदाम्नाये संकेताः श्रीमदुत्तरे ॥ ऊर्ध्वाम्नायस्य चैतानि न सन्ति कुलनायिके । साक्षाच्छिवस्वरूपत्वान्न किञ्चित् कर्म विद्यते ॥" (३.४१-४५) । अत्रोर्ध्वाम्नायविवरणे किञ्चिद्वैशिष्ट्यं दृश्यते, अन्यत् सर्वं समानमेव । पञ्चकृत्याम्नाया एते शाङ्करमठपञ्चकेनापि संबद्धाः सन्ति (IV ८.७५-९२) ।

षोडशतन्त्राणि उपतन्त्राष्टकं च, पाशुपतागमे नवतन्त्राणि षडुपतन्त्राणि च, कापालिकागमे तन्त्रमेकमुपतन्त्रचतुष्कं च, पाषण्डागमे तन्त्रत्रयमुपतन्त्रपञ्चकं च, पाञ्चरात्रागमे दशतन्त्राणि सप्तोपतन्त्राणि च, अघोरागमे दशतन्त्राणि उपतन्त्राष्टकं च, मञ्जुघोषागमे विंशत्तन्त्राणि त्रिंशदुपतन्त्राणि च, भैरवागमे शततन्त्राणि सप्तत्युपतन्त्राणि च, बटुकागमे द्विशततन्त्राणि अशीत्युपतन्त्राणि च, संजीविन्यागमे तन्त्रत्रयं सप्त चोपतन्त्रकम्, सिद्धेश्वरागमे दशतन्त्राणि उपतन्त्राष्टकं च, नीलवीरागमे सप्तदशतन्त्राणि, मन्त्रसिद्ध्यभिधागमेऽष्टादशतन्त्राणि, मृत्युञ्जयागमे विंशतितन्त्राणि द्वादश चोपतन्त्राणि, मायाविहारागमे तन्त्रत्रयमुपतन्त्रपञ्चकं च विश्वरूपागमे नवतन्त्राणि उपतन्त्रसप्तकं च, योगरूपागमे पञ्चाशत्तन्त्राणि उपतन्त्रदशकं च, विरूपागमे सप्ततन्त्राणि उपतन्त्राष्टकं च, यक्षिण्यागमे पञ्चतन्त्राणि उपतन्त्राणां सप्ततिश्च, निग्रहागमे शतं तन्त्राणि द्विशतं चोपतन्त्राणि विराजन्ते (IV ७.१०५-११६)।

पर्यायसप्तकनिरूपणप्रकरणसमाप्तौ (IV ७. १५७-१६०) देशपर्यायस्य पूर्वाम्नाये, कालपर्यायस्य दक्षिणाम्नाये, आगमपर्यायस्य पश्चिमाम्नाये, दर्शनपर्यायस्य उत्तराम्नाये, आयतनपर्यायस्य पातालाम्नाये, विद्यापर्यायस्य च ऊर्ध्वाम्नाये समावेशो विहितः, पर्यायाम्नायनाम्ना च ख्यापितोऽसौ। वचनेनानेन, उपरिवर्णितेषु पर्यायसप्तकेषु सर्वत्र आम्नायविभागस्य नियतोपस्थितिं च समीक्ष्य आम्नायविभागस्यैव प्राधान्यमिति यद्यपि प्रतीयते, तथापि दर्शन-आगमपर्याययोरपि स्वकीयं स्वरूपवैशिष्ट्यमवलोक्यते। देश-कालभेदेनापि तन्त्राणि भिद्यन्त एव। दशमहाविद्या[५९]नामन्यासां च विद्यानां प्रतिपादकानि तन्त्राण्यपि सन्त्येव।

अत्र सर्वत्र तन्त्रादीनां संख्यैव प्रदर्शिता, तेषां नामानि च परिगणितानि। तथापि तेनैव विस्तृततमस्यास्य तान्त्रिकवाङ्मयस्य स्वरूपमुन्मील्यते। अस्यां स्थितौ वाङ्मयस्यास्य परिमाणं पञ्चाशन्महापद्ममितं स्यादित्यत्र किमाश्चर्यमिव !

पर्यायसप्तकप्रकरणेऽस्मिन् कादिहादिमतयोः नैकवारमुल्लेख उपलभ्यते। तदधुना विवेच्यते।

कादि-हादि-कहादिमतविभागः

अत्र (IV ५. ४१) कादि-हादिमतत्वेन द्विधा चाम्नायपद्धतिः प्रतिपादिता। कादिमताऽपरनामधेयं तन्त्रराजतन्त्रं खण्डाष्टकसमन्वितं राजते। एतच्च पूर्वार्धोत्तरार्धयोः खण्डचतुष्टयात्मकयोर्विभक्तम्। तत्र पूर्वार्धं कादिसंज्ञम्, उत्तरार्धं च हादिसंज्ञकम् (I १. ९-१०; II ५८. ७८-७९)। कालिकामनौ कादिवर्णः, सुन्दरीमनौ च प्रथमाक्षरत्वेन हादिवर्णो विद्यते (III ३. ५०)। अत्र ककारस्य ब्रह्मरूपत्वम्, हकारस्य शिवरूपत्वं च व्याख्याय काद्यं कालीमतम्, हाद्यं च सुन्दरीमतमिति प्रतिपाद्यते (II १. १२५; ५८. ८१)। 'ब्रह्मरूपे महाचारे न दिवा न निशा प्रिये (II १. १२६-१४६) इत्यादिना व्याख्यातमनयोः स्वरूपं वैलक्षण्यं च, " ककारो ह्यादिरूपस्तु हकारस्त्वन्त्यगो भवेत " (II ५. ३९-४७),

---

५९ तानि चात्र द्वितीये खण्डे वर्णितानि। तद्यथा—" प्रतिशक्तौ च तन्त्राणि षष्टि वेदान्तगानि च॥ सूक्तान्यपि तथा सन्ति स्मृतिश्रुत्यादिकं तथा। षडाम्नाये महादेवि तथा षड्दर्शनादिके॥ भिन्नभिन्नानि तन्त्राणि संहितादीन्यपि प्रिये। शैवे द्वात्रिंशत्तन्त्राणि चोपतन्त्राणि वै शृणु॥ शतत्रयं पञ्चविंशत्संख्यकानि महेश्वरि। असंख्यातानि चोक्तानि दशविद्यक्रमात् क्रमः॥" (२.२९-३१) इति।

" कादिर्विराट् शून्यरूपः ककारः परिकीर्तितः " (III ३. ५१-६६) इत्यादिनोद्घाटितं ककार-हकारयोः स्वरूपं च मूळ एवावलोकनीयम् । कादि[६०]-हादिमतत्वेन कादि-हादि-क्रमेण च पूर्वार्ध-उत्तरार्धात्मकमेतत् तन्त्रराजतन्त्रे विराण्म[६१]तनाम्ना प्रख्याप्यते । (I २. ९८-९९) । अन्यत्र (I ६. १२५) काद्यं कालीमतम् हाद्यं श्रीत्रिपुराख्यम्, कहाद्यं तारिणीमतमित्युक्त्वा तस्य व्याख्यानं च विहितम् । एतच्च ' कहरूपं शृणु प्रिये " (II ६. ३५) इत्यादिना आपटलान्तं व्याख्यातम् । प्रस्तुते छिन्नमस्ताखण्डेऽपि—" काद्यं मतं कादिमतं...महोग्रतारिणी स्मृता ।...तारा कहस्वरूपत्वान्महानीलसरस्वती " (IV १. २२-२६) इत्येवं मतत्रयमेतत् प्रतिपादितम् । अत्र कहाद्यं तारिणीमतम् महोग्रतारिणी च उत्तराम्नायराज्ञी प्रतिपादिता । अत एव –" कहेत्येवं महामन्त्रस्तूत्तराम्नायगोचरः " (II ५. ४०; ५८. ८०; IV १. २४; ५. १३२; ८.१९) इति तत्र तत्र उत्तराम्नायरूपत्वं तस्य व्याख्यायते । एवं च—" काद्यं कालीमतं देवि हाद्यं श्रीसुन्दरीमतम् । द्वयं मिलित्वा कहाख्यं कादिहादिमतद्वयम् ॥ " (II ५८. ८२) इत्यस्य व्याख्यानं पूर्वोक्तशक्तिसंगमतन्त्रपरकतया विधेयम् । अस्य माहात्म्यं च—" कहेत्येवं महामन्त्रो यस्य वाचि प्रवर्तते " (III ३. ६७-६८) इत्यादिना श्लोकद्वयेन प्रतिपादितम् । एकत्र (I १६. २०) कादि-हादि-कहत्वेन विभक्तानामूर्ध्वाम्नायानां निर्देशो विद्यते, न तु विवृतमेतत्प्रकरणम् । क्रमदीक्षायां वर्णितः कादि-हादि-कहादिविभागो दीक्षाप्रकरणे व्याकरिष्यते ।

कादिक्रमानुसारं शक्तिज्ञानमेव सर्वातिशायि । सर्वाणि निगमागमज्ञानानि समभिव्याप्य तद् राजते । तच्च परं परात्परमिति द्विधा विभज्यते, हादिमत-कादिमते इति च तयोर्नामनी स्तः (I ६. १२३-१२५) । एतच्च विभागद्वयम्—" अत एव महेशानि कादिहादिमतद्वयम् " (II ३. १३), " कादिहादिमतेनैव द्विधात्वं परिकीर्तितम् " (III ४. १५) इत्यादिना बहुषु स्थलेषु विव्रियते । " वर्णसाम्यान्मन्त्रसाम्यात् कादिहादिमतं महत् " (II ५८. ८०) इति च तयोर्वैशिष्ट्यं प्रतिपाद्यते । " हादौ नवविधत्वं च कादौ नवविधत्वकम् (IV ५. ४२) इत्यत्र सूचित आम्नायानां नवविधो विभागो द्वितीयखण्डे चतुर्थपटले व्याख्यातस्तत्रैव द्रष्टव्यः । कादि-हादिमतयोर्मुख्याङ्गमन्त्राश्चतुर्थे खण्डे प्रथमे पटले ९-४६ श्लोकेषु ग्रन्थ एवावलोकनीयाः । तृतीये खण्डे एतयोरानन्दभैरवाद्याः सम्प्रदाया हाद्येऽन्तर्भवन्ति (III १. ७७) इति प्रतिपाद्य " लोपायां तु हकारो हि " (III ३. ५७) इत्येवं हादिविभाग एव लोपामुद्रानाम्ना प्रथित इत्युक्तम् । अन्यत्र (III ४. १५-१८) कादि-हादिमतयोः कामराज-लोपामुद्राख्यं नामान्तरमालिख्य कादिषट्क-लोपादिषट्कभेदेन द्वादश प्रस्तारा व्याख्याताः । एतच्च प्रस्तारप्रकरणे भविष्यति । दीप्तानित्याप्रकरणेऽपि (III १६. ६४-६५) काम[६२]राज-लोपामुद्राख्यं विभागद्वयं स्मृतम् ।

---

६० कादिहादिमत-कादिहादिक्रमशब्दयोः पृथक् प्रयोगोऽत्र स्वारसिको मन्तव्यः । मतशब्दो हि सम्प्रदायस्य वाचकः, क्रमशब्दश्च तस्मिन् मते पूजन-पात्रासादनादिकर्मसु स्वीकृतस्य विशिष्टस्य विधेः । तथा च शक्तिसंगमतन्त्रे कादिहादिमतयोस्तत्र प्रतिपादितयोः क्रमयोश्च वर्णनं सुविशदं वर्तत इति हि वचनस्य अस्याभिप्रायो नेतव्यः । मत-क्रमशब्दौ प्राचीनयोस्तान्त्रिकसम्प्रदाययोरपि वाचकौ स्तः, किन्तु तयोर्नात्र कश्चन संबन्धोऽन्वेषणीयः । दिव्यौघ-परम्परायां प्रादुर्भूतानि मतानि, सिद्धौघ-मानवौघपरम्परायां च प्रादुर्भूताः क्रमा मार्गाश्चेत्यपि विभागः कर्तुं शक्यते ।

६१ विराण्मतविषये ११ संख्याका टिप्पणी द्रष्टव्या ।

६२ शक्तिसंगमतन्त्रे प्रायः सर्वत्र कादि-हादि-कहादिशब्दाः कालीमत-सुन्दरीमत-तारिणीमतानां बोधकाः सन्ति । सम्प्रदायेष्वेतेषु काली, सुन्दरी, तारा च यथाक्रमं प्राधान्येनोपास्यन्ते । कादिः कामराजः, हादिर्लोपेति विभागो वटेशसंमत्याऽत्र प्रदर्शितः (II १. १३२-१३३) । एतौ कामराज-लोपामुद्राशब्दौ त्रिपुरासम्प्रदायसंबद्धौ मन्तव्यौ । नानयोः पूर्वोक्तेन विभागेन कश्चन संबन्धः । कामराजदृष्टा विद्या कादिनाम्ना, लोपामुद्रादृष्टा च हादिनाम्ना प्रथते ।

प्रथमे कालीखण्डे (I ५. ४-२१) इत्यत्र, द्वितीये ताराखण्डे च " कलौ कादिमतं पुण्यम् " (II ५. ४७) इत्यादिना आपटलान्तं हादिप्रभृतीनां मतानामागमानां दर्शनानां धर्मशास्त्रादीनां च प्रपञ्चः कादिमतमूलक एवेति प्रतिपाद्य कादिमतस्य माहात्म्यातिशयो वर्णितः । सर्वेषां शाबराणामन्येषां च मन्त्राणां फलदात्री कालिका, वरदानाधिकारो हि कालिकायां व्यवस्थितः, काली चेयं कादिमतप्रतिपाद्या, अतः कादिमतस्य वैशिष्ट्यं समुचितमेव । अत्रोपसंहाररूपेण--"एतत्कथाविस्तरस्तु कादिहादिविनिर्णये । पूर्वं विस्तरतो देवि मया तत्परिकीर्तितम् ॥ " (I ६. १२७-१२८) इत्येष श्लोको दृश्यते । अन्यत्र च— " कालीसुन्दर्यन्तरं तु यः पश्यति महेश्वरि । स पापिष्ठो महादुःखी रौरवं नरकं व्रजेत् ॥ " (II ५८. ७५-७८) इत्यादिना कालीसुन्दर्योरभेददर्शकस्यैव कादि-हादिमतयोरधिकारो वर्णितः । तदेतौ कादि-हादिमतौ विभागत्रयमापद्येते । तद्यथा—

केरले कालिका प्रोक्ता काश्मीरे त्रिपुरा मता ।
गौडे तारेति संप्रोक्ता सैव लोकोत्तरा भवेत् ॥
हादौ त्रितयमेतद्धि संक्षेपेण प्रकीर्तितम् ।
अथ कादौ केरले तु त्रिपुरा सा प्रकीर्तिता ॥
काश्मीरे तारिणी बाला गौडे काली प्रकीर्तिता । इति ।
(I ५. २४-२६)

प्रकरणस्यास्य वैशद्याय केरल-काश्मीर-गौडसम्प्रदाया व्याख्यायन्ते ।

केरलादित्रिविधसम्प्रदायः

" केरलश्चैव काश्मीरो गौडमार्गस्तृतीयकः । षट्पञ्चाशद्देशभेदात् सर्वत्र व्याप्य तिष्ठति ॥ अष्टादशसु देशेषु...काश्मीराख्यः क्रमः शुभः ॥ " इत्येवं प्रथमे खण्डे (४. ३-६) केरलादिसम्प्रदायत्रयस्य विवरणं दृश्यते । चतुर्थे खण्डे तु—" केरलश्चैव काश्मीरो...सर्वगः परिकीर्तितः ॥ " इत्येवं केरलादिसम्प्रदायचतुष्टयं विवृतम् । तत्र षट्पञ्चाशद्देशा नामग्राहं तृतीये (७. १५-७३), चतुर्थे च (२. १६-३३) खण्डे व्याख्याता इत्युक्तमेव । ग्रन्थस्यास्य खण्डत्रयसम्पादकेन श्रीमता डा. विनयतोषभट्टाचार्यमहोदयेन स्ववक्तव्ये देशप्रस्थ-विवरणात्मके (III पृ. ६-८) समालोचितास्ते इति नात्र प्रयत्यते । चतुर्थे खण्डे व्याख्यातो विलासाख्यः सम्प्रदायः पूर्वोक्ते प्रथमखण्डोद्धरणे न दृश्यते, न चान्येष्वपि स्थलेष्वविनाभावितया तस्य सर्वत्रोपस्थितिर्भवति सम्प्रदायत्रयेण सह इति स पृथगेव विवरिष्यते । हादि-कादिक्रमेण विभक्तस्य सम्प्रदायत्रयस्य परिभाषा उपर्युक्तयोरुद्धरणयोः सूचिता । तदेतस्य विस्तरः प्रथमे खण्डे सप्तमे पटले दृश्यते ।

अत्र—" मेधा[६३]दीक्षायुतो देवि केरलः परिकीर्तितः । षट् शाम्भवः प्रश्नयुतस्तथा चाष्टाष्टकान्वितः ॥ " इत्येवं लक्षणं विधाय केरलसम्प्रदायस्य ऋक्केरली, यजुःकेरली, सामकेरली, अथर्वकेरली

अनयोर्विद्ययोरारम्भः ककारेण हकारेण च भवतीति तथा उच्येते ते । प्रपञ्चसारे सौन्दर्यलहर्यां चोभे विद्ये समुद्धृते । नित्याषोडशिकार्णवे कादिविद्या, योगिनीहृदये च हादिविद्या समुद्धृता षड्विद्या अर्थाश्च तस्याः प्रकाशिताः । भास्कररायेण वरिवस्यारहस्ये कामविद्यासमुद्धारस्तस्या बहुविधाश्चार्थाः प्रकाशिताः । दिव्यौघ-सिद्धौघ-मानवौघभेदेन भिन्नस्य कामराजसन्तानस्य लोपामुद्रासन्तानस्य च वर्णनं नित्याषोडशिकार्णवोपोद्घाते (पृ. ९९-१०१) द्रष्टव्यम् ।

६३ मेधादीक्षादयः शब्दा अग्रे दीक्षादिप्रकरणेषु व्याख्यास्यन्ते ।

चेति चत्वारो भेदाः प्रदर्शिताः। ततोऽथर्वकेरलीयान् बहून् भेदान् व्याख्याय शाक्त-शैव-वैष्णव-सौर-गाणपत्य-बौद्धमतेषु पूजनविधि-पूजनद्रव्ययोः किमपि वैशिष्ट्यं प्रतिपाद्य फलश्रुतिरस्य प्रकरणस्य समुन्मीलिता (७. २-१६) ततः—"ऊर्ध्वाम्नायादिभिर्युक्तः काश्मारी शक्तिपातयुक्। अष्टाष्टकसमायुक्तः काश्मीरस्तत्त्वसिद्धियुक्॥" इत्येवं स्वरूपं निरूप्य काश्मीरसम्प्रदायस्यापि ऋक्काश्मीर-यजुःकाश्मीर-सामकाश्मीर-अथर्वकाश्मीराख्यान् चतुर्भेदान् विधाय पूर्ववदेव सर्वं विवृतम् (७. १७-२४)। अथ—"पूर्णाभिषेकसंयुक्तस्त्वष्टाष्टकसमन्वितः"-इति गौडलक्षणं विधाय, ऋग्गौडः, यजुर्गौडः, सामगौडः, अथर्वगौडश्चेति भेदान्, प्रदर्श्य पूर्ववदेव सर्वमुक्तम् (७. २५-३५)। एवं हादिमतेन सम्प्रदायं व्याख्याय ततस्तयैव पद्धत्या केरलादिसम्प्रदायत्रयस्य लक्षणभेदादयो विषया आपटलान्तं व्याख्याता मूळ एव दृष्टव्याः।

केरलादिसम्प्रदायानां दीक्षाधाराणि लक्षणानि (II १३. १८४-१८६) विस्तृतः परिचयश्च (II १४. ५०-६५) इत्यत्र परिशीलनार्हाणि सन्ति। अत्रैव महाकाश्मीर-पूर्वगौड-मध्यगौड-श्रीगौडलक्षणानि वर्तन्ते। अग्रे च—"शैवकेरलकं देवि शक्तिकेरलकं तथा। शिवशक्तिकेरलाख्यं त्रितयं परिकीर्तितम्॥ शुद्धोग्रगुप्तभेदेन नवधा केरलं भवेत्। नवधा चैव काश्मीरं गौडं च नवधा भवेत्॥" (II ४१. १८-१९) इत्येवं प्रत्येकं सम्प्रदायस्य नव नव भेदाः प्रदर्शिताः। ततः परम्—"केरले बहवो भेदाः" (III १. १५५-१७६) इत्यादिना पुनः केरलसम्प्रदायस्य बहवो भेदा व्याख्याताः। अत्र विलास[६४]सम्प्रदायस्यैव भेदः केरलः प्रतिपाद्यते। केरलभेदो द्रविडः। स एव चैतन्याख्यश्च कथ्यते। स्वामिसम्प्रदायवाचकाः सर्वे द्रविडेऽन्तर्भवन्ति। अत्रैव प्रसङ्गवशात् स्वरूप आनन्दश्चेति गौडसम्प्रदायत्वेन व्याख्यातौ। भवसिद्धः, हरः, सिद्धः, कलहट्टः, गोमुखः, विज्ञानी, पूर्वकेरलः, उत्तरकेरलः, दिव्यः, सत्यः, चैतन्यः, चिद्घनः, सर्वज्ञ इत्यादयः केरलसम्प्रदायस्य भेदाः सन्ति। अद्वैताख्यः, पूर्णनाथः, चिदम्बाख्य इति सम्प्रदायत्रयं द्रविडान्तर्गतत्वेन प्रतिपादितम्, अद्वैताख्यः सम्प्रदायोऽवधूतमतेऽपि समस्तीति च प्रोक्तम्। अत्रैव सरस्वत्यन्तग आनन्दान्तो नाथान्तो वा सम्प्रदायोऽन्तर्भवतीति प्रतिपाद्य ईशाख्यस्तु सम्प्रदायः केरलान्तर्गतो भवति, स एव माहेश्वर इति विश्वरूप इति चोच्यते इति निदर्शितम्। पात्रनिर्णयावसरे (I ४. २३-३७) विज्ञानकेरलस्य, ग्रहकालनिर्णयावसरे (III ११. ३६-४२) च व्यङ्कटेशाख्यकेरलस्य चर्चापि विद्यते। एतच्च भेदोपभेदवर्णनं शाङ्करदशनामिसम्प्रदायनिरूपणावसरे प्रतिपादितैर्भेदैः सह तुलनामभिकाङ्क्षति। सा च यथावसरं विधास्यते।

केरलभेदोपभेदवर्णनानन्तरम्—"सर्वदिव्यस्तु यः प्रोक्तः स काश्मीरेति कीर्तितः" (III १. १७७) इति काश्मीरसम्प्रदायस्य लक्षणान्तरं विधाय तस्याष्टौ भेदा उक्ताः। परिगणतया तु ते भावनाथः, क्रियानाथः, ज्ञाननाथः, चित्परः, चेतनेशः, सिद्धनाथः, ऋद्धिनाथ इत्येवं सप्त भवन्ति। ततः परमिदमप्यत्रैव प्रोच्यते यत् पूजनादौ पात्रासादनकर्मणि चैष सम्प्रदायत्रयस्य भेदोऽवलोक्यते, वस्तुतः सर्वमेकं प्रकीर्तितम्। गौडाख्यमार्गस्तथा काश्मीरसंमतं केरलेऽन्तर्भवतीत्यत्र न कोऽपि सन्देहावसर इति। अत एव द्वितीये खण्डे नानामतपरिगणनावसरे केवलं केरलस्यैव नाम दृश्यते, न गौडकाश्मीरयोः (१. २५)।

---

६४ विलासाख्यश्चैतन्याख्यश्च सम्प्रदायो द्रविडापरपर्यायकेरलसम्प्रदायान्तर्गतोऽत्र वर्ण्यते। "ऊर्ध्वाम्नायः केरलः स्यात्" (I ४.६७-६८) इत्येवं पञ्चाम्नायप्रकरणे च विलासचैतन्यौ पृथक् कथितौ। अन्यत्राप्येतौ पृथगेव मन्येते। एतच्चाग्रे स्पष्टीभविष्यति।

चतुर्थे खण्डे दिव्य-कौल वाममार्गभेदेन त्रिविधत्वं केरलस्य, भावदिव्य-क्रियादिव्यभेदेन द्विविधत्वं काश्मीरस्य, वाम-दक्षिणभेदेन च द्विविधत्वं गौडस्य सम्प्रदायस्य प्रोक्तम् (५. ४८-४९)। अग्रे शाङ्कर-दशनामिसम्प्रदायविवेचनावसरे तु केरलो दक्षिणो गौडश्च वामः सम्प्रदाय इति प्रतिपादितम् (IV ८. ११०), केरलः सम्प्रदायो वेदमार्गस्थो गौडश्च सम्प्रदायो निगमा[६५]दाविर्भूत इति च तत्रैवोक्तम् । I ३. ४७ इत्यत्रापि केरलः सम्प्रदायो दक्षिणपदेन बोध्यते, " केवलं दक्षहस्तेन पूजनाद् दक्षिणाभिधः । स एव केरलः प्रोक्तः शुद्धमार्गः प्रकीर्तितः ॥ " (I ५. ३८) इत्यत्र च दक्षिणपदस्य व्याख्यापि विहिता । III २. २२ इत्यत्र तु द्रविडपदेन केरलः सम्प्रदायो बोधितः ।

दक्षिणवामभेदौ

" वामहस्तात् पानपूजा क्रमाद् वामी प्रकीर्तितः " (I ५. ३६) इत्येवं वाममार्गानुयायिनोऽत्र व्याख्याताः । केरले सम्प्रदाये पूजातर्पणादिकं दक्षहस्तेन, गौडे च सम्प्रदाये वामहस्तेन क्रियत इति केरलः सम्प्रदायो दक्षिणः, गौडश्च सम्प्रदायो वाम इत्युच्यते (II ३३. २१-२३) वामगौडसम्प्रदायः पृथगप्यत्र लक्ष्यते—अलिपात्रं वामपाणौ दक्षहस्तेन तर्पयेत् । वामगौडस्तु सम्प्रोक्तश्चैतन्याख्यः स एव हि ॥ " (II ३३. ३०) इति । अत्र वामगौडलक्षणं विधाय स एव चैतन्याख्य इत्यपि वर्णितम् । सोऽयं सम्प्रदायः केरलान्तर्गतोऽपि दृश्यते । एतच्च चैतन्यमतव्याख्यानावसरे विवरिष्यते । कालिका-षोडशी-ताराप्रभृतयो देव्यो वामाचारेणैव पूजन्ते, गणेशरुद्रादिसम्प्रदायाश्च वामाचाररताः, एतेषु क्वचिद्दक्षिणाचारोऽपि प्रवर्तत इत्येष विषयः (II १. ८३-१२०) इत्यत्र विस्तरेण वर्णितः । तत्रेमे श्लोका अवधानार्हाः सन्ति—

क्वचिद् गणेशरुद्रेषु विष्णुसौरस्वयम्भुवे ।
वामाचारो वैदिकेऽपि भैरवा वामतत्पराः ॥
क्षेत्रपाला वामपराश्चीनाः कापालिकास्तथा ।
तथा पाशुपता देव वाममार्गे प्रतिष्ठिताः ॥
बौद्धाश्च केरला ये च वीरवैष्णवशाम्भवाः ।
चान्द्रास्त्वघोरा देवेशि वामद्वारपरायणाः ॥
बार्हस्पत्यादयोऽप्यन्ये भेदा वामपरायणाः ।
चीना वामपरा देवि बौद्धाचारपरायणाः ॥ इति,
वामदक्षिणयोगेन उभयाचारतत्पराः ।
शैवे शाक्ते गाणपते सौरे स्वायम्भुवे तथा ॥
चान्द्रे चीने पाञ्चरात्रे वैष्णवे वैदिकेऽपि च ।
कापालिके महेशानि वाममार्गोऽत्र कारणम् ॥ इति च ।

(II १. ९२-९५, ९९-१००)

अपि च—

डामरे वामभेदेऽपि चोत्तराम्नायडामरे ॥
वशिन्याम्नायके देवि वाम एव क्रिया स्मृता । (II ३. ५-६)

---

६५ निगमशब्दोऽत्र तन्त्रशास्त्रस्य परामर्शकः ।

इत्यादिना सर्वत्राप्रतिहतं वामाचारस्य प्राधान्यं प्रतिपाद्यते। चतुर्थे खण्डे तु—“वामदक्षिणमार्गौ हि कालीताराविधौ स्मृतः” (IV ६. ७९-९५) इत्यादिना दक्षिणवाममार्गयोः काचन व्यवस्था निर्दिष्टा। अत्रेदमवधेयम्–अभिनवगुप्तप्रभृतिप्राचीनाचार्यसमुद्धृतौ दक्षिणवामशब्दौ भगवतो शिवस्य दक्षवामवक्त्रोद्भूततान्त्रिकसम्प्रदाययोर्वाचकौ, अत्र तु दक्षिणाचार-वामाचारपदाभ्यामभिधीयमानयोः कर्मकाण्डीयद्विविधपद्धत्योः सूचकाविति। एतच्चास्माभिः कर्णेहत्य नित्याषोडशिकार्णवोपोद्घाते (पृ. ५३-५४) निदर्शितम्। विशेषजिज्ञासुभिस्तत एव द्रष्टव्यम्।

एवं च वक्तुमेतत् शक्यते यत् पूजनादौ पात्रासादनकर्मणि च विधिभेदात् केरलादिसम्प्रदायत्रयं प्रवर्तते, दक्षिणवामाचारयोश्च सर्वत्र साङ्कर्यं विद्यत इति। तत्र केरले भावना प्रोक्ता, काश्मीरे चानुकल्पनम्, गौडे प्रत्यक्षदानमित्येकत्र (I ६. १४१) प्रतिपाद्यते। अपरत्र तु (I ९. २०) केरले दुग्धेन पूजा, काश्मीरे भावना, गौडे प्रत्यक्षदानमित्युच्यते। स्वशाखोक्तन्यायेन तद् व्याख्येयम्। गुरुपरम्परया स्वीकृतः स्वकीयः सम्प्रदायो दीक्षितेन सुदृढं परिपालनीयः, तत्र सङ्करो न विधेयः। स्वशाखां परित्यज्यान्यां शाखामधीयाना वेदेषु शाखारण्डा इत्युच्यन्ते। एते हि निन्दिताः शास्त्रेषु। तथैवात्रापि (I ४. ६; III २. २२-२६) मार्गभ्रष्टा एते भृशं विनिन्दिताः। यथा स्वशाखामधीत्यानन्तरमन्यशाखाध्ययनमभ्युपगतम्, तथैव पूर्णाभिषेकयुक्तानां सर्वत्राधिकारोऽत्राप्यङ्गीकृतः (I ३. ४९-५१)

प्रस्तुतेऽस्मिन् शक्तिसंगमे तन्त्रे यद्यपि केरलादिसम्प्रदायत्रयस्य नानाविधान् भेदोपभेदान् प्रदर्श्य केरलसम्प्रदाय एव सर्वेषां समाहारः कृतस्तथापि संकरः सर्वथा परिहर्तव्य इत्यप्युक्तम्। संकरपरिहारायैव पूर्वमत्र (I ३. ४२-५१) कस्य कुत्राधिकार इति निरूपितम्। तदनु पात्रपूजार्घ्यादिनिर्णयः (I ४. ७-१९१; ५. ३२-३८; II १८. १-१२३), नामदानविधिः (I ५. ८७-१०२), दीक्षा (I ६. १०४-१०५), द्रव्यभेदः (I ९. १०-५६), पुरश्चरणम् (II ११. २४-३६; III ६. १६-३०), भूतशुद्धिः (II १२. १-१२), नवरात्रनिर्णयः (II १६. ६-१५), विसर्जननिर्णयः (II ४५. २०-२२), गुरुभावनाविधिः संकल्पप्रकारश्च (III ३. १-२६), स्वप्नमन्त्रादयः (III ३. १११-११६), प्राणायामः (III ३. ३२८-३२९), जीवन्यासः (III ११. ११०-११७), मातृकान्यासः (IV १०. २५-३५), होमः (IV ११. ५९) इत्येते विषया विस्तरेण प्रतिपादिता निर्दिष्टेषु प्रकरणेषु विशेषजिज्ञासुभिरवधार्याः। अत्रापि संक्षेपेण यथावसरं वक्ष्यन्ते।

व्याख्यातं केरलादिसम्प्रदायत्रम्। अत्र प्रथमखण्डस्य षष्ठेऽष्टमे च पटलेऽन्यत्र च प्रसङ्गवशान्नानाविधानां सम्प्रदायानां सभेदोपभेदानां स्वरूपमुन्मीलितम्। सम्प्रदायपदनिर्वचनपूर्वकं तदधुना समुपस्थाप्यते।

सभेदोपभेदाः सम्प्रदायाः

“सम्यक् प्रदीयते ज्ञानं सम्प्रदायः प्रकीर्तितः” (II १४.५१) इति सम्प्रदायपदनिर्वचनं क्रियतेऽत्र। “केरलश्चैव काश्मीरो गौडश्चैव तृतीयकः। सम्प्रदायत्रयं प्रोक्तं सर्वसिद्धिप्रवर्तकम्॥” (II १४. ५० इत्यत्र सम्प्रदायत्रयस्य सर्वसिद्धिप्रवर्तकत्वं प्रोच्यते। “अथान्यत् संप्रवक्ष्यामि सम्प्रदायस्वरूपकम्” (III १. १४५) इत्यादिना च आपटलान्तं नानाविधानां सम्प्रदायानामुत्तरोत्तरं वैशिष्ट्यम्, परस्परमन्तर्भावः, तेषां भेदोपभेदाश्च वर्ण्यन्ते।

सम्प्रदायानामुत्तरोत्तरं गरीयस्त्वम्

नित्याषोडशिकार्णवोपोद्घाते (पृ. ५३) शास्त्राणामुत्तरोत्तरं गरीयस्त्वं केषाञ्चन ग्रन्थवचनानामाधारेण प्रदर्शितम्। अत्रापि तत् प्रतिपाद्यते। अत्र हि-वैदिक-वैष्णव-गाणपत्य-सौर-शैव-शाक्त-वाम-दक्षिण-वीर-अवधूत(कौलावधूत)-दिव्यसम्प्रदायानामुत्तरोत्तरं गरीयस्त्वं प्रतिपाद्यते (III १. १४५-१४८)

अन्तर्भावः

शैवे पाशुपतादीनाम्, वैष्णवे पाञ्चरात्रादीनाम्, शाक्ते च पाषण्ड-चीनप्रभृतीनां सम्प्रदायानामन्तर्भावो भवति (III १. १४९-१५०)। त्रिजटः, एकजटः, त्रिशूली, बिन्दुभूषित इत्येते चत्वारो भेदाः शैवेऽन्तर्भवन्ति। पाशुपतादयश्च भेदाः शैवेऽन्तर्भवन्ति। ते च सप्तविधाः सन्ति (III १. १८२-१८३)। चीनाः, कापालिकाः, बौद्धाः, जैनाः, दिव्याः, कौलाः, वीराः, पशवः—इत्येते शाक्ते सम्प्रदायेऽन्तर्भवन्ति (III १. १८८-१८९)। गौडाख्यमार्गः, काश्मीरमार्गश्च केरलेऽन्तर्भवति। क्वचित् कदाचिद् भेदः सम्प्रदायात् प्रकीर्तितः (III १. १८०-१८१)। स च पूजनादौ पात्रासादनकर्मणि च भवतीत्युक्तमेव।

भेदोपभेदाः

कापालिके पञ्च, चण्डे भेदद्वयम्, स्वायम्भुवे त्रयम्, कौलेऽष्टौ, वीरे पञ्च, वैष्णवे दश, गाणपेऽष्टौ, जैने शतद्वयम्, सौरे पञ्च, बौद्धे शतमात्रकम्, पाशुपते दश भेदा भवन्ति, मुण्डी च त्रिंशद्विधो भवतीति प्रथमे खण्डे (६.१३७-१४०) प्रतिपाद्यते। चीनानां द्विशतम्, बौद्धे शतम्, दश पाशुपते, कौले च भेदाष्टकं भवतीति द्वितीये खण्डे (१.३१-३२) कथ्यते। तृतीये खण्डे च कापालिके एकादश, कौलेऽष्टौ, वीरे पञ्च, चीने शतद्वयम्, बौद्धे शतम्, पाशुपते सप्त, दिव्ये भेदद्वयम्, पशुषु भेदत्रयम्, अवधूते च सप्त भेदा भवन्तीत्येकत्र (१.१५०-१५२), चीनानां द्विशतम्, कापालिकानां पञ्च, बौद्धानां बहवः, जैने भेदद्वयम्, दिव्ये भेदद्वयम्, वीरः पञ्चधा-इति चापरत्र (१.१९०-२००) दृश्यते। एतच्चाग्रे समालोचयिष्यते।

परस्परनिन्दा तस्याः प्रयोजनं च

वैदिके शक्तिनिन्दा च शैवे वैष्णवनिन्दनम्॥
वैष्णवे गणनिन्दा च गाणपे सौरनिन्दनम्।
सौरे चान्द्रस्य निन्दा च चान्द्रे बौद्धस्य निन्दनम्॥
स्वायम्भुवस्य निन्दा च बौद्धमार्गे महेश्वरि।
सौभर्या चीननिन्दा च चीने जैनस्य निन्दनम्॥
पौराणे जैननिन्दा च जैने पौराणनिन्दनम्।
पौराणे मन्त्रशास्त्रस्य निन्दनं परमेश्वरि॥
धर्मशास्त्रे महेशानि तथा कौलिकनिन्दनम्।
एवं भिन्नमतान्येवं संजातानि महेश्वरि॥ (I ५. ९-११)

इत्येवं शास्त्राणां परस्परनिन्दा श्रूयते । अत्र गण-गाणपपदौ गाणपत्यसम्प्रदायवाचकौ । श्लोकानिमानुद्धृत्य प्रतिपाद्यते यदेवमिमानि शास्त्राणि भिन्नं भिन्नं प्रशंसन्ति, परस्परं निन्दन्ति च । तेन हि साधारणो जनः पिशाचग्रस्त इव संभ्रमति, न च विद्यासिद्धिमाप्नोति । परस्परनिन्दया स कमपि सुनिश्चितं मार्गमनुसर्तुं न प्रभवति । एतदर्थं तेन भवतारिका कालिका समाराध्या । तथा हि सर्वमेतत् प्रपञ्चार्थं प्रकीर्तितम्, येन हि संभ्रमापन्नानां जनानां प्रपञ्चादस्मान्न कदाचन विमुक्तिः स्यात् । येन तु सर्वविधं संशयमपहाय कादिमतानुसारेण कालिका समाराध्यते, तेन ज्ञायते यत् समस्त एष शास्त्रविस्तरः कादिमतमेवानुसरतीति । इत्येवं कालीखण्डे (I ५.१-२६) कादिमतस्य माहात्म्यातिशयो वर्णितः । ताराखण्डेऽपि च (II ५.४५-६४) पुनरावृत्तः सः । अथर्ववेदतः पञ्चाशन्महाभारस्यागमशास्त्रस्य निगमापरपर्यायस्य प्रादुर्भावो भवतीति पूर्वं प्रतिपादितम् । अपि च शास्त्रेऽस्मिन् (II ६१.११०-१११)चतुर्वेदाः; वाक्चतुष्टयमित्यादयोऽथर्ववेदच्छायया समाविष्टानीत्युच्यते । तस्याथर्ववेदस्याधिष्ठात्री च कालिका वर्तते । विना कालीं विना तारां क्वचिदपि नाथर्वणविधिः प्रवर्तते (I ५.२३) । इति स्पष्टमेव कादिमतस्य वैशिष्ट्यमङ्गीकर्तव्यम् । इदमत्रावधेयम्—नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुमिति न्यायानुसारमिमानि निन्दावचनानि कादिमतप्रशंसार्थं नियोजनीयानि, नहि तेषां कस्यापि शास्त्रस्य निन्दायामभिप्राय इति । एवं च रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां मानवानां कल्याणाय नानाविधाः सम्प्रदाया अत्र प्रवर्तन्ते ।

नानाविधाः सम्प्रदायाः

केरलादिसम्प्रदायत्रयस्यान्येषां च सम्प्रदायानां बहूनां नामानि प्रसङ्गवशात् पूर्वं स्मृतानि । अन्येऽपि नानाविधाः सम्प्रदाया अत्र उल्लिखिताः सन्ति । तद्यथा—

> शिवदेवीबटेशाख्यस्तथा चानन्दभैरवः ।
> केरलश्चैव काश्मीरो गौडचैतन्यगः शिवे ॥
> प्रत्येकं तु निगदितं सम्प्रदायचतुष्टयम् ।
> (I ६. १३५-१३६)

इत्यत्र सम्प्रदायचतुष्टयं प्रतिपाद्यते । ततः परमापटलान्तम् आराध्यः, कलहट्टः, पुष्पचक्री, जीवचक्री, चैतन्यः, आततायी, गोमुखी, वल्लभः, विज्ञानी, वामविज्ञानी, विद्याराट्, विराट्, स्वामी, भैरवाख्यः, रङ्गवारः, देववारः, मायादेवः, कालाख्यः, काञ्चीशः, ब्रह्मवारः, राजवारः, सिद्धवारः, विश्वरूपः, आनन्दभैरवे उन्मत्तभैरवादयः, वीरचक्रेऽसिताङ्गादयः, दिव्यचैतन्य-सिद्धचैतन्यादयः, देवीपरम्परायां बटुकमते च प्रोक्ता, अन्येऽपि बहवः सम्प्रदाया नामोल्लेखपुरस्सरमत्र स्मृताः । ताराखण्डे तर्पण[६६]क्रमात् सिद्धचैतन्यादयः षोडश सम्प्रदायाः प्रदर्शिताः, अन्ये भेदा विस्तरेण रहस्ये परिकीर्तिताः (II ३३. २५-३०) इति चोक्तम् । सुन्दरीखण्डेऽपि—" स्वाराज्ये नियतः प्रोक्तश्चैतन्याख्यः स एव तु " इत्यादिना " एतेऽपि केरले देवि ह्यन्तर्भूता भवन्ति वै " (II १. १५९-१७२) इत्यन्तं बहवः सम्प्रदाया नामग्राहं स्मर्यन्ते ।

---

६६ तर्पणक्रमोऽग्रे व्याख्यास्यते ।

वैदिकपरम्परानुपालनम्

एवं सत्स्वपि बहुषु सम्प्रदायेषु वैदिकपरम्परा सुतरामनुपालनीयेत्यप्यत्र स्पष्टं प्रतिपाद्यते। तथा हि—

वेदमूलाः क्रियाः सर्वा वेदमूला परा स्मृतिः ॥
वेदेन रहितं यत्तु तन्न कुर्याद् द्विजः क्वचित् ।
वेदमार्गरतो नित्यं ब्राह्मणो भवति ध्रुवम् ॥
वेदेन रहितो यस्तु स चाण्डालः प्रकीर्तितः ।
स्वस्वधर्मं पुरस्कृत्य सर्वं कार्यं महेश्वरि ॥
स्वधर्मनिरतो नित्यं सुखमाप्नोति निश्चितम् ।
स्वधर्मरहितो विप्रः सुतहारी द्विजाधमः ॥
तं दृष्ट्वा तु महेशानि प्राजापत्यं समाचरेत् ।
तदभावे महेशानि सचैलं जलमाविशेत् ॥
तस्मान्मुद्रादिकद्वेषं ब्राह्मणो वर्जयेत् सदा ।
अधमानुग्रहार्थं तु मुद्रा प्रोक्ता मया तव ॥ इति ।

(I ८.३१-३६)

अत्र द्विजेन वेदमार्गः कदापि न परित्याज्यः, वैदिकेतरमार्गेषु च द्वेषबुद्धिर्न विधेया, अधमानुग्रहार्थं हि ते समुपदिष्टा इति स्फुटमुच्यते। अत एव चतुर्थेऽस्मिन् प्रस्तुते खण्डे वैदिको दशनामिसम्प्रदायः प्रकाश्योऽन्ये च गोपितव्या इत्युच्यते।

शङ्कराचार्यप्रवर्तितो दशनामिसम्प्रदायः

अत्राष्टमे पटले ६०-११५, २१७-२१८ श्लोकेषु शाङ्करदशनामिसम्प्रदायस्य, भगवतः शङ्कराचार्यस्य, तत्प्रधानशिष्याणां मठादीनां च परिचयो विद्यते। तदे[६७]वात्र प्रस्तूयते। तथाहि—

उत्पत्स्यमानरूपो हि सम्प्रदायः प्रतन्यते ।
कलौ पापसमाकीर्णे नान्ये योगा महेश्वरि ॥
आम्नायाश्चैव पूर्वोक्ता गोपितव्या महेश्वरि ।
वक्ष्यमाणो महेशानि प्रकाश्यः सर्वजन्तुषु ॥
कलौ युगे तु सम्प्राप्ते जम्बुद्वीपे महेश्वरि ।
खण्डे भारतसंज्ञे तु श्रीशैलगिरिगह्वरे ॥

---

६७ विषयोऽयं मोतीलालबनारसीदास-प्रकाशनसंस्थया वाराणसीतोऽधुनैव (१९७६ ई. वर्षे) प्रकाशिते एकलिङ्गमाहात्म्ये (पृ. ९४-९६), मठाम्नायनाम्नि ग्रन्थे, शङ्कराचार्यकृते महानुशासने, मठाम्नायोपनिषदि च वर्णितो दृश्यते। अन्तिमग्रन्थत्रयसाहाय्येन श्रीमता बलदेवोपाध्यायेन 'श्रीशङ्कराचार्य' इत्याख्ये हिन्दीभाषाग्रन्थे (पृ. १९१-२४३) विषयेऽस्मिन् बहु विचारितम्। अथाप्यनेके विवादास्पदा विषयाः सन्ति। तेषां समाधानमनुसन्धानसापेक्षम्। समयाभावादत्र न प्रयत्यते। अत्रोद्धृते (पृ. २३८-२३९) महानुशासने आचार्याणां कर्तव्यान्युपदिष्टानि।

परिधावीवत्सरे तु सप्तम्यां शनिवासरे ।
उद्दण्डवर्षातीते तु दिननित्योदये शिवे ॥
सकारोदयवेलायां मध्याह्ने शाङ्करे गृहे ।
बौद्धोत्सादनकार्यार्थं शङ्करो मर्त्यरूपधृक् ॥
अवतीर्णो महेशानि पञ्चप्रेतसमन्वितः ।

(IV ८. ६०-६५)

इत्येवं वर्णितो भगवतः शङ्कराचार्यस्यावतारक्रमः । प[६८]ञ्चप्रेतांशिनश्च—"शङ्करस्तु मुखं देवि चत्वारः परितः पदम्" (८।७४) इत्येवमत्र प्रतिपादिताः । तेषु शङ्कराचार्यो भगवान् साक्षात् शिवावतारः । अस्य पूर्वस्यां दिशि पूर्वाम्नायः, गोवर्धनो मठः, भोग[६९]वारः सम्प्रदायः, वनाश्रमपदयोश्च स्थितिर्वर्तते । अत्र जगन्नाथो देवता, पुरुषोत्तमं क्षेत्रम् , विमला देवी, तीर्थं च महोदधिरस्ति । बलभद्रप्रभाचार्यौ रक्षकौ स्तः । महाविद्या भुवनेशी, सृष्टिरूपी मन्त्रयोगश्च षट्त्रिंशत्तन्त्रसमन्वितो राजते ।

दक्षिणस्यां दिशि दक्षिणाम्नायः, शृङ्गेरी मठः, भू(रि)वाराख्यः सम्प्रदायः, सरस्वती पुरी भारती चेति पदत्रयम् , भारती देवी, रामेश्वराभिधं च क्षेत्रं राजते । आदिवराहरूपी देवता, महाचोलनिवासिनी कामाक्षी श्रीत्रिपुरसुन्दरी देवी, शृङ्गी ऋषिः, आचार्यश्च पृथ्वीधरो वर्तते । तुङ्गभद्रा तीर्थम् , कमला देवता शिवकाञ्ची-विष्णुकाञ्चीनिवासिनी । सिद्धचेतनाख्यो भक्तियोगः स्थितिरूपी पञ्चविंशतितन्त्रयुक्तो वर्तते ।

पश्चिमायां दिशि पश्चिमाम्नायः, शारदाख्यो मठः, कीर(ट)वारः सम्प्रदायः, तीर्थाश्रमाख्ये च पदे स्तः । द्वारकाख्यं क्षेत्रम् , ईश्वरो देवता, देवी च भद्रकाली विराजते । ब्रह्मा तत्र प्रतिष्ठितः । विश्वरूप आचार्यः, गङ्गास्वरूपिणी गोमती चात्र तीर्थमभिप्रेतम् । संहाररूपी कर्मयोगः पञ्चसप्ततितन्त्रैः समुपबृंहितोऽत्राधिकृतः । विद्या चात्र श्रीत्रिपुराम्बिका स्वीकृता ।

उत्तरस्यां दिशि उत्तराम्नायः । जोतिर्मठः, (आ)नन्दवारः सम्प्रदायः, गिरि-पर्वत-सागराख्यं पदत्रयम् , बदरिका क्षेत्रम् , सर्वसिद्धिप्रदः पूर्णगिरिर्देवता, मन्त्रशास्त्रविशारदस्त्रोटक आचार्यः, अलकनन्दा तीर्थम् , बौद्धशास्त्रविडम्बका महाचीना रक्षकाः, तारा अधिष्ठात्री देवता, ज्ञानयोगः, नन्दकश्चात्र ब्रह्मचारी वर्तते ।

ऊर्ध्वायां दिशि ऊर्ध्वाम्नायः, सुमेरुः पीठम् , विज्ञानं पदम् , कैलाससंज्ञकं क्षेत्रं राजते । अत्र काश्मीरः सम्प्रदायो वर्तते । निरञ्जनो देवता, माया देवी, ईश्वर आचार्यः, मानसं सरश्च तीर्थं राजते । दक्षिणा काली विद्या राजयोगश्चात्र प्रतिष्ठितः । महापद्मागमानां पारवेत्ता शिवः स्वयमत्र निवसति ।

---

६८ "ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः । एते पञ्च महाप्रेताः" (I ३.६५) इत्येवं पञ्च महाप्रेता वर्ण्यन्ते । शङ्करभगवत्पादास्तेषां शिष्याश्च पञ्चप्रेतानामंशावतारा इत्यभिप्रायः ।

६९ भोगवारः, भूरिवारः, कीटवारः, आनन्दवारश्चेति चतुर्णां सम्प्रदायानां नामानि वर्ण्यन्ते, तेषामर्थाश्च प्रतिपाद्यन्ते । तदनुसारमत्रापि संशोध्य स्थापितानि नामानि । एतत्समाना एव रङ्गवार-देववार-ब्रह्मवार-राजवार-सिद्धवारसम्प्रदायाः पूर्वं निर्दिष्टाः ।

एवं पञ्च प्रेतांशान् निर्वर्ण्य तत्र " अयमेको महेशानि कलौ क्वापि भविष्यति " (८।९६) इति, " चतुर्भिः सह शिष्यैश्च शङ्करोऽवतरिष्यति " (८।९८) इति चोक्त्वा " शङ्करः शङ्करः साक्षाद् व्यासो नारायणो हरिः " (८.९८) इति व्यक्तमुक्तम् । ततश्च नारदः, दत्तात्रेयः; बृहत्सेनः, जैषीगव्यः, कश्यपः, वसिष्ठः, रथाङ्गः, शौनकः, कण्वः, शातातपश्चेति दशावताराः शङ्करस्य वर्णिताः । तदनु ज्ञानकाण्डम्, क्रियाकाण्डम्, धर्मकाण्डम्, योगकाण्डम्, भावकाण्डमिति काण्डपञ्चकं निर्वर्ण्य ज्ञानयोगः, राजयोगः, लययोगः, हठयोगः, मन्त्रयोगश्चेति योगपञ्चकं परिगण्य भाव-क्रियाभेदेन मन्त्रयोगो द्विधा वर्णितः । ततश्च—

> स[७०]रस्वती भारती च पर्वतारण्यसागराः ।
> गिरिः पुरी वनस्तीर्थश्चाश्रमो दशमः स्मृतः ।
> दशनामक्रमेणोक्तं पञ्चकं दशकं भवेत् ।
>
> (IV ८. १०४-१०५)

इति शाङ्करदशनामिसम्प्रदायः स्पष्टं प्रतिपादितः । आनन्दसरस्वती, इन्द्रसरस्वती, चैतन्यः, प्रकाशः, स्वरूपानन्दः, अपरः, परः, सप्तप्रज्ञः, प्रसादकः, नित्यः, सत्यः, चिद्धनः, कैवल्यः, विश्वरूपः, विराट्, विलासः, शाश्वतः, क[७१]लहट्टः, गोमुखः विज्ञानवल्लभ इत्यादयो भेदा अत्र वर्णिता विद्यन्ते । तेषु दशनामिसम्प्रदायः केरलसम्प्रदायान्तर्गतः, तदन्यश्च गौडसम्प्रदायेऽन्तर्भूतः । केरलो दक्षिणः, गौडश्च सम्प्रदायो वामः प्रोच्यते । तत्र केरलो वेदमार्गस्थः, वामश्च मार्गो निगमप्रतिपादितो वर्तते । अतो वेदमार्गानुवर्तित्वात् केरलसम्प्रदायान्तःपाती शाङ्क[७२]रदशनामिसम्प्रदाय एव प्रकाश्य इति स्पष्टमस्य प्रकरणस्याभिप्रायः प्रतीयते ।

नामग्राहं स्मृतेषु परःशतेषु सम्प्रदायेषु शाङ्करदशनामिसम्प्रदायवदन्येऽपि केचन सम्प्रदाया लक्षणभेदोपभेदप्रदर्शनपुरस्सरं व्याख्याताः । तेऽधुना संक्षेपेण प्रदर्श्यन्ते ।

सप्तविधोऽवधूतः सम्प्रदायः

कौला[७३]वधूतसम्प्रदायस्य गरीयस्त्वं प्रतिपाद्य तृतीये खण्डे तस्य सप्त भेदाः प्रतिपादिताः । ते च आनन्दः, नाथः, आनन्दनाथः, प्रकाशः, स्वरूपः, चैतन्यः, आराध्यश्चेति सन्ति । षट्शाम्भवादिशास्त्रज्ञ आराध्यः परिकीर्त्यते । स एव विद्याधिक्यादाचार्य उच्यते । गुरुपदे गुशब्दोऽन्धकारं बोधयति, रुशब्दश्च तस्यान्धकारस्य विनाशं ज्ञापयति । एवं चान्धकारस्य विनाशको ज्ञानस्य प्रकाशकश्च गुरुरुच्यते । नाथः

---

७० सरस्वतीप्रभृतिशब्दानामर्था मठाम्नायानुसारेण विवृताः पूर्वोक्ते श्रीशङ्कराचार्यनाम्नि ग्रन्थे (पृ. २४०-२४१) ।

७१ कलहट्ट-गोमुखादयः सम्प्रदायाः प्रथमखण्डे षष्ठपटलसमाप्तावपि विवृताः पूर्वं वर्णिता एव ।

७२ शाङ्करदशनामिसम्प्रदाय एष दक्षिणामूर्तिपरम्परायां प्रवर्तत इत्यत्रैव (IV ८. ११५) निर्दिश्यते ।

७३ कौलः सम्प्रदायोऽष्टविधः, अवधूतश्च सप्तविधोऽत्र प्रतिपाद्यते । तेन सम्प्रदाययोरनयोः स्पष्टमेव भेदः स्वीक्रियते, तथापि कौलावधूतशब्देनात्रावधूतसम्प्रदायस्योल्लेख आदरातिशयप्रदर्शनार्थः । कौलश्चासाववधूतश्चेति कर्मधारयसमासोऽत्राङ्गीकर्तव्यः ।

सिद्धयादिभिर्युक्तः; आ[७४]नन्दः शम्भुशक्तिमान्, आनन्दनाथश्च परमशैवस्य वाचको भवति। स एव महावीर इति, माहेश्वर इति चोच्यते। अस्मिन् कलौ काले वीरस्तु उद्धतवत् क्वचिद् विचरन् तिष्ठति। प्रकाशविभागो नात्र व्याख्यातः। प्रकरणवशाज्ज्ञायते यद्विलासपदं प्रकाशपरमेव स्यात्। विलासाख्यः सम्प्रदायः केरलादिसम्प्रदायत्रयेभ्यो भिन्न एव प्रतिपाद्यते। अत्र तु केरलो द्रविडश्च सम्प्रदायो विलास-सम्प्रदायान्तर्गत आचार्यत्वप्रदायकश्चाभिमन्यते। विरोधस्यास्य परिहाराय प्रसङ्गसङ्गतये चानुमीयते यल्लिपिकारदोषात्प्रकाशपदस्थाने विलासपदस्य संनिवेशः संजात इति। स्वाराज्यपदे नियतश्चैतन्यः, गौडश्च स्वरूप इत्युच्यते (III १. १४८-१६०)। शिव-देवी-बटेश-आनन्दभैरवाख्यम्, केरल-काश्मीर-गौड-चैतन्यगं च प्रत्येकं सम्प्रदायचतुष्टयमधुनैव प्रदर्शितम्। अवधूतो यथेच्छं सर्वानेतान् सम्प्रदायान् समाश्रयतीति तत्रैवोच्यते (I ६. १३५-१३७)।

आर्हतः (जैनः) सम्प्रदायः

जैने शतद्वयं भेदा भवन्तीत्युक्तम्। तारावती-भोगवती-विमलावली-प्रज्ञावती-मधुमती-उद्धटाम्बा-वतीप्रभृतीनामुपासका आर्हता इत्युच्यन्ते (I ६. १५४-१५५)। इदं च भवति जैनलक्षणम्—

जैनं शृणु महादेवि कमण्डलुधरः सदा॥
जीव एव परं भोगी कर्ता हर्ता स एव हि।
यदेव तत्सुखं देवि तत्सुखं स्वात्मरूपकम्॥
स जैनः कथितो देवि एवं बौद्धादयो मताः।
केशसंलुञ्चका देवि तथा श्वेतपटाः प्रिये॥
तथा रक्तपटा देवि तथा नीलाम्बरादयः।
बृहद्गुरुरिति ख्यातास्तथान्ये परमेश्वरि॥
अहिंसकास्तथान्ये च भेदाः संक्षेपतो मताः। इति।
(I ८. १२-१६)

अग्रे—" जैनागमो रक्तशुक्लपटसंबन्धिजातयः " (II १.३१) इत्युच्यते। तृतीये खण्डे तु—" जैने भेदद्वयं देवि कथ्यते यत्नतः शृणु। पार्श्वनाथः कलानाथः पद्माभोगवतीरतः॥ " (III १. १९५) इत्युच्यते। जैनानां शतद्वयं भेदास्तु नात्र कुत्रापि परिगणिताः। पद्मावती, उद्धटाम्बा, पार्श्वनाथ इत्येते चतुर्थे खण्डेऽपि स्मर्यन्ते (IV १. ३७)।

कापालिकः सम्प्रदायः

कपालपात्रसम्भोजी मद्यमांसेषु तत्परः।
स्त्रीयोनिदर्शको नित्यं मुण्डमालाधरः सदा॥

---

७४ " भूमौ स्थाप्य महेशानि हस्तयुग्मेन तर्पयेत्। आनन्दाख्यस्तु सम्प्रोक्तः " (II ३३.२१) इति लक्षणमानन्दावधूतस्यैव प्रतीयते।

श्मशानाग्निप्रभोजी यः स च कापालिकः स्मृतः ।
स च द्वादशधा प्रोक्तो महाकापालिकः परः ॥

इत्येवं कापालिकः सम्प्रदायोऽत्र वर्ण्यते । द्वादशभेदास्तु न परिगणिताः । तृतीये खण्डे तु कापालिके पञ्च भेदा इत्युक्त्वा इन्द्रजाली, देवजाली, रुद्रजाली, विद्याजाली, सिद्धिजालीति तेषां नामानि प्रदर्शितानि (III १. १९२-१९३) । I ६. १३७ इत्यत्रापि कापालिके पञ्च भेदा इत्येवोक्तम् । अपरत्र (III १. १५०) कापालिके रुद्रभेदा इत्युच्यते, किन्तु तेषां नामानि न प्रदर्शितानि । द्वितीये खण्डे मायाकापालिकः स्मर्यते (II १. ३०), नवरात्रनिर्णयावसरे कापालिकावधूतव्रतविशेषविधिर्वर्ण्यते । (II १६.२६), कापालिकानां चीनानां च कपालपात्रमिति च (II १८.५६) चर्च्यते । प्रथमे खण्डे (४.४२) तुम्बी कपालं च कापालिकानां पात्रमुच्यते । अन्यत्र चैषां शाक्तमतेऽन्तर्भावः प्रर्शितः (III १.१८८) ।

कालामुखः सम्प्रदायः

तन्त्रेऽस्मिन् शैवभेदेषु शाक्तभेदेषु वा न परिगणित एष विभागः । केवलं नामदानविधौ शाक्त-वैष्णव-गाणपत्य-शैव-स्वायम्भुव-चान्द्र-पाशुपत-चीन-जैन-वैदिकसम्प्रदायैः सहास्य परिगणनं विद्यते (I ५. ९२-९३), अन्यत्र (II १. ११७-११९) च शैव-वैष्णव-शाक्त-सौर-सुगतदर्शन-बौद्ध-पाशुपत-सांख्य-दक्षिण-वैदिकसम्प्रदायेष्वपि वाममार्गेण सिद्धिर्लभ्यत इति प्रतिपादनावसरे मन्त्रकालमुखसम्प्रदायस्याप्युल्लेखो दृश्यते । कापालिक-कालामुख-सम्प्रदाययोर्विस्तृतः परिचयो " दी कापालिक्स एण्ड कालामुख्स : टू लोस्ट शैवाइट सेक्ट्स " [७५]इत्याख्ये ग्रन्थे श्रीमता डेविड एन. लोरेंजन महोदयेन कृतः, अस्माभि[७६]श्च कालदमनः कालवदनो वा ", " शिवपुराणीयं दर्शनम् " इत्येतयोर्निबन्धयोः कृतः ।

कौलः सम्प्रदायः

कुल-कुलाकुल-अकुलशब्दा अत्र (I ३. ३२-४३) विस्तरेण व्याख्याताः, किन्तु तेषां नास्ति कश्चन संबन्धः कौलेन सम्प्रदायेन सह । " दक्षहस्तात् पानयोगाद् वामहस्तप्रतर्पणात् । दक्षहस्तात् पूजनाद्धि कौल इत्यभिधीयते ॥ " (I ५.३७) इति हि तस्य लक्षणमत्र विद्यते । कौलेऽष्टौ भेदा भवन्ति (I ६. १३८; II १.३२; III १.१५०), किन्तु तेषां नामान्यत्र न दृश्यन्ते । "वामे रामा रतियुता बलिपात्रं तु दक्षिगे ॥ पानपात्रं महेशानि वामहस्तेन तर्पकः । " महाकौलो महेशानि भूमौ संस्थाप्य तर्पयेत् ॥ हस्तद्वयेन चेद्देवि कौल इत्यभिधीयते । वामदक्षव्यत्ययेन वीरकौलः प्रकीर्तितः ॥ " (II ३३. १७-१९) अत्र कौलेन सह महाकौल-वीरकौलयोर्लक्षणानि सन्ति, तर्पणप्रकरणे ब्रह्मकौलः स्मर्यते (I ७. ४७), कामरूपागेन सह च गर्भकौलागमो गुप्तकौलागमश्च स्मर्येते । (II २४. ७-८) आहत्य कौलानां पञ्च भेदा भवन्ति । यद्यपि—" वीरादिकौलभेदाश्च पूर्वमेव प्रकाशिताः (I ८.२) इत्युच्यतेऽत्र, किन्तु तेषां नामानि तु नात्र परिज्ञायन्ते । पदोत्तिष्ठकौल-महाकौल-

---

७५ थामसन प्रेस (इण्डिया) लिमिटेड, नई दिल्ली—इत्यस्मात् स्थानात् १९७२ ई. वर्षे प्रकाशितमेतत् पुस्तकम् ।

७६ सारस्वती सुषमा, व. १९, अ. ४, पृ. ३५५-३५६, संवत् २०२१ इत्यत्र प्रथमः; पुराण, व. ७, अ. १, पृ. १६२-१६५ इत्यत्र च द्वितीयो निबन्धः प्रकाशितः ।

मूलकौल-योगिनीकौल-वह्निकौल-वृषणोत्थकौल-सिद्धकौलाख्याः सप्तभेदाः कौल[77]ज्ञाननिर्णयाख्ये ग्रन्थे व्याख्याता दृश्यन्ते। मृगेन्द्रागमे[78] चर्यापादेऽनुस्रोतांस्यष्टौ वर्णितानि। तत्र योगिनीकौल-सिद्धकौलयोर्लक्षणे दृश्येते (१. ४०-४१)। विस्तरभयान्नात्र संगृह्यन्ते। वीरकौलादीनां सम्प्रदायानामत्र दशमहाविद्यास्वन्तर्भावः प्रदर्श्यते (III १. १०१-१११)। पात्रनिर्णयावसरे च "वामावर्तक्रमेणैव गौडे कौले च पात्रकम्" (I ४. १७२) इत्येवं गौड-कौलमतयोः साम्यं प्रदर्श्यते।

गाणपत्यः सम्प्रदायः

षड्दर्शनानामन्येषां च सम्प्रदायानां परिगणनावसरेऽविनाभावितयाऽस्य सम्प्रदायस्य सर्वत्रोपस्थितिर्विराजतेतराम्। गाणपेऽष्टौ भेदा भवन्तीत्यत्र (I ६. १३९) केवलं सूचितम्, नामानि च प्रदर्शितानि। पात्रनिर्णयेऽर्घ्यदानविधौ चास्य सम्प्रदायस्य वैशिष्ट्यमत्र (I ४.१७०) प्रतिपाद्यते। गाणपत्यानि तन्त्राणि पर्यायनिर्णये प्रदर्शितानि।

घोरः सम्प्रदायः

सम्प्रदायस्यास्य लक्षणं न कृतमत्र। केवलमेकादश भेदा अत्र वर्णिताः। ते च रक्तघोरः, शुक्रघोरः, विण्मूत्रघोरः, भक्षघोरः, वान्त्यघोरः, घोरघोरतरः, वीणाघोरः, नीलाघोरः, सर्वभक्षाभिधः, घोराघोरः सिद्ध इतीमे भवन्ति (II १. १८-३०)। अत्र शुक्रशब्दः शुक्रपरकतया नेयः। '[79]अघोरी' इति नाम्ना लोके प्रसिद्धस्य सम्प्रदायस्येमे भेदा मन्तव्याः। अत्रत्यैर्नामभिस्तेषामाचारः स्फुटीभवति।

चण्डः सम्प्रदायः

चण्डे भेदद्वयम् (I ६. १३७) इत्येतावदेवात्रोच्यते। लक्षणादिकं तु न प्रदर्श्यते, न च नामनी निर्दिष्टे। "भैरवागमेषु दक्षिणस्रोतःसमुत्थेषु स्वच्छन्दः-[80]चण्ड-त्रिशिरोभैरवादिषु" (भा. १, पृ. २२५) इति नेत्रतन्त्रोद्योते क्षेमराजवचनाद् दक्षिणस्रोतःसमुत्थभैरवागमान्तर्गतोऽयं सम्प्रदायः प्रतीयते। मृगेन्द्रागमे चर्यापादे (१।३६) तु चण्डासिधारादिकं पश्चिमस्रोतःसमुद्भवम्, नेत्रतन्त्रोद्योते च (१६।७६) ऊर्ध्वस्रोतःसमुत्थं स्वीकृतम्। प्रतिष्ठालक्षणसारसमुच्चये वैरोचनकृतौ (भा. १, पृ. ३२) चण्डासिधारमेकमेव तन्त्रं पश्चिमस्रोतस्कं परिपठितम्। एवं च चण्डं चण्डासिधारमिति भिन्नभिन्नस्रोतस्के द्वे तन्त्रे प्रतीयेते।

चान्द्रः सम्प्रदायः

"चन्द्रजापरतो यस्तु स च चान्द्रो महेश्वरि" (I ८. २९) इति तस्य लक्षणमत्र दृश्यते। नानासम्प्रदायपरिगणनावसरेऽस्यापि नाम बहुषु स्थलेषूपलभ्यते। तच्च तत्र तत्र निर्दिष्टमेव। चान्द्रे

---

७७ ग्रन्थोऽयं डा० प्रबोधचन्द्रबागचीमहोदयेन सम्पादितः कलकत्तासंस्कृतग्रन्थमालायां १९३४ ई. वर्षे प्रकाशितश्च।

७८ पाण्डिच्चेरीतः १९६२ ई. वर्षे प्रकाशितमिदं पुस्तकम्।

७९ अघोरसाधने प्रयुज्यमानानि द्रव्याणि "रेतो हराम्बु पुष्पं च क्षारं नालाज्यकं तथा" इत्येवं रत्नपञ्चकनाम्ना तन्त्रालोकविवेकेऽपि (२९.१७) प्रदर्शितानि।

८० तन्त्रालोकविवेक (भा. १, पृ. ४२) धृतश्रीकण्ठ्यां भैरवाष्टकतन्त्रेषु चण्डाख्यमपि पठ्यते। नेत्रतन्त्रोद्योते तदेव स्मर्यते।

सम्प्रदाये पौर्णमास्यां पवित्रधारणं विधीयते (I १८. १८ । सोम-सौम्य-सोमसिद्धान्तप्रभृतिभिर्नामभिः पुराणादिषु प्रबोधचन्द्रोदयादिषु नाटकेषु च वर्णित एष एव सिद्धान्तः, "यशस्तिलक एण्ड इण्डियन कल्चर" नाम्नि [८१]ग्रन्थे श्रीमता कृष्णकान्तहाण्डीकीमहोदयेन, डेविड एन. लोरेंजनमहोदयेन च पूर्वोक्ते [८२]ग्रन्थे कापालिकसम्प्रदायाभिन्नो विस्तरेण व्याख्यातः । शक्तिसंगमे तन्त्रे विभिन्नेषु सम्प्रदायेषु यादृशः सूक्ष्मो भेदः प्रदर्शितस्तेन कापालिकः सिद्धान्तः सोम-(चान्द्र) सिद्धान्तश्च भिन्ने एव मन्तव्ये ।

चीनः सम्प्रदायः

"स्नानदानादिरहितः शौचाशौचविवर्जितः । न जपो न तपस्या च न तस्य नियमः क्वचित् ॥ ईदृग्विधो भवेच्चीनः सकलो निष्कलो द्विधा ।" (I ८. ११-१२) इत्येवं लक्षणप्रदर्शनपुरस्सरमस्य द्वौ भेदौ प्रदर्शितौ। द्वितीये खण्डे तु–"महाचीनक्रमो देवि कथ्यते क्षिप्रतो मया ॥ महाचीनक्रमेणैव तारा शीघ्रफलप्रदा। ब्रह्मचीनो दिव्यचीनो वीरचीनस्तृतीयकः ॥ महाचीनो निष्कलश्च चीनः पञ्चविधः स्मृतः ।" इत्येवं पञ्च भेदान् व्यावर्ण्य पुनरपि तस्य द्वौ भेदौ वर्णितौ लक्षितौ च–"महाचीनक्रमो देवि द्विविधः परिकीर्तितः ॥ सकलो निष्कलश्चेति सकलो बौद्धगोचरः । निष्कलो ब्राह्मणानां च द्वितीयं शृणु पार्वति ॥" (II २१. १-४) इत्यादिना आपटलान्तम् । "मणिबन्धादधः पाणिः पादौ गुल्फादधः शिवे ॥ मुखं प्रक्षालयेद् देवि चीनस्नानमिदं भवेत् । जानुभ्यामवनिं कृत्वा भूमौ मस्तकमानयेत् ॥ चीनमार्गे नमस्काराः कीर्तितास्ते मया तव ।" (II २१. ५३-५५) इत्यत्र वर्णितौ चीनस्नाननमस्कारौ इस्लामधर्मानुयायिनां वजूनमाज-कर्मणी अनुहरतः । मञ्जुघोषे चीनमार्गे छिन्नमस्ताविधावपि च स्नाननत्योरेष एव क्रमो दृश्यते । (II ३८. २-५) । महाचीनवरेण साध्ये जिह्वासंशोधन-शिरःसंशोधनकर्मणी (II १६. २९-३२) इत्यत्र वर्णिते । चीनानां कापालिकानां च कपालपात्रमिष्यते (II १८.५६) शाक्ते च सम्प्रदाये तावन्तभेवतः (III १. १८८) । अन्यत्र चीनानां द्विशतं भेदा वर्णिताः (II १. ३१; III १. १५१, १९०) तत्र केषाञ्चन नामान्येवं दृश्यन्ते–"चीनानां द्विशतं भेदास्ताराछिन्नाविधौ स तु । ताराधीशः पराधीशः क्षेमाख्यः प्रेमतारकः ॥ सागराख्यः परापन्नस्तथा जीवदयापरः । चिरजीवी सिद्धनामा संक्षेपान्नावकीर्तितः ॥" (III १. १९०-१९१) । चीनसम्प्रदायसंबद्धाश्चीनमार्गे पूजनक्रमः (I ४. १८६-१८८) दिङ्नियमः (II १८.१८), चीनदेशः (IV ५. १४७), चीनवेषः (III ९.३१), चीनाचारः (II १८. ७२-७६), चीनसुन्दरी (IV ५. २५) इत्यादयो विषया यथानिर्दिष्टेषु स्थलेषु विलोकनीयाः।

चैतन्याख्यः सम्प्रदायः

केरलादित्रिविधसम्प्रदायप्रकरणे केरलभेदो द्रविडः, स एव चैतन्याख्यश्च कथ्यत इत्युक्तम् , केरलभेदेषु चैतन्यस्य परिगणनं च विहितम् । अन्यत्र (II ३३.२०) नामगौडलक्षणं विधाय स एव चैतन्याख्यश्च कथ्यत इति वर्णितम् । सम्प्रदायचतुष्टयप्रदर्शनावसरे (I ६. १३५) तु तस्य स्वतन्त्रसम्प्रदायत्वमङ्गीकृतम् । शाङ्करदशनामिसम्प्रदायप्रकरणे (IV ८.१०६), तादृश एव प्रथमखण्डीये प्रकरणे (I ६. १४६-१४७) च चैतन्याख्यः सम्प्रदायः स्वतन्त्र एव परिगणितः । सप्तविधावधूतेष्वपि चैतन्यः परिपठ्यते । स्वाराज्यपदे नियतश्चैतन्य इति च तस्य लक्षणं विहितम् । द्वितीये पटले तर्पणक्रमात्

---

८१ ई. १९४९ वर्षे शोलापुरतः प्रकाशितस्यास्य ३३६, ३५७ पृ. द्रष्टव्ये ।

८२ पूर्वोक्तस्थानतः प्रकाशितस्यास्य परिशिष्टनिर्दिष्टस्थलानि द्रष्टव्यानि ।

सिद्धचैतन्य-सत्यचैतन्य-दिव्यचैतन्यादयः षोडश सम्प्रदायाश्चर्चिताः (II ३३. २५-२९) प्रथमे च खण्डे -" अनुग्रहाख्यश्चैतन्यस्तथैव...सिद्धचैतन्य एव च " (I ६.१५५-१६०) इत्येवं बहून् चैतन्य-भेदान् परिगण्य " एते काश्मीरमार्गस्थाः " इत्युक्तम् । एवं च चैतन्यस्य सम्प्रदायस्य काश्मीरे, कामगौडे, केरले च सम्प्रदाये समावेशो दृश्यते, तस्य स्वतन्त्रा च स्थितिर्वर्ण्यते । कथमेतत् सिद्ध्येतेति चेत्, प्रश्नोऽयमवधूतसम्प्रदायान्तर्गतामस्य स्थितिं विज्ञाय समाधेयः । तत्र हि " अवधूतः सर्वगः स्यात् " (I ६.१३७) इत्युच्यते । एवं च कोल-काश्मीर-गौडेषु त्रिविधेष्वपि सम्प्रदायेषु चैतन्यस्य स्थितिर्न विरुध्यते, न चास्य स्वातन्त्र्यं व्याहन्यते । अत एव पूर्वाम्नायेऽस्य स्वतन्त्रा स्थितिः प्रदर्शिता संगच्छते (I ४.६८)। सिद्धचैतन्यमार्गे पात्राणाम (I ४.९७), चैतन्याख्यक्रमे भूतशुद्धेः (I १२.८), चैतन्याख्यमते गुरुपूजनस्य (II १८.२४) चैतन्याख्ये क्रमे सा[८३]मान्यपूजनस्य (II १८.११०), चैतन्यमते बीजमेलनस्य (II १९. १९), तिर्यक्चक्रस्थापनस्य (III ६.२९), सिद्धचेतना-ख्यस्य भक्तियोगस्य (IV ८.८३) च स्वातन्त्र्येण विधानादस्य स्वतन्त्रसम्प्रदायत्वेन स्थितिः सुतरां शक्तिसंगमेऽङ्गीकृतेति विभावनीयम् ।

दिव्या वीराः पशवश्च

दिव्यमार्ग-वीरमार्ग-पशुमार्गानुवर्तिनो (I ६.२१), दिव्या वीराः पशवश्चोच्यन्ते । तत्र—" दिव्ये भेदद्वयम् " (III १.१५२) इत्युक्तम् । आदिदिव्यः, उपदिव्य इति च तयोर्नामनी प्रदर्शिते (III १.१९६) दिव्ये सम्प्रदायेऽपि वरदानाधिकारः कालिकायां प्रतितिष्ठति (II ५८. ५६-५७)। दिव्य-चीनक्रमः (II २.३३), दिव्यमार्गश्चात्र (II २.३७) चर्च्यते ।

वीरागमः स्मर्यते (II १.३०)। तदनुयायिनो वीराः । वीरः पञ्चविधो भवति (I ६.१३८; III १.१५१, १९७)। श्रीचक्रवीरः, ऊर्मिलाचक्रवीरः, चूडाचक्रवीरः, पुष्पचक्रवीरः, जीवचक्रवीरश्चेति तेषां नामानि भवन्ति । तत्र जीवचक्रे भावयोगः, पुष्पचक्रे क्रियायोगः, श्रीचक्रे ज्ञानयोगः, ऊर्मिलाचक्रे लययोगः, चूडाचक्रे च राजयोगः साध्यते (III १.१९७-२००)। प्रथमे खण्डे पुष्पचक्री, जीवचक्री च स्मर्येते (I ६.१४५), वीरचक्रे चासिताङ्गादीनां भैरवसम्प्रदायानां समावेशः क्रियते (I ६.१६६-१६९)। तत्र श्रीचक्रादीनां स्वरूपमग्रे विवेचयिष्यते । शाक्तसम्प्रदायाद् वीरशाक्तः सम्प्रदायः पृथग् वर्ण्यते पात्रनिर्णयावसरे (I ४.१५६)। दिव्या वीराः पशवश्च शाक्ते सम्प्रदायेऽन्तर्भाविताः (III १.१८९) इति वीरसम्प्रदायस्यैव वीरशाक्तपदेन निर्देशो मन्तव्यः ।

" एकाकी पाननिरतः पशुरित्यभिधीयते " (II ३३.१५) इति पशोर्लक्षणं विहितम् । " पशवस्त्रिविधा देवि ज्ञाताज्ञातविनिन्दकाः " (III १.१९६) इति च तस्य त्रयो भेदा वर्णिताः । तत्र एकाकी पाननिरतो दीक्षितः प्रथमः पशुर्ज्ञातपदेनोच्यते, दीक्षितो निन्दको द्वितीयः पशुविनिन्दकः, अदीक्षितः क्रियाहीनो मन्त्रतन्त्राविवर्जितश्च तृतीयोऽज्ञातः कथ्यते । एष एव महापशुरित्युच्यते (II ३३.१५-१७)।

अत्र—" पानं च त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमात् । दिव्यं देव्यग्रतः पानं वीरं मुद्रासने कृतम् ॥ स्वेच्छया पशुवत् पीतं पशुपानमितीरितम् । भुक्तिमुक्तिप्रदं दिव्यं वीरं मुक्तिप्रदं भवेत् । पशुपानं नरकदम् "

---

८३ सामान्यपूजनस्य चैतन्याख्यः क्रमोऽयं महाभैरवसंमत इत्यत्रैव प्रतिपाद्यते ।

(७।९४-९६) इति कुलार्णवस्थाः श्लोकाः प्रकरणानुगताः। शक्तिसंगमे तु महादिव्यादिभेदतः पानं पञ्चविधं प्रोक्तम् । महादिव्यं दिव्यं वीरः पशुर्महापशुश्चेति तेषां नामानि सन्ति । एतेषां लक्षणानि ग्रन्थ एव द्रष्टव्यानि (II ३३.२-१७) ।

दौर्गः सम्प्रदायः

" दुर्गाचण्डयादिसंयुक्तः स च दौर्गः प्रकीर्तितः " (I ८.३१) इति लक्षणमस्य दृश्यते । " शैववैष्णवदौर्गार्किगाणपत्येन्दुसम्भवैः । मन्त्रैर्विशुद्धचित्तस्य कुलज्ञानं प्रकाशते ॥ " (२।२९) इति कुलार्णववचनाद् दौर्गः शब्दोऽत्र शाक्तसम्प्रदायवाचकः प्रतीयते । शाक्तः सम्प्रदायोऽत्र शक्तिसंगमे विस्तरेण व्याख्यातः । दौर्गत्वेन पृथग् लक्षणं तु ब्राह्मणवसिष्ठन्यायेन नेयम् ।

पाशुपतः सम्प्रदायः

" दश पाशुपते भेदाः " (I ६. १४०; II १. ३२) इति, " सप्त पाशुपताः प्रोक्ताः " (I ८.४१; III १. १५१, १८३) इति चात्र दृश्यते । अत्र पाशुपतानां दश भेदाः क्वापि न परिगणिताः । सप्त भेदास्तु—' शिखी मुण्डी जटी चैव द्वित्रिदण्डी क्रमेण च ॥ एकदण्डी महेशानि वीरशैवस्तथैव च । सप्त पाशुपताः प्रोक्ताः (I ८. ४०-४१) इत्येवं प्रथमे खण्डे, " आदौ शिखी ततो मुण्डी जटी चैव तृतीयकः । द्विदण्डी त्वेकदण्डी च त्रिदण्डी च ततः स्मृतः ॥ वीरशैवः सप्तमस्तु सप्त पाशुपताः स्मृताः । " (III १. १८४-१८५) इति च तृतीये खण्डे प्रदर्शिताः । एतेषु षण्णां पाशुपतानां वासनाः प्रथमे खण्डेऽष्टमे पटले ८५-९२ श्लोकेषु निर्दिष्टास्तत एवावलोकनीयाः । सप्तमो वीरशैवश्च " केवलं शिवसम्पन्नस्त्वन्यदेवस्य निन्दकः ॥ वीरशैवेति कथितः " (I ८. २७-२८) इत्येवं लक्षितः । एतेषु मुण्डी त्रिंशद्विधो भवति (I ६. १४०; ८.८८), स च तारासूक्ते[८४] प्रकाशित इत्यप्यत्रैवोच्यते । चतुर्थे खण्डे तु जटी मुण्डी शिखी चेति त्रैविध्यं पाशुपतस्य सम्प्रदायस्य प्रोक्तम् (IV ८.११०) । पाशुपतवीरशैवादयः सम्प्रदाया दशमहाविद्यासु (III १. १०७-१०८), शैवे च च सम्प्रदाये (III १.१४९) अन्तर्भूता भवन्ति । पाशुपतक्रमे वरदानाधिकारः कालिकायां प्रतिष्ठितः (II ५८.५६), यतो हि पाशुपतादीनां सम्प्रदायानामधिष्ठात्री कालिका भवति (II ५८.७४) । अथाप्यागमसन्दोहे पृथक्तया परिगणनाद् (II १.२४) अस्य स्वातन्त्र्यं न व्याहन्यते । पाशुपतादिषु सम्प्रदायेषु नामदानविधिः प्रथमे (५. ९२-९४) तृतीये (१.९३-९५) च खण्डे द्रष्टव्यः । आगमसन्दोहे (II १.२५) वीरशैवः सम्प्रदायः स्वतन्त्रतया परिगणितः । स च ब्राह्मणवसिष्ठन्यायेन ज्ञेयः ।

पाषण्डः सम्प्रदायः

" पाषण्डाख्यव्रतं प्राप्ताः पाषण्डास्ते प्रकीर्तिताः ॥ श्मशानभस्मधारी च भस्मधारणसंचयः । स्नानसन्ध्यादिकं देवि लौकिकार्थं तु यश्चरेत् ॥ विष्णुद्वेषपरो भूत्वा सर्वं प्रकुरुते नरः । स पाषण्डेति कथितः " (I ८.६८) इत्येवमस्य सम्प्रदायस्य लक्षणमत्र वर्ण्यते ।

---

८४ तारासूक्तमिति शक्तिसंगमतन्त्रस्य चतुर्थखण्डस्य नामधेयमित्युक्तं प्राक्, किन्तु तत्र त्रिंशद्विधो मुण्डी कुत्रापि न प्रकाशितः । किमितो भिन्नोऽपि तारासूक्तनामा कश्चन ग्रन्थो विद्यते ? यत्र त्रिंशद्विधो मुण्डी प्रकाशितः स्यात् ।

बौद्धः सम्प्रदायः

षड्दर्शनेषु सर्वत्र बौद्धानामविनाभावितया परिगणनं भवति । पर्यायसप्तकप्रकरणे च बौद्धतन्त्राणामुल्लेखो वर्तते । बौद्धानां शतं भेदाः (I ६.१३९; II १.३२; III १.१५१) इत्युच्यते । तेषां नामानि तु क्वापि न परिगणितानि । केवलं तृतीये खण्डे—" बौद्धान् संश्रृणु यत्नतः ॥ केशच्छेदी वृक्षच्छेदी मद्याशी कल्मषस्तथा । इच्छाभेदी पञ्चमस्तु एवं बहुविधा मताः ॥ " (१. १९३-१९४) इत्येवं तेषु पञ्च नामानि संख्यायन्ते । आगमसन्दोहे (II १.३०) वीरागमेन सह बौद्धागमोऽपि पठ्यते । जैने बौद्धे च तारावदर्घ्यविधिः प्रतिपाद्यते (I ४ १६८) । विविधासननिरूपणप्रकरणे (II ४७.७३) शून्यवादस्यापि समुल्लेखो भवति । दशमहाविद्यासु तारायाः (तारिण्याः), चीनमार्गस्य मञ्जुघोषस्य (I ४.१८६) च सम्प्रदायस्य बौद्धेन सम्प्रदायेन सह घनिष्ठः संबन्धो भवति । षड्दर्शनानां समन्वयमुखेन प्रवर्तते तन्त्रमेतत् । तत्र बौद्धोपादानानां विशेषतया समुल्लेखो विविधविषयनिरूपणावसरे करिष्यते । मञ्जुघोषस्य सम्प्रदायस्य (I ४.१८६-१८७; II ३८. २, ११) इत्यादिषु स्थलेषु चतुर्थखण्डस्य प्रथमपटले च विशेषतया समुल्लेखो दर्शनार्हः ।

भैरवः सम्प्रदायः

" सम्प्रदायविहीनानां कुलशास्त्रप्रयोजनात् । सर्वगर्हित इत्युक्तो भैरवाख्यः प्रकीर्तितः । वेदबाह्यो यथा प्रोक्तस्तथैवाऽयं प्रकीर्तितः । " (I ६. १५२-१५३) इत्येवं वेदबाह्यतया सम्प्रदाय एष चर्च्यतेऽत्र। उन्मत्तभैरवादयः, असिताङ्गादयश्च भैरवा[८५]स्तत्रैव (I ६.१६३-१६९) वर्णिताः । विरूपाक्षमतेन त्रयोदश महाविद्याः, भैरवमतेन च षोडश विद्या भवन्तीत्यादयो विषया यथावसरं प्रतिपादयिष्यन्ते ।

विलासाख्यः सम्प्रदायः

केरलादित्रिविधसम्प्रदायनिरूपणावसरे चतुर्थो विलासाख्यः सम्प्रदायः स्मृतः। सम्प्रदाय एष सम्पूर्णे देशे प्रचरति, हार्दबाह्यप्रभेदेन तस्य द्विधात्वं च भवतीति चतुर्थे खण्डे (५. ४४-५०) प्रतिपाद्यते । प्रथमे खण्डे विलासाख्यस्य वैष्णवाख्यस्य च दक्षिणाम्नाये समावेशः कृतः (I ४.६८), " केवलं तर्पणं यदि ॥ विलासाख्यस्तदा " (४.१८३-१८४) इति च तस्य लक्षणं कृतम् । विलासे पानकर्म I ५.३३ इत्यत्र वर्ण्यते। " सर्वातिरिक्तो देवेशि विलासाख्यः प्रकीर्तितः। विलासाख्ये सम्प्रदाये स्वयमस्ति सदाशिवः॥ हार्दबाह्यप्रभेदेन द्विविधत्वं च पार्वति । " (I ९.३४-३५) इत्यत्र च तस्य वैशिष्ट्यं द्वैविध्यं च प्रकाश्यते । द्वितीये खण्डे तु—" विलासाख्यास्त्रिधा देवि भेदाश्चान्ये भवन्ति च " (४५.२०) इत्युच्यते, तेषां नामानि तु न दृश्यन्ते । किन्तु प्रथमे खण्डे--" चैतन्यान्तो विलासाख्यो बाणसंख्याप्रवाचकः " (I ६.१७३) इत्यादिना आपटलान्तं मध्ये मध्ये बहवो भेदाः सम्प्रदायस्यास्य वर्णिताः । तृतीये खण्डे विलाससम्प्रदायोक्तोऽन्तर्मातृकान्यसनक्रमो निर्दिष्टः— " अथान्तर्मातृकां वक्ष्ये " (३.२२९) इत्यादिना ।

वैष्णवाख्यः सम्प्रदायः

आगमसन्दोहे (II १.२४) वैष्णवमतस्यापि समावेशो वर्तते। पर्यायसप्तकनिरूपणे षड्दर्शनेषु

---

८५ तृतीये खण्डे (११. २५३-२५४) मन्थान-षट्चक्र-फट्कार-विमक्ष-वीरेश-श्रीमन्तेश्वर-हंसगर्भ-चण्डिकेश्वराख्या अष्टौ भैरवा वर्ण्यन्ते ।

च वैष्णवानां तन्त्राणां परिगणनं विस्तरेण वर्तते । " वैखानसादिदीक्षाद्यैर्युक्तो वैष्णव एव च " (I ८.२६) " वेवेष्टि सर्वं संख्याप्य यस्तिष्ठति स वैष्णवः " (I ८.४२) इति चास्य लक्षणं प्रतिपाद्यते । वैष्णवः सम्प्रदायोऽयं दशविधो भवति (I ६.१३८) । यद्यपि तृतीये खण्डेऽष्टविधो वैष्णव (III १.१८५) इत्युच्यते, तथापि परिगणनया ते दश भवन्ति । दशविधा वैष्णवा इमे सन्ति—" वैखानसो भवेदादौ श्रीराधावल्लभस्तथा । गोकुलेशो महेशानि तथा वृन्दावनी भवेत ॥ पाञ्चरात्रः पञ्चमः स्यात् षष्ठः श्रीवीरवैष्णवः । रामानन्दी हरिव्यासी निम्बार्कश्च महेश्वरि ॥ ततो भागवतो देवि दशभेदाः प्रकीर्तिताः ॥ " (I ८.३८-४०) इति तृतीये खण्डेऽपि तान्येतानि परिगणितानि (१. १८५-१८८) । अतश्च " पाञ्चरात्रादयो देवि वैष्णवे संभवन्ति हि " (III १.१४९) इति युक्तमेव । अमीषां दशविधानां वैष्णवानां लक्षणानि वैशिष्ट्यं च प्रथमे खण्डेऽष्टमे पटले ३-६, २८-२९, ४३-८२ श्लोकेषु द्रष्टव्यानि । " वैखानसादिदीक्षाद्यैर्भूषितः स्मार्तवैष्णवः " (I ८.४३) इति च लक्षणं वैखानसस्य वर्तते । सुरेन्द्रसंहिताप्रभृतीनां ग्रन्थानामाधारेण वैष्णवानां पाशुपतानां च सम्प्रदायानां वर्णनं कृतमिति विभावनीयमत्र (I ८.८३-८५) । आगमसन्दोहे (II १. २४-२५) वीरवैष्णवस्य पाञ्चरात्रस्य च पृथग् वर्णनं क्रियते ! तत्र वीरवैष्णवस्य दशमहाविद्यास्वन्तर्भावः प्रदर्श्यते (III १.१०८), अधिवासविषयकश्च पाञ्चरात्रक्रमः स्वतन्त्रतया वर्ण्यते (I १८.१५)

इदमत्रावधेयम् —" पाञ्चरात्रं भागवतं तथा वैखानसाभिधम् " इति वचनमुद्धृत्य भास्कररायेण नित्याषोडशिकार्णवसेतुबन्धे (प्रथमसंस्करणे, पृ. ५) वैष्णवानां भेदत्रयमेवाङ्गीकृतम् । तिरुपति-तिरुमलै-तीर्थवसतेर्भगवतो वेङ्कटेश्वरस्यार्चनं वैखानसपद्धत्या भवति, वैखानसागमाश्च तिरुपतिक्षेत्रतः प्रकाशिता नैके । एवमेव श्रीरंगप्रभृतिषु प्रसिद्धेषु दाक्षिणात्येषु वैष्णवमन्दिरेषु पाञ्चरात्रविधिः प्रवर्तते, पाञ्चरात्रसंहितानां च बाहुल्येनोपलब्धिस्तत्रैव भवति, प्रकाशिताश्च ताः । रामानुजे सम्प्रदाये प्रकामं समादरो विद्यते तासाम् । तमिलवैष्णववाङ्मयं पाञ्चरात्रसंहिताभिरनुप्राणितमित्यङ्गीक्रियते । प्रसिद्धेन शर्मण्यदेशीयेन विदुषा डा० श्राडरमहोदयेन ' एन इंट्रोडक्शन टू दी पाञ्चरात्र लिटरेचर ' इत्याख्ये स्वकीये ग्रन्थे पाञ्चरात्र वाङ्मयस्य विशदः परिचयः प्रदत्तः । तत्र हयशीर्षपाञ्चरात्रस्याग्निपुराणस्य च कानिचन वचनान्यपि समाश्रित्य विदुषाऽनेन पाञ्चरात्रसंहितानां विस्तृता नामावली समुपस्थापिता । अग्निपुराणस्थाः पाञ्चरात्रीया अध्याया हयशीर्षपाञ्चरात्रस्य प्रतिच्छायाभूता इति सप्रमाणं साधितमस्माभिरन्य[८६]त्र । अग्निपुराणे पञ्चविंशतिपाञ्चरात्रसंहितानामेव नामानि दृश्यन्ते । एतावन्त्येव नामानि हयशीर्षेऽपि सन्ति । ततः परं दश नामानि भागवतसंहितानां सन्ति, किन्तु श्राडरमहोदयेन तत्र नवनामानि दृष्टानि, तान्यपि च पाञ्चरात्रसंहितासु समावेशितानि । वस्तुतस्तु " इमे (मा) भागवतानां तु " (२९) इति वचनात्, तन्त्रभागवतस्याप्यत्र परिगणनाच्च भागवतस्य तृतीयस्य वैष्णवसम्प्रदायस्येमाः संहिता इति विभावनीयम् । भागवततत्त्वनिर्णयादिषु (पृ. २-३) मध्वाचार्येण तन्त्रभागवतमुद्धृतम् । इतोऽपि प्राक्तनेन बाण[८७]भट्टेन भागवताः पाञ्चरात्राश्च पृथग् वर्णिताः । एवं च वैखानसं पाञ्चरात्रं भागवतं चेति सम्प्रदायत्रयमेव दशविधवैष्णवेषु प्राचीनम् । अत एव श्रीमता विनयतोषभट्टाचार्यमहोदयेन प्रथमखण्डप्रस्तावनायाम् (पृ. VI-VII) निम्बार्क-रामानन्द-राधावल्लभ-हरिव्याससम्प्रदायानामर्वाचीनत्वं साधितम् । एवमेव गोकुलेशः सम्प्रदायोऽपि

---

८६ पुण्यपत्तनस्थ-वेदशास्त्रोत्तेजकसभया प्रकाशिते 'प्राचीन भारतीय विद्येचे पुनर्दर्शन' इत्याख्ये ग्रन्थे १८१-१९६ पत्रान्तर्गते आगम आणि तन्त्रशास्त्र' नाम्नि निबन्धे ।

८७ हर्षचरिते (निर्णयसागरपञ्चमसंस्करणे, पृ. २३६-२३७) द्रष्टव्यम् ।

श्रीमतो वल्लभाचार्यस्य पुष्टिमार्गप्रवर्तकस्य पौत्रेण गोकुलनाथेन सम्राजो जहांगीरस्य राज्यकाले प्रवर्तितत्वादर्वाचीन एव वर्तते ।

शाक्तः सम्प्रदायः

" शक्तिरुपासको यस्तु स च शाक्तः प्रकीर्तितः " (I ८.२६) इति हि शाक्तस्य लक्षणमत्र दृश्यते । षड्दर्शनेषु पर्यायसप्तकनिरूपणे च शाक्तस्य सम्प्रदायस्य तत्तन्त्राणां च परिचयो विस्तरेण प्रतिपाद्यते । शाक्ते सम्प्रदाये केषां केषां मतानामन्तर्भावो भवतीत्यपि निदर्शितमेव । शक्तिसंगमाख्यं तन्त्रमिदं प्राधान्येन शाक्तस्य सम्प्रदायस्यैव प्रतिपादकमिति मन्तव्यम् ।

शैवः सम्प्रदायः

" षडध्वशाम्भवाद्यैस्तु युक्तः शैवः प्रकीर्तितः " (I ८.२७) इति " सर्वोत्तमो भवेच्छैवः शाम्भवः परिकीर्तितः। चतुर्दशीव्रतासक्तः प्रदोषव्रततत्परः ॥...एतद्व्रतसमायुक्तः शिवपूजापरायणः । " (I ८. ९३-९६) इति च शैवानां लक्षणं प्रतिपाद्यतेऽत्र । शैवा एव शाम्भवा उच्यन्ते । " शिवप्राधान्याच्छैवं स्याच्छाम्भवः सम्प्रकीर्तितः " (II ३.८) इति वचनमुपोद्बलकमस्य । अष्टाविंशतिसिद्धान्ताः (III ३. १९०), अष्टादशसिद्धान्ताश्च (III ११.४०) शैवानामागमग्रन्था उच्यन्ते । " प्रायश्च सिद्धान्तप्रियो लोकः " इत्याह [८८]श्रीक्षेमराजः । " सिद्धान्तशब्दश्च पङ्कजादिशब्दवद् योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशतन्त्रेषु प्रसिद्धः " इति च श्रीमान् अघोर[८९]शिवाचार्यः । एवं च शैवाः शाम्भवाः सिद्धान्तिन इत्यनर्थान्तरम् । I ३.२ इत्यत्र दृष्टः सिद्धान्तशब्दस्तु ज्योतिःशास्त्रेण संबद्धः । यद्यप्यागमसन्दोहे शैवाः पाशुपताश्च पृथक्तया वर्ण्यन्ते (II १.२४), तथापि पाशुपतानां शैवे सम्प्रदायेऽन्तर्भावप्रदर्शनाद् (III १. १४९, १८३) अभिन्नत्वं तयोर्मन्तव्यम् । पृथङ्निर्देशस्तु ब्राह्मणवसिष्ठन्यायेन नेयः । शाम्भवसम्प्रदायस्य गर्भशाम्भव-केरलशाम्भवनामानौ भेदौ तृतीये खण्डे (१.११५), पीठवाणीप्रभेदेन लिपिभाषाप्रभेदेन प्रत्येकं विंशतिः शाम्भवानां भेदाश्चतुर्थे खण्डे (१.१०९) द्रष्टव्याः ।

सौरः सम्प्रदायः

षड्दर्शनेषु आगमसन्दोहे सौरसम्प्रदायस्यापि समावेशो वर्तते । पर्यायसप्तकनिरूपणे सौरतन्त्राणां परिगणनं विद्यते । " सूर्यासक्तमना यस्तु स सौरः परिकीर्तितः " (I ८.३०) इति हि सौरसम्प्रदायानुयायिनो लक्षणम् । " सौरे पञ्च महेशानि " (I ६.१३९) इति च तस्य पञ्च भेदाः सूचिताः । नामान्येषां तु कुत्रापि न दृश्यन्ते । अर्घ्यप्रकरणे (I ४.१६७) वरदानाधिकारे (II ५८.५५) च सौरसम्प्रदायस्योल्लेखो वर्तते ।

स्मार्तः सम्प्रदायः

प्रथमे खण्डे नानामतनिरूपणपटले स्मार्तवैष्णवपदेन (८.४३) वैखानसः सम्प्रदायो गृह्यते, किन्तु दशविधवैष्णवसम्प्रदायलक्षणप्रदर्शनान्तरं " तेषां व्रतादिकानां तु निर्णयः कथ्यते क्रमात् " इत्यादिना

---

८८ स्वच्छन्दतन्त्रोद्योते (२.२५) द्रष्टव्यम् ।

८९ रत्नत्रयव्याख्यायामुल्लेखिन्यां पृ. ५ अवलोकनीयम् ।

" स्मार्तानां मतमाख्यातं वैखानसमतं शृणु " (I ८. ६१-६८) इत्यन्तं स्मार्ताश्चर्च्यन्ते। अत्र वैखानसमतस्य पृथङ्निर्देशात् तदभिन्नस्मार्तवैष्णवापेक्षया सम्प्रदायस्यास्य पृथक् स्थितिर्निर्धार्यते । दशविधवैष्णवेषु नैतत् परिगृहीतम् । अथ च दशमीविद्धा एकादशी अत्र परिगृहीता । अतः स्मार्तः शैव सम्प्रदायो दशविधवैष्णवभिन्नोऽत्र लक्षित इति मन्तव्यम् । एवमेव—" मुहूर्तवेधो देवेशि स्मार्तानां परिकीर्तितः " (I ८.८१) इत्यपि वचनं स्मार्तसम्प्रदायपरतयैव योजनीयम् । एते पञ्चायतनवादिनो मन्तव्याः ।

स्वायम्भुवः सम्प्रदायः

" ब्राह्मणोपासको यस्तु स च स्वायम्भुवो मतः " (I ८.३०) इति हि तस्य लक्षणमुच्यते आगमसन्दोहे (II १.२५), वरदानाधिकारे (II ५८.५५) च स स्मर्यते। स्वायम्भुवस्यास्य सम्प्रदायस्य त्रयो भेदा अत्र (I ६ १३८) सूचिताः, तेषां नामानि तु क्वापि न परिदृश्यन्ते। स्वायम्भुवेऽस्मिन् सम्प्रदाये गाणपत्यवदर्घ्यदानविधिः संपाद्यते (I ४.१७१) ।

एवमत्र नानाविध : सम्प्रदाया वर्णिताः । एतेभ्यः प्रसिद्धेभ्योऽप्रसिद्धेभ्यश्च सम्प्रदायेभ्यो भिन्नानि तदन्तर्गतानि वा नानामतानि [९०]मत-क्रम-मार्गाङ्कितानि तत्र तत्रार्घ्य-पात्र-पान-पूजा-विद्यादिविषयकाणि समुपलभ्यन्तेऽत्र । द्वितीये परिशिष्टे तेषां नामान्यक्षरानुक्रमेण सम्प्रदायनामभिः सह स्थापितानि । अधुना तेषामपि संक्षेपेणात्र परिचयः समुपस्थाप्यते ।

सम्प्रदायपरम्परा

दिव्यौघ-सिद्धौघ-मानवौघक्रमेण सम्प्रदायपरम्परा प्रवर्तत इति हि प्रतिपाद्यते विशेषतः शाक्तेषु तन्त्रेष्वागमेषु च । कामकलाविलासे क्रमोदयनाम्ना प्रतिपादिता सा ' द्विविधः क्रमोदयः ' इति शीर्षकेणास्माभिर्नित्याषोडशिकार्णवोपोद्घाते विस्तरेण व्याख्याता (पृ. ९७-१०१) । यद्यपि त्रिविधैषा सम्प्रदायपरम्परा नात्र तया पद्धत्या उपदिष्टा, तथाप्यत्र वर्णिता विविधाः सम्प्रदाया दिव्यौघपरम्पराम् , मतमतान्तराणि सिद्धौघपरम्पराम् , शाङ्करदशनामिप्रकरणं च मानवौघपरम्परां सूचयन्ति । पारम्पर्यक्रमनाम्ना विषयोऽयमेवं व्याख्यायतेऽत्र—

" अथातः संप्रवक्ष्यामि पारम्पर्यक्रमं शिवे " (III १.६३-९०) इत्यादिना प्रकरणमिदं प्रारभ्यते। आदौ साक्षात् परशिवेन शङ्करः प्रबोध्यते। श[९१]ङ्कर एव चतुर्भिः शिष्यैः सह शङ्कराचार्यरूपेणावतरति। शिवेन देवी बोधिता, देव्या च सर्वे प्रबोध्यन्ते। एवं च शिवपरम्परा देवीपरम्परा चेति प[९२]रम्पराद्वयं प्रवर्तते। ताभ्यां च मतबाहुल्यमाविर्भवति। वस्तुतस्तु आनन्दभैरवाद् देवीमतपरम्परा प्रवर्तते; तत्र च प[९३]ञ्चाशीतिमतानि क्रमाश्च संजायन्ते। दक्षिणामूर्तितः शिवपरम्परा प्रवर्तते। दिव्यौघ-सिद्धौघ-मानवौघक्रमेण सम्प्रदायपारम्पर्यमेतच्चिरन्तरं प्रवहति । आनन्दभैरवाद्याः कोटिभेदा ह्याद्य सम्प्रदायेऽन्तर्भवन्ति । अत्र

---

९० अत्र ६० संख्याका टिप्पणी द्रष्टव्या ।

९१ " चतुर्भिः सह शिष्यैश्च शङ्करोऽवतरिष्यति " (III १. ६४) इति हि प्रतिपादितमत्र। एतच्च शाङ्करदशनामिसम्प्रदायप्रतिपादनावसरे विवृतमेव ।

९२ परम्पराद्वयमेतत् प्रथमे खण्डेऽपि (I ५. २६-३१) वर्णितम् ।

९३ " आनन्दभैरवमते पञ्चाशीतिगुरुक्रमः " (I ५. ३९-४२; II ३२. ४-६) इत्यादिना विषय एष स्पष्टीक्रियते ।

विभिन्नानां मार्गप्रवर्तकानां मुख्यत्वमङ्गीक्रियते, एते च मुख्या मार्गप्रवर्तका विरूपाक्षादय ऋषिपदेनाभिधीयन्ते। अत्र सरस्वती लेखनी, गणेशो लेखकः, वक्ता देवो महेश्वरः, पृथ्वी पत्री, नाथाः शास्त्रस्य बन्धकाः, ब्रह्मास्त्राद्याः शरभाद्याश्च शास्त्रस्य रक्षकाः, ओघाश्च शास्त्राणां प्रवर्तकाः सन्ति। ओघाश्च पारम्पर्यक्रमादागता भिन्ना भिन्ना भवन्ति। दिव्यौघः स्वर्गे, सिद्धौघो भूमौ, मानवौघश्च मनुष्येषु प्रवर्तते। शिवात् स्वगुरुपर्यन्तायाः, देवीतः स्वगुरुपर्यन्तायाः, आनन्दभैरवाद् दक्षिणामूर्तितो वा स्वगुर्वन्तपरम्परायाः ज्ञानमुत्तममभिधीयते। एतदभावे एकविंशत्तमगुरुपारम्पर्यज्ञानं परमेष्ठिगुरुपर्यन्तज्ञानं वा नितान्तमपेक्षितम्। आनन्दभैरवमतेन देवीपरम्परायां प्रवर्तितानां बहूनां मतानां नामानि प्रथमखण्डे षष्ठपटले संगृहीतानि पूर्वमेव प्रदर्शितानि।

चतुर्थे खण्डे (७. ६६-७५) प्रतिपाद्यते यद् ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः, शान्तिः, शान्त्यतीता, सर्वातीता, दिव्यसाम्राज्यमेधा चेति नव कहादिसम्प्रदायाधीशा उच्यन्ते आनन्दभैरवः, दक्षिणामूर्तिः, विरूपाक्षः, राजराजेश्वरः, सदाशिवः, संवर्तकेश्वरः, दिव्यौघः, सिद्धौघः मानवौघश्चेति नव हादिसम्प्रदायाधीशाः प्रोच्यन्ते। ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः, भैरवः, बटुकः, महाकालः, अक्षोभ्यश्चेति नव कादिसम्प्रदायाधीशा भवन्ति। कालः, महाकालः, करालः, अतिकालः, प्रलयेशः (संवर्तकेश्वरः), क्रोधराजः, कालिका, महातारा, छिन्नमस्ता चेति नव महाकादिमताधीशाः प्रोच्यन्त इति।

अत्र स[९४]दाशिवः सम्प्रदायत्रयस्याधीशः। संवर्तकेश्वर एव प्रलयेश इत्यप्युच्यत इति ब्रह्म-विष्णु-रुद्र-ईश्वर-संवर्तकेश्वर-महाकालाः सम्प्रदायद्वयस्य, अन्ये च मतस्यैकस्याधीशाः सन्ति। अधीशा एतेऽन्यत्र नव[९५]नाथपदेन व्याख्याताः। एते च मतप्रवर्तकाः सन्ति। एतेषु बहूनां मतान्यत्र बाहुल्येन विभिन्नेषु प्रकरणेषु दृश्यन्ते। अपि च— "आनन्दभैरवः कालश्चातिकालक्रमेण च। आनन्दभैरवमते पञ्चाशीतिगुरुक्रमः॥" (II ३२.५) इत्यत्र कालातिकालाभ्यां सह आनन्दभैरवः पठ्यते। चतुर्थखण्डे च— "कालश्चैव महाकालः करालश्च तृतीयकः। अतिकालश्चतुर्थश्च" (IV ७.७३-७४) इति, "चतुःकालमतत्वेन बटुकः पञ्चमो मतः" (IV ८.१६८) इति मतपञ्चकप्रतिपादनावसरे कालादयः सम्प्रदाया बटुकेन सह संयोज्यन्ते, "शिवदेवी वटेशाख्यस्तथाचानन्दभैरवः" (I ६.१३५) इत्यत्र आनन्दभैरवेण सह वटेशाख्यः संपठ्यते। वटेशाख्यमतमिदं वटवासिमतेनाभिन्नमेव मन्तव्यम्। करालाद्भिन्नं विकरालमतमत्र श्रूयते (II १८.४५)। एवं च मतान्येतानि क्वचित् सहवर्तीनि क्वचिच्च स्वकीयां स्वतन्त्रां सम्मतिं प्रदर्शयन्ति। आनन्द-आनन्दभैरव-बटुक-भैरव-महाभैरवादीनां मतानां विभिन्नेषु विषयेषु स्वातन्त्र्येण मतोपस्थापनादेतेषां पार्थक्यमङ्गीकर्तव्यमेव।

अक्षोभ्योऽत्र नवमः कादिमताधीशः पठ्यते। "अक्षोभ्यो भैरवः प्रोक्तः" (III १९. ६०) "अक्षोभ्यं नाम चाश्रित्य मुनिवेषधरः शिवः" (IV ५. १४६) इति वचनाभ्यां तस्य भैरवत्वं शिवत्वं च ख्याप्यते। शिव एव भैरवस्वरूपं धारयतीति प्रसिद्धमेव। मुनिवेशधरस्याक्षोभ्यस्य वर्णनं

---

९४ "गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः। प्रश्नोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत्॥" योगिनीहृदयदीपिकायाम् (पृ. २) उद्धृतं महास्वच्छन्दवचनमेतत् पाठान्तरेण सह स्वच्छन्दतन्त्रे (८.३१) समुपलभ्यते। अत्र सदाशिवः सकलशास्त्राणामवतारक उच्यते।

९५ "नवनाथैरकल्पयत्" (१.७) इत्यत्र तन्त्रराजतन्त्रे सूचिता नवनाथा द्वितीये पटले (२. १-९) परिगणिताः। ते च–प्रकाश-विमर्श-आनन्द-ज्ञान-सत्य-पूर्ण-स्वभाव-प्रातिभ-सुभगाख्याः सन्ति।

तारोत्पत्तिप्रकरणे (IV ५. १३१-१४८) विद्यते । मेरोः पश्चिमकूले चोलनामा महाह्रदो राजते । तस्मिन् ह्रदे निपत्य तारिणी नीलवर्णाऽभवत्, नीलसरस्वती-महानीलसरस्वती-नीलोग्रतारिणी-महोग्रतारा-प्रभृतिनामभिश्च ख्यातिं जगाम । चोलह्रदस्य चौत्तरे भागे चीन[९६]देशेऽक्षोभ्यनामा ऋषिरेको महत्तरो निवसति स्म, यो मुनिवेषधरः शिव एवासीत् । तेन हि चीनदेशे विश्वव्यापकतोयसंकटे समुत्पन्ने सर्वप्रथमं तारा[९७]विद्याया जपो विहितः । " येनादौ जप्यते जातु स तस्य ऋषिरीरितः " (IV ५. १४६) इति वचनानुसारमुग्रापत्तारकस्य तारामन्त्रस्य अक्षोभ्य एव ऋषिरभिमन्यते । " येन दृष्टा तु या पूर्वं स तस्या ऋषिरीरितः " (I १. ८९) इत्यत्र स्त्रीत्वेन निर्देशो विद्यानां बोधकः । स्त्रीदेवत्या हि मन्त्रा विद्यापदेनाभिधीयन्ते । विद्याश्रिताः पुरुषं (भैरवं) विना न सिद्ध्यन्ति । अत एव कालि[९८]कायां महाकालः सुन्दर्यां ललितेश्वरः, तारायामक्षोभ्यः, छिन्नायां विकरालः, भुवनायां महादेवः, धूम्रायां कालभैरवः, महालक्ष्म्यां नारायणः, भैरव्यां बटुकः, मातङ्ग्यां मातङ्गः सदाशिवो वा, बगलायां मृत्युञ्जयो भैरवः शिवः स्वर्णाकर्षणभैरवो वा तया तया विद्यया सह समाराध्यते । अत एवोपसंहाररूपेण प्रोच्यते—" बटुकस्य तु संयोगाद् विद्याः सिद्ध्यन्ति नान्यथा " (IV ८. २१३) इति । अत्र बटुकपदं भैरवसामान्यपरम् । एतेनेदमायाति यदक्षोभ्यातिकालप्रभृतीनां यानि मतान्यत्र निर्दिष्टानि, तानि सर्वाणि तासां तासां विद्यानामेतन्नामकैर्भैरवैरिदम्प्रथमतया प्रतिपादितानीति ।

अधुनाऽत्र व्याख्यातानां ग्रन्थानां मतानां च परःशतानामाधारेण ये विषया अत्र प्रतिपादिताः, तेषु केषाञ्चन महत्त्वपूर्णानां परिचयः समुपस्थाप्यते ।

---

९६ प्राचीनः कामरूपदेश एव साम्प्रतम् असमनाम्ना प्रसिद्ध्यति । कदाचिदयं चीननाम्ना, साम्प्रतिकचीनदेशश्च महाचीननाम्ना व्यवह्रियते स्म । प्राग्ज्योतिषपुरं चीनदेशस्य राजधानी समासीत् । हुएनत्सांग-नाम्नश्चीनयात्रिणो यात्राविवरणादिदमवगम्यत इति श्रीभगवद्दत्तमहोदयाः स्वकीये ' वैदिक वाङ्मय का इतिहास ' इत्याख्ये ग्रन्थे भा. १, पृ. १६, १८) वर्णयन्ति । सभापर्वणो दाक्षिणात्ये पाठे आश्रमवासिकपर्वणि च प्राग्ज्योतिषपुराधीशो भगदत्तः किरातैश्चीनैश्च परिवृतो वर्ण्यते, इत्यपि तत्रैवोच्यते । साम्प्रतमसमप्रान्ते उग्रापत्तारिण्या महोग्रतारायाः सविशेषमर्चनं प्रचलतीति तत्रैव जलापच्छमन्यास्तारायाः प्रादुर्भावः समजायतेति वक्तुं शक्यते । ब्रह्मपुत्रनदेन प्रतिवर्षमसमप्रान्ते जलापदियं प्रवर्त्यते । चीन-महाचीनदेशयोः सीमे (III ७. ४८-४९) इत्यत्र वर्णिते द्रष्टव्ये ।

९७ " तारां च तोयप्लवे " (श्लो. १७) इत्येवं धर्माचार्यकृतलघुस्तुतौ स्तूयते । तारा पञ्चस्तवीकारो धर्माचार्योऽयं सरस्वतीकण्ठाभरणकारभोजदेवात् प्राचीन इति सप्रमाणं साधितमस्माभिः ' त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च ' इत्याख्ये निबन्धे (सारस्वती सुषमा, व. २०, अ. २, पृ. २३)।

९८ विषयोऽयं द्वितीये खण्डेऽपि (II ४३. २१-२७) वर्ण्यते ।

उत्तरार्धः

द्विविधा वरिवस्या

तन्त्रशास्त्रेषु द्विविधा वरिवस्या प्रतिपाद्यते–बाह्या च आन्तरा च । कुण्डलिनीजागरणषट्चक्रभेदादिस्वरूपया यौगिकप्रक्रियया क्रियमाणा वरिवस्या आन्तरा, पञ्चोपचार-षोडशोपचारादिभिश्च क्रियमाणा [1]बाह्येत्यभिधीयते । अत्रापि हार्दावकाशजं बाह्यावकाशजं चेति द्विविधं यजनं प्रतिपादितम् (IV ११.६८-९०) । अन्योन्याश्रयरूपमेतद्भवति । अन्तःशुद्धौ सत्यां हि बहिःशुद्धिर्भवति । एवं च हार्द-बाह्यप्रभेदेन पूजाया द्वौ भेदौ भवतः । अत्र भगवत्या पृच्छयते—स्वामिन् ! बाह्यपूजां विना कथमन्तःप्रपूजनं कर्तुं शक्यते । भगवता च समाधीयते–विष्ठापूर्णे मृद्घटे बाह्यशुद्धिर्निष्फला भवति । अतोऽन्तःशुद्धिं समासाद्य बहिःशुद्धिर्विधेया । कलौ बहिःपूजाविधौ सामग्री दुर्मिला, तेन व्यङ्गता आन्तर-वरिवस्या जायते । तत्साङ्गतासिद्ध्येऽन्तःपूजा प्रथमं विधेया ।

अन्तःपूजा चेयं भावनामात्रगम्या । संयोगं विना यो गर्भाधानमिच्छति स एवान्तःपूजनं विहाय बहिःपूजां समाचरति । ईदृशो जनो दरिद्री महारोगी च भवति । अतः शुभेच्छुनाऽन्तःपूजां विधायैव बहिःपूजा समाचर्या । अपक्कां मृदमानीय हि सुन्दरो घटो निर्मीयते, नहि पक्कया मृदा तन्निर्माणं संभवति । अतः...“देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेत्” (IV ११.८५) इति शास्त्रसमयमनुसृत्य साधकेनान्तःपूजाविधिना देवत्वमासाद्य बाह्यपूजा विधेया । एतदर्थमेव भूतशुद्धि–प्राणप्रतिष्ठा-न्यास प्राणायामादय उपाया विधीयन्ते । पूर्वं देहमये पीठे परमेश्वरी समाराध्या । एवं स्वान्तर्गोचरा पूजा निष्पन्ना भवति, संकल्पसिद्धिश्च जायते । अन्तःपूजने भावनानुसारं फलं लभ्यते । भावं विना ब्रह्मापि दुर्गतिं गच्छति । भावनावशमापन्नश्च नरो भावयोगी भवति । एवं हार्दी वरिवस्या भावनात्मिकाऽत्र वर्ण्यते । विशिष्टया दार्शनिकदृष्ट्या यौगिकप्रक्रियया च सा साध्यते ।

शक्तिसंगमीयं दर्शनम्

आदिनारायण एव साक्षात् परशम्भुरित्युच्यते । स एव निर्गुणं ब्रह्म । बृहत्त्वाद्धि तद् ब्रह्मेति कीर्त्यते । आदिमध्यान्तरहिता गुणातीता महोज्ज्वला आदर्शवत् स्वच्छरूपा महाशक्तिरिति प्रकीर्त्यते । “[2]शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते” मतमिदं यद्यप्यत्रापि मान्यते (I १.९८; IV

---

१ “नित्यपूजयस्वं द्विविधम्—दहराकाशजं बाह्याकाशजं चेति । बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ भूर्जपत्रशुद्धपटहेमरजतादिपट्टतले लिखित्वा समाराधनम् । एतदेव कौलपूजा । दहराकाशजं नाम हृदयाकाशावकाशे चक्रस्य पूजनम् । इदमेव समयपूजा” (पृ. ६४) इत्यादिना सौन्दर्यलहरीटीकाकारो लक्ष्मीधरोऽपि पूजायाः प्रकारद्वयमेतत् प्रतिपादयति ।

२ नित्याषोडशिकार्णवस्थः (४.७) श्लोकोऽयम् । अत्र हि चतुर्थे पटले शक्तिप्राधान्यपक्षः समुपस्थापितः, यदाधारा प्रवर्तते सौन्दर्यलहरीकारस्य उक्तिरियम्—“शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि” (श्लो. १) इति ।

३.११३), तथापि " प्रकृत्या तु विना देवि न संसारः क्वचिद् भवेत् " (IV ८.२०८) इत्यादिना तदेवानूद्य " पुरुषं च विना देवि न विद्या सिद्धिदायिनी । तस्मात् कारणतो देवि द्वितयं पूजयेच्छिवे ॥ " (IV ८.२०९) [3]इत्यप्युच्यते । अत एवात्र शिवशक्त्यात्मकं कालकालीमयं ब्रह्म उपास्यतयाऽभिधीयते। तदिदं ब्रह्म केचिच्छक्तिपदेन, केचिन् शिवपदेन, केचिन्नारायणादिपदैर्व्याहरन्ति । अत्र विशेषतः कालीतारामयं ब्रह्म प्रतिपाद्यते । तत्र तारिणी ब्रह्मरूपा, कालिका ब्रह्मसुन्दरी, छिन्ना ब्रह्मसिद्धिः, सुन्दरी च ब्रह्मचिद्धनेत्युच्यते । तदेतद् ब्रह्म निर्गुणं [4]सगुणं च भवति । यस्य वर्णने कुण्ठतामापद्यते बुद्धिः, यदवर्ण्यं वाच्यातीतं तदेव निर्गुणं निराकारं ब्रह्माभिधीयते, अनेकधा वर्ण्यमानं वर्णनाशक्तिगोचरं ब्रह्म सगुणं प्रकीर्त्यते।

सृष्टिस्थितिलयतिरोधानानुग्रहाख्यपञ्चकृत्यसम्पादनार्थं हि निर्गुणं (निष्कलं) ब्रह्म वर्ण-प[5]द-तत्त्व-मन्त्र-भुवन-कलाख्येन षडध्वना परिणमते, सगुणं (सकलं) रूपं धारयति । आणव्य-कार्मण-माया-प्रकृति-अहङ्काराख्यैश्च मलैः स्वस्वरूपमाच्छाद्य सृष्टिजालं सर्वत्र प्रसारयति, पालयति स्वातन्त्र्येण संहरति च । " कीटाद् ब्रह्माण्डपर्यन्तं सर्वं शक्तिमयं जगत् " (III १.२०१), " शिवशक्त्यात्मकं देवि यत्किञ्चिज्जगतीतले " (III ४.५५) इत्यादिना तदेतत् प्रतिपाद्यते । निर्गुणयोर्हि ब्रह्मपरमशक्त्योर्मध्यभागे प्रतिबिम्बरूपेण सगुणः शिवः संदृश्यते । शिवस्य च प्रतिबिम्बस्वरूपिणी प्रकृतिः प्रादुर्भवति । ततश्च महदहङ्कारादिप्राणान्तं जगत् समुत्पद्यते । प्राणाच्च जीवः । स च जीवात्मपरमात्मभेदेन भिद्यते । प्रलयावस्थायां तु म[6]हाशून्यस्वरूपायां महादक्षिणकालिकायां शून्यस्वरूपे कृष्णे च सर्वं जगत् संलीनं तिष्ठति । सेयं सृष्टिसंहारप्रक्रियाऽत्र प्रथमे खण्डे प्रथमद्वितीयपटलयोर्विस्तरेण व्याख्याता ।

अस्यां सृष्टिसंहारप्रक्रियायां प्रवहन्त्यां भगवतो निग्रहानुग्रहव्यापारौ सहैव प्रवर्तेते । निग्रहव्यापारे प्रवृत्ते जीवोऽहन्ताममताध्यासेन संश्लिष्टो जायते, [7]शृङ्खलाभिश्च आबद्धो भवति । ब्रह्मवासनायां गलितायां शिवशक्त्योः परस्परमाकर्षणाख्ये च कर्मणि प्रवृत्ते प्रपञ्चोऽयं प्रवर्तते । प्रपञ्चस्यास्य विस्तारार्थमेव नानाविधानि शास्त्राणि व्यामोहकानि प्रवर्तन्ते, तेषां प्रवर्तयित्री च प्रपञ्चेशीतिनाम्नाऽत्र व्याख्यायते । अनुग्रहव्यापारे प्रवृत्ते तु सच्छास्त्राध्ययनेन सद्गुरूपलब्ध्या सद्दीक्षया [8]चाभिमानाष्टक-दूषणत्रयपरिहारमुखेन मलानामपचये सति शक्तिपातः प्रवर्तते । शक्तिपातविषयेऽत्र—" पूर्णाभिषेक-युक्तानां शक्तिपातः प्रजायते । अयोग्यस्यापि कालेन कालीविद्यारतस्य च ॥ चतुष्षष्टिविधौ देवि शक्तिपातो भवेद् ध्रुवम् । नीलसारस्वते तन्त्रे पञ्चधा परिकीर्तितः ॥ श्रीसुन्दर्यां महेशानि शक्तिपातोऽ-

---

३ शक्तौ शिवं विना शम्भोः सामरस्यं न विद्यते " (III ३.८४-८६) इत्यादिना स्पष्टीक्रियते विषयोऽयम्।

४ प्राचीनेषु तन्त्रेषु निर्गुण-सगुणशब्दयोः स्थाने निष्कल-सकलशब्दौ प्रयुज्येते । षडध्वात्मकं जगद्धि प्रथमं कलारूपेण परिणमते । अत एव सकलशब्देन प्रोच्यते तत् । कलातीतं च ब्रह्म निष्कलपदाभिधेयम् । योगिनीहृदये (१.२७-२८) सकल-सकलनिष्कल-निष्कलशब्दाः स्थूल-सूक्ष्म-परदशानां बोधकाः सन्ति । अत्र तु निष्कल-सकलशब्दौ बाह्यपूजासु क्रमविशेषत्वेन व्याख्यातौ ।

५ अत्र पदाध्वनः स्थाने मात्राध्वा परिसंख्यातः (I २.४७) । लक्षणानि त्वेतेषां न प्रदर्शितानि ।

६ प्रकरणेऽस्मिन् स्वराट्चक्र-विराट्चक्र-सर्वराट्चक्र-शून्यप्रभृतिलोकानां वर्णनं दृश्यते (I २.३६-३७) ।

७ लोहमयी, स्वर्णजा, प्रेमजा, लयजा चेति शृङ्खलाचतुष्टयमत्र वर्ण्यते (IV ९.३७-३८) ।

८ " ज्ञानं पूजां कुलं जातिं बलमृद्धिं तपो वपुः । अष्टावाश्रित्य मानित्वं स्मयमाहुर्गतस्मयाः ॥ " (श्लो. २५) इति रत्नकरण्डश्रावकाचारेऽभिमानाष्टकं वर्ण्यते । कायिका द्वादश, वाचिका मानसिकाश्च दश दशेति संहृत्य ३२ भेदात्मकं दोषत्रयमपि जैनग्रन्थेषु व्याख्यातम् ।

ड्धा भवेत्। छिन्नाविद्याविधौ देवि शक्तिपातश्चतुर्विधः ॥ बगलाद्यासु विद्यासु शक्तिपातो द्विधा भवेत्। वैष्णवाद्यागमे देवि शक्तिपातस्तु पञ्चधा ॥" (I ३.५१-५४) इति, "अष्टादशविधो देवि शक्तिपातः" (II ४४.५३; III ४.७८) इति च दृश्यते। विवरणं च नास्योपलभ्यते। प्राचीनः शक्तिपात-सिद्धान्तोऽयं सिद्धान्तग्रन्थेषु विस्तरेण व्याख्यातः, समालोचितश्च विस्तरेण तन्त्रालोके त्रयोदशाह्निकेऽभि-नवगुप्तेन। भगवतोऽनुग्रहव्यापाररूपया शक्तिपातप्रक्रिययैव भक्तेरुदयो भवति। एतच्च पु[9]राणादिष्वपि प्रतिपाद्यते।

शक्तिपातेन पावितान्तःकरणो जीवो विज्ञानं लभते। पराकुण्डलिनी (शक्तिः) परमशिवश्च बी[10]जाङ्कुरन्यायेन जपास्फटिकन्यायेन च जगदात्मना परिणमतः, "वस्तुगत्या तु चैतन्यमेकं सर्वत्र तिष्ठति। सर्वं व्याप्य परं ब्रह्म सर्वं च व्याप्य तिष्ठति ॥" (IV ९.१२) इत्युक्तेः। कुण्डलिन्यामस्यां शैवानि द[11]शतत्त्वानि, सांख्यसंमतानि पञ्चविंशतितत्त्वानि, सिद्धान्तशैवानां षट्त्रिंशत्तत्त्वानि समाविष्टानि। पराप्रासादविद्यायां शाम्भवेष्वपि च [12]एकपञ्चाशत्तत्त्वानि कीर्तितानि। तान्यपि कुण्डलिन्यामेव समा-विशन्ति। अत्र प्रश्नः समुदेति यदेका कुण्डलिनी सार्धत्रिवलयात्मना च स्थिता, तस्यामेतावन्ति तत्त्वानि कथं संविशेयुरिति। प्रश्नोऽयमेवं समाधीयते—नाडीवायुप्रभेदेन हि सर्वमेतत् संभवति। यथा हि वायुगत्या शरीरे क्षेपणाङ्कुरणे, प्रसारण-रोधने, गतिर्जृम्भा रतिर्धृतिः प्रीतिरित्यादयो भावाः समुपजायन्ते, तथैव कुण्डलिन्यां विविधानां तत्त्वानामुत्पत्तिः संभवति। सर्पो हि वायुं भक्षयति। तद्वदेव तदाकारा सार्धत्रि-वलया कुण्डली वायुगतिं निरोद्धुं सर्वमेतदुपसंहर्तुं च क्षमा। देहसंस्थासु द्विसप्ततिसहस्रनाडीषु सहस्रद्वितयी

---

९ "पुराणेऽपि च तस्यैव प्रसादाद् भक्तिरिष्यते। यया यान्ति परां सिद्धिं तद्भावगतमानसाः ॥" (१३.२८५) इत्येवमुपसंह्रियते शक्तिपातप्रकरणं तन्त्रालोके। किञ्च, "भक्तिरेव परां काष्ठां प्राप्ता मोक्षोऽभिधीयते" इति वचनमुद्धरति जयरथस्तन्त्रालोकविवेके (१३.२१४-२१६), "भक्त्यादीनां मुक्तौ, मन्त्रसिद्ध्यादीनां भुक्तौ प्राधान्यमन्यत्र चानुषङ्गः" इति व्यवस्थापयति च।

१० "न च कर्मान्तरेण शरीरं संभवति, न च शरीरमन्तरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसङ्गः। अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद् दोषो भवति" (ब्र. २.१.३६) इति श्रीशङ्करभगवत्पादाः प्रतिपादयन्ति। तद्विधयैव शक्तिशिवयोरप्यनादित्वमङ्गीकार्यम्। जपास्फटिकन्यायश्च—"नानाविधवस्तूनां वर्णान् धत्ते यथामलः स्फटिकः। तद्वदुपाधेर्गुणभावितस्य भावं विभुर्धत्ते ॥ विगतोपाधिः स्फटिकः स्वप्रभया भाति निर्मलो यद्वत्। चिद्दीपः स्वप्रभया तथा विभातीह निरुपाधिः (१६, ६१) इति परमार्थसारकारिकयोर्व्याख्यातः। एतेन शिवशक्त्योः स्वरूपमपि व्याख्यायते।

११ "दशतत्त्वमयीमेके" (८.४) इत्येवमहिर्बुध्न्यसंहितायां दशतत्त्वमयी सृष्टिरियमिति वादिनः स्मृताः। नामानि तु तेषां तत्त्वानां नैव परिगणितानि। दशतत्त्ववादिन इमे शैवान्तर्गता इति शक्तिसंगमवचनेनानेन निश्चेतुं शक्यते। तानि च दशतत्त्वानि लक्ष्मीधरधृतकामिकायामेवं व्याख्यायन्ते—"त्वगसृङ्मांसमेदोऽस्थिधातवः शक्ति-मूलकाः। मज्जाशुक्रप्राणजीवधातवः शिवमूलकाः ॥ नवधातुरयं देहो नवयोनिसमुद्भवः। दशमी योनिरेकैव परा शक्तिस्तदीश्वरी ॥" इति दशमी योनिः बैन्दवस्थानम्। तदीश्वरी तस्य देहस्येत्यर्थः" (पृ. ७९) इति पञ्चभिः शक्तिचक्रैश्चतुर्भिः शिवचक्रैश्च नवयोन्यात्मकं श्रीचक्रं निष्पद्यते, मध्ये च तस्य बिन्दू राजते इत्यपि विभावनीयमत्र।

१२ "पञ्चभूतानि तन्मात्रपञ्चकं चेन्द्रियाणि च। ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च ॥ त्वगादिधातवः सप्त पञ्च प्राणादिवायवः। मनश्चाहङ्कृतिः ख्यातिर्गुणाः प्रकृतिपूरुषौ ॥ रागो विद्या कला चैव नियतिः काल एव च। माया च शुद्धविद्या च। महेश्वरसदाशिवौ ॥ शक्तिश्च शिवतत्त्वं च तत्त्वानि क्रमशो विदुः ॥" इत्येतान्येकपञ्चा-शत्तत्त्वानि वायवीयसंहितादिशैवपुराणेषु सर्वेषु प्रतिपादितानि" (पृ. ७९-८०) इति लक्ष्मीधरः। अस्यार्थस्तत्रैव द्रष्टव्यः।

मुख्या, तन्मध्ये च त्रितयी मुख्यतमा। एताश्च कालीतारा-छिन्नानामभिरत्र परिचीयन्ते, एता एव इडा-पिङ्गला-सुषुम्नानामभिर्योगशास्त्रेषु प्रसिद्धाः। पृष्ठवंशस्थितो दण्डो मेरुदण्डः खट्वाङ्ग इति च प्रकीर्त्यते। अस्मिन् ब्रह्मतारानाम्नी नाडी निवसति। शरीरे प्रसृतानां वायूनां गतिं स्वाधीनीकृत्यान्यासां नाडीनां मार्गं च रोधयित्वा ब्रह्मतारायां (सुषुम्नायां) प्राणापानयोः संयोजनमेवात्र योगोऽभिधीयते। अनेन हि खेचरत्वादिकाः सर्वाः सिद्धयः साधयितुं शक्यन्ते, सृष्टिसंहारादिसामर्थ्यमाविर्भवति। अस्यां स्थितौ कुण्डलिन्यामेकस्यां विविधानां तत्त्वानामाविर्भावः संजायेतेत्यत्र किमाश्चर्यम्? एकैव कुण्डली स्वेच्छया गुणिता सती समस्तं त्रैलोक्यं सूते, एकैव कुण्डली सर्वतत्त्वेषु संस्थिता। कुण्डलीशिवयोरैक्यमेवात्र विज्ञान-पदेनाभिधीयते।

कीटो यथा भावनया भृङ्गीत्वमुपयाति, तथैव जीवोऽपि भृङ्गावली(I ६.८५-८७)भावनया षट्चक्रभेदनक्रमेण स्वानन्दरूपतामुपलभते। कीटो भृङ्गीत्वमायाति चेत् पुनः कीटो नैव भवति, तथैव जीवोऽपि ब्रह्मस्वरूपः सन् पुनर्जीवरूपतां नाप्नोति। सुख-दुःख-जय-लाभ-अहङ्कार-दम्भ-मोह-काम-क्षुधा-जृम्भा-पिपासाप्रभृतयो भावा जीवावस्थायामेव प्रभवन्ति। विज्ञाने तु समुत्पन्ने न सौख्यं न च दुःखता। तदुक्तम्—"देहाभिमाने गलिते विदिते परमात्मनि। न सौख्यं न च वै दुःखं परब्रह्मैव केवलम्॥" (I १.१२२) इति। यथा दाहो वह्निशक्तिर्वह्नौ निवसति, तद्वत् सप्रपञ्चा महाशक्तिरियं कुण्डलिनी ब्रह्मणि निवसति। अग्नेर्विस्फुलिङ्गानामिव जीवानामुत्पत्तिविलयौ भवतः। एतच्च विज्ञानं भावनया मन्त्रयोगेन चाभिव्यज्यते। विज्ञानमिदं लब्ध्वा स्वात्मारामो भवति। न स पुनरावर्तते।

षड्विधो योगः

"भावयोगो जीवचक्रे पुष्पचक्रे क्रियाभिधः। श्रीचक्रे ज्ञानयोगस्तु लययोगस्तु ऊर्मिले॥ चूडाचक्रे राजयोगः" (III १.१९९-२००) इत्येवं पञ्चधाऽत्र योगो व्याख्यातः। अन्यत्र (IV ८.१०१-१०२) ज्ञानकाण्डं क्रियाकाण्डं धर्मकाण्डं योगकाण्डं भावकाण्डमिति काण्डपञ्चकेन सह ज्ञानयोगो राजयोगो लययोगो हठयोगो मन्त्रयोगश्चेति योगस्य पञ्चभेदा वर्णिताः, भा[१३]व-क्रियाभेदेन मन्त्रयोगोऽपि द्विधा विभक्तः। पूर्वोक्तौ भाव-क्रियायोगौ मन्त्रयोगेऽन्तर्भावितौ, हठयोगश्चाधिको निर्दिष्टः। नादयोगोऽप्यत्र व्याख्यायते। एवं च शक्तिसंगममतेन षड्विधो योग इति वक्तुं शक्यते। "चतुर्थी लयजा प्रोक्ता" (IV ९.३८) इति, "लयस्य भूमिकायां तु स्थितिः प्रथमभूमिका। भूमिकानां तु पञ्चाशत् तदा योगेश्वरो भवेत्॥" (IV ९.४९) इति च लययोगसंबद्धमिव किञ्चिदत्र दृश्यते। नादयोगश्च—"तत्तन्नाडीनादयोगाद् भूयस्यः स्युर्हि सिद्धयः। ब्रह्मताराभ्यासयोगान्नादयोगः प्रजायते। नादो ध्वनिरिति प्रोक्तः सप्तधा स हि कीर्तितः। तदेव निर्गुणं ब्रह्म ध्येयं परगुणोत्तरम्॥ यथाकारस्तु वीणायां पृष्ठवंशे तथा भवेत्। सगुणा ध्यानयोगात्तु यथा निर्गुणतां व्रजेत्॥ यथा वीणाभ्यासयोगान्नादयोगः प्रजायते। तथा ताराजापयोगाद्

---

१३ "ग्रहणं द्विविधं देवि बाह्याभ्यन्तरभेदतः॥ चन्द्रकोटिनिकायाङ्ग भवेदाभ्यन्तराभिधम्। भावयोगात् क्रियायोगाद् द्विधा तत्रापि पार्वति। भावयोगो भवेच्छाक्ते क्रिया योगविधौ स्मृता।" (II १७.२-४) अत्र बाह्याभ्यन्तरभेदेन द्विविधं ग्रहणं वर्णितम्। आभ्यन्तरं ग्रहणं भावक्रियाभेदेन द्विधा भिद्यते। तत्र भावयोगः शाक्ते, क्रियायोगश्च सामान्ययोगविधौ परिगण्यते। योगसूत्रे—"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (२.१) इत्येवं क्रियायोगो व्याख्यातः। सोऽयं क्रियायोगो बहुधा प्रपञ्च्यते पुराणादिषु।

देहे नादः प्रवर्तते । देहनादे जायमाने सिद्धभूमिः प्रकीर्तिता । सिद्धभूमिर्महेशानि मेधादीक्षाप्रगोचरा ॥" (IV ८.३५-३९) इत्येवं व्याख्यातोऽत्र । राजयोगः शक्तियोगपरत्वेन व्याख्यायते (IV २.४८) । स च बाह्यवरिवस्याविधौ विस्तरेण वर्णयिष्यते । भावयोगोऽधुना प्रोच्यते ।

भावयोगः

भृङ्गावलीभावनापदेनानुपदमेव विवृतोऽयं भावयोगो द्वितीये पटले (१३.१६३-१६९) इत्यत्र परिभाष्यते, व्याख्यायते चैवं चतुर्थे पटले—महाशैवं स्वतःसिद्धं स्वयम्भूनामकं बीजाङ्कुरस्वरूपं शिवशक्त्यात्मकं स्थानं मूलाधारं विदुः । गुदस्य द्व्यङ्गुलादूर्ध्वं स्वाधिष्ठानादधः स्थितं गुह्यस्थानमेव तत् । अत्रैव परा कुण्डलिनी पञ्चसूत्रविवर्जितं कलैकेन समन्वितं ब्रह्माण्डसूत्रसहितं स्वयम्भूलिङ्गं च विभाव्यते । षट्चक्रभेदनक्रमेण द्विपत्रे बिन्दुचक्रे चन्द्रसंज्ञके कटाहे च विश्रम्य कुण्डलिनी सहस्रारस्थितेन कलानन्तस्वरूपिणा शिवेन सामरस्यमयते, कुण्डली चन्द्रकुण्डे समरसानन्दा भवति । एवं कुण्डलीशिवयोरैक्यं प्रजायते । तयोर्योगामृतमेव सप्तदशीं कलां विदुः । तामिमां सप्तदशीं कलां पीत्वा योगिनः पूर्णतां व्रजन्ति । भावयोगेन सर्वमेतत् संसाध्यते । सेयं सप्तदशी कला एवमत्र वर्णिता—

> कलां सप्तदशीं वामां महाकुण्डलिनीं पराम् ॥
> तेजःपुञ्जां सूक्ष्मरूपां बिसतन्तुतनीयसीम् ।
> प्रसुप्तभुजगाकारां सार्धत्रिवलयां पराम् ॥
> सूर्यकोटिप्रतीकाशां चन्द्रकोटिसुशीतलाम् ।
> तटित्परार्धलावण्यामग्न्यर्बुदसुदीपिनीम् ॥
> नीवारशूकवत्तन्वीं कलाषोडशधारिणीम् । इति ।
> (IV ९.५९-६२)

एवं भावनायोगेन सप्त[१४]दशीं कलां विदित्वाऽष्टादश्यां कलायां शान्त्यतीतायां प्रविशति योगी । एवं विज्ञानवान् शिवो भूत्वा स मेधादीक्षां लभेत । मेधादीक्षा च पूर्णानन्दस्वरूपिणी भवति । पूर्णानन्दे समुत्पन्ने क्षुद्रानन्दा निष्प्रयोजना भवन्ति । इन्द्राद्या ब्रह्मविष्णुमहेशाद्याश्च क्षुद्रानन्दपराः समुपदृश्यन्ते, मर्त्यानां तत्र का कथा ? अतो ब्रह्मानन्दावाप्तये योगिना मेधादीक्षायां सततं प्रयत्नवता भाव्यम् । ब्रह्मानन्दश्च—

> ब्रह्मानन्दो महाकालः पूर्णं ब्रह्म सनातनम् ।
> विज्ञानरूपं तद्ब्रह्म खण्डाखण्डविवर्जितम् ॥

इत्येवं व्याख्यातः । निःसारे दुराचारव्रतेऽस्मिन् प्रपञ्चे भावनयैव सर्वाः सिद्धय उपलभ्यन्ते । भावना यदि सिद्धा न स्यात् तदा किमप्यत्र न साधयितुं शक्येत । कुण्डली भिन्नरूपा भवति स्वयम्भूलिङ्गं च भिन्नरूपं भवति । कुण्डल्याः स्थानं मूलाधारम्, श्रीदेवतायाः स्थानं हृदयम्, शिवस्थानं च सहस्रारमिति । एवं स्थानभेदान्नामभेदात् स्वरूपभेदाच्च विभक्तयोः कुण्डलीशिवयोरैक्यं हि विना भावनया कथं भवेत् ?

---

१४ शान्तिः सप्तदशी, शान्त्यतीता चाष्टादशी कलेति प्रथमखण्डे (२. १३७-१३८) वर्ण्यते ।

स्थानादिभेदेन विभक्तेष्वपि चैतन्यमेकमेवेति भावनया हि ताद्रूप्यमभिन्नत्वमैक्यमभिव्यज्यते। ताद्रूप्ये च समुत्पन्ने परशिवत्वं व्रजति साधकः परशक्तिस्वरूपोऽहमिति विभावनया भूतले सर्वं संसाधयितुं शक्येत। भावयोगेनानेन मनःस्थैर्ये संजाते रसभावः, अर्धनारीश्वरत्वम्, मन्त्रचैतन्यविग्रहत्वं च साधकस्य सुलभम्।

मन्त्रयोगः

प्रपञ्चेशी सुन्दरीरूपेण यदा सुन्दरं रूपं धारयति तदायं प्रपञ्चः समुत्पद्यत इत्युक्तमनुपदमेव। शक्तिकोणेऽनन्तब्रह्माण्डात्मकमेतच्चराचरं जगत् तिष्ठति। तस्याः कुण्डलिनी शक्तिरक्षोभ्यनागरूपिणी प्रादुर्भवति। सैव स्वेच्छया गुणिता सती पञ्चाशन्मातृकारूपेण परिणमते। मातृकाभ्य एताभ्यः सर्वे मन्त्रा विद्या[१५]श्च समुत्पद्यन्ते। सर्वप्रथमं येन ऋषिणा या विद्या दृष्टा तन्नाम्नैव सा प्रथते। यथा अक्षोभ्यमुनिना दृष्टा ताराविद्या तन्नाम्नैव प्रसिद्धयति। शक्त्यात्मककुण्डलीतो विकास[१६]मापन्ना एता विद्या मनुष्यस्य शरीरे सार्धत्रिवलयात्मककुण्डलिनीरूपेणावतिष्ठन्ते। नानाविधासु विद्यास्वेतासु दश महाविद्यापदेनात्र व्याख्याताः। ताश्च यथावसरं प्रदर्शयिष्यन्ते। मन्त्रयोगेन भावनया च समुपासिता एता विद्या जीवं शिवं सम्पादयन्ति। मन्त्रयोगश्चायं दीपरेखा-मन्त्रोदय-हंसचार-[१७]अक्षरोदय-अन्तमर्मातृका-पारायण-पुरश्चरणादिविधयः समुपास्यते। कालनित्याप्रसङ्गेन प्रथमखण्डे प्रथमद्वितीयतृतीयपटलेषु, तृतीयखण्डे च द्वितीयतृतीयपटलयोरिमे विषया विस्तरेण व्याख्याता दरीदृश्यन्ते।

प्रणवोपासना

वैदिकवाङ्मये प्रणवस्येव तन्त्रागमेषु वर्तते किमपि माहात्म्यं बीजमन्त्राणाम्। स्वेष्टदेवताया बीजमन्त्रः प्रणवनाम्नाऽप्यभिधीयते। बीजाक्षराणामेतेषां निर्गुणोपासनायां विनियोगो भवति। यथात्र प्रणवस्य कामकलाबीजस्य वाग्भवबीजस्य च निर्गुणोपासनायां विनियोगो विहितः। "प्रणवो निर्गुणः प्रोक्तः सर्वाद्यो वेदगोचरः। वेदमाता तु गायत्री तदाद्यः प्रणवः स्मृतः॥ प्रणवोपासिनां प्रोक्ता निर्गुणो[१८]पासना भवेत्।" (IV ८.२३-२४) इत्येवं स्तूयते प्रणवोऽत्र। प्रणवश्चायं कलापञ्चकसंयुक्तो वर्ण्यते (I ३.६३)। अकार-उकार-मकार-नाद-बिन्दुनामिकाः पञ्चकलास्तस्य भवन्ति। ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवश्चेति पञ्च महाप्रेताः प्रणवं समाश्रित्यावतिष्ठन्ते। कलासप्तकरूपी चायं प्रणवो भवति। क[१९]लासप्तकं चैतत् शाम्भव-शाक्तादिभेदेन पञ्चधा भिद्यते। कलासप्तकसंयुतः प्रणवः सुन्दरीरूपो भवति। "पञ्च[२०]प्रणवयोगे

---

१५ श्रीदेवत्या मन्त्रा विद्यापदेनाभिधीयन्त इत्यागमविदः।

१६ पराया वाचो विकासस्थानं मूलाधारमेवेत्यागमतन्त्रविदां सिद्धान्तः।

१७ अक्षरोदयप्रसङ्गे "आई पल्लवितैत्यत्र सिद्धा वर्णास्तु सूचिताः" (I ३.१३) इत्युच्यते। एष एव प्रसङ्गः (III ३. ३६, ४५-४७) इत्यत्रापि दृश्यते। अत्र लघुस्तुतौ "आईपल्लवितैः परस्परयुतैः" (१९ श्लो.) इत्यस्मिन् श्लोके प्रतिपादितो विषयः स्मार्यते।

१८ "प्रणवोपासना देवि निर्गुणाख्या प्रकीर्तिता" (IV ८.११६) इत्यत्रापि प्रणवस्य निर्गुणोपासनायां विनियोगः प्रदर्श्यते।

१९ अस्य विवरणं ग्रन्थे (I ३. ६६ ७५) द्रष्टव्यम्।

२० "तारवाग्भवलज्जामाः प्रासादपरया सह। प्रणवाः पञ्च तैर्वाच्यः पञ्चप्रणवभावितः॥" (श्लो. ४९२) इत्येवं गणेशसहस्रनामभाष्ये भास्कररायेण पञ्च प्रणवाः प्रदर्शिताः। "वेदप्रणव ॐकारः, शिवप्रणवो ह्रूंकारः, मायाप्रणवो ह्रींकार इत्यादि बहवः प्रकारास्तन्त्रेषु वर्णिताः" (पृ. ३३) इति विज्ञानभैरवविवृतौ शिवोपाध्यायः।

तु कलासप्तकपञ्चके ॥ सप्त “[२१]तारेति विख्याता कथिता पूर्वमेव तत् ।” (I ३.७६-७७) इत्येवं च प्रकरणमेतदुपसंहियते ।

प्रणवप्रसङ्गेनैवात्र हंसरूपा कामकला व्याख्याता । हंसः सोहमिति सततं प्रवहमानां श्वासप्रश्वास-प्रक्रियामाश्रित्य स्वाभाविकरूपेण प्रयत्नमन्तरा जायमानो जपोऽजपाजपनाम्ना तन्त्रागमशास्त्रेषु प्रसिद्धः, हंसगायत्री-अजपागायत्रीप्रभृतिनामभिश्च परिचीयते तत्र तत्र । हकारोच्चारणेन सह श्वासो बहिर्याति, सकारेण सह च प्रविशति । हकार[२२]सकारयोर्लोपे च कामकलाऽभिव्यज्यते । सोहम् इति स्वरूपे प्रणवः कामकला च प्रतितिष्ठतः । रकारद्वययोगे सकारस्य, ईकारैकारयोर्योगे च हकारस्योत्पत्तिर्भवति । अत एव पराप्रासादेवता चतुःपक्षस्वरूपिणी चतुश्चरणरूपा च। प्रणवे तु पक्षद्वयस्य त्यागः पक्षद्वयस्य च परिग्रहणं भवति । अत्र प्रथम-श्चरमश्च वर्णः परित्यज्यते । मायाबीजादिके रतिबीजादिके च प्रणवस्योत्पत्तिर्भवति । हकारोऽर्धनारीश्वरस्वरूपः शक्तिबीजं चाभिधीयते । बिन्दुयुग्मेन एकारस्य, बिन्दुत्रयेण च ईकारस्य निष्पत्तिर्भवति । तत्र ईकारस्य ऊर्ध्वगतो बिन्दुर्भानुस्वरूपः, अधोगतौ च बिन्दू दहनशीतांशुस्वरूपौ स्तः । हार्धकला ईकारैकारात्मिका निर्दिश्यते । अत्र ऊर्ध्वबिन्दुर्मुखरूपेण, अधोबिन्दू कुचद्वयात्मना, हार्धकला च योन्यात्मना भाव्यन्ते । अत्रत्योऽधोबिन्दुः परारूपः योनिबिन्दुः परात्परारूपः, कुचबिन्दुः प्रथमः परातीतारूपः, द्वितीयश्च चित्परारूपः, मुखबिन्दुश्चित्परात्परारूपः, सर्वातीता च चण्डरूपा सप्तमी कला बीजादूर्ध्वं विराजते । एवं प्रणवे शाम्भवादिभेदेन पञ्चधा विभक्ते प्रत्येकं कलासप्तकसंयुते काम[२३]कलाख्यस्य तृतीयस्य प्रणवस्य स्वरूपमिदमुन्मील्यते । एषा कामकलैव कालिका, आदिनाथः, परब्रह्मेति च गीयते ।

वाग्भवबीजस्य स्वरूपं माहात्म्यं च मूल एव (II ८.२२-३२) अवलोकनीयम् ।

गुरुः

यद्यपि प्राचीनेषु तन्त्रेषु “ गु[२४]रुतः शास्त्रतः स्वतः ” इति त्रिविधो ज्ञानागमः प्रतिपाद्यते, तथापि गुरोर्महिमा सर्वातिशायीति सर्वत्र वर्ण्यते। अत्र—“ गुशब्दस्त्वन्धकारत्वाद् रुशब्दस्तस्य बोधकः । द्वाभ्यां गुरुश्च संप्रोक्तः स एव हि प्रकाशकः ॥ ” (III १.१५५-१५६) इत्येवं गुरुशब्दस्य निरुक्तिः प्रदर्शिता, III २. १२३-१२४ इत्यादिश्लोकेषु च तस्य महिमा वर्ण्यते । गुरोर्माहात्म्यं सुरगुरोर्बृहस्पते-र्दैत्यगुरोः शुक्राचार्यस्य च पौराणिकोपाख्यानव्याजेन (III ११.५५) दृढीक्रियते। गुरुपादुकानां विविधानामत्र (II ४६. १५-१६; IV १.५८-६०) वर्णनमस्ति । विद्योपासनावसरे गुरोः स्मरण-

---

२१ “ ॐकारः प्रणवस्तारो हंसो नारायणो ध्रुवः । वेदात्मा सर्ववेदादिरादित्यः सर्वपावनः ॥ मोक्षदो मुक्तिमार्गश्च सर्वसंधारणक्षमः । एवमादीनि नामानि शास्त्रे शास्त्रे विचक्षणैः ॥ अधीतानि महापुण्यान्योङ्कारस्य महात्मनः । ” (२४. ४९-५१) इति लक्ष्मीतन्त्रप्रामाण्येन तारशब्दोऽत्र प्रणवस्य वाचकः ।

२२ स्पन्दकारिकादिव्याख्याता योगिनां मध्यदशेयमस्माभिः “ मरुतोऽन्तर्बहिर्वापि वियद्युग्मानिवर्तनात् ” (श्लो. २५) इत्यादिविज्ञानभैरवश्लोकव्याख्यायां विस्पष्टं प्रपञ्चिता ।

२३ तृतीये खण्डेऽपि (३.४८-५८) कामकलाविद्या मतभेदेन व्याख्याता ।

२४ “ त्रिप्रत्ययमिदं ज्ञानं गुरुतः शास्त्रतः स्वतः ” इति निशाटनागमे किरणागमे च प्रतिपाद्यते । अभिनवगुप्तेन तन्त्रालोके (४.७८-७९), महेश्वरानन्देन च महार्थमञ्जरीपरिमले व्याख्यायते तत् ।

मवश्यमेव विधेयम् (IV १०. ३-५) इति, गु[२५]रु-दैवत-मन्त्राणां स्वात्मनश्च ऐक्यसम्पादनाय गुरुरेव शरणम् (III ३. ४-१८) इति चात्र सुदृढं प्रतिपाद्यते । किञ्च गुरूपदिष्ट एव मन्त्रे चै[२६]तन्यमभिव्यज्यत इति हि तन्त्रशास्त्रसंमतः पन्थाः । अनुपदिष्टमन्त्रजपो ' नाम ' इत्याख्ययाऽभिहितोऽत्र (II ४६.४५) । त्रिविधानां स्वप्नलब्धानां मन्त्राणामृषिच्छन्दोदैवतादिविषयकनिर्णयं विधाय स्वप्नलब्धे स्त्रिया दत्ते च मन्त्रे विद्यमानमन्तरमत्र वर्ण्यते (III ३. ८८-१८०) । स्त्रीलब्धे मन्त्रे देवीपरम्परा, स्वप्नलब्धे च मन्त्रे दक्षिणामूर्तिपरम्पराऽङ्गीक्रियते, अर्थात् तत्र देवी दक्षिणामूर्तिश्च गुरुत्वेन पूज्येते । गुरूपदिष्टे मन्त्रे चैतन्याभिव्यक्तये मन्त्रसिद्धिसम्पादनाय विस्तृता प्रक्रियाऽत्र प्रदर्शिता । संक्षेपेण सात्र प्रदर्श्यते ।

मन्त्रसिद्धिप्रक्रिया

यथोक्तलक्षणो गुरुर्यथोक्तलक्षणाय शिष्याय ऋणधनाख्यचक्रसाहाय्येन परीक्ष्य मन्त्रं यथोचितमुपदिशति, शापोद्धार-उत्कीलनयोश्च सूक्ष्ममन्तरं वेदयति । मन्त्रसाधनसमये प्रतिग्रहः सर्वथा प्रतिषिद्धः । परान्त-परद्रव्य-परस्त्री-परनिन्दानां संकल्पोऽपि सर्वथा साधकेन परिवर्जनीयः । मन्त्रजपादौ जातसूतकस्य परिहाराय दशसंस्करान् विदधीत । जपान्ते दशविधपुरश्चरणमनुष्ठेयम् । अनेन विधिना साधिते मन्त्रे त्रिविधं मन्त्रचैतन्यमभिव्यज्यते । चैतन्यसंयुक्त एव मन्त्रः सिद्धिं प्रयच्छति । पा[२७]रायणपुरश्चरणादीनां विविधा भेदा अत्र प्रदर्शिताः । तत्प्रसङ्गेन बाह्याभ्यन्तरभेदेन द्विविधो ग्रहणयोगोऽप्यत्र व्याख्यायते । कूटोच्चारविधिः, वर्णोद्धारः, वीतिसंख्यस्य वीतिवर्णस्य वा मन्त्रस्य लक्षणम्, षडाम्नायस्य मन्त्राणां प्रस्तारगणना (III ३. १८२-१९३), जपफलनिवेदनम्, मालानां विविधा भेदा ग्रथनादिप्रकाराश्चेत्यादयो विषया विस्तरेणात्र वर्णिताः । महाकुण्डलिनीमनुः (III ११.२१८-२२२), भाषाभेदेन भिन्नाः शा[२८]बरमन्त्राश्चात्र वर्ण्यन्ते । सिद्धोक्ता नाथोक्ताश्चेति द्विविधाः शाबरमन्त्रा अत्र सूचिताः, द्विविधशाबरसाधनविधिश्च संक्षेपेण प्रदर्शितः । अत्र नानास्थलेषु नवनाथानां ८४ सिद्धानां च प्रासङ्गिक उल्लेखः प्राप्यते ।

---

२५ भावनाविधौ गुरुदैवतमन्त्राणामैक्यविषये केरल-काश्मीर-गौडमतानां वैमत्यमत्र प्रतिपाद्यते (III ३. ३-१८) । गुरुदैवतमन्त्राणां स्वाभिन्नत्वेन भावनमप्यत्रोपदिश्यते । (III ३.२२२-२२८) । एवं हि भावयतः साधकस्य देवता वरदा भवति । विषयोऽयं योगिनीहृदये मन्त्रसंकेतपटले षड्विधमन्त्रार्थनिरूपणावसरे वैशद्येन व्याख्यायते ।

२६ मन्त्रचैतन्याभिव्यक्तिप्रकारो नित्याषोडशिकार्णवोपोद्धाते (पृ. ७५) द्रष्टव्यः ।

२७ पारायणप्रकरणेऽत्रानन्तपादुकाख्यो विशिष्टः क्रमः प्रतिपाद्यते (III ३.२६५) ।

२८ यथा स्त्रीदेवत्या मन्त्रा विद्यापदेनाभिधीयन्ते, एवमेव देशभाषासु निबद्धा मन्त्राः शाबरपदाभिधेया भवन्ति । " भाषाभेदाः शाबराणां मन्त्रमात्रे महेश्वरि " (I ६.१२६) इति हि प्रतिपाद्यतेऽत्र । एकत्र (I १६. १८-१९) शाबरं दशशाबरं कालशाबरं सिद्धशाबरमिति चत्वारो भेदाः परिगण्यन्ते, अन्यत्र (II १.२६-२८) सिद्धशाबर-कालशाबर-कुमारीशाबर-विजयाशाबर-कालिकाशाबर-दिव्यशाबर-वीरशाबर-श्रीनाथशाबर-तारिणीशाबर-श्रीशम्भुशाबर-शाबराख्या रुद्रसंख्याः शाबरजातयः प्रतिपादिताः । चतुर्थे खण्डे द्विविधशाबरसाधनप्रसङ्गे (११. ९१-९५) शिव(शम्भु) शाबरसाधनं वर्ण्यते । शाबरमन्त्रेषु वरदानाधिकारः कालिकायाः प्रकीर्तित इत्येकत्र (I ६.१२६-१२७), बटुकस्मृत्वा शाबरा मन्त्राः सिद्ध्यन्तीत्यपरत्र (I १२.७२), " भैरवस्य तु योगेन शाबरं सिद्धिदायकम् " इति चान्यत्र (II ४३. १०-१५) वर्ण्यते । अत्रेदं बोध्यम्—षट्पञ्चाशद्देशभेदेन शाबरा मन्त्रा भिद्यन्ते । महाकालस्य बटुकस्य च योगतः शाबराः सिद्धिदा भवन्ति । नाथोक्त-शम्भुसंप्रोक्तभेदात् शाबरा मन्त्रा द्विविधा भवन्ति । नाथोक्ता अपि सिद्धोक्त-नाथोक्तभेदात् प्रकारद्वयमापद्यन्ते । नव नाथाः सिद्धाश्च चतुरशीतिसंख्याका भवन्ति । चरप्रयोगा अपि शाबरे सर्वसिद्धिदाः ।

नामानि तु तेषां क्वापि न निर्दिष्टानि । एवं बहुधा व्याख्यातस्य मन्त्रयोगस्य वैशिष्ट्यमेवमत्र वर्ण्यते— " कलौ पापसमाकीर्णे न समाधिर्न योगता ॥ यदि योगो भवद्देवि नहि तत्र फलं भवेत् । तस्मात् कारणतो देवि मन्त्रयोगं समभ्यसेत् ॥ " (I ६.९२-९३) इति ।

पञ्चविधः प्राणायामः

यद्यप्यत्र षडङ्गोऽष्टाङ्गो वा योगो न व्याख्यातस्तथापि मन्त्रयोगसंबद्धान् नानाविषयान् संवर्ण्य मन्त्रजपप्रसङ्गेन " प्राणायामरहस्यं हि कथ्यते शृणु साम्प्रतम् । प्राणायामः पञ्चधा स्यात् " (III ३.२९६) इत्यादिना आपटलान्तं पञ्चविधः प्राणायामो वर्णितः । मालाशृङ्खलिकायोगात् कला[२९]शृङ्खलिकायोगाच्च प्राणायामस्यैते भेदा भवन्ति । प्राणायामाभ्यासेन साधकः सिद्धयोगीश्वरो भवति । प्राणायामपूर्वकमन्त्रजपेन भूतले सर्वाः सिद्धयः समुपलभ्यन्ते । भूतशुद्धिविधौ शोषणादिकर्मसु प्राणायामस्य उपयोगो भवति । तत्र शोषणादिविधौ प्राणायामस्य प्रयोगे केरल-काश्मीर-गौड-चैतन्यमतेन किञ्चिद्वैशिष्ट्यमत्र वर्ण्यते । तच्च ग्रन्थ एवावलोकनीयम् । एवमेव यन्त्रप्रकरणे " ध्यानं तु त्रिविधं प्रोक्तम् " (III २.१००) इत्यादिना त्रिविधं ध्या[३०]नमप्यत्र वर्णितम् ।

भूतशुद्धिः

द्वितीये खण्डे द्वादशे पटले केरल-काश्मीर-चैतन्य-क्रमेण त्रिविधा भूतशुद्धिः प्रतिपाद्यते । गौडः क्रमः काश्मीरक्रमादभिन्न एव । पञ्चभूत[३१]संशोधनमुखेन हि देहशुद्धिः संपाद्यते । देहशुद्धिं विदधता साधकेन प्राणायामसाधनया पापपुरुषस्य शोषणदाहौ दिव्यदेहस्य चाप्यायनं विधीयते । " शोषो मलस्य नाशो दाह एतस्य वासनोच्छेदः । आप्यायनं तनूनां ज्ञानसुधासेकनिर्मिता शुद्धिः ॥ " (४४) इत्यस्यां गाथायां महार्थमञ्जरीकारेण महेश्वरानन्देन व्याख्याता एते । तत्क्रमश्च नित्योत्सवादिपद्धतिग्रन्थेषु (पृ. ३५-३६) द्रष्टव्यः ।

प्राणप्रतिष्ठा

भूतशुद्धिमनु आप्यायिते दिव्यदेहे प्राणप्रतिष्ठा संपाद्यते । सा च शास्त्रान्तरेषु विस्तरेण वर्णिता । अत्रापि जीवक्रीडाविनिर्णये (III ११.१०५-११८) पञ्चविधो जीवन्यासो वर्ण्यते गौड-केरल-काश्मीरक्रमेण । एषा च प्रक्रिया तन्त्रान्तरेषु वर्णितायाः प्राणप्रतिष्ठाया एव प्रकारविशेषः । सम्पन्नायां प्राणप्रतिष्ठायाम्—" शिवो दाता शिवो भोक्ता शिवः कर्ता निरञ्जनः " (III ११. ११८) इति स्वात्मनः शिवस्वरूपतां भावयति साधकः ।

---

२९ प्रस्तारप्रकरणे यद्यपि शृङ्खलिकाप्रस्तारस्य कुत्रापि निर्देशो नास्ति, तथापि यथा माला-कलाशृङ्खलिका-प्रस्ताराभ्यां प्राणायामस्य भेदाः प्रदर्शितास्तथैव द्वितीये खण्डे (१.१६४-१७४) शृङ्खलिकायोगात् प्रस्ताराद् दशविद्यादि-मन्त्राणां विविधा भेदा वर्ण्यन्ते । प्रस्तारशब्दोऽत्र पर्यायवाची प्रतीयते । यथा सप्त पर्यायेषु विविधास्तन्त्रभेदाः समाविशन्ति, तथैव शृङ्खलिकाख्ये प्रस्तारे मन्त्र-प्राणायामादीनां भेदा इति ।

३० द्वितीये खण्डेऽपि (६३. १८-२०) ध्यानभेदक्रमो व्याख्यायते ।

३१ पञ्चभूतानां शुद्धिरियं वामकुक्षि–दक्षकुक्षिभेदेन (१०. ४२-४३), पञ्चभूतक्रम-श्मशानोक्तक्रम-कालीत्रि-बीजमार्ग-ताराबीजत्रयमार्गभेदेन च भिद्यते । एतच्च शाम्भवादौ स्फुटमुक्तमिति चतुर्थखण्डे (१०.५६-५७) वर्ण्यते ।

षडङ्गादयो न्यासाः

अङ्गन्यास-करन्यास-व्यापकन्यासादिविधिनाऽपि स्वात्मनोऽङ्गेषु सम्पूर्णे शरीरे च तासां तासां देवतानां विद्यानां मन्त्राणां चावाहनं स्थापनं च क्रियते। अत्र वर्णितो जीवन्यासः प्राणप्रतिष्ठाया एव प्रकारविशेष इत्यनुपदमेवोक्तम्। षडङ्गादिपुरश्चर्या प्राणस्थापनवद् भवतीति च चतुर्थे खण्डे (१०.९४) प्रोच्यते। एवं च साधकशरीरस्य दिव्यत्वापादने न्यासानामप्युपयोगः समस्ति। षोढा-चतुःषोढा-पञ्चषोढा-शक्ति-चक्र-पीठ-व्यापकादीनां न्यासानां नामान्यत्र दृश्यन्ते। तारिण्याश्चतुःषोढा, काली-सुन्दर्योश्च पञ्चषोढा विन्यस्यते। शक्तिन्यासे एकता चक्रन्यासे च भिन्नता भवति। शक्तिसंगमतन्त्रे तु सर्वमेकमेव (I ११. २५-२७)। लघुषोढा-पूर्वषोढा-महाषोढा-मन्त्रषोढा-गुह्यषोढा-दिव्यषोढाभेदेन षोढान्यासः षड्विधो भवति। विलाससम्प्रदायेऽन्तर्मातृकान्यासः समाचर्यते (III ३.२३०)। तत्त्वन्यास [३२]आत्म-विद्या-शिवतत्त्वाख्योऽप्यत्र सफलो वर्ण्यते (III ४.६४-८०)। चतुर्थे खण्डे (१०. ७८-९५) मार्गत्रयक्रमेण षडङ्गक्रमविन्यासो वर्णितः। नत्यस्त्रेण विनाऽङ्गुष्ठादिषडङ्गन्यासः, हृदयास्त्रं विना च हृदयादिषडङ्गन्यासो निष्फलो भवति। करन्यासस्य कालनाशिनी, हृदयादिन्यासस्य च मुद्रा सांख्यायनमुनिप्रदर्शिता ज्ञातव्या। अस्त्रे सिद्धे सति न्यसनं कार्यम्। अस्त्रे हि सिद्धे मन्त्रसिद्धिर्भवति, नान्यथा। न्यासानामेतेषां पद्धतिग्रन्थेषु महान् विस्तरोऽवलोक्यते।

एवं विज्ञानवान् शिवो भूत्वा योगाभ्यासनैरन्तर्यासादितशिवशक्तिसामरस्यस्वरूपो मेधादीक्षावान् साधक आन्तरवरिवस्यया पावितान्तःकरणः सन् बाह्यपूजार्थं प्राणायाम-भूतशुद्धि-प्राणप्रतिष्ठा-न्यासादि-प्रक्रियया स्वात्मनो भौतिकदेहस्यापि दिव्यरूपतामापादयति, बाह्यपूजायोग्यतां चाधत्ते।

बाह्यवरिवस्यास्वरूपं भेदाश्च

" समयाचारो नाम आन्तरपूजारतिः। समयिनां मते समयस्य सादाख्यतत्त्वस्य सपर्या सहस्रदलकमल एव क्रियते, न तु बाह्ये पी[३३]ठादौ। कुलाचारो नाम बाह्यपूजारतिः " (पृ. ६४, १२९)

---

३२ " मायान्तमात्मतत्त्वं विद्यातत्त्वं सदाशिवान्तं स्यात्। शक्तिशिवौ शिवतत्त्वम् " (१.४९) इत्येवं सौभाग्यसुधोदयेऽमृतानन्देन तत्त्वत्रयमेतद् व्याख्यातम्। ग्रन्थोऽयं नित्याषोडशिकार्णवे परिशिष्टत्वेन प्रकाशितः। मृत्युञ्जयभट्टारकापरनामधेये नेत्रतन्त्रे एकविंशाधिकारे शिवशक्त्यात्मस्वरूपा मन्त्रा व्याख्यायन्ते। शक्तिशब्दोऽत्र विद्यापर्यायत्वेन प्रयुक्तो मन्तव्यः।

३३ आदिना मण्डल-स्थण्डिलादिपरिग्रहः। तदुक्तं तन्त्रालोके—" मण्डलं स्थण्डिलं पात्रमक्षसूत्रं सपुस्तकम्। लिङ्गं तूरं पटः पुस्तं प्रतिमा मूर्तिरेव च॥ इत्येकादशधा बाह्यं पुनस्तद्बहुधा भवेत्। " (६. ३-४) इति। " पुस्तं लेपादिनिर्मिताकृतिः। मूर्तिर्गुर्वादिसंबन्धिनी। बहुधेति मण्डलादीनाप्येकशूलत्रिशूलादिक्रमेण नानात्वात् " इति तत्रत्यो विवेकः। तत्रैव " स्थण्डिलेऽग्नौ पटे लिङ्गे पात्रे पद्मेऽथ मण्डले। मूर्तौ घटेऽस्त्रसंघाते घटे सूत्रेऽथ पूजयेत्॥ स्वेन स्वेनोपचारेण सङ्करं वर्जयेदिति। " (२७. ४५-४६) इत्यपि वर्ण्यते। सर्वमेतत् सामान्यपूजाप्रकारेण संबद्धम्। कुलेज्या तु—" बहिः शक्तौ यामले च देहे प्राणपथे मतौ। इति षोढा कुलेज्या स्यात् प्रतिभेदं विभेदिनी॥ " (२९.७) इत्येवं षड्विधा तन्त्रालोक एव प्रतिपाद्यते। तत्र देहे प्राणपथे मतौ चान्तरवरिवस्या, बहिः शक्तौ यामले च बाह्यवरिवस्या संपाद्यते। अत्रैव —भूवस्त्रकायपीठाख्यं धाम चोत्कर्षभाक् क्रमात् " (२९.१५) इत्युच्यते। कायपीठपदेन काद्यं (कपालं) मुण्डं तदनुकल्पात्मकं विश्वामित्रकपालं (नारिकेलं) वा गृह्यत इति जयरथो व्याख्याति। एतच्च शक्तिसंगमवर्णितं वीरसाधनविधिमनुहरति।

इत्युक्त्वा सौन्दर्यलहरीव्याख्याकारो लक्ष्मीधरो वक्ति—" अत एव कौलास्त्रिकोणे बिन्दुं नित्यं समर्चयन्ति । तत् त्रिकोणं द्विविधम्—श्रीचक्रान्तर्गतनवयोनिमध्यवर्तिनी योनिः, सुन्दर्यास्तरुण्याः प्रत्यक्षयोनिश्चेति । श्रीचक्रस्थितनवयोनिमध्यगतयोनिं भूर्जहेमपट्टवस्त्रपीठादौ लिखितां पूर्वकौलाः पूजयन्ति, तरुण्याः प्र[34]त्यक्षयोनिमुत्तरकौलाः पूजयन्ति । उभयं योनिद्वयं बाह्यमेव ।. . . .तत्र सुरामांसमधुमत्स्यादिद्रव्यैः समाराधनं वामाचारप्रवृत्त्या प्रत्यक्षत्रिकोणे बिन्दुस्थानं मन्मथच्छत्रं कृत्वा संपूजयन्ति । अधोमुखं त्रिकोणमधोमुखमेव छत्रं पूजयन्ति । दिगम्बरक्षपणकादयस्तु स्त्रियमुत्तानां कृत्वा ऊर्ध्वं त्रिकोणं पूजयन्तीति रहस्यम् " (पृ. १८२-१८३) इति । एषा उभयविधा बाह्यवरिवस्याऽत्र विस्तरेण प्रायश्चतुर्ष्वपि खण्डेषु वर्णिता, शक्तियोग[35]श्च राजयोगनाम्ना द्वितीयचतुर्थखण्डयोर्विस्तरेण प्रदर्शितः । सेयं द्विविधाऽपि बाह्यवरिवस्या संक्षेपेण समुपस्थापयिष्यते ।

त्रिविधं कर्म

नित्यं नैमित्तिकं काम्यं चेति त्रिविधं कर्म भवति । तदनुसारं पूजा-पुरश्चरणादीन्यपि कर्माणि त्रिविधानि परिकीर्त्यन्ते । [36]आदौ नित्यं ततो नैमित्तिकं कर्म समाचर्यते । सन्ध्यावन्दनं नित्यं कर्म । अत्र हादिकादिमतेन सन्ध्याचतुष्टयं त्रयं च सूच्यते (I ६.७४), वर्णिताश्च तास्तृतीये खण्डे (५. ४७-५२)। तदनुसारं सुन्दरीसमुपासकेन प्रातःकाले, मध्याह्ने सायाह्ने, अर्धरात्रौ च सन्ध्यावन्दनं विधेयम् । तत्र प्रस्ताररूपा, आकृतिरूपा, उपस्थानाभिधा, वाञ्छाकल्पलताख्या चेति चतुर्विधा गायत्री समुपास्या । प्रातः षष्टिपारायणम्, मध्याह्ने नामपारायणम्, सायाह्ने मन्त्रपारायणम्, निशायां च चक्रपारायणं विधेयम् । कालिकायां क्वचिदुपस्थानविवर्जितं सन्ध्यात्रयं समुपास्यते, क्वचिच्च मेधादीक्षादिराज्ञीत्वात् कालिकायामपि सन्ध्याचतुष्टयं समाराध्यते । तारायां छिन्नायां च सन्ध्यात्रयमेव समाचरणीयम् ।

उपाकर्माभिधं कर्म नित्यवत् परिकीर्त्यते । पवित्राख्यं कर्म नैमित्तिकम्, रक्षाविधिश्च काम्यं कर्म भवति । कार्यमध्ये कार्यान्तरस्य समा[37]रम्भोऽङ्गाङ्गिभावेनैव कर्तुं शक्यते, न स्वातन्त्र्येण । उत्सर्जन-उपाकर्म-पवित्रारोपण-रक्षाबन्धन-मदनारोपणप्रभृतीनां कर्मणामत्र प्रथमे खण्डे १७-२० पटलेषु विस्तरेण वर्णनं दृश्यते । तत्र हि पवित्रनिर्माणे उपयुज्यमानानां नागपाश ब्रह्मग्रन्थि-चन्द्रग्रन्थिप्रभृतीनां माणिक्य-हीरकादिषु रच्यमानानां रक्षामन्त्राणाम्, रक्षाबन्धनकर्मणि गौतम-कपिल-शङ्करमतानाम्, सूत्राणाम्, दशविधरक्षाणाम्, शक्ति-पाञ्चरात्रमतानाम्, रक्षाकर्मतः प्राप्तसिद्धीनां पौरव-बृहदश्वादीनां जैमिन्यन्तानां राज्ञामृषीणां च, त्रिपुरदाहकथाया वसन्तपूजनस्य च वर्णनं विद्यते । अत्रैव त्रयोदशे पटले (३८-४१) वसन्तपञ्चमी-म[38]दनपूजा-पवित्रारोपणानि संक्षेपेण सूचितानि, अधिवासन-पवित्रारोपणे च तृतीये खण्डेऽपि (११. १४६-१५१) वर्णिते ।

---

३४ " त्रिकोणसंज्ञा योनिः स्यात्तत्रस्थो बिन्दुरुच्यते " (II ६.३९) इति शक्तिसंगमतन्त्रवचनमेतत समर्थयति लक्ष्मीधरोक्तिम् ।

३५ शक्तियोगशब्दो यथावसरं व्याख्यास्यते । राजयोगशब्दश्चात्र यौगिकपद्धत्या नेयः । रूढो ह्ययं शब्दः पातञ्जले योगे ।

३६ नित्य-नैमित्तिक-काम्यकर्मणां क्रमः (II ६०. २१-२६) इत्यत्र व्यक्तीकृतः ।

३७ " अङ्गाङ्गिभावमासाद्य सर्वं संसाधयेद् व्रती " (II ३९. २७-३३) इत्यादिना तद् व्याख्यायते ।

३८ काममूर्तिपूजनप्रसङ्गेन होढा (होलिका) राक्षसीकथा (II ६९. ११-२४) इत्यत्र वर्ण्यते ।

"धनकामे गणपतिम्" (II २. १-२१) इत्यादिना विविधानां कामनानां पूर्तये समर्च्या देवता वर्णिताः। तन्त्रशास्त्रेषु वर्णितानि वश्याकर्षणस्तम्भनादीनि षट्कर्माण्यपि काम्यकर्माण्येव। विरूपाक्षमतेन विराण्मतेन च त्रिविधानि षट्कर्माण्यत्र व्याख्यायन्ते (I ८. १०२-१०९), तदर्थमुपास्या देवताश्च वर्ण्यन्ते। वाञ्छासंकल्प-क्रियारूपं षट्कर्म चतुर्थखण्डे प्रतिपाद्यते (IV १०. ५८-६८)। अत्रैव चतुर्विधा वाञ्छा, षट्कर्मदेवताः, होमादिकम्, मालादिविभागः, राजसतामसादिभेदाश्च वर्ण्यन्ते।

रात्रिनिर्णयस्तिथिनिर्णयश्च

तान्त्रिकी उपासना दिवा च रात्रौ च सम्पाद्यते। अतो दिवसपूजायां तिथिनिर्णयो रात्रिपूजायां च रात्रिनिर्णय आवश्यकः। तदनुसारमेव नित्यानि, नैमित्तिकानि, काम्यानि च कर्माणि समाचर्यन्ते। तिथिकालविचारोऽयम् (II ६१. ३०-८९) इत्यत्र विस्तरेण कृतो दृश्यते। त्रिविधः प्रदोषोऽप्यत्रैव वर्णितः। पूर्णाभिषेकप्रकरणे (I ६. २३-२५) कालरात्रि-वीररात्रि-मोहरात्रि-महारात्रि-क्रोधरात्रि-घोररात्रि-तारारात्रि-अबलारात्रीणां दारुणायाश्चोल्लेखो विद्यते। चतुर्थे खण्डेऽपि जयन्तीप्रकरणे पञ्चम-षष्ठपटलयोः क्वचन तिथिनिर्देशपुरस्सरमेतासां नामानि दृश्यन्ते। सर्वासामेतासां विवरणं प्रथमखण्डीये वीररात्र्यादिनिर्णयाख्ये त्रयोदशे पटले द्रष्टव्यम्। अत्रैव पर्वरात्रस्य स्वरूपमपि वर्णितम्। क्वचन परिदृश्य-मानो नामभेदस्तिथिविवरणेन परिहर्तुं शक्यत इति न प्रयत्यते तदर्थमत्र। पटलसमाप्तावत्र तिथिविचारोऽपि दृश्यते। शनिप्रदोषविचारः, एकादशीव्रतनिर्णयः, अरुणोदयादिवेधविचारश्च कालीखण्डीयेऽष्टमे पटले विद्यते। शयन-बोधनाख्यस्य नवरात्रद्वयस्य वर्णनं गौडकाश्मीरद्रविडभेदेन त्रिधा विभक्तमत्र (II १६. १-६४) व्रत-नियम-पारणादिनिर्णयपुरस्सरं विहितम्। अत्रैव कापालिकावधूतानामेतदेव व्रतमित्युपदिश्य जिह्वासम्प्रोथन-शिरःसम्प्रोथनाख्ये कर्मणी महाचीनवरेण सम्पाद्यमाने वर्ण्येते। पितृतर्पणकाल-श्राद्धादितिथीनां निर्णयोऽप्यत्र विहितः (II ६०. २२; ६१. ६६-७३)। चतुर्थे खण्डे पञ्चमषष्ठपटलयोश्च दशविद्यानाम्, विष्णोर्दशावताराणाम्, गणेश-बटुक-भृगु-महा[३९]काल-दत्तप्रभृतीनां च जयन्तीनां तिथयो रात्रयश्च निर्णीताः। तदनुसारमेव समस्ता विद्या देवताश्च समाराधनीयास्तासु तासु रात्रिषु तिथिषु च।

मुख्या उपास्या देवता

देवीमतेन कालिका (काली), तारिणी (तारा), छिन्ना (छिन्नमस्ता) चेति तिस्रः शक्तयोऽत्र मुख्याः प्रतिपादिताः। अक्षोभ्यस्य मतेन तारा, नीला, एकजटा च; करालस्य मतेन डाकिनी, वर्णिनी, छिन्ना च; वटवासिमतेन बगला, पञ्चदशी, षोढा चेति तिस्रः शक्तयो भवन्ति। अन्यत्र तु "काली तारा तथा छिन्ना चतुर्थी सुन्दरी मता" (II १०.३३) इत्येवं चतुर्थीं सुन्दरीं च स्वीकृत्य चतस्रः शक्तयः प्रतिपाद्यन्ते। "या काली सैव तारा स्याद् या तारा सैव कालिका॥ या काली सैव छिन्ना स्याद् या छिन्ना सैव तारिणी। या सुन्दरी सैव काली सर्वसिद्धिप्रदा मता॥ चतसृणां न भेदोऽस्ति" इति च तासामभेदः प्रतिपाद्यते। किञ्च, कृष्ण-राम-शिवादीनां काली-तारा-ललिताप्रभृतीनां चाभेदश्चतुर्थे खण्डे (९. २-३३) साध्यते।" "वस्तुगत्या तु चैतन्यमेकं सर्वत्र तिष्ठति" (IV ९.१२) इत्येषा हि सिद्धान्तसरणिरत्र स्वीकृता।

---

३९ महाकालस्य स्वरूपं ध्यानं च तृतीये खण्डे (११. २२५-२३८) द्रष्टव्यम्।

एतासामेव मुख्यानां चतसृणां परस्परमभिन्नानां शक्तीनां नामभिः खण्डचतुष्टयात्मकमेतदखण्डं शक्तिसंगमतन्त्रं राजतेतराम्।

दशमहाविद्याः

प्राधान्येनात्र दशमहाविद्यानामुपर्युक्तो द्विविधो बाह्योपासनविधिर्व्याख्यातः। असंख्यातासु विद्यासु मुख्यतमा एता इति महाविद्यापदेनोच्यन्ते। एताश्च महाविद्याः शास्त्रान्तरेष्वपि व्याख्यायन्ते। एतासामुपासनामुखेनैव साम्प्रतिकः शाक्तः सम्प्रदायः प्रवर्तते। काली, तारा, षोडशी (सुन्दरी), भुवनेश्वरी, भैरवी, छिन्नमस्ता, धूमावती, बगला, मातङ्गी, कमला चेति नामानि सन्ति तासाम्। चतुर्थे खण्डे पञ्चमषष्ठपटलयोरेतासामुत्पत्तिर्विस्तरेण वर्णिता। तत्रावन्त्यां काल्याः, शिवकाञ्च्यां श्रीशैले श्रीत्रिपुराम्बिकायाः (सुन्दर्याः), मेरोः पश्चिमकूलस्थिते चोलह्रदे तारायाः, पुष्पभद्रानदीकूले छिन्नायाः, हरिद्राख्ये सिद्धकुण्डे सौराष्ट्रस्थिते बगलायाः, कदम्बविपिने मतङ्गमुनितपःप्रभावाद् मातङ्गिन्याः, दक्षप्रजापतेर्यज्ञे गौरीकुण्डसमुद्भवाद् धूमाद् धूमावत्याश्चोत्पत्तिः समजायत। अत्र मातङ्गिन्या उच्छिष्टमातङ्ग्याश्च जयन्ती पृथक् पृथक् प्रदर्शिता, भैरव्याश्च जयन्ती नैव वर्णिता। उच्छिष्टमातङ्गीनाम्ना सिद्धविद्या मातङ्गी[40], मतङ्गिनीनाम्ना च भैरवी वर्णितेति क्रमानुरोधात् प्रतीयते। उपर्युक्तेषु दशविद्यानामसु क्वचिद् वैभिन्न्यं दृश्यते, तत्तु मतभेदानुसारेणेति मन्तव्यम्। अत्र हि वीरनाथमतेन, नित्यामतेन, कुब्जामतेन च दशविद्यानामानि भिद्यन्ते। वामेन, दक्षिणेन, वामदक्षिणोभयेन वा मार्गेण यथायथमेताः समुपास्यन्ते (II. १.८३-११५; IV. ६.८०-८७)।

दश महाविद्यानां क्रमदशकम्

महानीलक्रमेण काली, महाचीनक्रमेण तारा, दिव्यचीनक्रमेण छिन्ना, गन्धर्वाख्यक्रमेण पञ्चमी (सुन्दरी), महागन्धर्वमार्गेण षोडशी, सौभाग्यक्रमेण बगला, जीवचक्रक्रमेण भैरवी, महाधूम्रक्रमेण धूम्रा, राजमार्गक्रमेण मातङ्गी, ब्रह्मभावक्रमेण दिव्यभावक्रमेण पशुमार्गक्रमेण वा समुपासिता कमला शीघ्रफलप्रदा भवति। महादिव्यक्रमेण, महावीरक्रमेण, महानीलक्रमेण च कादि-हादि-कहात्मिका विद्याः सिद्ध्यन्ति। स्वयम्भूपुष्पक्रमतः कालिका, स्वजातपुष्पक्रमतश्च भैरवी सिद्धिदा भवति। क्रमदशकमेतद् द्वितीये खण्डे २०-३१ पटलेषु विस्तरेण वर्ण्यते। तत्र महानीलक्रमेण कालिका सिद्धिदायिनी भवति। क्रमोऽयं सकलनिष्कलभेदेन द्विविधो भवति। सकलः क्रमो वाममार्गं निष्कलश्च दक्षिणमार्गमनुसरति। गुरोराज्ञां लब्ध्वा पञ्चवक्त्रक्रमोऽप्यत्र स्वीकर्तुं शक्यते। ब्रह्म-दिव्य-वीर-महाचीन-निष्कलभेदेन चीनः क्रमः पञ्चविधो भवति, सकलनिष्कलभेदेन च महाचीनक्रमो द्विधा विभज्यते, येन हि तारा समुपास्यते। तत्र सकलः क्रमो बौद्धानाम्, निष्कलश्च क्रमो ब्राह्मणानां कृतेऽभिधीयते। गन्धर्वाख्यक्रमेण सुन्दरी समुपास्यते। नानालङ्कारवस्त्राद्यलङ्कृतेन हि साधकेन गन्धर्वाख्यः क्रमः समनुष्ठीयते। पञ्चविधचीनेषु प्रदर्शितेन दिव्यचीनक्रमेण छिन्ना समुपास्यते। स्वपुष्पक्रमेण भैरवी समुपासनीया। सौभाग्यक्रमेणार्चिता बगला फलदा भवति। अत्र सृष्टिस्थितिसंहारभेदेन त्रिविधा पूजा भवति। सृष्टिपूजा गर्भकौलागमक्रमात्, स्थितिपूजा

---

४० मातङ्गी सैव सुमुखी सिद्धविद्या च (IV ६.४१)

गुप्तकौलागमात् , संहारपूजा च कामरूपागमान्निष्पाद्यते । गौडागममवलम्ब्य सांख्यायनमुनिरत्र स्थित्यर्चा-मन्यविधां प्रतिपादयामास । सौभाग्यक्रममेतदभिमानाष्टकं दूषणत्रयं पञ्चेन्द्रियासक्तिं च परिहृत्यानुष्ठीयते । अत्र सांख्यायनमतेन, दुर्वाससो मतेन, मतङ्गमुनिमतेन च पूजायां किञ्चिद्वैशिष्ट्यं वर्ण्यते । महाराजक्रमेण मातङ्गी समुपासनीया । दिव्यभावक्रमेण भुवना शीघ्रफलप्रदा भवति । कमलाक्रमवर्णने यद्यपि तस्या नाम न दृश्यते, तथापि ब्रह्ममार्गक्रमेण दिव्यमार्गक्रमेण पशुमार्गक्रमेण वा सा समुपास्यते । धूमावती काकक्रमेण समर्चनीया । नील-महानील-गन्धर्व-स्वपुष्प-महाचीन-महाराज-ब्रह्मभाव-कलार्चन-धूम्रभाव-ब्रह्मभावाख्येषु दशक्रमेषु समनुष्ठितेषु तेषु तेषु निर्दिष्टेषु कालेषु साधकेन सिद्धिरवाप्यते ।

कुल्लुकादिसमाराधनम्

दशविद्यानां समाराधनात् पूर्वं कुल्लुकासमाराधनमावश्यकम् । एतासामृषिच्छन्दोदैवतज्ञानपूर्वक-मुपासा विधीयते । एताश्च विद्यासम्बन्धिदोषाणां भक्षयित्र्यो भवन्ति । कुल्लुकासमाराधनं विना उपासिता विद्या निष्फला जायन्ते । एवमेव दशविधं यक्षिणी मण्डलमप्सरोमण्डलादिकं च दशविधं दशमहाविद्या-समाराधनात् पूर्वमेव पूज्यते । कलौ युगे एतासां विद्यानामुपासनयैव फलं लभ्यते । उपविद्यानां समारा-धनं तदा निष्फलं भवति । अङ्गमन्त्रसहिता एता विद्या[४१] चतुर्थे खण्डे प्रथमे पटले विस्तरेण प्रतिपाद्यन्ते । एतासां दशमहाविद्यानां भेदोपभेदा बहुविधा भवन्ति (II. १.१६४–१७३), निश्चितायां संख्याया-मेतासां जपेन च सिद्धिर्लभ्यते (II. ४३. ३-१०)। अत्र विद्यानां तदुपास्यानां देवतानां चाभेद एवाङ्गीक्रियते ।

मतान्तरम्

उन्मत्तभैरवमतेन त्रयोदश महाविद्या भवन्ति । विरूपाक्षेण त्रयोदश, भैरवेण च षोडश महा-शक्तयः स्वीक्रियन्ते । दशमहाविद्यासु चण्डेश्वरीं लघुश्यामां त्रिपुरां च संमेल्य त्रयोदश महाविद्याः सम्पाद्यन्ते । वनदुर्गां शूलिनीम् अश्वारूढां त्रैलोक्यविजयां वाराहीम् अन्नपूर्णां च संमेल्य षोडश विद्याः स्वीक्रियन्ते । महाकालमते एकपञ्चाशन्महाविद्या भवन्ति । महालक्ष्मीं समारभ्य कामकलापर्यन्तास्ताः सन्ति ।

काली तारा च

"कालीतारामयं ब्रह्म" इत्यसकृदत्र प्रतिपाद्यते । विना कालीं विना तारां नाथर्वणविधिः क्वचित् सिद्ध्यति । कालीकृतसृष्टिप्रतिपादकाः केचन श्लोकाः प्रायोऽत्र सर्वेषु खण्डेषु [४२]समुपलभ्यन्ते । आदिनाथं स्वभर्तारं प्रकल्प्य काली सुन्दरं रूपं धारयति, महाकालीति नाम्ना च व्यपदिश्यते । कालनाथेन साधिता काली केवलं कलौ युगे फलदा भवति । वरदानाधिकारः कालिकायां प्रतिष्ठितः । यत इयं वरदानेषु निपुणा, अत एव दक्षिणा कालीत्यभिधीयते । कलौ मुखाद्यशुद्धित्वात् कूटोच्चारो विधिपूर्वकं कर्तुं न शक्यत

---

४१ अत्र सुन्दर्या अङ्गमन्त्रा न निर्दिष्टाः ।

४२ एतदर्थम् I १.१९-५५; II ५. १७-३८; IV ५. १०६-१३०; ८. २-१३ इत्यादीनि स्थलानि द्रष्टव्यानि ।

इति तदाधारेण क्रियमाणं सुन्दरीसमाराधनं कलौ नैव फलदं भवति । कलौ काले काली स्पर्शमणिर्विद्यते । मणिना स्पृष्टो लोहभारो यथा सुवर्णतामापद्यते, तथैव कालीसाधको ब्रह्मस्वरूपो भवति । कालीमायासमुद्भूतस्य महाकालस्य काल्याश्च पूजनेनाऽन्तर्धानाद्या लौकिकसिद्धयोऽपि साधयितुं शक्यन्ते । षडाम्नाये शाम्भवे च कालीयं गुह्यकालीति नाम्ना व्यपदिश्यते । सकला निष्कला च तदुपासा क्रियते । संवर्तेशक्रमेण कालनाथक्रमेण च सा नवतत्त्वेश्वरी निगद्यते । काली वामाचारेण तुष्यति । अत एवोच्यते—"ताम्बूलं योनिचक्रं च मुण्डमाला शवासनम् ॥ सिन्दूरं खड्गकं देवि संविदासवयोः रसम् । विना यः पूजयेत् कालीं रौरवं नरकं व्रजेत् ॥" (II २०.५८-५९) इति । काली विद्या त्रिधा [४३]दशधा च जायते । सर्वा विद्या भैरवगणेशाद्याश्च सर्वे देवाः कालिकांशादेव जायन्ते । काली ताराारूपेण रावणस्य वधाय रामरूपेण च परिणमते । शिवशक्त्यात्मकं ब्रह्म सीतारामस्वरूपादभिन्नमेव । चक्षुषा विना यथा रूपं द्रष्टुं न शक्यते, तथैव कालिकां विना न कापि सिद्धिरधिगन्तुं शक्यते । कालीं दुर्गां शूलिनीं च समाराध्य सर्वाः सिद्धयो लभ्यन्ते । काल्याः सुन्दर्याश्च समाराधनेन शुक्रबृहस्पती, चतुरशीतिसिद्धाः, नवनाथादयश्च सिद्धिभाजो बभूवुः ।

कालीताराामयं ब्रह्मेत्युक्तम् । ब्रह्म च शिवशक्त्यात्मकं भवति । अतो यदा तारा शिवस्तदा काली शक्तिः, यदा च काली शिवस्तदा तारा शक्तिरूपेण राजते । कालीकृतायां सृष्टिप्रक्रियायां काली तारा चाभिन्नत्वेन वर्ण्येते । काली तारा च सर्वेषु युगेषु फलदे भवतः । कलियुगे तु तारा विशेषफलदा भवति । अत एव कालीतारापरायणो ज्ञातिषु श्रेष्ठ उच्यते । श्रीविद्योपासनायां श्रीविद्या, कालिका, तारा च सममेवोपास्यन्ते । सेयं ताराविद्या—"तारायोगो योग एव तथा ताराजपो जपः । तारामन्त्रो महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ॥" (I १२.३) इत्यादिना स्तूयते । तारामन्त्रजपेन घटसरस्वती सिद्ध्यति, षट्कर्मसाधनं च कुल्लुकासहितया ताराविद्यया क्रियते । बटुकस्वरूपिणी काली तारामयी प्रोच्यते । श्रीमहादक्षिणा काली सत्वरं फलं न प्रयच्छति, त्रैलोक्यतारिणी तारा तु सत्वरं सिद्धिं प्रददाति । ताराकल्पोक्तविधिना कालीतारामयं धाम नानादेवीसमुद्भवं समाराध्य महामधुमतीप्रभृतयो विद्या अनायासेन साध्यन्ते । अष्टौ [४४]तारा अष्ट कालीश्च षोडशनित्याभिः सह पवित्रग्रन्थिस्थानेषु पूज्यन्ते । ताराया महाताराया वा पूर्वं नीलं रूपं भवति । ततश्च सैव रक्तवर्णं सुन्दरीरूपं धारयति, त्वरिता-वनदुर्गादिस्वरूपं च धत्ते । [४५]तारास्वाराज्यचक्रं वैरोचनाष्टकम्, पद्मान्तकादयः, कुल्लुका, अक्षोभ्यश्च पूज्यन्ते ।

उग्रापत्तारकत्वादियमुग्रतारेत्यभिधीयते । चीनदेशे[४६] विश्वव्यापकतोयसंकटे समुत्पन्ने तस्या उग्राया आपदो निवारणार्थमुग्रतारा नूनमवतरति । मेरोः पश्चिमकूले चोलनामा महाह्रदो राजते । वेदमाता नीलोग्रतारिणी तत्रैवाविर्भूता, चोले ह्रदे निपत्य च नीलवर्णाऽभवत् । तत्राक्षोभ्येण ऋषिणा सर्वप्रथमं सा

---

४३ त्रिधा काली-तारा-छिन्नारूपेण, दशधा च दशमहाविद्यारूपेण काली स्वयमेव परिणमते ।

४४ अष्टविधतारायाः काल्याश्च नामान्यत्र क्वापि न दृश्यन्ते ।

४५ अस्मिन् प्रसङ्गे उग्रानित्यायाः (III १५. २४-४३) महोग्रतारायाश्च (II १०. २४-३२) साम्यमवलोकनार्हम् ।

४६ शक्तिसंगमतन्त्रे षट्पञ्चाशद्देशविभागप्रदर्शनावसरे—"काश्मीरं तु समारभ्य कामरूपाच्च पश्चिमे ॥ भोटान्तदेशो देवेशि मानसेशाच्च दक्षिणे । मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्तितः ॥ कैलाशगिरिमारभ्य सरयूयोनितः परे । आभोगान्तं महेशानि महाचीनाभिधो भवेत् ॥" (III ७. ४७-४९) इत्येवं भोटान्त-चीन-महाचीनदेशा वर्ण्यन्ते । अत्र सरयूसमुद्गमस्थानं निकषा महाचीनदेशस्य स्थितिर्निर्णीयते । देशविभाग एष तान्त्रिकोपासनाक्षेत्रस्य

दृष्टा समाराधिता चेति स एवास्या ऋषिः। नीलसरस्वतीं महानीलसरस्वतीमेकजटां वा एनां महोग्रतारां समाराध्य ब्रह्मा चतुर्वेदविद् भवति। इयं विद्या कहस्वरूपा उत्तराम्नायगोचरा च राजते। जलशायी हरिस्तोय[४७]प्लवे समुपस्थिते जलापच्छमनीं तारां स्मरति, तां प्रकृत्यात्मना स्वीकृत्य च जगत् सृजति। कादिहादिमताधीशस्तारोपासनायामधिकारी भवति। एनां जैनाः प्रभावतीम्, शाक्ताः शक्तिम्, बौद्धास्ताराम्, कौलाश्चक्ररूपाम्, चीना महोग्राम्, काद्याः कालीम्, हाद्याः श्रीसुन्दरीमाहुः। हंसरूपेण, कामकलारूपेण, प्रणवरूपेण, गायत्रीरूपेण च तारैव राजते। ब्रह्मतारायाः समाराधनेन जीवो ब्रह्मस्वरूपतामाप्नोति।

सुन्दरी नित्या च

"सुन्दरी भैरवी देवी तथैव कालसुन्दरी॥ सुन्दरी काल इत्युक्तः सुन्दरी गोप इत्यपि।" (I ९. १०-११) इत्यादि नामभिरत्र सुन्दरी स्तूयते। त्रिपुरा, त्रिपुराम्बिका, बाला, श्रीविद्येत्यादिनामभिः सैव परिचीयते। सैव षोडशीति कथ्यते। सुन्दरी विद्या क्लेशसाध्या भवति। अत्याचारादधर्मत्वाद् भ्रष्टत्वादपि पापसमाकीर्णे कलौ कस्य वै निश्चलं मनः? मनसोऽस्थैर्ये च कथं सुन्दरीसमाराधनं क्रियेत। अतो वीर-[४८]साधनवर्त्मना सा सततं समुपचर्या। सुन्दरीसमाराधनक्रमोऽयं द्वितीये खण्डे चतुश्चत्वारिंशत्तमे पटले प्रतिपाद्यते। बटुक-क्षेत्रपाल-गणपति-शङ्करोपासास्वपि क्रमोऽयं प्रयोक्तुं शक्यते। कदाचिदाद्या सुन्दरीयं ललिता लोकसंमोहनार्थाय ललितं स्वरूपं बिभ्रती वेणुनादपरा पुंरूपा कृष्णविग्रहा भवति। कदाचिच्च षोडशनित्यारूपेण परिणमते।

"नित्यानन्दस्वरूपत्वाच्चिद्धनत्वान्महेश्वरि॥ सदसद्व्यक्तिरूपत्वात् पूर्णरूपा तु या भवेत्। सा नित्या गदिता देवि कलाषट्कसमन्विता॥" (IV १०. ७०-७१) इत्येवं वर्णिता नित्या। नित्याषोडशिकार्णवे "तत्रादौ प्रथमा नित्या महात्रिपुरसुन्दरी" (१.२५) इत्यादिना षोडशनित्यानामानि सूच्यन्ते। एतासु पञ्चदश तिथिनित्याः, महात्रिपुरसुन्दरी च षोडशीति नाम्ना ख्याता। नित्याषोडशिकार्णवे त्रिपुरसुन्दर्या एवोपासा वर्णिता। अन्यासां नित्यानामुपासनाविधिः कादिमतनाम्ना प्रसिद्धे तन्त्रराजतन्त्रे वर्ण्यते। शक्तिसंगमतन्त्रे तु भिन्ना एव नित्यानित्याप्रभृतयः षोडश नित्याः प्रतिपाद्यन्ते। ताश्च तृतीयखण्डप्रस्तावनायां श्रीभट्टाचार्यमहोदयैः परिदर्शिताः। नित्याविधावन्यत्र च षोडशनित्या अत्र सूच्यन्ते। तिथि-दिन-युग-काल-पर्यायेति पञ्चविधनित्याप्रदर्शनप्रसङ्गे शुक्ल-कृष्ण क्रमेण द्विधार्चनं प्रतिपाद्यते। शुक्लपक्षे

विस्तारं सूचयति। अत्र वर्णितेषु सर्वेष्वपि देशेषु पीठानां विविधानां स्थितिर्वर्ण्यते प्राचीनेष्वपि तन्त्रेषु। एतच्चास्माभिर्नित्याषोडशिकार्णवोपोद्घाते पीठप्रकरणे (पृ. ७८-८३) प्रदर्शितम्। आधुनिकैर्भूगोलविद्भिर्देशानामेतेषां स्थितिस्तदनुसारमेव निश्चेतव्या। भोटान्तपदेन भूटानदेशो ग्रहीतव्यः। तत्समीप एव चीन-महाचीनदेशावपि स्याताम्। डा. प्रबोधचन्द्रबागचीमहोदयास्तु 'स्टडीज इन दी तन्त्राज्' इत्यस्मिन् ग्रन्थे (पृ. ४७) भोट(तिब्बत) चीन-(चाइना)-महाचीन(मंगोलिया) पदानि व्याख्याय सुदूरस्थितेष्वेषु क्षेत्रेषु तान्त्रिकपूजाया विस्तार आसीदिति न निश्चेतुं शक्यते इत्याहुः। तच्चिन्त्यम्। अत एव भारतीयतन्त्रेषु बाह्यप्रभावसाधनमपि तेषां निराधारमेव। अत्र पूर्वार्धीया ९६ संख्याका टिप्पणी अपि द्रष्टव्या।

४७ "तारां च तोयप्लवे" (श्लो. १७) इति लघुस्तुतिकारो धर्माचार्योऽप्याह।

४८ वीरसाधनविधिः संक्षेपेण उपसंहारप्रकरणे प्रदर्श्यते। अत एव विरोधिनीनित्यासमाराधनं मृतहट्टे (III १४.५८) क्रियते।

तिथिक्रमेण नित्याषोडशिकार्णवप्रतिपादिताः कामेश्वर्यादिकाश्चित्रान्ताः पञ्चदशतिथिनित्याः पूज्यन्ते, कृष्णपक्षे च चित्रादिकाः कामेश्वर्यन्ता विपर्ययक्रमेण पूज्यन्ते। मतान्तरेण काल्यादिका मित्रान्ताः पञ्चदश नित्या अनुलोम-विलोमक्रमेण शुक्लकृष्णपक्षयोः पूजनीयाः। असि[४९]तानित्याऽत्र श्रीत्रिपुरसुन्दरीस्थानीया।

तिथ्यादिपञ्चविधनित्यानां स्वरूपपरिज्ञानाय कालज्ञानमावश्यकम्। युगादिभेदेन भिन्नस्य कालस्य प्रथमखण्डे द्वितीयतृतीयपटलयोर्विस्तरेण स्वरूपमुन्मील्यते, तदेव च तृतीयखण्डतृतीयपटलेऽपि दृश्यते। अत्रैव चान्द्र-सावन-नाक्षत्र-सौर-बार्हस्पत्यभेदेन पञ्चविधो मासक्रमो निरूप्यते। तत्र बार्हस्पत्याभिधो मासः षट्त्रिंशद्दिवसात्मको निर्दिष्टः। पक्षश्चाष्टादशदिवसात्मको भवति। तत्र नित्या[५०]षोडशमण्डलम्, सप्तदशी शान्तिरष्टादशी शान्त्यतीता चेत्यष्टादशदेव्यः प्रतिपक्षं समर्च्यन्ते। नित्यादिवसमण्डले ह्रासवृद्धी न भवतः। उदयार्णक्रमेण सम्पूर्णो दिवसो भवति। बटुकमतानुसारी क्रम एषः। कालसंमत्या वर्णमासाभिधश्चतुर्थो मासः पञ्चाशद्दिवसात्मको भवति। तत्राष्टाचत्वारिंशदूनचत्वारिंशत्पञ्चाशद्वर्णानां त्रिविधं मण्डलं भवति। तिथिनित्याप्रसङ्गे दक्षिणामूर्तिमतमानन्दभैरवमतं चात्र निर्दिश्यते, [५१]पर्यायनित्याप्रसङ्गे च "आईपल्लवितैः" (श्लो. १९) इत्यादिलघुस्तवप्रतिपादितानि २०८३६ संख्याकानि त्रिपुरानामानि सूच्यन्ते।

बटुकोऽन्ये भैरवादयश्च

प्रथमखण्डे द्वादशे पटले बटुकसंबन्धिनः प्रश्ना देव्या समुपस्थाप्यन्ते, शपथपूर्वकं समाधीयन्ते च ते भगवता शिवेन। जपपूजादिहारकाणां वेतालादीनां विनाशाय भक्तानुग्रहाय च ताराकाल्या बटुको विभावितः। योगिनी-भैरव-महाविद्याप्रभृतीनामनन्तकोटिमन्त्राणां तेजःसमुद्भूतमेतद् बटुकाख्यं महः। अस्मै महोग्रताराप्रभृतिभिरायुधानि समर्पितानि, यक्षगन्धर्वादयः कौक्कुरं रूपमासाद्यामुं संभजन्ति। साक्षात् शिवेनैव बटुकाख्यं रूपं यदारभ्य धृतं तदा प्रभृति वेतालाद्या न दुःखदा बभूवुः, तेऽपि सिद्धिं संलेभिरे। बटुकस्य प्रभावेणैव सर्वा विद्याः शाबराद्याश्च मन्त्राः सिद्धिभाजो भवन्ति। दशयोगसमन्विता शुद्धा ज्येष्ठमासीया दशमी बटुकस्य तिथिरस्ति। अस्यामेव तिथौ बटुकः प्रादुर्बभूवेत्यस्मिन्नेव दिने बटुकस्य जयन्तीसमारोहः सम्पाद्यते। हेतु-त्रिपुरान्तक-वह्निवेताल-अग्निजिह्व-काल-कराल-एकपाद-भीम-त्रैलोक्य-सिद्धबटुकाख्या दश बटुका भवन्ति। बटुकं विना विद्या न सिद्ध्यन्तीति कृत्वा तृतीये चतुर्थे च खण्डेऽत्र दशविद्यानां दशभै[५२]रवा निर्दिष्टाः (III ४३. २२-२४; IV ८. २१०-२१२)। अपि च उन्मत्त-भैरवादयोऽसिताङ्गादयश्च भैरवाः पृथगत्र परिगण्यन्ते (I ६.१६३-१६९)। तृतीये खण्डे (११.२५३-२५४) मन्थान-षट्चक्र-फट्कार-विभक्ष-वीरेश-श्रीमन्तेश्वर-हंसगर्भ-चण्डिकेश्वरभैरवाख्या अष्टौ भैरवा निर्दिश्यन्ते।

---

४९ परशुरामकल्पसूत्रद्वितीयसंस्करणपरिशिष्टे (पृ. ४१०) द्विविधो नित्याषोडशक्रमो द्रष्टव्यः।

५० विषयोऽयमुपर्युक्ते ग्रन्थे (पृ. ४०६-४१४) स्पष्टीकृतस्तत्रैवावलोकनीयः। एतदनुसारि पञ्चाङ्गमपि दतिया-स्थानात् प्रकाश्यते।

५१ पर्यायशब्दोऽत्र प्रस्तारार्थे प्रयुक्त इति प्रतिभाति।

५२ द्वितीये परिशिष्टे प्रदर्शिता अक्षोभ्यादयो मत-क्रम-मार्गप्रवर्तका बाहुल्येन भैरवा एव सन्ति। कामाख्यापीठे साम्प्रतमपि भैरव उमानन्दाख्यः प्रथमं पूज्यते ब्रह्मपुत्रनदमध्यवर्ती।

षट्पञ्चाशद्वर्णेशाः, कुब्जि[५३]काप्रभृतयो देव्यः, दिव्यौघ-सिद्धौघ-मानवौघमयी गुरुपङ्क्तिः, चतुरशीतिसंख्याका सिद्धा यक्षाश्च, नवनाथाः, चतुष्षष्टियोगिन्यः, षट्त्रिंशद् यक्षिण्यश्च पूज्यत्वेनात्राभिधीयन्ते। एतासां देवतानां सपर्यासु को नामाधिकृतः? इति प्रश्नस्यास्य समाधानायाधिकारी तावत् निर्णीयते।

अधिकारी

तान्त्रिकीषु सपर्यासु सर्वे स्त्रीशूद्रादयोऽप्यधिकृता इति निर्विवादम्। अत्र दक्षिणामूर्तिघोरादौ पञ्चाक्षर्यां प्रणवाद्येषु मन्त्रेषु च स्त्रीणां नाधिकारिता, वेदादौ च शूद्राणां नाधिकारितेति प्रश्नः समुपस्थाप्यते। प्रणवं विना स्त्रीशूद्रौ सर्वत्राधिकृताविति च निर्णयः क्रियते। अत एव तन्त्रशास्त्रेषु वैदिकप्रणवतो भिन्नानां पञ्चप्रणवादीनां समुद्धारो वर्ण्यते। ते चात्र प्रणवोपासनायां विवृता एव। दीपरेखाविज्ञान-अक्षरोदय-जपपारायणादिषु विशिष्टेषु कर्मसु पूर्णाभिषिक्तस्यैवाधिकार इत्येवमधिकारसंकोचोऽप्यत्र क्रियते, "अल्पायुष्यादधर्मत्वात् पारुष्यजल्पनात् प्रिये। कलौ देवेशि नान्येषामधिकारो मयेरितः॥" (III ३.२७३) इति च हेतुरत्र प्रदर्श्यते, किन्तु—"बालाधिकारी यो देवि तस्य विद्याधिकारिता। विद्याधिकारे सम्पन्ने षोडश्यामधिकारवान्॥" (III ३.२७४) इत्यादिना योग्यतानुरूपोऽधिकारक्रमोऽयं विकासमापद्यत इत्यपि स्पष्टमत्र वर्णितम्।

दीक्षाभिषेकौ

तान्त्रिकत्वरिवस्यास्वधिकारसम्पादनाय दीक्षा [५४]परमावश्यकी। सा च पूर्णाभिषिक्तेन गुरुणा संपाद्यते। उपासाभेदेन कुलं कुलाकुलमकुलं चेति चक्रत्रयमत्र प्रतिपाद्यते। कुलचक्रं कालिकायाम्, अकुलं कालिका[५५]मनौ, कुलाकुलं च तारायां भवति। एकस्मिन् चक्रे दीक्षितेनापरचक्रे प्रवेशो न विधेयः, किन्तु पूर्णाभिषेकयुक्तानां सर्वत्र गमनं शुभमुद्घोष्यते। पूर्णाभिषेकी यस्मिन् देशे विराजते स देशः समन्ताल्लक्षयोजनं धन्यतां गच्छति। पूर्णाभिषेकयुक्तानां हि शक्तिपातः प्रजायते। पूर्णाभिषेकसंयुक्त एवाचार्यत्वं कर्तुं समर्थो भवति। ईदृशः पूर्णाभिषिक्तो गुरुर्वास्तुसर्पादिकं परिज्ञाय पूर्वं दीक्षास्थानं संशोधयति, तत्र शिष्यमधिवासयति, सम[५६]यांश्च कांश्चन श्रावयति, येषां हि पालनं दीक्षायोग्यतासंपादनाय तेन विधेयम्। दीक्षासमये नामाज्ञां प्रददाति गुरुः। केवलो मन्त्रजापो नाम इत्यभिधीयते। स च निष्फलो भवति। आदि[५७]मान्त्यहीनाः पुस्तकादिपठिता मन्त्राः शरदभ्रवन्निष्फला इति हि तन्त्रशास्त्राणां निश्चयः। एतद्दोषनिवारणाय गुरोर्मन्त्र-

---

५३ सकला निष्कला चेति द्विविधा कुब्जिकाऽत्र (IV १.१०४-१०५) प्रतिपाद्यते। तत्र निष्कला चन्द्रवक्त्रा सकला च षण्मुखा भवति।

५४ "अपि चाण्डालजातिस्थस्तारोपासनतत्परः॥ पूर्णदीक्षासमायुक्तः सैव श्रीकालिकाम्बिका। तव यत्नेन जातित्वे कारणं न मयेरितम्॥ "वर्षमात्रभवो बालः पूर्णदीक्षासमन्वितः॥ तदन्यो हि ऋषिर्देवि वर्षसाहस्रभागपि। ऋषिः कनिष्ठो देवेशि बालः श्रेष्ठः प्रकीर्तितः॥" (IV ८.२६-२९) एवं दीक्षाया जातिवयोनिरपेक्षं माहात्म्यमत्र वर्ण्यते।

५५ 'कालिकामनौ' इत्यस्य स्थाने 'सुन्दरीमनौ' इति पाठेन भाव्यमित्यग्रे प्रतिपादयिष्यते।

५६ समयपालका एते समयिन उच्यन्ते (I २०.२८)। वैष्णवेषु शैवेषु चागमेषु समयी, पुत्रकः; साधकः, आचार्यश्चेति दीक्षितानां चत्वारो भेदा निर्दिष्टाः।

५७ "आदिमान्त्यविहीनास्तु मन्त्राः स्युः शरदभ्रवत्। गुरोर्लक्षणमेतावदादिमान्त्यं तु योजयेत्॥" इत्ययं श्लोको बहुशास्तन्त्रागमग्रन्थेषु दृश्यते।

ग्रहणमावश्यकम् । नामाज्ञापदेनात्र तद् व्याख्यातम् । "ऋणं धनं च विज्ञाय नामाज्ञां दापयेद् गुरुः" (I ५.४३) इति निर्देशानुसारं गुरुणा ऋणधनचक्रसाहाय्येन मन्त्रशोधनं क्रियते, मन्त्रोपदेशसमये च तेन दक्षिणामूर्ति-आनन्दभैरवादिसम्प्रदायानुसारं स्वगुर्वन्ताया ओघत्रयपरम्पराया अपि परिचयो दीयते । नाम[५८]दानविधिरयं सम्प्रदायभेदेन विस्तरेण तत्र तत्र वर्ण्यते । शिष्याय स्वसाम्प्रदायिकनामप्रदानान्तो नामदानविधिरयं प्रवर्तते । तदनुसारं शिष्याय नाथानन्दप्रभुपादाद्यङ्कितं दीक्षानाम प्रदीयते ।

पूर्णाभिषेकनाम्ना हादिकादिक्रमेण दीक्षाविधिरयं प्रथमे खण्डे षष्ठे पटले वर्णितः । तथा हि— शुभमासे शुभर्क्षे शुभलग्ने शुभोदये च, कालरात्र्यादिषु, दारुणासंगमे, मकरे पुण्यसंगमे विविक्तस्थानमासाद्य स्थानशुद्ध्यादिपूर्वकं पर्वते, घोरे विपिने, शून्यगेहे श्म[५९]शानाष्टके, एक[६०]लिङ्गे शिवावासे, श्मशानाष्टके, चक्र[६१]पाणिगृहे, नद्याम् , पुर्याम् , पीठाष्टके, पञ्चाशत्पीठमध्ये, पुष्पिण्युत्सवे, गङ्गागर्भे, तडागे, वेश्यावासे, नदीसमुद्रसंगमे, कुलवृक्षवने, कदलीवने, मृगवने, नारिकेलवने, दिव्ये कदलीमण्डपे, वाटिकायाम् , पलाशवने, पुण्यक्षेत्रे, स्वैरिणीगृहे, कुट्टिनीनर्तकमण्डले विशिष्टस्थानमासाद्य मण्डपं कारयेत् । तन्मध्ये पूजामण्डपमारचयेत् । त्रिविधेनाष्टाष्टकक्रमेण पञ्चपञ्चकमार्गतो वा पूजामण्डपस्य संनिवेशो विधातव्यः । पूजामण्डपे यथायथं च[६२]क्राणि (सर्वतोभद्रादीनि मण्डलानि) रचयेत् , मध्ये च मेरुमण्डलमालिखेत् । मेरुसाधनमेतत् सकलं निष्कलं चेति द्विविधं भवति । सकलं दीक्षाङ्गत्वेन निष्कलं च कामनाङ्गत्वेन साध्यते । मेरुसाधनं विना दीक्षा नैव सम्पद्यते ।

ततो घटस्थापनादिकं विधाय यथायथं स्वाराध्यविद्याचक्राणि स्थापयेत् । एवं सुसंस्कृते मण्डपे शिष्योऽधिवासं कुर्यात् । प्रातरुत्थाय स्वेष्टदेवता विधिवत् समभ्यर्च्य होमादिकं प्रायश्चित्तादिकं च समाचर्य तत्रैव गुरुः शिष्यो वा जपपारायणादिकं कुर्यात् । ततो विद्योक्तं[६३]तिलकं कृत्वा गुरुः शङ्खकाहलप्रभृतिवाद्यानां घोषैः संगीतनर्तनध्वनिभिश्च पूरिते दिङ्मण्डले स्वयं शिष्यमभिषिञ्चेत् । ततश्च भृङ्गावलीयोगविधिना शिष्यतनौ मन्त्रचैतन्यं निदध्यात् । एतेन मन्त्ररूपो भवति शिष्यः । एषा दीक्षा सम्राण्मेधानाम्नाऽभिधीयते । श्रीविद्योपासकानां छिन्नाद्युपासकानां च त्रिविधा दीक्षा भवन्ति । ताश्च स्वस्वसम्प्रदायानुसारं स्वीकर्तव्याः ।

---

५८ "शैवे शिवान्तिकं नाम वैष्णवे तु तदन्तकम् । शाक्ते तु शक्तिगुरवस्तत्र भेदा भवन्ति हि । सौरे सौरं गाणपत्ये बौद्धे धर्मान्तिकं भवेत् ॥ एवं पाशुपताद्येषु तत्र दीक्षोक्तनाम तु । कार्यं तु यत्नतो देवि इत्येवं कालिकाऽब्रवीत् ॥" (III १.९३-९५) इत्यादीनि वचांस्यत्र द्रष्टव्यानि ।

५९ "श्रीकामरूपोज्जयिनीकाश्मीरकाञ्चीकरवीरदेवीकोट्टोड्डियानहिरण्यपुरवासिनो भैरवाः श्मशानेशाः स्वच्छन्दतन्त्रे तदुद्योते (२.१७९) च वर्णिताः । श्मशानाष्टकपदेनात्र कामरूपादीनि ग्राह्याणि । काशी तु महाश्मशानपदेनाभिधीयते ।

६० "पश्चिमाभिमुखं लिङ्गं नन्दिहीनं पुरातनम् । चतुरः पञ्च क्रोशान्ते न लिङ्गं दृश्यते शिवे ॥ तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा ।" (I ८.११०-१११) इत्येकलिङ्गलक्षणमत्र वर्ण्यते । नाथद्वारा-समीपस्थित-एकलिङ्गजी-स्थानादस्य लक्षणस्य संगतिः परामृष्टव्या ।

६१ चक्रपाणिगृहं कुम्भकारगृहम् । कुब्जिकामतं कुलालिकाम्नायपदेनाप्यभिधीयते । देव्याः कुब्जिकायाः पूजनं कुम्भकारगृहे विधेयमिति तत्रोच्यते (द्रष्टव्यम्—स्टडीज इन दी तन्त्राज् , पृ. ४५) ।

६२ सर्वतोभद्रादीनि पञ्च मण्डलानि द्वितीये खण्डे (४२.४-५) वर्णितानि ।

६३ त्रिपुण्ड्र-ऊर्ध्वपुण्ड्र-कज्जल-तिलकादीनां विधानं प्रथमखण्डेऽष्टमपटले क्रमदशकप्रकरणे च द्वितीये खण्डे द्रष्टव्यम् ।

तत्र बालया देहशुद्धिर्भवति, विद्याधिकारिता चोपजायते। विद्याधिकारं लब्ध्वा क्रमशः षोढा-पञ्चषोढा-पराविद्या-पराषट्क-चरण-निर्वाणादिदीक्षास्वधिकारमधिगच्छति। ततः षोढान्यासं न्यस्य रश्मिचिन्तनमाचरति। श्रीरश्मिं महारश्मिं च विन्यस्य साधको मेधादीक्षायां प्रविशति। मेधोत्तरं साम्राज्यमेधां दिव्यसाम्राज्यमेधां च दीक्षामधिगम्य नरः सदाशिवसमो भवति।

दीक्षोत्तरं शिष्येण सततं मन्त्रयोगाभ्यासवता भाव्यम्। यथानिर्दिष्टावधिपर्यन्तं मन्त्रयोगाभ्यासेन पावितान्तःकरणो हि साधकश्चक्षुष्मत्यादिमेधान्ताः सर्वा दीक्षाः साधयितुं समर्थो भवति। सोमसूर्याग्निरूपस्य जलस्य स्पर्शेनाशेषा दोषा नश्यन्ति। तस्मादशेषदुःखार्तिशान्त्यै अभिषेकोऽयं विधीयते। एवं समाप्तदीक्षेण प्राप्ताभिषेकेण शिष्येण गुरोः[६४]पूजनं विधेयम्। दीक्षाभिषेकप्रतिपादकेऽस्मिन् पटलेऽन्ते शिवपरम्परायां देवीपरम्परायां च प्रवर्तमाना नानाविधाः सम्प्रदायाः प्रदर्शिताः। तेन हि यस्य यत्राभिलाषः स्यात् स तत्र दीक्षितो जायेत। एते चास्माभिः सम्प्रदायप्रकरणे व्याख्याता एव। विना पूर्णाभिषेकेण कालीं तारां सुन्दरीं च ये समर्चयन्ति जपन्ति च नरकं ते यान्ति। तस्माद्दीक्षाभिषेकौ संपाद्यैव साधकेन तथा विधेयम्।

स्त्रीदीक्षा।

भर्त्रा दीक्षा प्रदेया स्यात् स्त्रीणां नान्येनेति सिद्धान्तितमत्र (II ५२.१)। ततः परं स्त्रीणां दीक्षाविनिर्णयार्थं समारब्धेऽष्टपञ्चाशत्तमे पटले पुत्रेण मातुर्दीक्षाविधानं युक्तिप्रदर्शनपूर्वकमङ्गीकृतम्। अत्रैव मात्रा दीक्षा प्रदेया वै स्त्रीणां नान्येनेति पक्षोऽपि समुपस्थाप्यते। देवीपरम्पराप्राप्ता हि स्त्रीणां दीक्षा शुभा भवति। वस्तुतस्तु दीक्षाविषयका नियमाः पुरुषेष्वेव प्रवर्तन्ते न योषित्सु। पुरुषेष्वपि पशुभावपरेष्वेव नियमानां प्रवृत्तिर्भवति। वीराणां तु सर्वत्र दीक्षणं भवति। अत्र शङ्क्यते—"गुरोः सकाशाच्चेद् देया तदा सा भगिनी मता। स्वयं वै यदि चेद्देया तदा कन्या प्रकीर्तिता। अन्यतो दापनीया चेन्मार्गभ्रष्टा तदा भवेत्॥" (II ५८.१६-१७) इति। समाधीयते च—"स्वसम्प्रदाये यः श्रेष्ठस्तत्सकाशात्तु दीक्षणम्" (II ५८.१९) इति। तदभावे कृष्णपक्षत्रयोदश्यां चन्द्रवासरान्वितायां तालपत्रे मनुं विलिख्य तत्र दश संस्कारान् विदध्यात्। दक्षिणामूर्तिसन्निधौ पायसादिकं विनिवेद्य बिल्वैः शङ्करं सम्पूज्य स्त्रियाः समक्षमष्टोत्तरसहस्रवारं तद्वाचयेत् तन्त्रोक्तवर्त्मना च होमादिकं कर्मानुतिष्ठेत्। स्वय[६५]मशक्तश्चेत् पुत्रद्वारा तस्य वाचनं कार्यम्। अथवा पत्नीमेव शास्त्रज्ञां विधाय तद्द्वारैव वाचनं कार्यम्। केवलमत्र स्त्रीणां कृते प्रणवस्योपदेशो वार्यते। तथा हि—"ध्यात्वा श्रीदक्षिणामूर्तिं विहाय प्रणवं प्रिये। मन्त्रो ग्राह्यो महेशानि गुरुः श्रीदक्षिणेश्वरः॥" (II ५८.४१-४२) इति। अथवाऽन्यप्रकारेणापि स्त्रीणां दीक्षा विधीयते। समुद्रगामिन्या नद्यास्तटे शुभलग्ने शुभदिने सम्प्रदायानुसारं सूर्यमण्डलं लिखेत्। तत्र साङ्गं सावरणं भगवन्तं सूर्यं सम्पूज्य तालपत्रे मनुं विलिख्याष्टोत्तरशतवारं वाचयेत्। सूर्य एवात्र गुरुत्वेन पूज्यते।

---

६४ गुरुपूजनप्रकारः प्रथमे (६.११८-१२२) द्वितीये (१८.२२-२७) च खण्डे संक्षेपेण वर्णितः।

६५ स्वस्याशक्तौ प्रतिनिधिद्वारा पूजन-मन्त्रलेखनादिकं कार्यते। भ्राता, पुत्रः, पिता, माता, स्वसा, रमणी, पौत्रः, गुरुः, गुरुपुत्रश्चेति नव प्रतिनिधयोऽत्र स्वीकृताः। प्रतिनिधिभ्यो यथायथमाभरणादिकं यथाशक्ति प्रदीयते। उपासनायां सामान्यहोमादौ च प्रतिनिधिर्नैव गृह्यते (II ५३.८-१३)।

वीराणां कौलिकानां च सम्प्रदाये भर्ता दीक्षामाचरति पत्न्याः । एतच्च—" स्त्रियो दीक्षा शुभा प्रोक्ता सर्वकामफलप्रदा । पतिः संदीक्षयेत् स्वस्त्रीं मातृनाम्नीं न कामिनीम् ॥ " इत्यादिना " भर्तुर्दीक्षाप्रदाने तु न दोषः कालिकागमे " (IV ११. २-१७) इत्य[६६]न्तेन ग्रन्थेन समर्थ्यते ।

त्रिविधो मेरुः

दीक्षाप्रकरणे मेरुमण्डलमालिखेदित्युक्तम् । मेरुभेदादिविज्ञानं श्रीमहासिद्धशैवके कालिकाम्नायतन्त्रे विस्तरेण वर्ण्यते । अत्रापि प्रथमखण्डीयनवमदशमपटलयोस्तद्वर्ण्यते । न्यासमेरु-यन्त्रमेरु-अग्निमेरुभेदेन त्रिविधो हि मे[६७]रुर्भवति । बाह्याभ्यन्तरभेदेन न्यासमेरु-यन्त्रमेरु द्विविधौ भवतः । पुनश्च न्या[६८]समेरुस्त्रिधा विभज्यते—मेरुप्रस्तारः, कैलासप्रस्तारः, भूप्रस्तारश्चेति । एवमान्तरेण न्यासमेरुणा सह चत्वारो भेदा भवन्ति न्यासमेरोः । यन्त्रमेरुः षड्विधो भवति । बाह्ये न्यासमेरौ न्यास आन्तरे च भावना क्रियते । बाह्ये यन्त्रमेरौ लेखनमान्तरे च भावना विधीयते । वह्निमेरुः पञ्चधा भवति—लयमेरुः, योगमेरुः, नादमेरुः, योगवीणाख्यमेरुः, कन्यामेरुश्चेति । बाह्याभ्यन्तरभेदेन विभक्तेष्वेषु दश वह्निमेरवो भवन्ति । तारिणीमते मन्त्रमेरुर्वर्णमेरुश्चेति द्वौ मेरू अधिकौ स्तः । वर्णमेरौ शतोत्तरं सप्ततिः कोष्ठानि भवन्ति । चतुःशृङ्गाह्वये मेरौ सर्वे वर्णाः प्रतिष्ठिताः ।

श्रीविद्योपासक एव मेरुसाधनमाचरेत् । श्रीविद्योपासकः पूर्णाभिषेकसंयुक्त ऊर्ध्वाम्नायादिसंयुक्तश्च आचार्यो भवति । पूर्णाभिषेकरहितेन मेरुसाधनमाचर्यते चेद् दुर्भिक्ष-राष्ट्रभङ्गादयो दोषाः प्रादुर्भवन्ति । दीक्षितेन क्रियते चेन्नाना सिद्धयः संजायन्ते । न्यासमेरुः सात्त्विकः, यन्त्रमेरू राजसः, वह्निमेरुश्च तामसः परिगण्यते । तृतीये खण्डे (१०. १-३२) अर्ध-मध्य-पूर्णभेदेन त्रिशतं पञ्च मेरवो भवन्तीति सूच्यते । अग्नि-न्यास-यन्त्राख्यत्रिविधमेरुसाधनं धूम्रकेत्वादि दोषशान्तिकरं भवति, तथापि तामसमेतत् कर्म पापसमाकीर्णे कलौ न संमतमिति व्यवस्थाप्यते ।

वह्निमेरुः

वह्निमेरुरेव कुण्डनाम्ना परिचीयते । तत्र श्रीविद्याद्युपासासु विभिन्नसंख्याकानां कुण्डा[६९]नामुपयोगो विधीयते । दशमे पटलेऽग्निमेरुसाधनं कुण्डचत्वरादिभेदेन, महाकाल-अक्षोभ्य-नीला-करालमतेन कैलास-शृङ्खला-रत्नगर्भ-षट्शाम्भवक्रमेण च विस्तरेण प्रतिपाद्यते । अत्रैव चत्वराणां पताकानां तोरणानां

६६ स्त्रीदीक्षाप्रकारस्तृतीये खण्डेऽपि (१.९१-९८) वर्ण्यते ।

६७ मेरुशब्दोऽत्र लक्षणया सर्वोच्चस्थानवाचकः । जपमालायां हि सर्वोपरिस्थे मणौ मेरुशब्दः प्रयुज्यते, तथैव यन्त्रप्रस्तारेष्वपि सर्वोच्चं यन्त्रं मेरुप्रस्तारनाम्ना परिचीयते ।

६८ न्यासमेरुशब्दो नात्र स्पष्टं व्याख्यातः । मेरु-कैलास-भू-कञ्ज-कूर्म-रत्नगर्भभेदेन षड्विधो यन्त्रमेरुश्चतुर्थे खण्डे (८.१३६-१३८) वर्ण्यते । न्यासमेरु-वह्निमेर्वोर्भेदास्तु विपर्यस्ता इव दृश्यन्ते । वह्निमेरुशब्दो हवनकुण्डार्थमत्र प्रयुक्तः । तत्र मेरुप्रस्तारादयो भेदा एव समञ्जसाः स्युः, न तु लयादयः पञ्च भेदाः । पञ्चचक्रक्रमे जीवचक्रमेव जीवमेरुरिति प्रतिपादयिष्यते । न्यासमेरुरयं लयादयस्तस्य भेदाश्च जीवचक्रेणैव संबद्धाः स्युरिति प्रतीयते । कौलतीर्थप्रकरणे हि योगवीणादयः शब्दा व्याख्यायन्ते ।

६९ पञ्चाग्नितपसि यथा सूर्यः पञ्चमाग्नित्वेन स्वीक्रियते, तथैव प्रकरणेऽस्मिन् सर्वत्र सूर्यस्यान्यतमाग्नित्वेन परिग्रहणं कृतम् ।

च लक्षणानि संवर्ण्य होमद्रव्यादयो विषयाः फलश्रुतिपूर्वकमुपदिष्टाः। एकादशे पटलेऽपि श्रीचक्र-कामचक्रादयः कुण्डात्मका मेरवो महामेरवश्च संवर्तेशक्रमेण शाम्भवाख्यक्रमेण च प्रतिपादिताः। कुण्ड-मेखला-स्थण्डिलादिविषयको विचारो द्वितीये पटलेऽपि (१८. ८७-९४) दृश्यते।

यन्त्रमेरुः

यन्त्रं देवानां गृहं बिन्दुश्च सिंहासनमुच्यते। बीजयुक्तमेव यन्त्रं सिद्धिदायकं भवति। बीजहीनं यन्त्रं शववत्, बीजयुक्तं च सजीवं सिद्धिदायकं भवति। ध्यानरूपा हि महाविद्या बिन्दौ दिव्यरूपतामासाद्य तिष्ठति। बीजलेखनविधिः केरले, गौडकाश्मीरयोः, चैतन्ये, नन्दनाथे चिद्घनभैरवयोश्च भिद्यते। शालिग्रामो यन्त्रं चैकत्र न पूज्यते, अतः पञ्चायतनपूजकेन यन्त्रमेवार्चनीयम्। यन्त्रं देवतानां पीठं भवति। यन्त्रे पूजिता देवता सहसैव प्रसीदति। शालिग्रामे बाणलिङ्गे जीवचक्रे स्थिरयन्त्रे च आवाहनविसर्जने न भवतः। महायन्त्रं प्रतिष्ठाप्य नैव तद्विसर्जनीयम्। यन्त्रप्रतिष्ठां कृत्वा यदा तत्र विद्या काचिद् देवता वा विभाव्यते, प्रतिष्ठाप्यते, तदनन्तरं तस्या विसर्जनं नैव क्रियते।

द्वितीये खण्डे ५१-५५ पटलेषु, ६३-६६ पटलेषु च धारणीययन्त्राणां विषयो विस्तरेण विचार्यते। यन्त्रमेतन्मुद्रा-माला-दुर्गभेदेन त्रिधा विभज्यते। सौभाग्याभरणयन्त्रेण मुद्रिका-घण्टाख्य-शृङ्खलादिषु विविधेष्वाभरणेषु धारितेन सर्वा विद्यास्तुष्यन्ति सिद्धयश्च समुपलभ्यन्ते। केन कथं कुत्र यन्त्रं धारणीयमिति सर्वमत्र वर्णितम्। स्त्रीसाहाय्येन यन्त्रसिद्धिरवाप्यत इति तदर्थं स्त्रीदीक्षाप्रकारोऽपि वर्ण्यते। स चानुपदमेव प्रदर्शितः। पञ्चावृत्तितः पञ्चविंशतिलक्षपर्यन्तासु लेखनावृत्तिषु पत्रादिषु यन्त्रस्य क्रियमाणासु नानाविधापन्निवृत्तिर्विजयादिकं चोपलभ्यते। स्वर्णे, रौप्ये, शिरोवेष्टने, कटिवस्त्रे, गारुड-पद्मराग-गोमेद-हीरकादिमणिषु च यन्त्रमेतत् संस्थाप्यते विविधानां कामनानां पूर्त्यै। रत्ने विशीर्णाङ्गेऽपि दोषो न भवति। सदोषाणि निर्दोषाणि च द्रव्यभेदतः कामनाभेदतश्च निर्मीयमाणानि नानाविधानि यन्त्राण्यत्र वर्ण्यन्ते। शिवताण्डवादितन्त्रेषु वर्णितान्यङ्कयन्त्राण्यप्यत्र संक्षेपेण दर्शितानि। तर्जन्यां रजतं धार्यमित्यादिना च मुद्रायन्त्रादिधारणविधिस्तत्स्थानानि च वर्णितानि। यन्त्रे बीजं शक्तिः कीलकं वा कामनाभेदेन संलिख्यन्ते, बीजादीनि चेमानि विद्याभेदेन भिद्यन्ते। मुद्राः पञ्चविधा अत्र वर्ण्यन्ते, तद्धारणविधिर्लेखनविधिश्च साधारः सफलः प्रदर्श्यते। यन्त्रं दग्धं स्फुटितं नष्टं चौरेण हृतं विदीर्णं घृष्टरेखं वा यदि भवेत् तर्हि किमत्र विधेयमिति नानामतप्रदर्शनपूर्वकं चर्च्यते। जपविधिर्यन्त्रसंस्कारविधिश्चात्र वर्ण्यते, येन हि यन्त्रं पुनरपि सर्वार्थसिद्धिकरं निष्पद्येत। अत्र सर्वेष्वपि प्रकरणेषु सामान्याः शाक्ताश्च उपाया वर्णिताः। शाक्ता उपायाः शीघ्रफलदा इति, अविकारेण च मनसा उपयोक्तव्या इति च स्मार्यते सर्वत्र।

तृतीये खण्डे यन्त्रध्यानप्रकरणे (२.९६–११३) सृष्टि-स्थिति-लयक्रमेण बीजसंलेखनेन प्रादुर्भूतायां तेजःपुञ्जनिभायां सर्वचैतन्यस्वरूपिण्यां रेखायां यन्त्रचैतन्यभावनाप्रकारो वर्ण्यते। अन्यत्र (४.५६-६४) यन्त्रप्रस्तार-यन्त्रपारायणादिनिदर्शनपूर्वकं रेखानिर्णयः क्रियते, फलश्रुतिश्च तस्य श्राव्यते। एकादशे पटले (१३८–१९५) पीठं पात्रम्, यन्त्रं च चैतन्यमुच्यते। पीठे यन्त्रस्य पूजनान्मूर्तिमयं भवति तत्। अतो यथा मूर्तिः पीठोपरि स्थाप्य पूज्यते, तद्वद् यन्त्रस्याप्यर्चनं विधेयम्। शुभयोगे शुभदिने महापर्वणि चन्द्रसूर्यग्रहे वा यन्त्रं स्थापनीयम्। अधिवासन-पवित्रारोपणादिकं च यथाशास्त्रं

विधेयम्, कर्मलोपे प्रायश्चित्तं च कर्तव्यम्। एवं हि क्रियमाणे यन्त्रचैतन्यमभिव्यज्यते। तेन च सर्वाः सिद्धयो हस्तगता भवन्ति। अत्र साम्राज्यमण्डल-महाविद्यामण्डल-महामण्डलाख्यानि यन्त्राणि विस्तरेण वर्ण्यन्ते, यत्र विविधानां देवदेवीनां क्षेत्रपाल-कश्मल-झोटिङ्ग-स्कन्द-विनायक-हनुमत्प्रभृतीनां शूलिनी-नवदुर्गा जयदुर्गा-डाकिनी-प्रभृतीनां च मण्डलानि सर्वार्थसाधकानि विवृतानि। चतुर्थखण्डे (८.१६९-२०७) काल्यास्ताराया नीलसरस्वत्याश्च यन्त्राणि वर्णितानि। कालीयन्त्रे महाकालमतेन, अतिकालमतेन च बीजानां निर्णयः कृतः। तारायन्त्रे च गन्धर्वेशमतमपि प्रदर्शितम्। छिन्ना-बगला-सुन्दरीयन्त्राणि च संक्षेपेणात्रैव प्रकाशितानि।

श्रीचक्रं श्रीयन्त्रं वा

श्रीचक्रं नाम भगवत्यास्त्रिपुरसुन्दर्या यन्त्रम्। यन्त्रोत्तमस्यास्य महिमा शास्त्रेषु राजतेतराम्। साम्प्रतं रेखागणितदृष्ट्या यन्त्राणामध्ययनं क्रियते। तद्दृष्ट्याऽपि वर्तते वैशिष्ट्यमस्य। यन्त्रस्यास्य लेखनपूजनविधिर्नित्याषोडशिकार्णवादितन्त्रेषु विस्तरेण प्रतिपाद्यते। अत्रापि तृतीये सुन्दरीखण्डे १-४, ११ पटलेषु चक्रस्वरूप-लेखन-पूजनादिको विषयो वर्णितः। नवचक्रात्मकं मण्डलमेतन्महासंवर्तकेश्वरनाम्ना श्रीमत्पञ्चकतन्त्रेषु विस्तरेण प्रकाशितम्। षट्शाम्भवाख्ययन्त्रनाम्नापि नवात्मकं चक्रमेतत् प्रथते। श्रीचक्रेऽस्मिन् सर्वेषां देवानां निवेशनमुदीर्यते, सर्वेषां पूजनमत्र क्रियते, विशेषतः संवर्तेशस्य। महापशुपतिः शिव एवात्र संवर्तेशः प्रोच्यते। महापाशुपतेषु नवतत्त्वेश्वरी श्रीविद्या संवर्तेशक्रमेण कालनाथक्रमेण च भिन्नाऽत्रैव पूज्यते। चतुर्णां शिवचक्राणां पञ्च शक्तिचक्राणां च सामरस्यात् श्रीचक्रमेतदुद्भवति। दक्षिणामूर्तिमतेन आनन्दभैरवमतेन शिवशक्तिचक्रलेखनक्रमे वैलक्षण्यं वर्तते। तच्च चतुर्थे खण्डेऽपि (८.१२३-१३१) वर्ण्यते। सम्प्रदायविद्भिरवधेयमेतत्। श्रीचक्रमन्तर्गृह-बहिर्गृहभेदेनापि विभज्यते। तदेतस्य श्रीचक्रस्य रुद्राक्षमण्डले पूजनात् साधको श्रीविद्यारूपो भवति, सर्वसिद्धीश्वरश्च जायते।

प्रस्ताराः।

न्यासमेरुप्रसङ्गेन मेरु-कैलास-भूप्रस्तारा अनुपदमेव वर्णिताः। श्रीचक्रमपि भू-कैलास-मेरुप्रस्तार-भेदात् त्रिधा भिद्यते। भूप्रस्तारः पातालोर्ध्वक्रमेण, कैलासप्रस्तारश्चार्धकैलास-पूर्णकैलासभेदेन द्विधा भिद्यते। मेरुप्रस्तारोऽपि द्विधा भिद्यते। संकलय्य षड् भवन्ति प्रस्ताराः। सृष्टि-स्थिति-संहारक्रमेण विभक्तेष्वेतेष्व-ष्टादश प्रस्तारा जायन्ते। सृष्टिस्थित्युपसंहारबीजलेखनक्रमेण च ३६ संख्याका[७०] भवन्ति प्रस्ताराः। मेरुसंज्ञकेन प्रस्तारेण नित्यायाः, कैलासाख्येन मातृकायाः, भूप्रस्तारेण च वाग्देवतायास्तादात्म्यं साध्यते। कादिषट्क-लोपादिषट्कभेदेन च भिन्नानां [७१]प्रस्ताराणामनन्तता जायते। एवमनन्तभेदभिन्नेऽस्मिन् श्रीचक्रे

---

७० अष्टादशसंख्यायां त्रिधा गुणितायां ५४ संख्या संजायते। अत्र तु ऋरवग्निमिता (३६) संख्या प्रदर्शिता, अङ्कानां वामतो गतिरिति चोक्तम् (III ४.९)। वचनबलादस्मादुपसंहारक्रमेण बीजलेखनं न विधेयमिति कृत्वा यन्त्रप्रस्ताराणामुक्तसंख्यासम्पत्तिः सूपपादा।

७१ प्रस्तार्यत इति प्रस्तार इति व्युत्पत्त्या विस्तारार्थकोऽयं शब्दः। दशविधानां भेदाः शृङ्खलिकायोगात् प्रस्ताराद् विनिर्गताः (II १.१६८), मन्त्रप्रस्तारप्रकरणम् (III ३.१८२-१९१), कादिषट्क-लोपादिषट्कप्रस्ताराः (III ४.१५-१८) इत्यादिषु सर्वेष्वपि स्थलेषु प्रस्तारशब्दो मन्त्रादीनां विस्तारमेव सूचयति।

श्रीविद्या उपास्यते। अन्यत्र (III ३. १९३-२०७) तु वृत्तत्रयनिर्णयं विधाय मेरु-कैलास-रत्नगर्भाख्याः प्रस्तारा वर्णितास्तेषां वैशिष्ट्यं च प्रदर्शितम्। चतुर्थे खण्डे (८.११-७-१२३) तु मेरु-कैलास-भू[७२]कञ्ज-कूर्म-रत्नगर्भ-भेदेन प्रस्तारपञ्चकं वर्ण्यते, रचनाप्रकारश्च प्रदर्श्यते। तत्र पातालरेखा गर्हिता। ऊर्ध्वरेखां समारभ्य मेर्वन्ताश्च प्रस्ताराः क्रमादुत्तमोत्तमा भवन्ति। हादिमतानुसारिण एते प्रस्ताराः।

अग्रे (८. १३६-१६८) कादिमतेन कहादिमतेन च प्रस्ताराश्चर्चिताः। तदनुसारं पूर्ण-मध्य-साध्य-कला-शक्ति-मातृका-योगिनी-शम्भु-परा(बिन्दु)भेदान्नव मेरुप्रस्तारा भवन्ति। पूर्ण-मध्य-कनिष्ठ-भेदेन कैलासप्रस्तारस्त्रिधा भिद्यते। ऊर्ध्वपातालभेदतो भूप्रस्तारो द्विधा भवति। मेरुः स्वर्गे, कैलासो मृत्युलोके, भूप्रस्तारश्च पाताले राजते। कञ्ज-कूर्म-रत्नगर्भाः प्रस्ताराः सर्वत्र पूजने शुभाः। ऊर्ध्वरेखामयः प्रस्तारो निन्दितः, पातालरेखा[७३] तु क्वचित् स्वीक्रियते। अत्र केसर-दल-बिन्दु-चक्रादीनां निर्णयं विधाय बीजहीनं यन्त्रं शववद् भवतीति पुनः प्रतिपादितम्। यन्त्रं मन्त्रं च समासाद्य कालिकाम्बिका पूज्यते। महाशङ्खे शालग्रामशिलायां बाणलिङ्गे कोणे वा आवाहन-प्राणस्थापन-विसर्जनादिकं न क्रियते। पीठपूजां विधाय ततो यन्त्रपूजा विधीयते। यन्त्रलेखनानन्तरमेव पीठपूजा समुचिता। पीठस्थापितं यन्त्रं मूर्ति-स्थानीयं भवति। एषा यन्त्रमूर्तिर्वरदा प्रोक्ता, क्षणमात्रेण सिद्ध्यत्येषा।

प्रस्तारविषयेऽत्र सदाशिव-आनन्दभैरव-दक्षिणामूर्ति-विरूपाक्ष-बटुक-खेचरीसिद्धि-चतुःकालमतानि प्रदर्शितानि। शिवेऽपि यन्त्रप्रस्तारबुद्धिर्देव्याः कृपयैव जायत इति वर्तते किमपि वैशिष्ट्यं प्रस्ताराणाम्।

अष्टार्गलचक्रम्

दिनहोराचक्रनाम्नाऽष्टार्गलचक्रमत्र (III ११.२२-४२) वर्णितम्। कालकौशल-विष्णुकौशल-युद्धकौशल-रुद्रकौशलचक्राणि दिनकौशलचक्रस्य अस्य षोडशीमपि कलां नार्हन्ति। निर्माणविधिमस्य चक्रस्य संवर्ण्य नित्याषोडशकम्, पञ्चाशद्वर्णाः, चतुष्षष्टियोगिन्यः, षट्पञ्चाशद्गणेशाः, केशवाद्या वैष्णवाद्याश्च देवताः, शशिभास्करौ, नक्षत्राणि च चराचरविभागेन राशीन् समाश्रित्यात्र वर्तन्ते, शिवाज्ञापालकाश्च सन्तः साधकाय यथेच्छं फलं यच्छन्तीत्युक्तम्।

पूर्वकौला भूर्जपत्रादिषु लिखिते श्रीचक्रे बिन्दौ च बाह्यसपर्यां सम्पादयन्तीति श्रीचक्रस्य सप्रस्तारस्य विस्तरेण वर्णनमक्रियत, तत्प्रसङ्गेन त्रिविधा मेरवो नानाविधानि यन्त्राणि च प्रदर्शितानि। उत्तरकौलास्तु शक्तिशरीरे सर्वमेतत् सम्पादयन्तीति साम्प्रतं शक्तिस्वरूपं विवेच्यते। सेयं सपर्या शक्तियोगपदाभिधेया शक्तिपूजन-कुमारीपूजन-लतासाधन-वेश्यासाधनरूपेण चक्रदशकरूपेण च विधीयत इति तदधुना विवेच्यते।

---

७२ भूकञ्जेति पदमेकं मत्वा प्रस्तारपञ्चकमेकत्र (IV ८.११७) पदद्वयं च मत्वा प्रस्तारषट्कमन्यत्र (IV ८.१४४-१४५) दृश्यते। अत्र प्रथमखण्डे (I ९.६२) यन्त्रमेरुः षड्विधो भवतीति वचनात्, भूप्रस्तारस्य सर्वत्र पृथक् प्रतिपादनाच्च यन्त्रप्रस्तारस्य षड्विधत्वमेवोचितम्।

७३ यथाऽत्रैवोच्यते—"पातालरेखा विश्वेशि स्थापने चररूपके॥ शुभदं कथितं देवि न मया पूजने मतम्।" (IV ८.१२१-१२२) इति।

शक्तियोगः

शक्तियोगोऽयमत्र राजयोगनाम्ना व्याख्यातः। "राजयोगं प्रवक्ष्यामि येन कालीसमो भवेत्" (२.४८) इत्येवं हि समारभ्यते प्रकरणमेतत् चतुर्थे खण्डे। ब्रह्मानन्दो महेशानि कलासप्तदशी तु सा। तन्मार्गशक्तियोगाच्च शक्तियोगः प्रकीर्तितः॥" (२.७६-७७) इति च शक्तियोगस्य प्रयोजनमुपदिश्यते। "स्त्रीनामा कालिकारूपा महाकालस्तु पुं भवेत्। शिवशक्त्यात्मकं ब्रह्म" (II ५९. २-३) इत्युक्त्वा स्त्रीपुरुषयोः संयोग एवात्र योगपदेनाभिधीयते। "स्त्रीमात्रे परमेशानि योगोऽयं विनिवेद्यताम्" (II १३.८०), "संयोगस्तु परं ब्रह्म संयोगस्तु परं तपः। संयोगानन्दरूपार्थं ब्रह्मापि यतते शिवे॥" (IV ३.१३३) इत्युक्त्वा तत्स्पष्टतरं भवति। "साधको देवदेवेशि निर्विकल्पो जितेन्द्रियः।... दृष्ट[७४]दोषेऽपि देवेशि मनःक्षोभं न कारयेत्।...एवं ज्ञात्वापि देवेशि विकाररहितो यदि। ईदृग्विधो निर्विकल्पः साधनार्हो न चान्यथा॥" (II १३. ८०-८४) इत्येवंलक्षणलक्षितो वीर एव योगमिममाचरितुं समर्थः, स एव चात्राधिकृतः—"सम्पर्केण विकारो हि न यथा जायते क्वचित्। साधकस्य तथा यस्य मतिः स्यादविकारिणी। सोऽधिकारी भवेन्नित्यं यागादौ सह योषिता॥" (II ३७.४१-४२)। अधिकारविहीनेन कृतायां शक्तिपूजायां समुद्भूयमाना दोषाश्च तत्रैव वर्ण्यन्ते।

अत्र आनन्द[७५]भुवन-कल्पलता-कामधेनु-कालमोहन-कालवीर-काली-गर्भान्त-गवाक्ष-चिन्तामणि-तारा-पर्जन्य-ब्रह्मराज-ब्रह्मवीर-वाञ्छाकल्पलता-स्पर्शमणिभेदेन बहुविधोऽयं योगो व्याख्यायते। शक्तियोगाच्छिवे ब्रह्मरूपताऽभिव्यज्यते। असिधाराव्रताख्योऽयं योगः। समरसानन्दो मुक्तिरत्राभिधीयते। कालिकागमे च सौख्यानन्दो मुक्तिरित्यभिहितम्। शाक्तदर्शने प्रवेश एव मोक्ष उच्यते। दुःखभागिनो मूढास्तु निर्गमं मोक्षमभिमन्यन्ते। शक्तियोगाभ्यासः सफलोऽत्र (II ६०.५४-८०) वर्ण्यते। "शक्तियोगः परं योगः शक्तियोगः परं तपः। शक्तियोगः परं धाम शक्तियोगः परा कला॥" (II ६१.१२) इत्यादिना च स्तूयते स योगः। अत्रैव बौद्धतन्त्रेषु प्रथितस्य वज्रशब्दस्यापि संक्षेपेण विवेचनं दृश्यते। गवाक्षयोगाभ्यासेन साधकोऽष्टावधानी, दशावधानी, शतावधानी, सहस्रावधानी च जायते।

शक्तिपूजनम्

"शक्तिं विना महेशानि पूजनं यः समाचरेत्॥ स दरिद्रो मम द्रोही तस्य नाशो भविष्यति। शक्तिशिवात्म्यमासाद्य पूजनं समुपाचरेत्॥ एवं यः कुरुते मर्त्यः स शिवो नात्र संशयः। शक्तेस्तु पूजनं कार्यं दिव्यभावफलाप्तये॥" (I ३. ५५-५७) इत्येवमत्र स्तूयते शक्तिपूजनम्। शक्तेरस्या लक्षणम् (II १५. ४-१२) इत्यत्र द्रष्टव्यम्। "सदा पञ्चमकारैश्च पूजयेत् कालिकाम्बिकाम्। शक्तिं विना नहि जपेन्न शक्तिः [७६]कारणं विना॥" (II ६.६) इति, "स चक्षुषा विना रूपं दर्पणे द्रष्टुमिच्छति। शक्तिं विहाय यः कश्चित् कालिकां द्रष्टुमिच्छति॥" (II ३७.७९) इति चात्रोपदिश्यते। नारीणां

---

७४ दृष्टदोषेऽपीत्यस्य स्वपत्न्या दोषे दृष्टेऽपीति प्रकरणानुगतोऽर्थः।

७५ सर्वेषामेतेषां योगानां लक्षणानि शब्दानुक्रमणीसोपानेन ग्रन्थमारुह्य ततो द्रष्टव्यानि।

७६ कारणशब्दोऽत्र मद्यपर्यायतया प्रयुक्तः। पैष्टीप्रभृतयस्तस्य प्रकारा द्वितीये खण्डे (३७.६३-६८) प्रकाश्यन्ते।

[७७]रूपस्य च प्रशंसा स्थाने स्थानेऽत्र दृश्यते। नारीशरीरे सर्वा देवता विद्याश्च निवसन्तीति जोघुष्यतेऽत्र (II १३. १३३-१३५; III १. २०१-२०४; IV ४ १४-२३)। अतः शक्तिस्वरूपाया नार्या पूजनेन सर्वा देवता विद्याश्च पूजिता भवन्ति। किञ्च—"पूजा जपो होमकर्म तर्पणं मार्जनं तथा। द्विजानां भोजनं चैव सर्वदा यत्र तिष्ठति ॥ शय्याभङ्गो भवेत् पूजा जपो जल्पः प्रकीर्तितः। प्रवेशनं होमकर्म तर्पणं......भवेत् ॥ तत्क्षालनं मार्जनं स्याद् दर्शनं द्विजभोजनम्। ईदृग्विधं महापीठं स्वयम्भूसंज्ञकं परम् ॥ यस्य दर्शनमात्रेण यावन्त्यः सन्ति सिद्धयः। स्वयमागत्य दासत्वं कुर्वन्त्येव न संशयः ॥" (II १३. ११९-१२२) इत्येवं सर्वसिद्धिप्रदत्वं शक्तिपूजाया वर्ण्यते। शक्तिपूजाप्रकारो द्वितीये खण्डे १३-१५ पटलेषु, चतुर्थे च खण्डे ३-४ पटलेषु विस्तरेण वर्णितः। "स्वयमक्षोभितो भूत्वा तस्याः क्षोभं समाचरेत्" (II १३.५३) इति हि शक्तिपूजायाः सिद्धान्तः। शक्तिरियं वयोभेदेन नवदुर्गा-बाला-श्यामा-तरुणी-महातारुण्यकौमुदीप्रभृतिनामभिर्भिद्यते (II ६२. ३-७)। [७८]रूपगन्धजातिभेदेन स्त्रिय एव दश महाविद्यारूपा भवन्ति (II ३०. १८-२६)। ता एव सिद्धेश्वरी-वागीश्वरी-विशालाक्षी-कामाख्यादि-रूपेण प्रथन्ते (II १५. ४४-५२), बालैव च तारारूपा (IV ३.८२) भवति, दिवा रात्रिक्रमेण च तासु विविधानां देवीनां स्वरूपमाविर्भवति (IV ४. १४-२३)। शक्तिपूजायामस्यां बटुकस्य मतेन परद्रोहादयः पञ्च दोषा वर्ज्याः सन्ति। शङ्करस्य मतेन च परान्नं परहस्तं च सर्वथा परिहर्तव्यम् (II १४.७०-७२) इत्युच्यते।

कुमारीपूजनम्

शक्त्यभावे कुमारीपूजनमुपदिश्यते (II ५९. ३०-४०)। अत्र हि कुमारी कुमारीपूजकश्च प्रशस्यते। अक्षरन्ती कुमारी स्यादिति च तस्या लक्षणं क्रियते। कुमारीपूजनमेतच्चतुर्थे खण्डे २-४ पटलेषु क्वचिद् दृश्यते।

लतासाधनम्

मेधादीक्षां विना लतासाधनं न क्रियते। लता चेयं कादिहादिकला भवति। अस्याः स्वरूपं साधनविधिश्च ताराखण्डे ३४-३५ पटलयोर्दृश्यते। निशापूजादिकं च ३६-३७ पटलयोर्वर्ण्यते। लतायाः साधकस्य च योगे सर्वसाम्राज्यमेधाख्या दीक्षा निष्पद्यते। वेधसिद्धिपर्यन्तं साधकेन केशसंवर्धनं तैललेप-नादिकं च क्रियते। श्मश्रून् स न निकृन्तति। वेधश्चायं वाग्वेध-श्रुतिवेध-दृष्टिवेध-स्पर्शवेध-क्रियावेधभेदेन पञ्चधा भवति। अधिकारेण मनसा लतासाधनं क्रियते चेत् सर्वाः सिद्धयः साधकस्य पुरस्तात् समुपतिष्ठन्ते, षष्टिसिद्धीश्वरः स भवति। विकारे जायमाने तु साधको ध्रुवं नश्यति। महाचीनद्रुमलतायाः साधनं माहात्म्यं लक्षणादिकं फलं च (II १६.७१-११४) इत्यत्र, महासिद्धिद्रुमलता-महादिव्यद्रुमलतयोश्च साधनं फलं च (IV ४.६९-७३) इत्यत्र द्रष्टव्यम्।

---

७७ "नारी त्रैलोक्यजननी" इत्यादिना नारीणाम्, "रूपं रूपमहो रूपम्" इत्यादिना च रूपस्य प्रशंसा तत्र तत्र दृश्यते।

७८ रूप-गन्ध-जातिभेदेन कामशास्त्रग्रन्थेषु कामिनीनां भेदोपभेदाः प्रदर्श्यन्ते। अत्रापि रूप-गन्ध-जातिभेदेन शक्तिपूजायामुपात्तासु शक्तिषु तारात्वारोपः क्रियते।

वेश्यासाधनम् ।

राजवेश्या, नृत्यवेश्या, तीर्थवेश्या, गुप्तवेश्या, देववेश्या, ब्रह्मवेश्या, ग्रामवेश्या चेति सप्तविधा वेश्याऽत्र प्रतिपादिता । " वेश्यामध्ये सदा स्थेयं राजलक्ष्मीस्तु सा परा " (IV २.६२-६६) इत्यादिना, " वेश्यादर्शनमात्रेण देवतादर्शनं मतम् " (IV ३. १५०-१६२) इत्यादिना च स्तूयते सा । वेश्यापीठं दिव्यपीठत्वेन वर्ण्यतेऽन्यत्र (IV २.७८-८०) । वेश्यागृहं प्रयागकमृतुयोगे च दिव्यप्रयागकमभिमन्यते । " पञ्चलिङ्गहता वेश्या " (IV ४.१२) इति च तस्या लक्षणं क्रियते ।

चक्रदशकम्

" नव चक्राणि...केरलाख्यं च दशमम् " (I ५. १०२) इत्येवं दश चक्राणि प्रतिपाद्यन्ते । अनेकेषां नाम्नां सत्त्वेऽपि दश संख्या कथमत्र पूर्यत इति न स्पष्टीभवति । बहुषु स्थलेषु नाम्नामेतेषां विद्यमानत्वेऽपि न सर्वाण्येकत्र कुत्राप्युद्दिष्टानीति संगृह्य सर्वाण्यत्र प्रदर्श्यन्ते । तदनुसारं चक्रपूजायामुपयुज्यमानानि दश चक्राणीमानि सन्ति—१. अकुलाष्टकचक्रम् , २. अष्टकन्याचक्रम् , ३. ऊर्मिलाचक्रम् , ४. कुलाष्टकचक्रम् , ५. चूला(डा)चक्रम् , ६. दशविद्याचक्रम् , ७. पञ्चचक्रम् , ८. पञ्चाशत्पीठचक्रम् , ९. षट्त्रिंशज्जातिचक्रम् , १०. केरलचक्रं चेति । अनेन चक्रदशकोपासनेन विविधाः सिद्धयः समुपलभ्यन्ते (I ६. १–८) । एतेषु ऊर्मिलाचक्र-चूलाचक्रे, श्रीक्रम-केरलक्रमे च प्रथमे खण्डे (५. १०८–११३) व्याख्यायन्ते । उपर्युक्तेषु दशचक्रेषु श्रीक्रमो नैव वर्णितः । तद्विषये चानुपदमेव वक्ष्यते । " कुलचक्रं भवेत् काल्यामकुलं कालिकामनौ । कुलाकुलं च तारायाम् " (I ६.२०) इत्यत्र त्रिविधं चक्रं वर्णितम् । एष्वपि कुलाकुलचक्रस्योपर्युक्तेषु दशचक्रेषु परिगणनं नास्ति, कुलाष्टकचक्रस्य कुलाकुलाष्टकचक्रस्य च नाम्नां द्वितीये खण्डे (१४.३-१०) परिगणनादस्यापि चक्रस्य स्वतन्त्रमस्तित्वं सिद्ध्यति । ' कालिकामनौ ' इत्यस्य स्थाने ' सुन्दरीमनौ ' इत्युचितः पाठः प्रतिभाति, " सुन्दरी भैरवी धूम्रा त्वकुलत्वेन कीर्तिता " (I ३.४२) इत्यत्र सुन्दर्या अकुलचक्रपूज्यत्वाभिधानात् । चतुर्थे खण्डे चतुर्थपटलेऽकुलाष्टक-अष्ट-कन्या(वसुकन्या)-कुलाष्टक-दशविद्या-पञ्चाशत्पीठ-षट्त्रिंशज्जातिचक्राणि संक्षेपेण विवृतानि । प्रथमखण्डे व्याख्याते ऊर्मिलाचक्र-चूलाचक्रे अत्र न दृश्येते, पञ्चचक्रक्रमश्चाधिको व्याख्यायते । एवमेवात्रत्यद्वितीयपटले मातृकाष्टकचक्रं दृश्यते । जात्यष्टकभवा योषितश्च द्वितीयखण्डे (३५.३६) स्मर्यन्ते । अत्र सर्वत्र चक्रशब्दो योषितां समूहस्य वाचकः । सर्वप्रथममत्र पञ्चचक्रक्रमो वर्ण्यते ।

पञ्चचक्रक्रमः ।

पञ्चचक्रक्रमो यद्यपि नात्र स्पष्टं व्याख्यातस्तथापि [७९]पञ्चवीरप्रसङ्गेनात्र (III १. १९९-२००) जीवचक्र-पुष्पचक्र-श्रीचक्र-ऊर्मिलाचक्र-चूलाचक्राख्यानि पञ्चचक्राणि प्रदर्शितानि । तान्येवास्य क्रमस्य पञ्च चक्राणि मन्तव्यानि । एतेषु ऊर्मिलाचक्र-चूलाचक्र-श्रीच[८०]क्राणि प्रथमखण्डे व्याख्यातानि । चतुर्थे खण्डे

---

७९ वीर-आनन्दवीर-कालवीर-महावीर-रुद्रवीराख्याः पञ्च वीरा अत्र विभिन्नेषु प्रकरणेषु प्रतिपाद्यन्ते, किन्तु पञ्चचक्रक्रमेण तेषां स्पष्टः संबन्धः कुत्रापि न विद्यते ।

८० श्रीचक्रमत्र श्रीक्रमनाम्ना व्याख्यातम् (I ५.११२) ।

(११.१४-१५) च चक्राणामेतेषां नूतनं व्याख्यानं दृश्यते । 'रतिश्रीचक्रसंमते' इत्यस्य स्थाने 'रतौ श्रीचक्रसंमते' इति पाठः शोभनः प्रतिभाति । प्रथमखण्डे (३.११७-१४२) त्रिविधान्यष्टाष्टकचक्राणि शिव-विष्णु-जीवाख्यानि व्याख्यातानि । तत्र जीवाख्यं चक्रमेव कामचक्रं जीवमेरुरिति च प्रोच्यते । आनन्द-भैरवाख्यमिदमष्टाष्टकम् । द्वितीये खण्डे (१३.१९८-२१५) च जीवचक्रस्य चर्चा विद्यते । जीवचक्र-वज्जीवासनेऽपि सिद्धिर्लभ्यते (II ४९.६९) । पुष्पचक्रं च चतुर्थे खण्डे वर्णितम् । पुष्पनिर्णय-प्रकरणेऽस्य विस्तारोऽवसेयः । चक्राणामेतेषां समाहारेण पञ्चचक्रक्रमोऽयं निष्पद्यते । कालिकासमाराधने गुरोराज्ञां लब्ध्वा क्रमोऽयं स्वीकर्तुं शक्यते । पञ्चचक्रमतेऽर्घ्यपात्रादिष्वपि वैशिष्ट्यं वर्तते ।

दशविद्यादीनि चक्राणि ।

रूपगन्धजातिभेदेन योषित एव दशमहाविद्यानाम्न्यो भवन्तीति विषयोऽयं द्वितीये खण्डे (३०.७-२६) वर्ण्यते । एताभिरेव योषिद्भिर्दशविद्याचक्रं निष्पद्यते । द्वितीये खण्डे "ब्राह्मणी तु गया प्रोक्ता" (१३.५-२४) इत्यादिना पञ्चाशत् कौलतीर्थानि वर्ण्यन्ते । कौलतीर्थरूपा एता योषितः पञ्चाशत्पीठचक्रं सम्पादयन्ति । प्रतिदेशं [८१]षट्त्रिंशद् वृत्तयो भवन्ति । वृत्तिशब्दोऽत्र जातिपर्यायोऽवसेयः । षट्त्रिंशज्जातिभवाभिर्योषिद्भिः षट्त्रिंशज्जातिचक्रं निष्पन्नं भवति । एवं चक्रदशकरूपासु शक्तिपदाभिधेयासु योषित्सु शक्तियोगोऽयं सम्पाद्यते ।

सामान्यपूजापेक्षया शाक्तपूजायामस्यां भिन्नानि भवन्त्युपादानानीति पीठानामासनानां चोभयविधं स्वरूपं विवेच्यतेऽधुना ।

पीठानि

"पीठं तु पञ्चधा प्रोक्तं पञ्चायतनमार्गतः । सप्तसोपानसंयुक्तं मेरुकैलासमार्गतः ॥ सिंहाक्रान्तं च देव्यां वै शैवे वृषभरूपकम् । वैष्णवे गरुडाक्रान्तं गजाक्रान्तं च गाणपे । हंसाक्रान्तं सौरमन्त्रे काल्यां प्रेतसमन्वितम् । नवसोपानसंयुक्तं सुन्दर्याः पीठमीरितम् । सोपानेन समायुक्तमङ्गुलोत्सेधमेव च ।" (I ३.१७-२०) इत्येवं पञ्चायतनपीठान्यत्र वर्ण्यन्ते । पीठशब्दोऽत्र सिंहासनपरः । देवतानां नृपतीनां गुरूणां च आसनं सिंहासनमितीर्यते । अत्र तु—"साधना शवमुण्डस्य सिंहासनमितीरितम्" (II ११.४६), "गले पादस्य निक्षेपः सिंहासनमितीरितम्" (II १४. १६) इत्येवं सिंहासनं लक्ष्यते ।

वस्तुतस्तु तान्त्रिकवाङ्मये पीठशब्देन ओड्याण-कामरूप-जालन्धर-पूर्णगिरिप्रभृतीनि पीठानि परिचीयन्ते । अत्र—"ओड्याणं चतुरस्रं च कामरूपं च वर्तुलम् । जालन्धरं त्वर्धचन्द्रं त्र्यस्रः पूर्णगिरिर्भवेत् ॥" (I ४.१०३) इत्येवं तेषां स्वरूपमुपवर्ण्यते । कौलतीर्थप्रसङ्गेन द्वितीयखण्डे त्रयोदशपटले पञ्चाशत्पीठानि, अन्यानि च कानिचन पीठानि वर्णितानि । अन्तर्धानकर्याः कालीविद्यायाः[८२] प्रसङ्गे

---

८१ "प्रतिदेशं महेशानि षट्त्रिंशद्वृत्तयः स्मृताः ॥ षट्त्रिंशद्गुणनं कृत्वा अष्टादशशतीभवेत् । कादिहादिक्रमेणैव शक्तिबाहुल्यमीरितम् ॥" (IV २.४८-४९) ।

८२ द्वादशकालीपूजाप्रतिपादकेऽभिनवगुप्त-जयरथ-महेश्वरानन्दादिभिर्विवृते क्रमदर्शने खेचरी-दिक्चरी-गोचरी-भूचर्यः शक्तयः प्रतिपादिताः । प्रदीप्तमङ्गलायाः (III १९.२४७) स्थाने मङ्गलादेवी मङ्गलादीप्तिश्च तत्र वर्ण्यते ।

उड्यानं करवीरं चेति पीठद्वयं स्मार्यते। तथापि न वर्तते तादृशं महत्त्वमेतेषां यादृशं हि प्राचीनेषु तन्त्रेषु राजतेतराम्। अत्र हि "पीठेऽनुक्ते शक्तिपीठम्" (III ३.१२०) इति मान्यते। चतुर्थे खण्डे विद्यापीठनिर्णयेऽपि "यत्र नोक्तं भवेत् पीठं शक्तिपीठं च तत्र वै" (२.३-१५) इति दृश्यते। अत्र नानासम्प्रदायदृष्ट्या पीठविचारः समाचरितः, किन्तु पीठनामसु केवलं हिङ्गुलाख्यं पीठमेव दृश्यते। अन्यानि सर्वाणि पीठानि तेषां तेषां सम्प्रदायदेवतानां देवीनां च सिंहासनैरेव संबद्धानि। पीठरहस्येऽपि (IV १०.९६-१०४, ११०-१३४) सोपान[८३]-सिंहासन-विष्टरात्मक एव पीठविचारः कृतो न तीर्थात्मकः। स्नानपीठभोगपीठभेदेन हार्दबाह्यप्रभेदेन चात्रैव क्रियमाणे विवेचनेऽस्ति किमपि वैशिष्ट्यम्, किन्तु नास्त्यत्रापि तीर्थस्वरूपाणां पीठानां परिचयः। कामरूपादिषु हि पीठेषु तीर्थयात्रा समाचर्यते भक्तजनैः। अत्र वर्णितानि कौलतीर्थानि तु शक्तिस्वरूपाण्येव।

कौलतीर्थानि

कौलावधूतमार्गेषु तीर्थयात्रा निषिद्धा। तीर्थाटनं संन्यासो व्रतधारणमुपवासो मुण्डनमित्यादीनि सर्वथा तत्र परिवर्ज्यन्ते। शिरसि पूर्णाभिषेकः क्रियत इति तत्र मुण्डनं निषिध्यते। कौलतीर्थानि तानि भिन्नान्येव। यत्र कौलो निवसति, तत्रैव सर्वाणि पीठानि राजन्ते। तथाहि—"ब्राह्मणी तु गया प्रोक्ता" (II १३. ५-२४) इत्यादिना पञ्चाशत्पीठान्यत्र वर्ण्यन्ते। योगिनो यथा स्वशरीर एव ब्रह्माण्डभावनां (पिण्डाण्डभावनां) कुर्वन्ति, तथैव कौलावधूताः शक्तिशरीरे एव तीर्थादिभावनां कुर्वन्ति। पीठेऽनुक्ते शक्तिपीठमित्यादिना तदेव स्मर्यते। चतुष्पीठ-पञ्चपीठादिभेदेन विचारोऽयं प्रायः सम्पूर्णेऽस्मिन् पटले वर्ण्यते, सन्ति च परःशतानि तीर्थनामानि तेषां व्याख्यानानि च। कौलावधूतास्तीर्थयात्रामिमां विचित्रामाचरन्तः साम्प्रतं प्रायः सर्वेष्वेव तान्त्रिकसम्प्रदायेषु बौद्धादिष्वपि स्वीकृतानि कामरूप-पूर्णगिरि-जालन्धर-ओड्यानाख्यानि प्रसिद्धतमान्यपि पीठानि विस्मृतवन्त इत्यहो दैवदुर्विलसितम्। एतेषु कामरूपाख्यं पीठमेव साम्प्रतं सर्वेषां परिचितम्। अन्यानि पीठानि कुत्र स्थितानीति न तेषां स्थानं निश्चेतुं पार्यते। भगमालिन्याः पूर्णगिरिपीठम्, त्रिपुरसुन्दर्याश्च ओड्याणपीठं कुत्र वर्तते? वज्रेश्वर्या जालन्धरं पीठं कांगडा-उपत्यकायां नगरकोटाख्ये स्थाने वर्तत इत्यस्माभिर्निश्चीयते। वर्तते हि तत्र देव्या वज्रेश्वर्या मन्दिरं शिलालेखश्च।

आसनानि।

द्वाविंशत्यासनानि भवन्ति (II ४.२७)। तानि च मृदु-समारूढ-कोमल-अचूलक-योनित्वक्-विष्टर-अस्थिभूमि-कुशसुरत-मुण्ड-पञ्चमुण्ड-त्रिमुण्ड-एकमुण्ड-चिता-श्मशान-चूलक-शव-मृत - महाशव-वीर - महावीर-योनिपुष्पाख्यानि सन्ति (II ९. २-६)। अत्रैव नवमदशमपटलयोर्मुण्डरहस्यमतेन कालिकापरिशिष्टमतेन च मुण्डासनं व्याख्याय मुण्डकोपासनं विस्तरेण वर्ण्यते। वीरासनमप्यत्र व्याख्यातम्। विंशे पटले २३-३० श्लोकेषु बहूनां वीरासनानां नामानि परिगणितानि, शवसाधननाम्ना परिचितं वीरसाधनं च वर्णितम्। मृदुचूलकाद्यासनेषु कालिका तिष्ठति, अतः साध्य-सुसिद्धादिभेदभिन्नानां मुण्डानां साधनं तत्रैव विधेयम्

---

[८३] देवताषोडशक-धर्माष्टक-प्रेताष्टकसमाक्रान्तं सोपानं स्तम्भचतुष्कसमुज्ज्वलं वर्ण्यतेऽत्र (II ६०.२८-५४; ६१.९९-१०९)। एतच्च उपरि वर्णितान्नवसोपानसंयुक्तात् सुन्दर्याः सिंहासनादभिन्नमेव।

(II ३७.८४-९३)। मुण्डासनस्य, अचूलकप्रकारेण, वीरासनक्रमेण, मृतासनक्रमेण च वीरसाधनस्य वर्णनमेकोनचत्वारिंशे पटलेऽपि १-१९ श्लोकेषु वर्ण्यते । अग्रे चतुर्षु पटलेषु (४७-५०) देहासन-परिभाषासनभेदेन द्विविधानि वरासनानि, शिवासनम् , देवतासननिर्णये पञ्चप्रेतासनानि, दशविद्यासनानि, कुब्जिकाप्रभृतीनां च नानादेवीनामासनानि वर्णितानि । परिभाषासनेषु पञ्चविधाश्व-कुञ्जरादीन्यासनानि परिगणितानि, यानि हि चलासननाम्नाऽपि परिचीयन्ते। पुनः ६०, ६७-६९, ७१ पटलेषु केषाञ्चनासनानां लक्षणप्रदर्शनपुरस्सरं फलश्रुतिर्विहिता, मृदु-अचूलक-कोमल-मुण्ड-मृत-वीर-महावीरासनानां संस्कारविधिश्च वर्णितः । अन्ते देहासनानि परिभाषासनानि च चतुरशीतिसंख्याकानि भवन्तीत्युक्तम् । फलश्रुतिसहितं सुरतासनं चतुर्थे खण्डे (३.२०३-२०५) वर्ण्यते ।

" पञ्चाशत्कुशतो ब्रह्मा तदूर्ध्वं विष्टरः स्मृतः । कुशपत्रशतेनैव विष्टरं कारयेद् बुधः ॥ " (II २०.५७) इति विष्टरासनस्य लक्षणमत्र विधीयते । विष्टरासनस्य विस्तृतं वर्णनं चतुर्थे खण्डे (१०.११६-१३४) विद्यते । कुशत्रोटने गायत्रीमन्त्रः समुच्चार्यते । गायत्रीमन्त्रश्च कीदृश इति शम्भुमतेन तारिणीमतेन चात्र निर्दिष्टम्। आसनविषये—" यथोक्तासनमासाद्य दिग्बन्धादिप्रपूर्वकम् । आविसर्जनपर्यन्तमासनव्यत्ययो नहि ॥ " (IV १०.१०४-१०५) इति नियमः श्राव्यतेऽत्र ।

" अर्घपात्रं यागधाम दीप इत्युच्यते त्रयम् । रहस्यं कौलिके यागे तत्रार्घः शक्तिसंगमात् ॥ " (२९.१४-१५) इति तन्त्रालोकदिशा शाक्तयागेऽस्मिन् वर्ततेऽर्घ्यस्य पात्राणां च महिमेत्यधुना तद्विवेच्यते ।

अर्घ्यः पात्रं तर्पणं पानं च

सामान्यार्घ्यविशेषार्घ्यरूपेण द्विविधावर्घ्यौ भवतः । सामान्यार्घ्योऽपि सकल-निष्कलभेदेन द्विधा भिद्यते (I ४.७२-७३) । सामान्यार्घ्ये चत्वारि पात्राणि भवन्ति, घटश्च आवश्यकः । बिन्दुना वर्जितं यन्त्रं यथा निषिद्धं तथैव घटं विना पूजा निषिद्धा । अर्घ्यः, मधुपर्कः, प्रोक्षणम् , पाद्यम् , पञ्चामृतम् , आचमनम् , स्नानं च सामान्यार्घ्येण सम्पाद्यन्ते । केरले शिवपूजा सामान्यार्घ्येण संपाद्यते, गौडे भैरवाणां पूजा सामान्यार्घ्येण क्रियते । अत्र सदाशिवमतेन केरलक्रमेण विरूपाक्ष-वीरभद्र-बटुक-आनन्द-कराल-विकराल-महादेव-दक्षिण-बटवासि-गौडमतानुसारं च सामान्यार्घ्यविशेषार्घ्ययोर्यथायथं व्यवस्था कृता (II १८.३६-५१) ।

रसवेदमितैः (६४) पात्रैः सर्वोत्तमा, कलासंख्यामितैः(१६)र्मध्यमा, नाथसंख्यामितैः(९) कनिष्ठा, बाणसंख्यामितैश्च (५) सामान्या पात्रसंख्याऽत्र वर्ण्यते । केरल-काश्मीर-गौडमतेषु पात्रसंख्याभेदोऽयं दृश्यते । केरलाख्यमते वारिपात्रं दक्षिणे स्थाप्यते । काश्मीरे तर्पणे भेदो भवति । गौडे वामकरेण तर्पणं संपाद्यते । पात्रविचारोऽयं प्रथमखण्डे चतुर्थपटले सम्पूर्णे विद्यते । शङ्खशुक्तिकपर्दिकाभेदेन महाकपालं त्रिविधं भवति । केरल-काश्मीर-गौडमतेन विज्ञानकेरलमतेन च सामान्यार्घ्यविशेषार्घ्यपात्राणि विविधान्यत्र वर्णितानि । अथवा एकेनापि धातुना सुवर्णरजतादिना सर्वाणि पात्राणि कल्पनीयानि । कांस्य-लोह-रौप्य-सौवर्ण- स्फाटिक-पारद-मारकत-वैडूर्य-नवरत्न-नारिकेल-महाशङ्खमयानि पात्राण्युत्तरोत्तरं श्रेष्ठानि मन्यन्ते ।

वृक्षोत्थान्यपि पात्राणि भवन्ति। पात्राण्यश्वत्थपत्राकाराणि कुतपाकाराणि[८४] वा निष्पाद्यानि। वैष्णवे वर्तुलं पात्रं भवति। कपालपात्राभावे विश्वामित्रकपालकं पात्रं गृह्यते। बगलायां काचजं पात्रमङ्गीक्रियते। कापालिके मते तुम्बीकपालम्, नीलचीनक्रमे च कपालपात्रं कपर्दिकं वा पात्रं भवति, यत्र हि कपर्दीशस्तिष्ठति। [८५]पञ्चविद्याविधावपि तदेव पात्रं स्वीक्रियते। ब्राह्मणस्य विश्वामित्र[८६]कपालं पात्रत्वेन विहितम्। ताम्रादिभवेषु पात्रेषु स्थापितेऽर्घ्ये देवता यथोत्तरं वर्धमानकालावधिं यावत् तिष्ठन्ति। विश्वामित्रकपाले कपाले वा सर्वा देवता वरदा भवन्ति। अतो विश्वामित्रकपालेन कपर्दिकया वा सर्वाणि पात्राणि निर्मेयानि। स्फाटिकं पात्रं सकल-निष्कलभेदेन द्विविधं भवति। सूर्याद् वह्निकरः स्फटिकः सकलः, चन्द्रदर्शनमात्रेणाश्विन्यां पूर्णमास्यां जलस्रावी च स्फटिको निष्कलोऽभिधीयते। तेनामृतजलेन कालीं तारां च तर्पयेत्। केरलाख्ये सम्प्रदाये नारिकेलार्घ्येण, काश्मीरे स्फाटिकार्घ्येण, गौडे च कपालार्घ्येण सपर्या सम्पाद्यते। सकल-निष्कलस्फाटिकालाभे त्रिकोणयोनिरूपः स्फाटिकः शुभदो भवति। कपालपात्रालाभे स्फाटिकं पात्रं ग्राह्यम्।

अत्र केरले ६४ पात्राणि, काश्मीरे १६ पात्राणि च परिगणय्य, पश्चिमकेरले, कौलिके, चिदानन्दसम्प्रदाये, आनन्दसम्प्रदाये, भोग[८७]चा(वा)रे, सिद्धचैतन्यमार्गे, पञ्चचक्रमते, आनन्दवीरदेवमते, पञ्चमानन्दनाथमते, विश्वरू[८८]पमते, योगरूपमते च पात्रसंख्या प्रदर्शिता। ततः परं कुलनाथभैरव-निवापशम्भुनाथ-काश्मीरमतानुसारं पात्राणां स्थापनक्रमः प्रदर्शितः। एवमेव पात्रस्थापनमन्त्रान् प्रदर्श्य कस्मिन् पात्रे केनार्घ्येण गुरुप्रभृतीन् यजेतेति, कियदन्तरं कुत्र च पात्राणि स्थाप्यानीति सर्वं विभज्य निर्दिष्टम्। आवरणपूजासमये यथायथं मु[८९]द्राप्रदर्शनमावश्यकम्। अत्रैव गौडे, यजुर्गौडे, वामगौडे, क्रूरगौडे, शाक्ते, वीरशाक्ते, शैवे, शक्तियुक्तवैष्णवेऽयुक्ते च, सौरे, जैने, बौद्धे, भैरवे, गणेशे, स्वायम्भुवे, कौले, काश्मीरे, केरले च सम्प्रदाये पात्रस्थापनप्रकारो निर्दिष्टः। "पूजयामि तर्पयामि नमः" इत्येतेषां पदानां केरल-काश्मीर-सम्राट्केरल-आदिकेरल-पूर्णानन्द-चिदानन्द-बोधानन्द-विलास-विश्वरूपसम्प्रदायेषु कथं नाम व्यत्यये-

---

८४ "त्रिकोणरूपं यत् पात्रं कुतपः परिकीर्तितः" (I ४.३५) इति कुतपाकारस्य पात्रस्य स्वरूपमत्र वर्णितम्।

८५ पञ्चविद्याविधावत्र काली, तारा, छिन्नमस्ता, सुन्दरी, बगलामुखी चेति पञ्च देव्योऽङ्गीकृताः (II ४२.१७)।

८६ विश्वामित्रकपालपदेन नारिकेलमत्र गृह्यते।

८७ भोगवारः सम्प्रदायः शाङ्करदशनामिसम्प्रदायप्रकरणे व्याख्यातः। भोगवार इति तत्र नाम दृश्यते, न तु भोगचार इति। तत्रैव भूवार-कीटवार-आनन्दवार शब्दा अपि व्याख्याताः।

८८ शाङ्करदशनामिसम्प्रदायप्रकरण एव शङ्कराचार्यशिष्येषु वर्तते विश्वरूपस्यापि नाम। शक्तिसंगमतन्त्रेण संबद्धो विश्वरूपक्रमोऽत्र स्मर्यते (I २.१०३) अर्घ्यप्रकरणे पात्राणाम् (I ४.१०१), तर्पणस्य (I ४.१८४) च प्रसङ्गेन विश्वरूपमतमत्र प्रदर्श्यते। केरलसम्प्रदायेन संबद्धत्वान्मतमेतत् शङ्कराचार्यशिष्यस्य विश्वरूपस्यैव प्रतीयते।

८९ शक्तिसंगमतन्त्रे चतुर्विधा मुद्रा वर्ण्यन्ते। तत्र पात्रप्रकरणे आवरणपूजायां च प्रयुज्यमाना मुद्रा एकविधाः। एतासु संघट्टना-खेचरी-आयुध-योनिमुद्राणां केवलं नामान्यत्र दृश्यन्ते। चतुर्विधा संघट्टनाख्या मुद्रा अत्र (III १.५५-६२) व्याख्याता। एषा च चतुश्चरणविद्यायां षट्शाम्भवविधौ चोपयुज्यते। अन्यत्र (I ८.१६-२५,३६) द्वितीयप्रकारका भावन-रेखन-विन्यसन-तापनाख्याश्चतुर्विधा मुद्रा वर्णभेदेन प्रतिपाद्यन्ते, अधमानुग्रहार्थं चैताः सन्तीत्युपदिश्यते। द्विप्रकारकाभ्यामेताभ्यां भिन्नाः पञ्च मुद्रा द्वितीये खण्डे मकारपञ्चकप्रकरणे (३२.१५,३८) प्रदर्श्यन्ते। इतोऽपि भिन्नाः पञ्चविधा मुद्रा समन्त्रप्रयोगा धारणाविधिफलश्रुतिसमन्विता वर्ण्यन्ते द्वितीये खण्डे (६३.२१-४५) एव। अत्राङ्गुलीयकमेव मुद्रापदेनाभिहितम्। एताश्च अङ्क-बीज-बीजक-यन्त्र-नामरूपाख्याः सन्ति।

नोच्चारणं क्रियत इति प्रदर्शितम् । सर्वान्ते च चीनमार्गे तारिण्यां मञ्जुघोषे च "वज्रपुष्पं प्रतीच्छ स्वाहा" इत्यनेन पूजनं विधीयत इत्युक्तम् ।

अपि च महावीरस्य कपालानि पात्राणि भवन्ति । कपालपात्रे कापाली सिद्धिरन्याश्च बहुविधाः सिद्धय उपलभ्यन्ते । कापालिकानां चीनानां च कपालपात्रमीर्यते । तत्र च महाचीनेश्वरी पूज्यते । नारिकेलं तुम्बी कपालं चेति त्रिविधं कपालं भवति । सूर्यार्घ्यविशेषार्घ्यादिषु निर्दिष्टपरिमाणानि विशेषाकाराणि च पात्राणि समुपयुज्यन्ते । सम्प्रदायानुसारं पात्राणां स्थापनं क्रियते । पात्राणां स्थापने व्युत्क्रमे सति प्रायश्चित्तादिकं कर्तव्यम् । गौड-चैतन्य-महाभैरवसंमतस्य पात्राणामासादनविसर्जनक्रमस्य वर्णनमप्यत्रैव (II १८.१०४-११३) विद्यते । पात्रशोधनप्रकारश्च समन्त्रकोऽत्र (II ६८.२५-४२) वर्ण्यते ।

प्रथमखण्डे चतुर्थपटलान्ते तर्पणक्रमभेदेन केचन सम्प्रदाया निर्दिष्टाः । द्वितीयखण्डेऽपि (३३.१७ -२९) तर्पणक्रम-भेदेन कौल-वाम-महाकौल-वीरकौल-वामगौड-चैतन्य-आनन्द-सम्प्रदायाः सिद्धचैतन्यादयः षोडशभेदाश्च वर्ण्यन्ते । चतुर्थखण्डेऽपि १०.७२-७४) ऋषितर्पण-पितृतर्पण-क्रमदेवतातर्पणानि निर्दिष्टानि ।

"वीरपात्रे च वीराणाम्" (II १८. ११९-१२०) इत्यादिना वीरादिपात्रेषु स्थापितमर्घ्यं केन ग्राह्यमिति निर्णीयते । पूजान्ते साधकः सामान्यविशेषार्घ्यावेकीकृत्य स्वयं पिबति, घटद्रव्यं च वीरेभ्यः प्रयच्छति । वीराणामभावे स्वयं पिबति याचकसंज्ञके पात्रे च स्थापयति । विशेषार्घ्यजलं देवीपीठे चक्ररूपं भ्रामयित्वा स्वयं मुखे क्षिपति । सामान्यार्घ्यजलेन च देव्यै जलं निवेदयति । गृह्णामि प्रगृह्णीया इत्युक्त्वा विलासे सम्प्रदाये पानकर्म विधीयते । जुहोमि जुषस्वेति केरले, होष्यामि प्रजुषस्वेति काश्मीरे पानं क्रियते । एते च क्रमेण पूजानन्दी, नन्दनाथी, महानन्दश्चेति कथ्यन्ते । वामी वामहस्तात् पानपूजे समाचरति । कौलस्तु दक्षहस्तेन पानं पूजनं च, वामहस्तेन च तर्पणं समाचरति । दिव्यौघे स्थित्वा, सिद्धौघे स्थापयित्वा, मानवौघे समुत्थाय, चैतन्ये च सङ्गीभूय पानं क्रियते । विसर्जनोत्तरं भद्रनाथमतेन, वीरतृप्त्युत्तरमतिकालमतेन, शक्तिपात्रं पृथक्कृत्य दक्षिणामूर्तिमतेन, शक्तिपात्रं गृहीत्वा च वीरनाथमतेन पानं विधीयते । तदिदं पानं महादिव्य-दिव्य-वीर-महापशु-पशुभेदात् पञ्चधा भवति । "प्राणापानौ समाहारौ प्रत्याहारो मनः स्थिरम् ॥ भानुमण्डलकं भित्वा इन्दुमण्डलमध्यगम् । सुषुम्नावर्त्मनि नित्यं सुधाधारापकर्षिणी(णि) ॥" (II ३३. ३-४) इति महादिव्यपानस्य, "त्यक्तसर्वाशयोन्मूलवासनामलसंचयः ॥ कौलिकाचारयोगेन पञ्चतत्त्वेन तर्पयेत् । षट्चक्रक्रमभेदेन हुनेद् द्रव्यं समन्त्रकम् ॥ ध्यानार्चनपरावस्था वीरपानमनुत्तमम् ।" (II ३३. ६-८) इति च वीरपानस्य लक्षणं प्रदर्शितम् । अन्ये च भेदोपभेदा ग्रन्थ एव द्रष्टव्याः ।

मकारपञ्चकम् अनुकल्पाश्च

शाक्तपूजासु मद्यं मांसं मत्स्यं मुद्रा मैथुनं चेति मकारपञ्चकं पञ्चतत्त्वनाम्ना तत्त्वपञ्चकनाम्ना वा प्रसिद्ध्यति । प्रथमखण्डीये नवमपटले द्रव्यभेदप्रकरणे मतमतान्तरोपन्यासपुरस्सरं बहु विचारितमनुकल्पाश्च बहवः समुपस्थापिताः । तथा हि—केरल-काश्मीर-गौड-शिव-शक्ति-सप्तपर्याय-चतुरशीतियुग्म-नाथत्रययुग्म-ओघत्रयक्रम-वटवासिक्रम-दशविद्याक्रमादिभिर्द्रव्येषु भेदबाहुल्यं भवति । दुग्धं वृन्ताकं सूरणं दुग्धसारं कुमारी चेति पञ्चतत्त्वानि केचिज्जगुः । काश्मीरानुकल्परूपेण ताम्रपात्रघृतं गव्यं पिण्याकं गृञ्जनं दुग्धं मिथुनमिति पञ्च तत्त्वानि गृह्यन्ते । गौडमार्गे तु पञ्च मकारा एव मुख्यत्वेनाङ्गीक्रियन्ते । जलं शीतलजलं

सौगन्धिजलं दधि दुग्धं घृतं तैलं मधु संविद् मद्यं चेत्येतेषां द्रव्याणामुत्तरोत्तरतो दशगुणं वैशिष्ट्यं गौडे सम्प्रदाये, संहृति-क्रमाच्च वैशिष्ट्यं केरले सम्प्रदाये स्वीक्रियते। अत्र शुद्धकेरल-चैतन्यकेरल-ऋक्केरल-गुप्तकेरल-उग्रकेरल-शुद्धकाश्मीर-ऋक्काश्मीर-कूरकाश्मीर-गुप्तकाश्मीर-अथर्वकाश्मीर-शुद्धगौड-ऋग्गौड-यजुर्गौड-गुप्तगौड-उग्रगौड-द्विविधविलासाख्यसम्प्रदायानुसारमप्यनुकल्पाः प्रदर्शिताः। अत्रैव—"ताम्रे गव्यं मधुसमं दैवे पित्र्ये न दुष्यति। अत एव महेशानि होमे ताम्रं प्रगृह्यते।" (I ९. ३९-४०) इति व्यवस्थाप्यानुकल्पानां विस्तृता नामावली सविवरणा समुपस्थापिता। सा च तत्रैव (I ९. ४०-५६) द्रष्टव्या। द्वितीये खण्डे (३२. १९-३८) पञ्चमुद्रापदेन मकारपञ्चकं व्याख्यातम्। अत्रैव मकारपञ्चकस्याध्यात्मिकी व्याख्या दृश्यते, या हि कुलार्णवतन्त्र (५.१०७-११२) समाना ततो विस्तृता च वर्तते। चतुर्थे खण्डे (४. १०५-११६) सात्त्विको जीवहत्यां न समाचरेदिति तदर्थमनुकल्परूपेण सात्त्विको बलिदानविधिः प्रदर्शितः, गुडार्द्रकादीनि च द्रव्याणि परिगणितानि।

शाक्तपूजोपादानेषु मकारपञ्चकवद् वर्तते पुष्पाणां मालानां च स्वकीयं वैशिष्ट्यम्। तदधुना विवेच्यते।

पुष्पनिर्णयः

गौड-काश्मीर-केरलभेदेन त्रिविधम्, उत्तम-मध्यम-अधमभेदेन च त्रिविधमिति षड्विधं स्वयम्भू-कुसुमं वर्ण्यते (II ३०. ३०-३५)। चतुर्थखण्डे चतुर्थपञ्चमपटलयोर्विस्तरेण व्याख्यानमस्य वर्तते। अत्र हि प्रथमं पुष्पस्य शाक्तीं परिभाषां व्यावर्ण्य केरलक्रमेण सामान्यपूजोपयोगीनि केतकीमालत्यादीनि शताधिकानि पुष्पाणि वर्णितानि। तदनु स्वयम्भूकुसुमस्य ग्रहणविधिं संवर्ण्य स्वयम्भूकुसुमेन सह तेषां तेषां पुष्पाणां होमेन मानवः कालीरूपो भवतीति वर्णितम्। प्रतिदिनं नवीनानि शुद्धानि पुष्पाणि ग्राह्याणि, निर्माल्यरूपाणि पर्युषितानि च वर्ज्यानि। एवं स्वयम्भूगन्धसन्तुष्टा काली सदा तद्गृहे निवसति। स्वर्णै रत्नैः स्पर्शमणिभिश्च कालिका तथा न तृप्यति, यथा हि स्वयम्भूकुसुमेन। अष्टादशविधं कामपुष्पम्, दशविधश्चूडामणिः, द्विविधा केतकी, चतुर्विधा मल्लिका, पञ्चधा मालती—इत्यादीनि शाक्तपुष्पाणि व्याख्याय पुनरपि यूथिका-मालत्यादीनि सामान्यानि पुष्पाणि वर्णितानि। तदनु कस्य देवस्य पूजायै कीदृशं पुष्पमुपादेयं हेयं चेति निदर्शितम्। एवमेवाग्रे (IV ११. १७-३३) पुनरप्येष विषयः संक्षेपेण वर्णितः। अत्र नारदमतमपि प्रदर्शितम्। अन्ते च करवीरपुष्पस्य माहात्म्यातिशयो वर्णितः।

मालाभेदाः।

ब्रह्ममालां मुण्डमालां कालिका धारयति, नारिकेलभवा माला सिद्धमाला शैवमाला च रुद्राक्षैर्निर्मीयते। तिसृणामप्यासां मालानां धारणविधिर्द्वितीये खण्डे (३.१२-२६) वर्ण्यते। अस्ति चात्र मालासंबन्धि-विचारस्य महान् विस्तरो विभिन्नेषु पटलेषु। तथा हि—नवमे पटले (३०-४६) उत्तम-मध्यम-अधमभेदेन त्रिविधा माला प्रदर्शिता। दन्ताक्षमाला, यत्र हि मेरुस्थाने[९०]राजदन्तो निवेश्यते, उत्तमा कालिकाकर्षिणी भवति। कर्णनेत्रान्तरस्थोऽस्थिखण्डो महाशङ्खनाम्ना प्रसिद्ध्यति। पञ्चाशन्मणिनिर्मिता महाशङ्खमयी माला मध्यमा ताराजपे विनियुज्यते। अस्थिभिर्नृमुण्डैर्नृललाटैर्वा निर्मिता माला कनिष्ठा छिन्नाजपे

९० "संमुखौ यावुभौ दन्तौ राजदन्तौ प्रकीर्तितौ॥...... कालिकासंहितायां च मतमन्यत् प्रकीर्तितम्॥" (II ९.३४-३९) इत्यादिना राजदन्तपदमेतद् व्याख्यातम्। तदेतत् तृतीये खण्डेऽपि (११.८२-८४) विवृतम्।

विनियुक्ता । सूर्याग्निसोमसूत्रैर्वसया मज्जया नाडिभिर्वा माला ग्रथनीया । सूत्रकर्मणि स्वयम्भुवाक्ता नाडी सर्वोत्तमा, स्वयम्भुवाक्तं सूत्रं सर्वोत्तमम् । पण्यस्त्रीनिर्मितं कुमारीनिर्मितं द्विजेन्द्रपण्यस्त्रीनिर्मितं वा ग्रन्थि-वर्जितं कुण्डाक्तं गोलाक्तं स्वयम्भुवाक्तं मातङ्गीहस्तात् प्राप्तं वा सूत्रमत्र ग्राह्यम् । चतसृणामपि काली-तारा-छिन्ना-सुन्दरीणामुपासनास्वेता माला विनियोज्यन्ते । अन्यत्र (३०.१-७; ५५.१८-२५) दशविद्या-नामन्येषां देवानां च विभिन्ना मालिका वर्ण्यन्ते । अत्रैव चत्वारिंशे पटले वर्णमाला विवृता, एकचत्वारिंशे च पटले मालाग्रथनविधिं प्रदर्श्य मणि-काच-शृङ्ग-बीज-चन्दन-सुवर्ण-रजतादिभवानां मालानां देवतासमाराधनेषु षट्कर्मसु च फलश्रुतिपूर्वकं विनियोगो विहितः । पुनः ५६-५७ पटलयोः कामनाभेदेन विभिन्नानां मालानां स्वरूपं फलं च विस्तरेण वर्ण्यते । अन्ते च मालारात्रिविधाने (७०.२-४५) महामालाशोधनविधिं संवर्ण्य कपालकज्जल-जगद्धूलि-उद्भ्रान्तधूलिभिर्दन्तमालाशोधनविधिः प्रदर्शितः । एवं हि मालिके एते सिद्धे भवतः ।

द्वित्रिमासोत्तरं मालायाः संग्रथनं कार्यम् । स्वयं संत्रुटिता माला प्रायश्चित्ताय कल्पते । षण्मासोत्तरं जीर्णसूत्रस्य माला न स्थाप्येत्यादिकं तृतीये खण्डे प्रतिपादितम् (६.९-१५) । चतुर्थे खण्डेऽपि (९.७०-८७; १०.८-१०) अङ्गुलिपर्वसु सम्पाद्यानां शक्ति-विष्णु-शिव-भैरव-सौर-गाणप-गायत्री-बटुक-चीन-क्षेत्रपाल-गन्धर्व-वटवासि-मञ्जुघोष-खेचर-शाम्भव-वरुण-धनद-यक्षिणी-किन्नरी-जैन-चान्द्र-स्वायम्भुवमालानां सृष्टि-संहारभेदेन भिन्नानां वर्णनं विद्यते । अत्रैव प्रतिमाला-मालिकाभेदेन द्विविधा मालिका प्रदर्शिता ।

एवं शक्तियोगापेक्षिणः सर्वे पदार्थाः शक्तिसंगमतन्त्रस्य चतुर्ष्वपि खण्डेषु वर्णिता अत्र संक्षिप्य समुपस्थापिताः । एभिरेव द्रव्यैः क्रमैश्च शक्तियागः समनुष्ठीयते । अथातीव संक्षेपेण सामान्यपूजाक्रमो वर्ण्यते, येनावशिष्टा विषया अपि व्याख्याताः स्युः ।

सामान्यपूजाक्रमः

साधकः प्रातरुत्थाय गुरुदेवताध्यानादिकं विधाय भूप्रार्थनादीनि मुखक्षालनान्तानि प्रातःकृत्यानि संपाद्य स्नायात् । मञ्जुघोष-चीनमार्ग-छिन्नाक्रम-महानीलक्रम-वीरस्नानानि यथायथं स्वसम्प्रदायवर्त्मना (II ३८.२-५, ४८-४९) संपाद्यानि । स्वशाखोक्तेन स्वकल्पोक्तेन वा विधानेन पञ्चविधस्नानेष्वेकतम-मङ्गीकुर्यात् (III ५. २-४६) अथ धौते वाससी परिधाय कृततिलको धृतरुद्राक्षादिमालः[९१] सन्ध्या-वन्दनमाचरेत्, स्वेष्टदेवतां च सायुधां[९२] सावरणां ध्यायेत् । अथ गृहीतदीक्षः साधको यागमन्दिरं प्रविश्य यथोक्तासने प्राङ्मुख[९३] उदङ्मुखो वा उपविश्य देशकालौ[९४] संकीर्तयेत् । प्राणप्रतिष्ठा-भूतशुद्ध्यादिविधिना

---

९१ रुद्राक्षधारणविधिस्तृतीये खण्डे (११.११८-१२८) प्रतिपाद्यते ।

९२ देवतानां देवीनां च मूर्तिषु ध्यानेष्वपि च आयुधान्यवश्यमेव वर्ण्यन्ते । श्रीयन्त्रपूजायामपि बाण-धनुः-पाश-अङ्कुशानि ध्यायन्ते पूज्यन्ते च । तानि च वर्णितानि नित्याषोडशिकार्णवे (१.१८०) । अत्रापि चतुर्थे खण्डे (९.८७-९०) आयुधानां संक्षिप्ता चर्चा विद्यते ।

९३ तन्त्रशास्त्रस्य बहुषु ग्रन्थेषु प्राचीनिर्णयो वर्ण्यते । अत्रापि द्वितीये (१८.१-२१), तृतीये (६.२७-६२, ६५-७२) च खण्डे विषयोऽयं वर्णितः । अत्रैव समताष्टकमार्गेणापि (II १८.२१) प्राचीक्रमः प्रदर्शितः । कोऽयं समताष्टकमार्ग इति तु नैव विवृतम् । तन्त्रालोकतद्विवेकयोस्त्रिकशासनं तत्रत्यं श्लोकद्वयं च स्मर्यते (४.२७४-२७५) । श्लोकद्वयमेतन्महार्थमञ्जरीपरिमलेऽपि (पृ. १६८) दृश्यते । तत्र—" समता सर्वभावानां वृत्तीनां चैव सर्वशः । समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः ॥ भूमिकानां च सर्वासामोवल्लीनां तथैव च । समता सर्वदेवानां वर्णानां चैव सर्वशः ॥ " इत्येवं समताष्टकं प्रतिपाद्यते । एष एव समताष्टकमार्गः स्यात् ।

९४ अत्र तृतीये खण्डे (३.१९-२६) केरल-काश्मीर-गौडक्रमेण संकल्पप्रयोजनानि प्रतिपादितानि ।

स्वात्मनो दिव्यदेहतां संपाद्य प्रत्यूहापसारणं विधाय न्यासजालादिकं संपादयेत्। पात्रासादन-सामान्यार्घ्य-विशेषार्घ्यादीनि निष्पाद्यान्तर्यागवर्त्मना चित्तशुद्धिं विदध्यात्। अथ स्वेष्टदेवतां मूर्ति-यन्त्रादिष्वावाहयेन्मुद्राप्रदर्शनपूर्वकम्, [९५]चतुष्षष्ट्युपचारैश्च तां सभाजयेत्।

पूजाया दुर्गरूपत्वमत्र वर्ण्यते (II ११.२९)। विधिवदनुष्ठितया स्वेष्टदेवतायाः पूजया हि साधकस्तथैव सुरक्षितो भवति, यथा हि स्वकीये दुर्गे राजा सुरक्षितस्तिष्ठति। धूपदीपादिविषये किञ्चिदत्र वैशिष्ट्यं दृश्यते। षोडशाङ्गो दशाङ्गः श्रीखण्डधूपो वाऽष्टादशाङ्गो दशविद्याक्रमेण योजनीयः (II ४४.२९-३४)। दशविद्याक्रमेण दशधूपा अत्र वर्ण्यन्ते (II ४७.८-१४)। दशगन्धधूपनिर्माणविधिश्च तृतीये खण्डे (१८.५३-५७) दृश्यते। त्रिशक्तिविषयको नित्यदीपो द्वितीये खण्डे (६४.१९-२५) वर्ण्यते। शैव-शाक्त-गाणपत्य-चान्द्र-सौर-आर्हत-वैष्णव-वैदिकमतेन नैवेद्यविनियोजनमत्रैव (II ३९.१९-२६) वर्णितम्। "ताम्बूलेन विना यस्तु कालिकां दशधा जपेत्॥ इह क्षोभमवाप्नोति परत्र नरकं व्रजेत्।" (II ३७.७०-७१) इत्येवं कालिकापूजनविधौ वर्तते ताम्बूलस्य विशिष्टं स्थानम्। अत्र प्रथमखण्डे (२१.६-३०) ताम्बूलसमयः श्राव्यते, दूती[९६]यागप्रसङ्गेन समुत्पन्नाया नाग(ताम्बूल)वल्ल्याश्च कथा वर्ण्यते। आरात्रिकविधानं च (II १९.१-७) इत्यत्र द्रष्टव्यम्।

दिग्बन्धादिपूर्वकमासनमासाद्य विसर्जनपर्यन्तमासनव्यत्ययो न विधेय इति नियम्यते। अस्यां दशायां चतुष्षष्ट्युपचाराणां मध्ये परिगणितौ प्रदक्षिणानमस्कारौ कथं कार्यौ? उत्थाने हि आसनध्वंसो भवति, अनुत्थाने च प्रदक्षिणानमस्कारौ कथं भवेताम्? अस्याः शङ्कायाः समाधानायात्रोच्यते यद् यथा धूप-दीप-ताम्बूल-नैवेद्यादीनां निवेदनावसरे मुद्राप्रदर्शनमुखेनोपचारः साध्यते, तथैव प्रदक्षिणानमस्कारौ मुद्रास्वरूपिणौ विधेयौ। मुद्राप्रदर्शनमुखेनैव तौ निष्पाद्याविति भावः। एवं हि करणे नैवासनव्यत्ययो भवति (IV १०.१०५-११०)। मञ्जुघोषे चीनमार्गे छिन्नमस्ताविधौ विशिष्टो नमस्कारक्रमो द्वितीये खण्डे (३८.२-४) वर्ण्यते।

पुष्पं फलानि धान्यानि यत्किञ्चिज्जगतीगतं द्रव्यं सर्वं होमद्रव्यत्वेनोपयोक्तुं शक्यते (I १०.६९-७१), तिलतण्डुलादीनां च परिमाणं (III ६.१८-२६) इत्यत्र वर्णितम्। बलिदानान्ते होमकर्म इत्येकः पक्षः (I १८. ८७-९९), केरल-काश्मीर-गौड-सदाशिवमतेन-क्रमोऽयं भिद्यते। होमविषयको विचारस्तृतीये खण्डे (३. २०८-२१५) संक्षेपेण, चतुर्थे खण्डे (११. ३४-६८) च विस्तरेण क्रियते। सात्त्विक-राजस-तामसभेदेन त्रिविधं बलिदानमत्र (I १२. ४४-४८) वर्णितम्। "ततः पूजोत्तरं देवि बलिदानं तु केरले" (II १८.८५-८६) इत्यादिना केरल-काश्मीर-गौड-श्रीगौडमतेन बलिदानक्रमो निर्धार्यते। सात्त्विको बलिदानविधिरत्र चतुर्थे खण्डेऽनुकल्परूपेण समुपस्थाप्यते (४. १०५-११६)। सर्वकर्मप्रसिद्ध्यै देवताबलिरादिश्यते। कर्मव्यङ्गतानिवारणार्थं च प्रायश्चित्तं विधीयते।

उत्पाताः कौतुकानि सिद्धयश्च

अत्र धूम्रकेतु-भूकम्प-प्रतिमाहास-उल्कापातसदृशानामुत्पातानां शान्तिकराः प्रयोगाः, अन्तर्धानकरी-आर्द्रपटेश्वरी-उच्छिष्टमातङ्गी-कृष्णमातङ्गी-तिरस्करिणी-वार्तायक्षी-सम्पत्सरस्वती-स्वप्नवाराहीविद्यानां च

[९५] "चतुष्षष्ट्युपचाराणां मध्ये शङ्का प्रजायते" (IV १०.१०६) इत्येवं चतुष्षष्ट्युपचाराः केवलमत्र सूच्यन्ते। उपचाराणां विविधानां विस्तृतं विवेचनं परशुरामकल्पसूत्रद्वितीयसंस्करणपरिशिष्टे (पृ. ३८६-३९५) द्रष्टव्यम्।

[९६] दूतीयागशब्दो बाह्यशक्तिपूजापरः पद्धतिग्रन्थेषु मूलतन्त्रेषु च बहुधा व्याख्यायते।

नानाकौतुककरा योगास्तृतीये खण्डे वर्ण्यन्ते । नानाविधानां सिद्धीनां प्रायः सम्पूर्ण एव ग्रन्थे नानास्थलेषु समुल्लेखो वर्तते । षष्टिसिद्धीश्वर इति शब्दो लब्धप्रसरोऽत्र । " चतुरशीतिसिद्धयः " (I ७.५२) इति चात्र समुल्लिखितम् । अत्र नवनाथसाहचर्याद् यद्यपि चतुरशीतिसिद्धबोधकोऽयं शब्दः प्रतीयते, तथापि चतुरशीतिसिद्धीनामपि सत्तां सूचयत्येव । षष्टिसिद्धयश्चतुरशीतिसिद्धयो वा कुत्रापि न परिगणिता ग्रन्थे । विभिन्नेषु प्रकरणेषु पठितानां सिद्धीनां संकलनायां शताधिकानि नामानि सम्पद्यन्ते ।

सिद्धीनां नामानि

अञ्जन-अणिमाद्यष्टक-अन्तर्धान(अदृश्यता)-आकर्षण-आज्ञा-इन्द्रजाल-उच्चाटन-ऊर्ध्वोत्क्रमण-कपालिनी-काकभाषा-कापाली(कपाल)-कामरूपता-कुल-खड्ग-खेचरी(खे गतिः)-गुटिका-गुप्ति-घट-चन्द्रसूर्यादिकिरण-चरक-चराचरगति-चिन्तामणि-चिरजीविता-जय-जलरूपता-जलस्तम्भन-जाप-डमरु - डामरी - तिथि - तिलक - त्रिकालज्ञता - त्रिधावाद - त्रिशूल - त्रैलोक्यवशता - त्रैलोक्याकर्षण - दिव्यदृष्टि--दीनार-दुन्दुभि-दूरदृष्टि- दूरश्रुति-द्रव्यप्राप्ति-धनदा-धातुवाद-पताकाद्वन्द्व-पद्मावती-परकायप्रवेश-पाताल-पात्र-पादुका-पाश-पीठ-पौरुष-बिलाञ्जन-भाषा-भूतसंचरण-भैरवाष्टक-भोगवती-मनःस्थैर्य-मधुमती-मनोजवित्व-महाकपालिनी-महामधुमती-महाश्रुतिधर-महेन्द्रजाल-मूकविवाद-मूकान्धस्तब्धीकरण-मूर्तिमृतसंजीवनी(मृतकोत्थापन)-मोहन-रञ्जक-रस-रसायन-लगुड-वन्ध्यात्वनाशन-वयःस्तम्भ(स्थैर्य)-वह्निस्तम्भन-वाक्सिद्धि(द्विविधाऽष्टविधा च)-वाञ्छासिद्धि-वायुस्तम्भ-वासः(पट)सिद्धि-शङ्खशापानुग्रहसामर्थ्य-शास्तृ-षडैश्वर्य-संमोहन-संहार-साध्यजाड्यता-स्थिति-स्पर्श(चिन्तामणि)-स्वर्णभैरवाख्याः सिद्धयोऽत्र विभिन्नेषु स्थलेषु तेषां तेषां कर्मणां फलश्रुतिरूपेणोपस्थापिताः । एतदतिरिक्तं वीरसाधनविधिना अप्सरोगण-किन्नर-किन्नरी-कूष्माण्ड-खेचर-चेटक-दानव-दैत्य-नाग-निवातकवच-पिशाच-प्रेत-ब्रह्मराक्षस-भूत-भूतिनी-भैरव-यक्ष-यक्षिणीमण्डल - यातुधान-राकिनी - राक्षस-वेताल-साध्य-सिद्धादयः क्रूराः सौम्याश्च सर्वा देवताः साध्यन्त इत्यप्यत्र (II ४४.५६-५८) वर्ण्यते । एवं शताधिकाः सिद्धयोऽत्र उल्लिखिताः सन्ति । एतासु घट (II १९.२४-२९)-परकायप्रवेश (III १२. १-३५)-पात्र(II १९.८-१८)-वाञ्छामणि(II १९.२६)-संमोहाञ्जन(III १३.२५-२६) साध्यजाड्यता (III ७.१-१५) नामधेयाः सिद्धयोऽत्रव्याख्याताः ।

एवमान्तरवरिवस्या-बाह्यवरिवस्याप्रतिपादनमुखेन चतुर्ष्वपि खण्डेषु प्रतिपादितानां प्रमुखाणां विषयाणां विस्पष्टः संक्षिप्तश्च परिचयोऽत्र समुपस्थापितः । अथोपसंहाररूपेण केचन विषयाः समालोच्यन्ते ।

उपसंहारः

डा. बी. [९७]भट्टाचार्यमहोदया अणिमाद्यष्टसिद्धीनाम्, अष्टादशविधानां चतुर्विंशतिप्रकाराणां च सिद्धीनामुल्लेखं विधाय ब्रह्मवैवर्तपुराणवर्णितासु ३४ संख्याकासु सिद्धिषु काश्चन वर्णयन्ति । हिन्दूतन्त्रेषु एताः सिद्धयो वर्ण्यन्ते, एताभ्यो भिन्नाः खड्ग-अञ्जन-पादलेप-अन्तर्धान-रसरसायन-खेचर-भूचर-पातालाख्या अष्टौ सिद्धयो बौद्धतन्त्रेषु स्वीक्रियन्त इति च तेऽभिनिविशन्ते। बौद्धतन्त्रवर्णिताः सर्वा एताः सिद्धयः शक्ति-

---

९७ साधनमालाभूमिकायाम् (P. LXXXV), एन इंट्रोडक्शन टू बुद्धिस्ट इसोटेरिज्म (पृ. ८३-८९) इत्यत्र च द्रष्टव्यम् ।

संगमतन्त्रेऽपि सन्ति, किन्त्वेतादृशान्युदाहरणानि हिन्दूतन्त्रेषु बौद्धतन्त्राणां प्रभावस्य सूचकानीति तेषामभिप्रायः। डा बी. [98]भट्टाचार्यमहोदयाः, डॉ. प्रबोधचन्द्रबागचीमहोदयाश्च महताऽऽटोपेन विषयमेतत्प्रसाधयन्ति। पद्मान्तक-मञ्जुघोष-वैरोचनाष्टक-पार्श्वनाथ-पद्मावतीप्रभृतयः शब्दा न व्याकृताः शक्तिसंगमादिषु तन्त्रेषु वैशद्येन, यथा हि ते व्यावर्ण्यन्ते बौद्ध-जैनादिषु तन्त्रेष्विति परवर्तिषु केषुचन तन्त्रेषु बौद्धादीनां तन्त्राणां प्रभावोऽङ्गीकर्तव्य एव, तथापि भट्टाभिनवगुप्तकालादर्वागाविर्भूतेषु तन्त्रेषु नेदृशः प्रभावोऽवलोक्यते। प्राचीनेषु तन्त्रेष्वपि नित्याषोडशिकार्णवप्रभृतिष्वेताः सिद्धय उपलभ्यन्त इति बौद्धतन्त्राणां हिन्दूतन्त्राणां च सिद्धयो भिन्ना इति व्याहतं वचः। प्राचीनानां हिन्दूतन्त्राणां बौद्धतन्त्रेषु प्रभाव इत्यपि सप्रमाणं साधयितुं शक्यते।

वस्तुतस्तु सर्वमेतद् भारतीयं ज्ञानम्। वैदिका बौद्धा जैनाश्च शैवा वैष्णवाश्च विद्वांसः सहैव निवसन्ति स्म। परस्परमावापोद्वापरूपेणैव भारतीयस्य सम्पूर्णस्य ज्ञानस्य देशकालभेदेन विकासः समजायत। धर्मसम्प्रदायनिरपेक्षं देशकालानुरोधि दुराग्रहवर्जितमनुशीलनमेव यथार्थां स्थितिं प्रकाशयेत्। श्रद्धेयचरणैः श्रीगोपीनाथ[99]कविराजमहोदयैर्मन्त्रयाननाम्ना प्रसिद्धानि बौद्धतन्त्राणि वज्रयान-सहजयान-कालचक्रयानभेदेषु विभज्यन्ते। अत्रत्याः सर्वे विषयाः प्राचीनेषु तन्त्रग्रन्थेष्वपि समानमाना अवलोक्यन्त इति प्राचीनानां तन्त्राणां त्रिभेदभिन्नानां बौद्धतन्त्राणां च तुलनात्मकमनुशीलनं विधेयताकोटिमाटीकते, यद्धि नाद्यावधि संजातम्। तदैव चतुरशीतिसिद्धानां विषयेऽपि किमपि याथार्थ्येन वक्तुं शक्येत। शक्तिसंगमतन्त्रे हि नवनाथानां चतुरशीतिसिद्धानां च दशाधिकेषु स्थलेषु सहैवोल्लेखो विद्यते, साम्प्रतमपि च तेषां सम्प्रदायनिरपेक्षा स्थितिरङ्गीक्रियते। नैकैर्विद्वद्भिः कृतेन आधुनिकेनानुशीलनेन सर्वे सिद्धा बौद्धमतावलम्बिनो निर्धार्यन्ते। वस्तुतस्तु मत्स्येन्द्रनाथ एव सकलकुलशास्त्रावतारकतया प्रसिद्धः। स च सिद्धानां नाथानां च प्रथमः। तेन प्रवर्तितासु षट् संख्याकासु ओवल्लीषु प्रभुपाद-बोधिशब्दान्ता अपि सिद्धा अवतेरुः, [100]आनन्द-आवलियोगिशब्दान्ता अपि चेति शैवानां शाक्तानां बौद्धानां च त्रिविधानां तन्त्राणां कौलत्वेन स्वरूपं समानमेव, योगपद्धतिः क्रियापद्धतिश्च समानैवेति विभावनीयं विपश्चिद्भिः।

खण्डत्रयस्य सम्पादका डा. बी. भट्टाचार्यमहोदया द्वितीयखण्डप्रस्तावनायां बाह्यशक्तिपूजासंबद्धानि प्रकरणान्यपि कुण्डलिनीशक्तिपरकतया नीत्वा सर्वत्र आन्तरवरिवस्यामेव समर्थयन्ति। किन्तु "सौख्यानन्दो भवेन्मुक्तिः" (II ५. ११) "जीवचक्रे सप्तचुम्बनवित्" (II १३.२१४), "कुलं शक्तिः समाख्याता" (II ३६.१८), "मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च॥ एभिरेव कृता पूजा कुलाचारः प्रकीर्तितः।" (II ३६. २०-२१) "चतुर्विधापि मुक्तिर्हि नीवीमुक्तौ प्रतिष्ठिता"

---

९८ पूर्वोक्ते ग्रन्थे 'इन्फ्लुएंस ऑफ बुद्धिस्ट तान्त्रिज्म ऑन हिन्दुइज्म' (पृ. १४७-१६४) इत्यत्र, 'स्टडीज इन दी तन्त्राज्' इत्याख्ये ग्रन्थे च 'ऑन फोरेन एलिमेन्ट इन दी तन्त्र' इति शीर्षके निबन्धे च (पृ. ४५-५५) द्रष्टव्यमेतत्।

९९ आचार्यनरेन्द्रदेवकृतस्य 'बौद्ध-धर्म-दर्शन' इत्याख्यस्य हिन्दीभाषामयस्य ग्रन्थस्य भूमिका (पृ. २८) द्रष्टव्या।

१०० "आनन्दावलिबोधिप्रभुपादान्ताश्च योगिशब्दान्ताः। एता ओवल्ल्यः स्युः" (२९.३६) इत्यस्मात् तन्त्रालोकवचनादेतज्ज्ञायते। 'ओवल्ली' इति ज्ञानप्रवाह इत्यर्थे प्रयुज्यते। विषयोऽयं 'त्रिपुरादर्शनस्यापश्चिमा आचार्याः कृतयश्च' इति शीर्षकेऽस्मदीये निबन्धे द्रष्टव्यः (सारस्वती सुषमा, व. २०, अ. २, पृ. १३-१४)।

(IV २. ११३), "नवनीतं भवेद् यावत्" (IV ३.५२, १९३), गर्भिणीरतिः (IV ३. १०३-११०), "रक्तरूपं श्वेतरूपं श्लक्ष्णं परमचिक्कणम्। तत्त्वं संजायते तस्याः कुण्डसाराभिधं भवेत्॥" (IV ३. ११२-११३), "तस्याः सङ्गभवं सौख्यं ब्रह्मानन्देति संजगुः" (IV ३. १२०-१२४), "पञ्चचुम्बनमासाद्य" (IV ३. २०४), "हस्ताहस्तिकया योगो निह्नवः परिकीर्तितः" (IV ३. २०८), "कुण्डं कुलामृताख्यं च सर्वतीर्थोत्तमोत्तमम्" (IV ४.८), "योनिं विना महेशानि न किञ्चिज्जगतीगतम्" (IV ४.३०-३३) वचनानामीदृशानां कामशास्त्रमन्तरा नहि धर्मशास्त्रेण कश्चन संबन्धः समस्ति। प्रत्युत—"स्वमातृमपि गच्छन्तं कौलिकं न निवारयेत्। साक्षात्तु भगिनी या तु चूडाचक्रे शुभावहा॥ स्वपुत्री च शुभा प्रोक्ता ऊर्मिलाचक्रसंमते।" (IV ११.१४-१५) इत्यादीनि, कौलतीर्थपटले (II १३) पठितानि च वचनानि महत्सामाजिकं[१०१] वैशसमापादयन्ति। सत्यमेवोक्तं श्रीमद्भागवते—

जुगुप्सितं[१०२] धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः।
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः॥ (१.५.१५) नहि नासिकायां

सत्यां स्वर्गो नावलोकयितुं शक्यत इति विप्रसम्प्रदायोऽयं प्रवर्तनीयः। हिंसाबहुलं वैदिकं कर्मकाण्डं बुद्धमहावीरादिभिः समालोचितं सद् यथा साम्प्रतं विरलतामापेदे, तथैव सौन्दर्यलहरीकारेण लक्ष्मीधरप्रभृतिभिश्च "अर्धपात्रं यागधाम दीप इत्युच्यते त्रयम्। रहस्यं कौलिके यागे तत्रार्धः शक्तिसंगमात्॥" (तन्त्रा. २९. १४-१५) इत्यभिनवगुप्तादिप्रदर्शितं रहस्यात्मकौलिकं बाह्यमर्चनं निषिध्य योगप्रक्रियाप्रधानमान्तरमर्चनं समयिमतनाम्ना वैदिकप्रक्रियायां परिगृहीतम्। शक्तिसंगमतन्त्रेऽपि—"ब्राह्मणेन तथा कार्यं ब्राह्मण्यं न विनश्यति" (I ८.१७; ९.३६; II १.३४), "वेदेन रहितं यत्तु तन्न कुर्याद् द्विजः क्वचित्" (I ८.३२), "वेदमूलाः क्रियाः सर्वा ब्राह्मणो वेद एव च। प्राणा वरं प्रयच्छन्तु ब्राह्मणो नार्पयेत् सुराम्॥" (I ९.५१), "वेदहीनाश्च ये धर्मास्तान् कथं ब्राह्मणश्चरेत्" (II २१.४८), "गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च" (II ४४.६०) इत्यादिप्रकरणेषु वेदविरुद्धाचरणं सर्वथा प्रतिषिद्धम्, वर्णधर्मानुसारेण तान्त्रिकविधीनां समादरश्च कर्तव्यः (I २.८०-८२; II १. ३३-३६) इति सूचितम्। वर्तन्ते हि तादृशा विचित्रा आचारविचारास्तेषु तेषु वर्णेषु जातिषु च। "यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः" (वा. अ. १०३.३०) इति वचनानुसारं मानवैः स्वीयाचारविचारानुसारं तास्ता देवताः समर्च्यन्ते। मानवमात्रस्य कल्याणाय हि प्रवर्तते तन्त्रशास्त्रम्। ते च स्वीयाचारविचारानुसारमेव प्रवर्तिताः परमतत्त्वाधिगमाय सारल्येन समर्थाः स्युरिति विभाव्य तन्त्रशास्त्रीया नानाविधाः सम्प्रदायाः प्रवृत्ताः सन्ति देशकालानुसारम्। बाह्या इमे आचारा विचाराश्च देशभेदेन कालभेदेन च भिद्यन्ते, कालातीताश्च भवन्ति तेषु केचन धर्माः।

---

१०१ अष्टाङ्गमैथुनवर्जको ब्रह्मचारी निगद्यते धर्मशास्त्रेषु। तन्त्रशास्त्रेषु ओष्ठ्यान्त्यत्रितयासेवी (तन्त्रा. २९.९८) ब्रह्मचारी वर्ण्यते। साम्प्रतिकाः केचन ब्रह्मचारिणस्तामिमामेव तान्त्रिकीं परिभाषामङ्गीकुर्वन्ति, न धर्मशास्त्रीयाम्। "अबला यत्र प्रबला बालो राजा निरक्षरो मन्त्री। नहि नहि तत्र धनाशा जीवित आशाऽपि दुर्लभा भवति॥" इति, "स्त्रीपुंवच्च प्रभवति यदा तद्धि गेहं विनष्टम्" इति च नीतिश्लोकेषु प्रतिपाद्यते, अत्र तु "स्त्रीप्रभूणां गेहगं च जगदेतच्चराचरम्" (IV ३.११५) इति वर्ण्यते। प्रकरणानुरोधेन हि स्त्री प्रभुर्येषामित्यत्र विगृह्यते।

१०२ उभयसामरस्यसमुत्थः कुण्डगोलकाख्यो द्रव्यविशेषोऽर्घ्यत्वेनात्र परिकल्प्यते (तन्त्रालोकविवेके, २५.१६६)। स्वयम्भुकुसुमादीनि चात्र पूजायामुपादीयन्ते। जुगुप्सितानि तान्येतानि कर्माणि।

अथवा—" स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसम्पत्करीं ये मोहादवधीरयन्ति कुधियो मिथ्याफलान्वेषिणः। ते तेनैव निहत्य निर्दयतरं मुण्डीकृता लुञ्चिताः केचित् पञ्चशिखीकृताश्च जटिनः कापालिकाश्चापरे ॥" इति यशस्तिलकचम्पूधृत(भा. २, पृ. २५२) नीलपटोक्तिगूढाभिप्रायमन्वीक्ष्यापक्वाशयानां योगिनां चित्तविकारोपशमाय यामलो विधिर्यथाकथञ्चित् समर्थयितुं शक्यते। श्रीमता भास्कररायेण तन्त्राणां धर्म[१०३]शास्त्रेऽन्तर्भावः कृतः, " तेषां प्रामाण्यसमर्थनं त्वस्मदीये त्रिपुरसुन्दरीबाह्यवरिवस्याविधौ द्रष्टव्यम्। तन्त्रराजव्याख्याने च विस्तरेण तन्त्राणां धर्मशास्त्रेऽन्तर्भावः प्रपञ्चयिष्यते " इति च प्रोच्यते। तन्त्रराजव्याख्यानस्य भास्कररायकृतस्यानुपलम्भात्तत्र तन्त्राणां धर्मशास्त्रेऽन्तर्भावः सार्वात्म्येन आंशिकरूपेण वा कृत इति ज्ञातुं न शक्यते। याज्ञवल्क्यस्मृतिव्याख्या[१०४]त्रापरार्केण शैवपाञ्चरात्राद्यागमानामांशिकं प्रामाण्यमङ्गीकृतम्। शाक्ततन्त्राणामपि तयैव पद्धत्या आंशिकमेव प्रामाण्यं सिद्ध्यति। तत्रापि बाह्यशक्तिवरिवस्याप्रतिपादकानि शास्त्राणि काम[१०५]शास्त्राङ्गतयैव प्रामाण्यं लभ्येरन्, न धर्मशास्त्राङ्गतयेति निबन्धकारसम्मतः पन्थाः।

किञ्च, यष्टिविद्धं शूलविद्धं सर्पदष्टं पयोमृतं खड्गहतं विषहतं विद्धं चाण्डालाद्यभिभूतमिति शवाष्टकमीर्यते। शवसाधनया याममात्रेण सिद्धिभाग् भवति मानवः। वीरसाधननाम्ना तदेतद्विवृतमत्र (II ४४. २-६३)। शवसाधनमेतत् प्रत्यालीढपदेन क्रियते। प्रत्यालीढदशेयम्—" शवस्य हृदये न्यस्तं दक्षिणं चरणं शुभम् ॥ शवस्य पादयुगलमनुलोमाकृतिक्रमात्। संन्यस्य वामचरणे प्रत्यालीढं तदुच्यते ॥" (III ७. ८-९) इत्येवमत्र वर्ण्यते। मुण्डसाधनमप्यत्रोपदिश्यते। " अखण्डाङ्गं शवं शस्तं सखण्डं मुण्डमुच्यते। रक्ताक्तं यदि देवेशि तदा त्याज्यं प्रयत्नतः ॥" (II ९. ५०-५१) इति च मुण्डस्य लक्षणं विधीयते। वीरासन-वीरमाला-वीरपात्र-वीरशक्ति-वीरविद्या-वीरवेषादीनां विस्तृतं वर्णनं द्वितीये खण्डे दृश्यते। वीरसाधनप्रक्रियेयं कापालिकानां परम्परामनुहरति। पुराणादिषु नास्याः परम्पराया अपि धर्मशास्त्राङ्गत्वमूरीक्रियते।

---

१०३ वरिवस्यारहस्ये (पृ. ७) द्रष्टव्यम्। भास्कररायकृतबाह्यवरिवस्याविधेरुपोद्घातप्रकरणस्य ६०९८४ (१६/१६४) संख्याका मातृका सरस्वतीभवनपुस्तकालये विद्यते। तत्र वेदविरुद्धांशस्तन्त्रे नास्त्येवेति सपरिकरबन्धं साधितम्।

१०४ " तस्माद्दूष्यत्वेनैव शैवादि प्रमाणमनुष्ठेयत्वे त्वङ्गत्वेन केनचित् कश्चिदंशेनाऽऽदेयं साकल्येन नानुष्ठेयमिति स्थितम् " इत्येवमुपसंह्रियते प्रकरणमेतत् तत्र (आनन्दाश्रम-पुण्यपत्तनसंस्करणम्, ई. १९०३ वर्षे प्रकाशितम्, पृ. १०-१९)।

१०५ विज्ञानभैरवविवृतिकारस्य शिवोपाध्यायस्य वचनद्वयमवधेयमत्र—" न पुनः केवलकामपरतन्त्रतया करचञ्चत्कुचप(भ)रपरिमर्दन-पेशलकोमलकुन्तलकर्षणललनाविरचितचक्षुःकूगन-बाहूद्धूनन-सीत्कृतिबोधन-त्वरितसभाजन-मानन-स्वरचितवेणीग्रहण-वशीकृतपश्चाद्ग्रीवानवरतप्रेङ्खोलनसंदर्शन-प्रसृतोत्क्षेपण-करनखलेखन-रदनोद्दर्तितमञ्जुकपोलद्वन्द्वोच्चुम्बनसक्थिश्लेषण-स्वप्रोथद्वयपृथुलविघट्टन-श्यामारक्ताधरभव-षष्ठवर्णप्लुतसम्बोधन-दीपितमन्मथवह्नयुद्दङ्कितप्रजननतेजन-यष्टिप्रक्षेपणसंघट्टन-रेतःसिञ्चनपर्यन्तक्षोभविधानेन आत्मानं गर्ते पातयेत् " (पृ. ६३) इति, " ये तु रसनीयवीरद्रव्यपानावदंशचर्वणादिना आनन्दविकासाद् भरितावस्थामभिदधति, तत्राऽस्त्युन्मादविधायिभावकवलने स्वानन्ददशावमर्शनविषये सहृदया एव प्रमाणमिति त एव प्रष्टव्याः, तादृग्दशायां तत्त्वचिन्ता किमस्तीति ? यदि पुनस्तत्रापि तेषामवहितचिन्तत्वं भवेत् तर्हि तेऽतिधन्याः सर्वपूज्याः सर्वनमस्कार्या महाचारा इति तान् न निन्देत्, किन्तु नमस्येत् " (पृ. ६१) इति च।

शर्मण्यदेशीयेन विदुषा डा. [१०६]विण्टरनित्जमहोदयेन प्रोच्यते—"पुराणानां तन्त्रशास्त्राणां चानुशीलनं नानन्ददायकं कार्यम्। तन्त्रशास्त्राणां विषये कथनमेतत् सविशेषं घटते। तानि हि हीनकोटिकैर्लेखकैर्व्याकरणनियमविहीनायां भाषायामाबद्धानि" इति। यद्यपि पराकालिकान् कांश्चन तन्त्रग्रन्थानवलोक्य विदुषा लेखकेन धारणेयं स्थिरीकृता, प्राचीनेषु हि तन्त्रशास्त्रेषु नैवंविधा दोषाः समवलोक्यन्ते, तथापि विचारणीयेयमुक्तिस्तत्रभवतो विण्टरनित्जमहाशयस्य। वैष्णवेषु, शैवेषु, शाक्तेषु, बौद्धेषु च सम्प्रदायेष्वाध्यात्मिकक्षेत्रेष्वपि रहस्यात्मिकाः काश्चन क्रियाः साम्प्रतमपि प्रवर्तन्ते। "अन्तः शाक्ता बहिः शैवाः सभामध्ये च वैष्णवाः" इत्येतादृशं विद्रूपं द्वैधीभूतं जीवनं यापयन्ति केचन। भगवतः श्रीकृष्णस्य मोहकं रूपमेभिराराध्यते, न लोकमङ्गलकारि। मर्यादापुरुषोत्तमस्य रामभद्रस्य चरितमपि कलुषीक्रियते। योगछद्मना देशे विदेशेषु च प्रचारयन्ति ते रहस्यात्मिका एताः क्रियाः। वस्तुतो धर्म-मोक्षयोश्छलेन अर्थकामयोः साम्राज्यमेतत् प्रसरति। "मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यत्" इत्येवं विभक्तासु उत्कृष्टासु समाजव्यक्तिषु किं न स्याद्वचस्येव स्थितिराध्यात्मिकताया नैतिकताया वेति स्वयमेव निभालयन्तु सुधियः। वैचित्र्यमेतदवलोक्य सीदति साम्प्रतिकः साधारणो मानवः। विषादस्यास्य परिहाराय, आध्यात्मिकानां चिरन्तनभावानां स्थापनाय, सम्पूर्णस्य मानवसमाजस्य सुव्यवस्थायै च आवापोद्वापपद्धत्या वैदिक-तान्त्रिकश्रुतीनां समन्वयमुखेन प्रवर्तयितव्यो नूतनो मानवो धर्मः। एतदर्थं च—"यद्यप्यस्ति त्रिकालज्ञस्त्रैलोक्याकर्षणक्षमः। तथापि लौकिकाचारं मनसाऽपि न लङ्घयेत्॥" (II ४६. ४२-४३) इति शक्तिसंगमतन्त्रवचनमेतत् साहायकमाचरिष्यति।

कृतज्ञताप्रकाशः

एवमस्य ग्रन्थस्य सम्पादनकर्मण इतिकर्तव्यता परिसमाप्यते। अस्मिन् शुभे कर्मणि प्रवर्तयितॄणां कृतसहायानां च स्मरणमवसरप्राप्तमत्र चर्च्यते। सर्वप्रथममस्य ग्रन्थस्य खण्डत्रयस्य सम्पादकाः स्वर्गीया डा० बी. भट्टाचार्यमहोदयाः सादरं स्मर्यन्ते। तैः क्षुण्णेन हि पथाऽस्माभिरस्य खण्डस्य सम्पादने प्रवृत्तम्। प्राच्यविद्यामन्दिरस्य नियामकचरा डा. भो. जे. सांडेसरामहोदया एम. एस. विश्वविद्यालयाधिकारिणश्च तदनु साधुवादार्हाः, यैः प्रवर्तितोऽहं खण्डस्यास्य सम्पादनाय। संस्कृतभाषायामुपोद्घातलेखनानुज्ञां प्रदाय भृशमुपकृतमेभिः। वर्तमाननियामकैः श्रीमद्भिः डा. ए. एन. जानीमहोदयैः स्वल्पेनैव कालेन ग्रन्थोऽयं मुद्रापितः, सत्वरमुपोद्घातलेखनाय पौनःपुन्येन प्रेरितश्चाहम्, येन हि ग्रन्थोऽयमनतिविलम्बेन प्रकाश्यत इति तेऽपि साधुवादार्हाः। ग्रन्थप्रकाशने विलम्बो मा भूदिति कृत्वा डा. जानीमहोदयैः प्राच्यविद्यामन्दिरस्यानुसन्धानाधिकारिणः श्रीमन्तो डा. बी. एन. भट्टमहोदयाः प्रूफ-संशोधनकर्मणि नियोजिताः सावहितं ग्रन्थसंशोधनमकार्षुरिति नूनं तेषां कृतज्ञतामावहामि। तन्त्रागमसाहित्यशास्त्रमर्मज्ञाः श्रीमन्तो बटुकनाथशास्त्रिखिस्तेमहोदयाः पारिभाषिकानां पदानां व्याख्याने महत्साहाय्यमाचरितवन्त इति तेऽपि सादरमत्र स्मर्यन्ते। सरस्वतीभवनग्रन्थालयाध्यक्षाः श्रीलक्ष्मीनारायणतिवारीमहोदयाः, उपग्रन्थाध्यक्षौ श्रीबलरामशास्त्रिभारद्वाज-श्रीअच्युतनाथझामहोदयौ, काशीस्थविश्वनाथपुस्तकालयाध्यक्षाः श्रीदेवमणियाज्ञिकमहोदयाश्च भृशं धन्यवादार्हाः, यैर्हि शक्तिसंगमतन्त्रस्यान्येषां च ग्रन्थानामपेक्षितानां मातृकाणां मुद्रितग्रन्थानां च

---

१०६ 'हिस्ट्री ऑफ इण्डियन लिटरेचर' इत्याख्यस्य ग्रन्थस्य १९२७ ई. वर्षे प्रकाशिते संस्करणे, भा. १, पृ. ६०६ द्रष्टव्यम्।

सौलभ्याय साहाय्यमाचरितम् । मैथिललिपिमय्या मातृकायाः पाठसंकलनेऽन्येषां मैथिलबंगलिपिकानां ग्रन्थानामावश्यकांशवाचने सरस्वतीभवनस्थैर्विद्वद्भिः श्रीमद्भिः जनार्दनशास्त्रिपाण्डेय-नन्दिनाथमिश्र-तारकनाथभट्टाचार्यमहोदयैः, उपोद्घातभाषायां भावव्यञ्जनासमर्थानां विशिष्टानां पदानां समुपस्थापने संस्कृत-विश्वविद्यालये आगमाध्यापकैः श्रीरघुनाथमिश्रमहोदयैः, जैनधर्मदर्शनसंबन्धिनां केषाञ्चन पदानां परिचयदाने जैनदर्शनप्राध्यापकैः श्रीअमृतलालजैनमहोदयैश्च साहाय्यं कृतमिति सर्वेषामेतेषामुपकारं सादरं स्मरामि। सरस्वतीभवनमातृकाणां पाठसंकलनेऽनुक्रमणीत्रयसंयोजने च कृतसहायाभ्यां सौ. शोभना (एम.ए., बी. एड.), कु. आशा (बी.ए.) नाम्नीभ्यां पुत्रीभ्यां शुभाशिषो वितीर्यन्ते। अन्ते च प्राच्यविद्यामन्दिर-मुद्रणालयस्य कर्मचारिणो धन्यवादशतैः संयोज्यन्ते, येषां हि सहयोगेन सुसज्जितोऽयं ग्रन्थः पाठकेभ्य उपह्रियते। एवं सत्यपि सर्वेषां सहयोगे याः काश्चन त्रुटयोऽवलोक्येरन् सुधीभिः क्षन्तव्यास्ता मानव-स्वभावसुलभा इति संप्रार्थयन् विरमति—

गुरुपूर्णिमा, संवत् २०३३
३०-७-७७ ई.
वाराणसी।

विदुषां वशंवदः
व्रजवल्लभद्विवेदः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये योगतन्त्रविभागप्राध्यापकः।

श्रीगुरुभ्यो नमः

श्रीशक्तिसङ्गमतन्त्रम् ।

छिन्नमस्ताखण्डः ॥ ४ ॥

प्रथमः पटलः ।

श्रीदेव्युवाच

देवदेव महादेव सर्वसिद्धिप्रवर्तक ।
त्वत्तः श्रुतं मया सर्वं रहस्यातिरहस्यकम् ॥ १ ॥
इदानीं वद देवेश रहस्य[1]मपरं विभो ।

श्रीशिव उवाच

रहस्यातिरहस्यं च कथं त्वयि निवेद्यताम्[2] ॥ २ ॥
तथापि तव सद्भक्त्या रहस्यमपि कथ्यते ।
काली तारा छिन्नमस्ता सुन्दरी बगला रमा ॥ ३ ॥
मातङ्गी भुवना सिद्धविद्या च भैरवी तथा ।
धूमावती च दशमी महाविद्या दश स्मृताः ॥ ४ ॥
चण्डेश्वरी लघुश्यामा त्रिपुटा[3]दिप्रयोगतः ।
त्रयोदश महाविद्याः श्रृणुष्व षोडशीं प्रिये[4] ॥ ५ ॥
दश पूर्वास्तु[5] संगृह्य वन[6]दुर्गां च शूलिनीम् ।
अश्वारूढां महाविद्यां त्रैलोक्यविजयाभिधाम् ॥ ६ ॥
वाराहीमन्नपूर्णां च कलासंख्याः प्रकीर्तिताः ।
[7]महाकालमते देवि एकपञ्चाशदीरिताः ॥ ७ ॥
महालक्ष्मीं समारभ्य महाकामकलान्तकम् ।
विद्यासंख्या त्वया प्रोक्ता त्रितयं पूर्ववद्भवेत् ॥ ८ ॥

---

1 SA SC °स्यं परमं । 2 C D °द्यते । 3 C °टारिः, SC °रादि° । 4 C N SB शिवे । 5 D °र्वा तु, SA SC SD °र्वा च । 6 D नव° । 7 D SA SC omit this line.

एतासामङ्गमन्त्रांश्च कथयामि शृणु प्रिये ।
कालीविद्या सिद्धविद्या सर्वविद्योत्तमोत्तमा ॥ ९ ॥

तत्क्रमः कथ्यते देवि यथायोगेन साम्प्रतम् ।
आदौ स्पर्शमणिर्देवि ततश्चिन्तामणिर्भवेत् ॥ १० ॥

सि[1]द्धकाली ततः प्रोक्ता विद्याराज्ञी तदुत्तरा ।
ततः कामकलाकाली हंसकाली ततः शिवे ॥ ११ ॥

गुह्यकाली तदन्ते स्याद् दशभेदाऽपि पार्वति ।
लघुश्यामा महाका[2]लो बटुकोन्मत्तभैरवः ॥ १२ ॥

नित्यामन्त्राः पञ्चदश कुल्लुकापञ्चवर्गकम् ।
[3]त्रैलोक्यविजयामन्त्र[4]स्तथा ह्याद्येश्वरीमनुः[5] ॥ १३ ॥

[6]पारायणानां षट् संख्या क्षेत्रेशो गणयोगिनी ।
त्रिशक्तिविद्या देवेशि तथा श्रीगुरुपादुका ॥ १४ ॥

बगला शरभः शास्ता तथा [7]मधुमती वरा[8] ।
र[9]जकः सुरतेशी च मञ्जुघोषमहेश्वरौ ॥ १५ ॥

चिटिविद्या [10]भगेशी च पुष्पकुण्डा परा शिवे ।
पञ्च षोढा सहस्रार्णा द्विशतार्णा महेश्वरि ॥ १६ ॥

कालरात्रिर्महेशानि बगलारात्रिरेव च ।
मण्डलानां चतुष्कं च यथायोगेन योजयेत् ॥ १७ ॥

एतेऽङ्गमन्त्राः संप्रोक्ताः कालिकाजपकर्मणि ।
एते मूलमनोरादौ जप्या देव्यश्च सर्वशः ॥ १८ ॥

महाविद्याविधौ देवि नाङ्गाङ्गित्वप्रकल्पना ।

दे[11]व्युवाच

उपविद्यां समासाद्य जपिष्यन्ति नराधमाः ॥ १९ ॥

यथोक्तं नहि कुर्वन्ति दे[12]वदूषणतत्पराः ।
सर्वा अपि महाविद्या एकरूपा निरन्तरम्[13] ॥ २० ॥

---

1 C SA SC SD सिद्धि° । 2 SD °काली । 3 N SA SB त्रि° । 4 SD °न्त्रा° । 5 D मुहुः । 6 D SA SC परापराणां । 7 D धूमावती । 8 D SA SC SD परा । 9 SD रञ्जकः । 10 C भं° । 11 N SA SB SC SD काल्युवाच । 12 C °ह° । 13 SD adds after this सर्वासां कल्पभेदेन प्रोक्तं मुखाङ्गमादरात् ।

प्रोक्तं (एवं) कादिमताख्यस्य प्रोक्तं मुख्याङ्गमादरात् ।
अथ हादिमताख्यस्य रूपं संप्रतिपाद्यते ॥ २१ ॥

[1]काद्यं मतं कादिमतं वि[2]राडनुत्तरं मतम् ।
हाद्यं हादिमतं देवि हंसराजाभिधं शिवे ॥ २२ ॥

[3]स्वराडुत्तरतन्त्रं [4]तु त[5](द्)एव परिकीर्तितम् ।
कादि हादि मिलित्वा तु कहेत्ये[6]व महामनुः ॥ २३ ॥

कहेत्ये[7]व महामन्त्रस्तूत्तराम्नायगोचरः ।
उत्तराम्नायराज्ञी च महोग्रतारिणी स्मृता ॥ २४ ॥

या तारा सैव छिन्ना स्यात् सैव श्रीत्रिपुराम्बिका ।
सैव काली सैव तारा न भेदोऽस्ति महेश्वरि ॥ २५ ॥

पारायणादिकं देवि तारायां कारयेत् प्रिये ।
तारा कहस्वरूपत्वान्महानीलसरस्वती ॥ २६ ॥

तारायामपि देवेशि साम्रा[7]ड्भेदाश्च कीर्तिताः ।
इति संक्षेपतः प्रोक्तमङ्गमन्त्रान् शृणु प्रिये ॥ २७ ॥

आदौ तु स्पर्शतारा स्यात्ततश्चिन्तामणिः स्मृतः ।
ततः सिद्धजटा प्रोक्ता उग्रतारा तदुत्तरम्[8] ॥ २८ ॥

हंसतारा ततो देवि निर्वाणरूपिणी कला ।
महानीला महेशानि नीलशाम्भवरूपिणी ॥ २९ ॥

महानीलोत्तरं देवि पूर्वसाम्राड्द्व[9]यं शिवे[10] ।
त्रयं मिलित्वा देवेशि दिव्यसाम्राज्यभूषिता ॥ ३० ॥

कादि हादि च सर्वत्र दिव्यसाम्राट् कलौ नहि ।
दिव्यसाम्राट् कलौ चेत् स्यात्तच्च सत्ययुगं भवेत् ॥ ३१ ॥

एकाक्षरी [11]तारमायाबिन्दुचन्द्रविभूषिता ।
कूर्चयुग्मं स्पर्शमणिश्चण्ड[1]घण्टा च हूंकृतिः ॥ ३२ ॥

---

1 SA SC omit this line । 2 D हाद्यं हादिमतं तथा । 3 C D N स्वा° । 4 D SA SC SD च । 5 D तन्त्रवरं । 6 D SD °वं । 7 D SA SC नाम्ना भेदाः प्र°, C SB SD °ण्मेधा प्र° । 8 SA SC SD ततः परम् । 9 SA SC °ट्त्रयं । 10 D SC SD add after this शिव उवाच । 11 N SA SB SC SD तरौं । 12 SC °श्चन्द्र° ।

महाचिन्तामणिः प्रोक्तस्तनः सिद्धजटा भवेत् ।
मूलविद्या हंसतारा महानीला तदुत्तरम् ॥ ३३ ॥

एवम[13]न्यानि कथ्यन्ते रहस्यान्यपि पार्वति ।
बटुकः क्षेत्रपश्चैव गणपो योगिनी तथा ॥ ३४ ॥

अक्षोभ्यो विजया वह्निस्तथैव च[2]ण्डघण्टिका ।
श्रीषोढापञ्चकं देवि कामसो[3]मादयस्तथा ॥ ३५ ॥

कुल्लुकापञ्चकं देवि तथार्द्रपङ्क्तिका[4] मता ।
शिवाघोरौ पाशुपतं चक्रं तु जयदौर्गकम् ॥ ३६ ॥

अमो[5]घफलदा यक्षी तथा पद्मावती शिवा ।
उद्भटा[6]म्बा बौद्धनाथः पार्श्वनाथस्तथैव च ॥ ३७ ॥

काली छिन्ना च बगला ताराभेदाश्च सर्वशः ।
तारिणी यक्षिणी प्रोक्ता मञ्जुघोषो महेश्वरः[7] ॥ ३८ ॥

प्रत्यङ्गिरा नारसिंही भैरवाष्टकमेव च ।
पञ्चकल्पद्रुमा मन्त्राः सर्वकामफलप्रदाः ॥ ३९ ॥

रक्तचामुण्डिका नित्यक्लिन्ना विद्या तथैव च ।
महाकालक्रमेणैव कथितं पी[8]तशारदे ॥ ४० ॥

राज्यवश्यकरा मन्त्रास्तथान्ये खड्गजा[9]तयः ।
लुलायख[10]रशार्दूलकरिवश्यकरास्तथा[11] ॥ ४१ ॥

धनुर्विद्या शस्त्रविद्या काण्डाग्निजलस्तम्भनाः ।
भयद्वादशहारिण्यस्ता अङ्गमनवः स्मृताः ॥ ४२ ॥

एतेऽङ्गमन्त्राः संप्रोक्ता गायत्रीसहि[12]ताः शिवे ।
त्रिशक्तिविद्याभेदे तु न भेदोऽस्ति कचित् प्रिये ॥ ४३ ॥

चतुर्विधा[13] त्रिशक्तिस्तु सर्वसिद्धिक्रमेण च ।
[14]आद्या त्रिशक्तिर्देवेशि कालिकादिक्रमेण च ॥ ४४ ॥

---

1 C N SA SB SC SD °न्येऽपि। 2 SD °चन्द्र°। 3 D °षोढा°। 4 N दुर्घटिका, SA SD °पटिका शिवा। 5 D अघोर°। 6 C °टो वा, D °टात्मा। 7 D SC °रि। 8 SD नील°। 9 N SA SB SC SD °दयः, C °पादपः। 10 D SD °खड्ग°। 11 D °वन्यास्तथापरे। 12 C सिद्धिका। 13 C °धाऽत्र, N SD °द्या त्रि°। 14 D omits this line.

काली तारा छिन्नमस्ता त्रिशक्तिकल्पमालिका ।
तारा नीला चैकजटा अक्षोभ्यस्य क्रमेण च ॥ ४५ ॥

डाकिनी वर्णिनी छिन्ना करालस्य त्रिशक्तयः ।
बाला पञ्चदशी षोढा त्रिशक्तिर्वटवासिनः ॥ ४६ ॥

छिन्नाङ्गमन्त्रा देवेशि कथ्यन्ते शृणु यत्नतः ।
गुरुमन्त्रो मालिनी च कुल्लुकापञ्चकं तथा ॥ ४७ ॥

काली तारा च नकुली मातङ्गी सिद्धसुन्दरी ।
त्रिजटैकजटा श्यामा सभेदा अपि पार्वति ॥ ४८ ॥

वि[1]कटा लम्पटा देवि यक्षि[2]णी परिकीर्तिता ।
[3]यक्षस्तु भ्रामको देवि दीपिनी परिकीर्तिता ॥ ४९ ॥

दीपिनी कालिकायां[4] तु गणेशादिचतुष्ककम्[5] ।
बटुकश्च महाकालः क्रोधराजोऽपरोऽपि च ॥ ५० ॥

पार्षन्मण्डलकं देवि महामहिषमर्दिनी ।
भवानी कमलाऽघोर[6]चतुष्कं परमेश्वरि ॥ ५१ ॥

छिन्नाङ्गमन्त्राः कथिताः सुन्दर्याः शृणु पार्वति ।
षष्ठीज[7]यो नाम मन्त्रो मन्त्रपारायणं तथा ॥ ५२ ॥

[8]चक्रपारायणं चैव मन्त्रपारायणं तथा ।
सहस्रार्णचतुष्कं च तथा सन्ध्याचतुष्टयम् ॥ ५३ ॥

पञ्च षोढा परामन्त्रः[9] श्रीविद्या कामसुन्दरी ।
बाला चान्त्य[10]क्रमेणैव पराप्रासादं एव च ॥ ५४ ॥

निर्वाण[11]पदवी विद्या कुब्जिका[12] परमेश्वरि ।
नवा[13]म्नायमण्डलानि कादौ हादावपि प्रिये ॥ ५५ ॥

रश्मिमण्डलकं देवि गायत्रीत्रैक[14]मन्त्रतः ।
विद्यामण्डलकं देवि मन्त्रमण्डलमेव च ॥ ५६ ॥

---

1 SD विकरालपटा । 2 SD omits यक्षिणी परिकीर्तिता......पार्षन्मण्डलकं देवि in forth line. 3 C omits this line. 4 D SA SC °यास्तु । 5 N °ष्टकम् । 6 D SD घोरा । 7 C °पो । 8 C SD omit this line. 9 D °न्त्राः । 10 D °प्युत्क°, N °व्युत्क° । 11 D °णे । 12 D SA SC SD °ञ्चि° । 13 D षड्डा° । 14 C SB °कैक°, D °कम°, SD °त्र्याङ्कार° ।

मन्त्रविद्यामण्डलं च महाविद्याभिधं ततः ।
साम्राज्यमण्डलं देवि तथा दर्शनमण्डलम् ॥ ५७ ॥

मन्त्रमण्डलपूर्वा तु महाविद्या तदन्ततः ।
श्रीमूर्तिपादुका चैव समयश्री[1]पादुका स्मृता[2] ॥ ५८ ॥

महाश्रीपादुका देवि निर्वाणपादुकायुगम् ।
पराश्रीपादुका देवि वाराहीपादुका तथा ॥ ५९ ॥

मातङ्गीपादुका देवि रक्तश्वेतसमाश्रिता[3] ।
सर्वसाम्राज्यमेधान्ते दिव्यसाम्राज्यभूषितः ॥ ६० ॥

प्रातर्गणेशं मध्याह्ने वाराही परिकीर्तिता ।
सन्ध्यायां राजमातङ्गी अमरी कु[4]ण्डली निशा ॥ ६१ ॥

साधनायां मन्त्रषट्[5]कं क्रमात् संकथ्यते शृणु ।
बालाम्बा बगला काली वाराही कमलेश्वरी ॥ ६२ ॥

पञ्चकामाः शै[6]वविष्णू[7] सर्वे मन्त्रा महेश्वरि ।
महाविद्याया[8] दशकं कुल्लुकापञ्चकं तथा ॥ ६३ ॥

दीपिनी शापनाशश्च प्रसन्नाञ्जलिरेव च ।
अष्टादशसहस्रं च न्या[9]सजाला[10]न् प्रविन्यसेत् ॥ ६४ ॥

सुन्दरी यक्षिणी प्रोक्ता महायक्षी पुलिन्दिनी ।
ब्रह्मा[11]स्त्रं पञ्चविद्यास्त्रमस्त्रा[12]न्यन्यानि पार्वति ॥ ६५ ॥

राजराजेश्व[13]रो देवि बटुको वारुणीप्रियः ।
नवतत्त्वेश्वरो देवि शरभो विजये[14]श्वरः ॥ ६६ ॥

वर्णविद्या मण्डलं च ह[15]नुमान् भैर[16]वेश्वरः ।
श्रीविद्या कालिका तारा त्रिविधा त्रिगु[17]णक्रमात् ॥ ६७ ॥

दशविद्यैकाक्षराश्च तथा त्रिशक्तिजाः पराः ।
आद्यन्तमध्यभेदेन नवभेदास्त्रिशक्तयः ॥ ६८ ॥

---

1 C श्री च । 2 C omits D N SA SB स्मृतः । 3 N SB समि°, D SA SC SD °मन्विता । 4 C N SA SB SD °लिनी । 5 D °राजं, SD बन्धं । 6 D SA SB SC सैव, SD सप्त । 7 C D N SA SD विष्णुः, SC विष्णु । 8 D °द्या° । 9 N मास° । 10 SD °जालं । 11 N °स्त्रकं । 12 D °न्त्रा° । 13 C SB SC °री । 14 C °ये । 15 SA °नू° । 16 SD मण्डले° । 17 D °णा ।

त्रिक्रमो यदि चेद् [1]भूयात्तदा क[2]लिहरः शिवः[3] ।
बगलाङ्गमन्त्रा देवेशि कथ्यन्ते स्वेष्टसाधकाः ॥ ६९ ॥

मृत्युञ्जयश्च बटुकस्तथैवोत्कील[4]नं शिवे ।
पञ्चास्त्रं पञ्चब्रह्मास्त्रं कुल्लुकापञ्चकं तथा ॥ ७० ॥

तथाऽपराजिता श्यामा [5]चण्डेशी च हरिद्र[6]वा ।
विडाला यक्षिणी देवि स्तम्भनत्वरिताऽपि च ॥ ७१ ॥

स्वप्नेश्वरी चैकजिह्वा मन्त्रान्ये भैरवादयः ।
गणपाद्याश्च मनवो भिन्नरूपेण[7] सन्ति च ॥ ७२ ॥

कालिकायां च सुन्दर्यां छिन्नायां तारिणी[8]मनौ ।
बगलायां मञ्जुघोषे रौ[9]द्रे च बटुके परे ॥ ७३ ॥

न [10] पञ्चायतनं कार्यं मनसाऽपि महेश्वरि ।
मन्त्राङ्ग[11]त्वेन संजप्या न पञ्चायतनक्रमात् ॥ ७४ ॥

इति संक्षेपतः प्रोक्तं [12]महालक्ष्म्यङ्गदेवताः ।
कथ्यन्ते परमेशानि श्रीविष्णुर्गणपोऽ[13]ण्डजः ॥ ७५ ॥

धन[14]दश्च कुबेरश्च नि[15]धिमन्त्रा अपि प्रिये ।
विद्याभेदाश्च देवेशि भुवना वज्ररूपिणी ॥ ७६ ॥

विद्या भोगवती देवि लक्ष्मीनारायणोऽपरः ।
[16]कुल्लुकास्त्रादिकं देवि विष्णुभेदा अपि प्रिये ॥ ७७ ॥

अन्नपूर्णा महेशानी विशालाक्षी महेश्वरि ।
का[17]माक्षी व[18]नराज्ञीति मन्त्रा लक्ष्म्यङ्गदेवताः ॥ ७८ ॥

मातङ्ग्या अङ्गमन्त्राश्च न[19]कुली च सरस्वती ।
मातङ्गी पादुका देवि लघुश्यामा च कामिनी ॥ ७९ ॥

वीरभद्रो मतङ्गश्च प्रम[20]दा मोहिनी परा ।
भोगेशो यक्षः संप्रोक्तो भुवनायां शृणु प्रिये ॥ ८० ॥

---

1 C °द्रूपा त° । 2 C काली°, SD कालिका° । 3 SD शिवे । 4 D °कं । 5 SC SD चण्डाली । 6 N °द्रयः, SB °प्रिया । 7 C च । 8 C °तनौ । 9 SD बौद्धे । 10 D नव चा° । 11 C °न्त्रो यत्नेन । 12 SC कथ्यन्ते परमेश्वरि । महालक्ष्म्यङ्गमन्त्राश्च । 13 C SC °नु° । 14 C D N SB SD °दा च । 15 C वि° । 16 SD omits two lines. 17 D कमलाक्षी । 18 D SA SC SD धन° । 19 SD omit नकुली च···मतङ्गश्च । 20 D °दो ।

शिवः शिवा विधाता च त्रिपुटा बटुकस्तथा ।
कुल्लुकापञ्चकं देवि पञ्चायतनमेव च ॥ ८१ ॥

गौरी श्रीरञ्जिनीमन्त्रो वि[1]द्याभेदाः सशक्तयः ।
लोकपालादिमनवो वाणीमन्त्रास्तथा प्रिये ॥ ८२ ॥

हयग्रीवः पिङ्गली च खड्गवा[2]रण एव च ।
एतेऽङ्गमन्त्राः संप्रोक्ताः सिद्धविद्याविधौ शृणु ॥ ८३ ॥

पुलिन्दिनी भैरवश्च उच्छिष्टगणपस्तथा ।
पिशाचग[3]णपो[4] देवि उच्छिष्टभैर[5]वोऽपरः ॥ ८४ ॥

मातङ्गी नकु[6]ली रत्नविद्या वाग्वादिनी तथा ।
महामधुमती देवि तथा कर्णपिशाचिनी ॥ ८५ ॥

एकवीरा च त्वरिता [7]ढुण्ढिराजो निशाकरः ।
अघोरः कुल्लुकानां च पञ्चकं परिकीर्तितम् ॥ ८६ ॥

श्रीभैरव्याश्चाङ्गमन्त्राः कथ्यन्ते शृणु पार्वति ।
गणपश्च तथा दुर्गा क्षेत्रपो दक्षिणाप्रियः[8] ॥ ८७ ॥

हयग्रीवेश्वरी विद्या विद्याभेदा महेश्वरि ।
बटुको भैरवः शम्भुः पञ्चानां पञ्चि[9]का तथा ॥ ८८ ॥

[10]रश्मिमण्डलषट्कं च विद्याप[11]ञ्चाशदेव च ।
धूमावल्यङ्गमन्त्राश्च वीरेशो बटुकः शिवः[12] ॥ ८९ ॥

प्रत्यङ्गिरा च शरभस्तथा पाशुपतं शिवे[13] ।
संहारास्त्रं कुक्कु[14]टी च तथा मर्कटिका शिवे ॥ ९० ॥

मा[15]रणत्वरिता विद्या कुल्लुकापञ्चकं शिवे ।
दशविद्याविधौ देवि क्रमादङ्गादि कीर्तितम् ॥ ९१ ॥

पूर्णाभिषेकयुक्तानां सर्वेषां जप इ[16]ष्यते ।
अन्येषामङ्गमन्त्राणां जपः संकीर्तितो मया ॥ ९२ ॥

---

1 D द्विविधा भेद° । 2 C °गणप, N SB °रावण । 3 D गा° । 4 SD °को । 5 C °वी । 6 C कुल्लुका । 7 C D N धुण्डि°, SA SC घूण्ढि°, SD घण्टा° । 8 C SC °ये । 9 SD °ञ्चकं । 10 C शिव° । 11 SD °ञ्चदशैव । 12 SD °वे । 13 SD चरेत् । 14 N घुघु°, C घघू°, D कुङ्कुदी, SC कुर्कुटी । 15 SA SC °णा । 16 C उच्यते, D SA SC ईष्यते ।

पूर्णाभिषेकसंयुक्तो यं यं मन्त्रं जपेच्छिवे ।
तमेव सिद्धं जानीयान्नात्र कार्या विचारणा ॥ ९३ ॥

पञ्चायतनप[1]क्षे तु तदङ्गद्वारदेवता ।
यथा गुरोर्दत्तमन्त्रा[2]स्तदेवाङ्गं प्रकीर्तितम् ॥ ९४ ॥

एवं दर्शनमार्गे तु द्वास्थमूर्तिस्थिता अपि ।
अर्धनारीश्व[3]रे देवि शिवशक्तिप्रभेदतः ॥ ९५ ॥

नृसिंहत्रिपुरायां तु तद्द्वयोक्ताङ्गदेवताः ।
श्रीमहाका[4]मसुन्दर्यां तद्द्वयोक्ताः प्रकीर्तिताः ॥ ९६ ॥

हयग्रीवे[5] च सुन्दर्यां तथैव शिवसुन्दरी ।
गोपालसुन्दरी विद्या तथैव कालसुन्दरी ॥ ९७ ॥

एतद्विद्याविधौ देवि तद्द्वयोक्ताङ्गदेवताः[6] ।
बालायोगात् पञ्चदशी तथैव षोडशी शिवे ॥ ९८ ॥

एतद्योगात् त्रिधा विद्या कीर्तिता परमे[7]श्वरि ।
श्रीलोकसुन्दरी दे[8]वि सैव वै स्पर्शसुन्दरी ॥ ९९ ॥

बालायुक्ता स्पर्शमयी ह्या[9]द्यन्तक्रमयोगतः ।
विद्यायुक्ता सुन्दरी तु पुमाद्य[10]न्तक्रमेण च ॥ १०० ॥

श्री[11]महाषोडशीयुक्ता महाचित्षोडशी परा ।
इति संक्षेपतः प्रोक्तं गुह्यका[12]ल्यां विशेषतः ॥ १०१ ॥

संकर्षणी सिद्धकाली कुब्जिका सुन्दरी तथा ।
श्रीमहासिद्धयोगेशी श्रीमत्सिद्धकरालिका ॥ १०२ ॥

प्रत्यङ्गिरा शेषिका च शेषमन्त्रोऽपि पार्वति ।
नवाम्नायादिमन्त्राश्च विज्ञेयाः कालिकामनौ ॥ १०३ ॥

न[13]ववक्त्रे महेशानि गुह्यकाल्यां महेश्वरि ।
कुब्जिका द्विविधा देवि सकला निष्कला [14]क्रमात् ॥ १०४ ॥

---

1 C D °यज्ञे; SC यज्ञेषु । 2 D °न्त्रं त° । 3 D °रो । 4 C N °राम°; D °वाम° । 5 N SB °वसुन्दर्यां च । 6 N °ताम् । 7 SC SD °श्वरी । 8 C विद्या । 9 D SA SC SD आ° । 10 C °न् यत्तु क° । 11 C omits three lines. 12 SC SD °ल्या । 13 SC पञ्च°; SD °चक्रं । 14 D °लाः शिवे ।

निष्कला चन्द्रव[1]क्त्रा स्यात् सकला षण्मु[2]खा मता ।
तथैव गुह्यकाली तु सकला निष्कला शिवे ॥ १०५ ॥

एकवक्त्रा कलाहीना दशवक्त्रा कलायुता ।
गुह्यकाल्याः परिज्ञानात् कादिहादिमतेश्वरः[3] ॥ १०६ ॥

महापा[4]शुपतेशी मा महाविद्या महाकला ।
संवर्तेशक्रमेणैव नवतत्त्वेश्वरी परा ॥ १०७ ॥

[5]कालनाथक्रमेणैव नवतत्त्वेश्व[6]री परा[7] ।
अद्वैतभावसंपन्ना श्रीमहागुह्यकालिका ॥ १०८ ॥

पीठवाणीप्रभेदेन शाम्भवानां च विंशतिः ।
[8]लिपिभाषाप्रभेदेन शाम्भवानां च विंशतिः ॥ १०९ ॥

इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

इति श्रीशक्तिसंगम[9]महातन्त्रराजे उत्तरभागे चतुर्थखण्डे श्रीमदक्षोभ्यमहोग्रतारासंवादे [विषयनिर्देशो] नाम प्रथमः पटलः ॥

---

1 D °युक्ता । 2 D समुखा । 3 D °रि । 4 SD °पशु° । 5 C omits this line. 6 C D N °श्वरा । 7 SC तथा । 8 C D omit this line. 9 N SA SB SC SD °मतन्त्रागमे प्रथमः पटलः ।

द्वितीयः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि पूर्वमुक्तं रहस्यकम् ।

श्रीशिव उवाच

रहस्यातिरहस्यं च कथ्यते शृणु पार्वति ॥ १ ॥

डामरद्वयमन्त्राश्च **उड्डीश**द्वयगोचराः ।
[1]तथाऽन्येऽपि महामन्त्राः [2]पूर्णदीक्षाविधौ शिवे ॥ २ ॥

अधिकारो भवेत्तेषां नात्र कार्या विचारणा ।
विद्यापीठनि[3]र्णयस्तु सोऽपि संकथ्यते शृणु ॥ ३ ॥

यत्र नोक्तं भवेत् पीठं शक्तिपीठं च तत्र वै ।
इदं शक्तिविधौ प्रोक्तं शैवे पञ्चाक्षरोद्भ[4]वम् ॥ ४ ॥

अष्टाक्षरोक्तं विष्णो तु प्रोक्तमेकाद[5]शाक्षरम् ।
गणेशे गदितं पीठं सूर्ये घृणिसमुद्भवम् ॥ ५ ॥

क्वचिद् धर्मादिपीठं च क्वचिन्नामादिसंभवम् ।
यत्र नोक्तं भवेत् पीठं [6]तत्क्रमः परिकीर्तितः ॥ ६ ॥

चान्द्रे स्वायम्भुवे चीने बौद्धे वैदिकपीठके ।
यत्र नोक्तं भवेत् पीठं निर्णयः [7]परिकीर्तितः ॥ ७ ॥

ताराकालीक्रमेणैव पीठं संकथ्यते शृणु ।
मेधा[8]दिपीठं वाक्सिद्ध्यै लक्ष्म्यादि कमला[9]श्रये ॥ ८ ॥

जया[10]श्रये जयापीठं ताराविद्याविधौ स्मृतम् ।
काल्याः पीठत्रयं देवि गुह्यकाल्यां निशाकरः ॥ ९ ॥

सुन्दर्यां वेदधा पीठं तारायां द्विविधं भवेत् ।
छिन्नायामेकरूपं तु भुवनायामपि प्रिये ॥ १० ॥

---

1 SD षडाम्नायद्वयमन्त्राश्च । 2 SB पूर्व° । 3 D नित्याया° । 4 SB °द्भवे । 5 D N SB SD °क्षरे स्वकम्; SA °क्षरं; स्वलम्; C °क्षरैककम् । 6 SA SC omit तत्क्रमः......भवेत् पीठं । 7 C N SB स प्रकी° । 8 SD °धापी° । 9 C SC °प्रिये; N °शये; SD स वै । 10 SD °यै वि° ।

धूम्रायामपि तथा मातङ्ग्यां द्विविधं भवेत् ।
सि[1]द्धविद्याविधौ देवि द्विविधं भैरवीमनौ ॥ ११ ॥

सुन्दरीपीठमाख्यातं धूम्रायामेकमेव च ।
कमलायां द्वयं पीठं शैवे त्रिविधमेव च ॥ १२ ॥

चतुर्विधं वैष्णवे स्यात् सौरे द्विविधमीरितम् ।
गाणपे पञ्चधा पीठम[2]न्योऽपि पीठविस्तरः[3] ॥ १३ ॥

शैवपीठं च बटुके स्वर्णेशे मृ[4]डभैरवे ।
वडवातले वीरभद्रे [5]चान्द्रे नामादिकीर्तनम् ॥ १४ ॥

स्वायम्भुवे हिंगुला[6]ख्ये पीठं शक्तिमयं मतम् ।
इति संक्षेपतः प्रोक्तं पर्यायनिर्णयं शृणु ॥ १५ ॥

आदौ कादिर्महेशानि हादिश्चैव तदुत्तर[7]म् ।
कादिहादिमतत्वेन देशानां द्विविधा गतिः ॥ १६ ॥

कादौ षट्पञ्चाशद्देशा हादावपि तथा प्रिये ।
तद्देशशक्तिसंयोगस्तद्राज्यमि[8]ति कीर्तितम् ॥ १७ ॥

तत्संगमजपेनैव तद्देशराज्यमाप्नुयात् ।
तत्रादौ कादिदेशाश्च कथ्यन्ते परमेश्वरि ॥ १८ ॥

अङ्गवङ्गौ कलिङ्गश्च कालिङ्गः केरलस्तथा ।
काश्मीरः कामरूपश्च महाराष्ट्रो[9]ऽन्ध्र एव च ॥ १९ ॥

सौराष्ट्रो द्रविडश्चैव तैलङ्गमलया[10]लकौ ।
[11]कार्णाटावन्त्यवैदर्भसर्पा(मर्वा)भीर[12](ाः) समालवाः ॥ २० ॥

चोलपाञ्चालकाम्बोज(ा) वैराट् पाण्ड्योविदेहभूः[13] ।
बाह्लीकश्च किरातश्च कैकटावन्त्यकौ तथा ॥ २१ ॥

ऐराकभोटान्तचीना महाचीनस्तथै[14]व च ।
नेपालः शी[15]लहट्टश्च गौडकोशलमागधाः ॥ २२ ॥

---

1 C omits this line. 2 D SA °न्ये°; SD °न्यत्र। 3 D SA °राः। 4 N °दु°। 5 SA SD चान्ते। 6 D N °राजे; SA SB SC SD °लाजे। 7 SD °त्तरः। 8 SA SC SD °मपि। 9 C SD °ड्र। 10 C °यं तथा; D °पाण्डवौ; N °पादुकौ; SA SC °पाण्डकौ; SB SD °यादकौ। 11 C omits this line. 12 D °सर्यातीय°। 13 C °कम्। 14 SA SC °था स्मरेत्। 15 D श्री°।

औत्कलाः कुन्तला हूणाः कोङ्कणः कै[1]कयस्तथा ।
शूरसे[2]नः कौरवाश्च सिंहलाश्च पुलिन्दकाः ॥ २३ ॥

कच्छसेवनम[3]द्राश्च सौ[4]वीरलाटबर्बराः ।
[5]मत्स्यःसैन्धव इत्येतत् षट्पञ्चाशत् प्रकीर्तिताः ॥ २४ ॥

कादिदेशाः समाख्याता हादिदेशान् शृणु प्रिये ।
अङ्गबङ्गकलिङ्ग(ा)श्च कालिङ्गः स्यात् सुवीरकः ॥ २५ ॥

[6]काश्मीरश्चैव काम्बोजः सौराष्ट्रो मगधस्तथा ।
महाराष्ट्रो मालवस्तु[7] नेपालः केरलस्तथा ॥ २६ ॥

चोलपाञ्चालगौडाश्च म[8]लयालश्च सिंहलः ।
द्रविडः कोङ्कणश्चैव कार्णाटो लाट एव च ॥ २७ ॥

[9]मलाटश्चैव पा[10]लाटः पाण्ड्यान्धकपुलिन्दकाः ।
हूणकौरवगान्धारविदर्भाः सविदेहकाः ॥ २८ ॥

बा[11]ह्लीकबर्बरौ देवि कै[12]कयः कोशलोऽपि च ।
कुन्तलश्च किरातश्च शूरसेनश्च सेव[13]नः ॥ २९ ॥

वना[14]टः टङ्कणश्चैव कोङ्कणो मत्स्यमद्रकौ ।
मै[15]डसैन्धवसिन्धूत्थाः पार्श्वकीकौ ततः स्मृतौ ॥ ३० ॥

यो[16]र्जालयवनौ देवि जलजालन्धसाल्वलाः ।
सिन्धु[17]श्च व[18]न्ध्यदेशश्च हादिपर्यायवाचकाः ॥ ३१ ॥

देशद्वयव्यव[19]स्था तु **पूर्वतन्त्रे** प्रकीर्तिता[20] ।
देशभेदं च विज्ञाय पर्यायक्रममाचरेत् ॥ ३२ ॥

पर्यायाः सप्त विख्यातास्तानहो वच्मि संशृणु ।
देशकालाम्नायविद्या दर्शनायतने तथा ॥ ३३ ॥

---

1 D SC SD के° । 2 D °नाः । 3 D SA SB SC SD °भ° । 4 D omits सौवीर...कालिङ्गः in the fourth line. 5 C omits this line. 6 C omits this line. 7 D SA SC SD °श्च । 8 D SA SC मालपाण्डश्च । 9 D भल्ला° । 10 C जाबालः; N SB पानायः । 11 C °ही° । 12 D °के° । 13 D श्येवलः; SA SC श्येवनः । 14 D SA SC SD °ला° । 15 C भै° । 16 C SC घो°; D SA SD यौ° । 17 C °धूत्थ° । 18 D SA SC वैद्य°; SD वैद्यनाथश्च । 19 C °विभागस्तु । 20 C °तः ।

तथागमप्रभेदेन पर्यायसप्तकं भवेत् ।
यस्मिन् देशे य आचारस्तद्देशक्रममार्गतः ॥ ३४ ॥

तत्र तन्त्राणि कानि स्युस्त[1]त्र मार्गः कथं स्मृतः ।
एतज्ज्ञानं महेशानि ज्ञात्वा यत्नेन पार्वति ॥ ३५ ॥

तत्तन्त्रसंख्यामार्गेण सम्प्रदायक्रमेण च ।
यो[2]जयेत् परमेशानि देशपर्यायविच्छिवः[3] ॥ ३६ ॥

कस्मिन् काले तु का[4] विद्या कथं जा[5]ता किमात्मिका ।
तत्तन्त्राचारयोगेन कालपर्यायवान् भवेत् ॥ ३७ ॥

कस्याम्नाये किमाचारः किं रूपं किं विशिष्टता ।
कति[6] तन्त्रादिसंख्या च तथैव यामलादिकम् ॥ ३८ ॥

आम्नायाख्यस्तु पर्यायो ह्येतद्विज्ञानगोचरः ।
का विद्या वा किमाचारा कलौ किं वा स्व[7]रूपिणी ॥ ३९ ॥

त्रैविध्यं किं युगत्वेन किंगुणा किंविशिष्टता ।
विद्यापर्याय इत्युक्तो दर्शनाख्यं शृणु प्रिये ॥ ४० ॥

किं दर्शनं कथं किं[8]वा किमाचारात्मकं भवेत् ।
कानि तन्त्राणि विद्याश्च एतज्ज्ञानं महेश्वरि ॥ ४१ ॥

[9]दर्शनाख्यस्तु पर्यायः प्रोक्त आयतनं शृणु ।
किमायतनकं देवि [10]कथं जातं महेश्वरि ॥ ४२ ॥

कियत्[11] तन्त्राणि देवेशि आचारः कीदृशो भवेत् ।
अयमायतनाख्यो हि पर्यायः परिकीर्तितः ॥ ४३ ॥

अथागमाख्यपर्यायं शृणु यत्नेन पार्वति ।
को वागमः कथं जातः किमाचारः कथं भवेत् ॥ ४४ ॥

के मन्त्राः केऽङ्गमन्त्राश्च पारम्पर्यं कथं भवेत्[12] ।
कियत्[13] तन्त्राणि का सिद्धिरेतज्ज्ञानं च यत्र वै ॥ ४५ ॥

---

1 C °न्त्र° । 2 C जपेत्तु । 3 D °द्वरः; SD °वे । 4 N विद्या या । 5 SC ज्ञाता । 6 D कानि तन्त्राणि । 7 SB omits स्वरूपिणी...किं वा in the fourth line. 8 SC किं च । 9 SD omits two lines. 10 D omits कथं...पर्यायं in the fourth line. 11 SD °द्‌य° । 12 C N चरेत् । 13 D SD किं मन्त्राणि च ।

अयमागमपर्यायः कादिहादिमते भवेत् ।
पर्याये कादिहादौ तु क्वचिद् भेदोऽस्ति पार्वति ॥ ४६ ॥
सर्वमेतन्महेशानि रहस्यातिरहस्यकम् ।
कथ्यते शृणु देवेशि राजयो[1]गोत्तरं शिवे ॥ ४७ ॥
राजयोगं प्रवक्ष्यामि येन कालीसमो भवेत् ।
प्रतिदेशं महेशानि षट्त्रिंशद् [2]वृत्तयः स्मृताः ॥ ४८ ॥
षट्त्रिंशद्गु[3]णनं कृत्वा अष्टादशश[4]ती भवेत् ।
कादिहादिक्रमेणैव शक्तिबाहुल्यमीरितम् ॥ ४९ ॥
[5]अनुक्रमेण देवेशि अथाङ्कुरितयौवना ।
आप्रौढान्तं महेशानि चित्रिण्यादिक्रमेण च ॥ ५० ॥
दिव्यादिव्यक्रमेणैव भेदबाहुल्यमीरितम् ।
पीठानि सरितश्चैव सागराः पर्वतार्णवाः ॥ ५१ ॥
तीर्थानि सकलान्य[6]त्र यथायोगेन योजयेत् ।
नामरूपगन्धभेदैर्विद्याभेदादिकं चरेत् ॥ ५२ ॥
सुन्दरी रमणी रामा ह्लादिनी चञ्चलेक्षणा ।
कटाक्षताडिनी साध्वी सर्वमन्त्रविशारदा ॥ ५३ ॥
आनन्दामृतकल्लोला यद्दे[7]शे पीठसंचयः ।
अन्यत्र पीठमेकं तु शक्तौ ब्रह्माण्डपीठकम् ॥ ५४ ॥
जीवपीठं महापीठं रा[8]जसिंहासनं परम् ।
शक्त्यालापी शक्तिभोगी शक्तिचुम्बनतत्परः ॥ ५५ ॥
शक्त्यानन्दी शक्तिपूजी शक्तिध्यानपरायणः ।
हसन् वदन् स्पृशन् गायन् धावन् क्रीडारसोद्यतः ॥ ५६ ॥
[9]नानाविनोदवाक्यैश्च नानानन्दकरैः शिवे ।
शक्तिमध्ये सदास्थेयं तामालोक्य जपं चरेत् ॥ ५७ ॥
दशन् चुम्बंस्तथालिङ्ग्य संमर्द्य मथनं परम् ।
आन्दोलिका नदी वाटी नौकायात्रा तथोज्जटे ॥ ५८ ॥

---

1 N °गाक्षरं; C °राजो° । 2 SD गुणितं कुरु । 3 SD °णितं । 4 N °तो । 5 C omits three lines. 6 N SB मन्त्र° । 7 SD °ह° । 8 D तत्र । 9 C omits this line.

लोकहीने शक्तिसंघे यत्र कुत्राप्यचूडके ।
पञ्चमुद्रां चरन् देवि गानमध्ये विशेषतः ॥ ५९ ॥

अहो धन्यवतां मध्ये न धन्यस्तादृ[1]शः क्वचित् ।
स राजा स च देवे[2]ज्यः स एव च सदाशिवः ॥ ६० ॥

स एव दे[3]वीरूपो हि शक्तिज्ञाता[4] ममार्थदः ।
सम्राड् भोक्ता स एवात्र स गन्धर्वाधिकः कलौ ॥ ६१ ॥

सिद्धिदाता [5]ऋद्धिदाता स एव शक्तिदर्शकः ।
वेश्यामध्ये सदा स्थेयं राज्यलक्ष्मीस्तु सा परा ॥ ६२ ॥

[6]राज्यलक्ष्मीर्मोक्षलक्ष्मीः कीर्तिलक्ष्मीस्तु सा परा ।
वेश्यामण्डलगो भूत्वा यं यं मन्त्रं जपेच्छिवे ॥ ६३ ॥

शिवतुल्यो नरो भूयान्नात्र कार्या विचारणा ।
वेश्या सप्तविधा प्रोक्ता यथायोगक्रमेण च ॥ ६४ ॥

राजवेश्या नृत्यवे[7]श्या तीर्थवेश्या तथाऽपरा ।
गुप्तवेश्या देववेश्या ब्रह्मवेश्या मताऽपरा ॥ ६५ ॥

ग्रामवेश्या सप्तमी स्याद् वेश्या सप्तविधा भवेत् ।
वेश्यासमाजः कर्तव्यः पूजनं तु विशेषतः ॥ ६६ ॥

दा[8]नं शय्या भूषणानि तासां दद्याद् दिने दिने ।
सर्वदा नृत्यगानस्थः कालीं तारां प्रपूजय[9]न् ॥ ६७ ॥

ईदृग्विधं महाभक्तं कदा पश्यामि पार्वति ।
शक्तियोगस्तु कठिनो दिव्ययो[10]गो यथेच्छया ॥ ६८ ॥

जननी तस्य वै धन्या पिता तस्य महेश्वरः[11] ।
दाता कालीसमो लोके वेदे[12] तारासमो भवेत् ॥ ६९ ॥

राज्ये श्रीसुन्दरीतुल्योऽनुग्रहे छिन्नमस्तका ।
वि[13]ग्रहे बगलातुल्यो मातङ्गी तु वशीकृतौ ॥ ७० ॥

सर्ववाञ्छामयी सिद्धिस्तस्य हस्तगता सदा ।
भुवनासदृशः शान्तौ क्रोधे धूमावतीसमः ॥ ७१ ॥

---

1 D SA SB SC SD °स्त्वी° । 2 SD °शः । 3 D °व° । 4 N °त° । 5 N शक्ति° । 6 C SD omit this line. 7 N SA SB SC SD °पात्रं । 8 C N यानं । 9 SC °येत् । 10 D °गस्त° । 11 SD °रि । 12 C °दगान° । 13 SD निग्रहे ।

क्रीडायां कालिकातुल्यो वाञ्छायां सुमुखीसमः ।
दातृत्वे कमला साक्षात् सत्ये श्रीका[1]लिका यथा ॥ ७२ ॥
ज्ञाने परशिवः प्रो[2]क्तो ब्रह्माण्डनिर्मितौ शिवे ।
राजराजेश्वरीतुल्यः कर्षणे पायसप्रिया ॥ ७३ ॥
यथा प्रोक्ता तु त्रैका[3]ल्ये महापद्मावती यथा ।
ईदृशः साधको देवि शक्तिज्ञानात् क्षणाद् भवेत् ॥ ७४ ॥
अहो शक्तिस्वरूपस्य ज्ञाता कोऽस्ति महीतले ।
तत्रापि वेश्यालापी तु साक्षात् तारासमः कलौ ॥ ७५ ॥
मुख्यः कुण्डलिनीश[4]स्तु योगरूपो निरञ्जनः ।
ब्रह्मानन्दो महेशानि कला सप्तदशी तु सा ॥ ७६ ॥
तन्मार्गशक्तिभोगार्थं शक्तियोगः प्रकीर्तितः ।
शक्तियोगाकर्षणार्थं तासां वश्यार्थमेव च ॥ ७७ ॥
वेश्यापीठं दिव्यपीठं मया निगदितं शिवे[5] ।
वेश्यापीठं द्रव्यसाध्यं द्र[6]व्यं विभुवरस्य च ॥ ७८ ॥
विभुत्वं नरनाथत्वं महाराज्यं भवेच्छिवे ।
महाराजो नरो[7] भूयान्निःस्पृहो धार्मिकः कृती ॥ ७९ ॥
तत्पीठं तु महेशानि कुमारीपूजनेन तु ।
कुमारी सकलारामा र[8]म्या रमणसुन्दरी ॥ ८० ॥
कुमारीद[9]र्शनेनैव ब्रह्माण्डं पूजितं भवेत् ।
कुमारीपूजनफलं महाराज्यं [10]च वर्षतः ॥ ८१ ॥
महाराज्यफलं देवि लक्ष्मीत्रितयवान् सुखी ।
श[11]क्रकर्ता भक्तभक्तः सर्वदा द्वि[12]जपूजकः ॥ ८२ ॥
गुरुभक्तो विनीतश्च धीरोदा[13]त्तो महाशयः ।
ईदृग्विधो महाराजो वेश्यामण्डलवान् भवेत् ॥ ८३ ॥
वेश्यातोषणपुण्येन शक्तिला[14]भी नरो भवेत् ।
दशाष्टशक्तयः प्रोक्ता विद्यामातृक्रमेण च ॥ ८४ ॥

---

1 D °कमला । 2 SD ख्यातो । 3 SD °लोक्ये । 4 N SA SB SC SD °शम्भु° । 5 D °वम् । 6 C विश्वं प्र° । 7 D न यो भूपो । 8 SD वामा । 9 CD °पूज° । 10 SA SC तु; C °ज्यावरोधकः । 11 D SD स च । 12 C बी° । 13 D दाता । 14 D °पी ।

दशाविद्या मातृकाऽष्टौ त[1]द्रूपसामरस्यवान् ।
अष्टाष्टकमिदं प्रोक्तमिदमेव त्रिधेरितम् ॥ ८५ ॥

ब्रह्मरूपधरे देवि कृपयाहर विग्र[2]हम् ।
इत्यादि पूजने नाम[3] यत्प्रोक्तं परमेश्वरि ॥ ८६ ॥

अष्टाष्टकप्रभेदेन गदितं नीलशारदे ।
तत्र तदु[4]क्तिमाचर्य सर्वसिद्धीश्वरो भवेत् ॥ ८७ ॥

अष्टशक्तौ महेशानि या[5] शक्तिः परिनिष्ठिता ।
सा सिद्धिस्तस्य वै [6]भूयान्नात्र कार्या विचारणा ॥ ८८ ॥

उत्तरोत्तरभावस्य सि[7]द्ध्यर्थं परमेश्वरि ।
रूपगन्धप्रभेदेन दशाविद्याः प्रकीर्तिताः ॥ ८९ ॥

मातापितृकृतं नाम त्यक्त्वा नाम यथार्थतः ।
नाम दद्यान्महेशानि ता[8]सु देवत्वभावना ॥ ९० ॥

तत्र विकारयुक्तश्चे[9]त् तत्क्षणान्नश्यति ध्रुवम् ।
[10]अथाविकारसिद्ध्यर्थम[11]क्षरन्त्यां प्रपूजयेत् ॥ ९१ ॥

अक्षरन्ती कुमारी च क्षरन्ती तरुणी मता ।
कामादिविषयैर्व्याप्ते मायामोह[12]प्रवेष्टिते ॥ ९२ ॥

इन्द्रियाणां निग्रहो हि कलौ कस्य भविष्यति ।
अविकारप्रसिद्ध्यर्थं कुमारीं पूजयेच्छिवे ॥ ९३ ॥

उत्तरोत्तर[13]वर्षाणां क्रमेण नवचण्डिका[14]म् ।
मातृकाष्टक्रमेणैव दशविद्याक्रमेण च ॥ ९४ ॥

अष्टकन्याजातिमार्गात्[15] कुलाकुलक्रमेण च ।
पञ्च[16]चक्रक्रमेणैव पञ्चाशत्पीठयोग[17]तः ॥ ९५ ॥

नाम दद्यान्महेशानि तद्भावे[17]न प्रपूजयेत् ।
अनन्यभावनाशक्तः पूजयेद्धि कुमारिकाम् ॥ ९६ ॥

---

1 D न रू°। 2 CN विघ्नतः। 3 C °नाथ। 4 D °द्भक्ति°। 5 SD त्रि°। 6 SC वेश्यानां ना°। 7 C °द्धिदं। 8 CN वासुदे°। 9 N SC SD °श्च। 10 D त°। 11 DN SA SB SC °र्थं न; C मक्षराद्यं। 12 CN °हैः। 13 D °र्णानां। 14 D °का; C °वर्णिका; N °वञ्चिका। 15C °र्गो कु°। 16 SD अष्ट°; N °वक्त्र°। 17 D °मार्गतः। 18 C °वे तत्।

कुमारीपूजनादेव त्रैलोक्यं करमध्यगम् ।
पूजनेन कुमारीणां तत्त्वज्ञानं प्रजायते ॥ ९७ ॥

तत्त्वज्ञाने समुत्पन्ने वेश्यापूजनवान् वि[1]भुः ।
क्रीडालोला विनोदार्ता वृद्धानामपि मोहिनी ॥ ९८ ॥

ईदृग्विधा[2] या हि बाला ह्युत्पत्तिर्योनिलिङ्गवत् ।
ईदृग्विधो[3] निग्रही यः स सुरासुरपूजितः ॥ ९९ ॥

यासां दर्शनमात्रेण मुनयो मोहसंगताः ।
तासु तेषु (तासु) विरक्तो यः स [4]च शक्ति[5]प्रपूजकः ॥ १०० ॥

अत्र चेत् क्षरणं नास्ति क्षरणं नास्ति भूतले ।
ततः शक्त्याः सदा पूजा कर्तव्या परमेश्वरि ॥ १०१ ॥

नामरूपादि गन्धादि यदि स्यात् परमेश्वरि ।
सिद्धविद्या तु सा प्रोक्ता नात्र कार्या विचारणा ॥ १०२ ॥

सिद्धिसोपानमेतद्धि गदितं नीलशारदे ।
शक्त्या व्याप्तमिदं सर्वं जगदेतच्चराचरम् ॥ १०३ ॥

तया यदुक्तं देवेशि तदेव कारयेत् [6]प्रिये ।
योगं कु[7]र्विति चेदुक्तं तदेव च समाचरेत् ॥ १०४ ॥

अन्यथा कुरुते यस्तु तस्य पातो भविष्यति ।
रूपं दृष्ट्वा तु प्रणमेद् रूपं परमदुर्लभम् ॥ १०५ ॥

रूपं रूपं परंरूपं रूपं ब्रह्म सनातनम् ।
रूपे रूपे समुत्पन्ने तारारूपः स्वयं भवेत् ॥ १०६ ॥

रूपमध्ये वसे[8]न्नित्यं न रूपं भोगयेत् स्वयम् ।
भोगरूपं स्वयं चेत्स्याद् रूपभोगं समाचरेत् ॥ १०७ ॥

रागतो नहि कर्तव्यं क[9]र्तव्यं निस्पृहेच्छया ।
नाना विद्यास्वरूपाणि यथा तिष्ठन्ति पार्वति ॥ १०८ ॥

तथा शक्तिस्वरूपाणि बालतारुण्यवृद्धता ।
रूपगन्धजातिभेदास्त्रि[10]धा भेदाः प्रकीर्तिताः ॥ १०९ ॥

---

1 SD भवेत् । 2 N SC SD °घे यो । 3 C °धानसहितः । 4 C °र्वं° ।
5 SD °क्ति प्रपूजयेत् । 6 C °च्छिवे; SA SC SD प्रियम् । 7 SA SC SD कुर्वीत ।
8 N °स° । 9 N °र्मैवत्रि° । 10 N SA SB SC SD द्विधा ।

स्वयमेव शिवो देवि मायामोहेन मोहितः ।
अमोहितः शिवः प्रोक्तः सर्वा विद्याः प्रकीर्तिताः ॥ ११० ॥

अज्ञानान्मानुषी योनिः क[1]ल्प्यते परमेश्वरि ।
ज्ञानमासाद्य देवेशि कालीरूपं जगत्त्रयम् ॥ १११ ॥

अहो शक्तिसमालोकः सालोकः[2] परिकीर्तितः ।
चतुर्विधापि मुक्तिर्हि नीवीमुक्तौ प्रतिष्ठि[3]ता ॥ ११२ ॥

शक्तिः शक्तिः पुनः शक्तिः शक्तिः शक्तिः पुनः पुनः ।
वेश्या वेश्या पुनर्वेश्या वेश्या वेश्या पुनश्च[4] सा ॥ ११३ ॥

कुमारी च कुमारी च कुमारी च कुमारिका ।
महा[5]राज्यं महाराज्यं महाराज्यमितोऽपि किम् ॥ ११४ ॥

हसत् जल्पन् प्रधावन् वा निद्राणः[6] संगलोलुपः ।
तया सह प्रजप्तव्यं तारारूपाप्तये ध्रुवम् ॥ ११५ ॥

इतिः संक्षेपतः प्रोक्तं तद्योगः कथ्यते शृणु ।

इति श्रीशक्तिसंगममहातन्त्र[7]राजे उत्तरभागे चतुर्थखण्डे श्रीमदक्षोभ्यमहोग्रतारासंवादे [विद्यापीठनिर्णयो] नाम द्वितीयः पटलः ॥

---

1 SC SD कल्पते । 2 D °क्यः । 3 N SA SB SC SD °ष्ठति । 4 SD °नः पुनः । 5 SD वेश्या° । 6 CD °लुः । 7 N SA SB SC SD °तन्त्रे तारासोपाने द्वितीयः पटलः ।

तृतीयः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि पू[1]र्वं संसूचितं च यत् ।
तन्मे कथय सिद्धे[2]श यद्यहं तव वल्लभा ॥ १ ॥

श्रीशिव उवाच

रहस्यमपि ते देवि कथ्यते शृणु साम्प्रतम् ।
आलोक्य प्रजपेद् देवि दिवारात्रं महेश्वरि ॥ २ ॥

दूरदृष्टिमयी सिद्धिस्तस्य हस्तगता सदा ।
संस्पर्श्य प्रजपेल्लक्षं द्युमणित्वं प्र[3]गच्छति ॥ ३ ॥

हसन् जपेत्त[4]या नित्यं सर्वकालमतन्द्रितः ।
महावाक्सिद्धिमाप्नोति राजराजेश्वरो भवेत् ॥ ४ ॥

वदंस्त[5]या जपेल्लक्षं महाक[6]विव[7]रप्रदः ।
धावंस्त[8]या जपेद्देवि दशसाहस्रमादरात् ॥ ५ ॥

मासमात्रप्रयोगेण पादुकासिद्धिमाप्नुयात् ।
[9]सोपानारोहणं कृत्वा तया सह महेश्वरि ॥ ६ ॥

प्रजपेन्मासषट्कं हि खेचरीसिद्धिमाप्नुयात् ।
दोलास्थितां समालोक्य स्पृश्यालिङ्गय च चुम्ब्य[10] च ॥ ७ ॥

हसन् मन्त्रं जपेद्यो हि षडैश्वर्यं क्रमाद् भवेत् ।
स्ना[11]नपीठगतां वीक्ष्य जलक्रीडां समभ्यसन् ॥ ८ ॥

जपेन्महेशतुल्यः स्यात् काव्यं भाषामयं भवेत् ।
दिवा पश्यन् जपेत्तारां विकाररहितः शिवे ॥ ९ ॥
[12]सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा ।
दिवा हास्यर[13]तां वीक्ष्य योगिनीमेल[14]नो भवेत् ॥ १० ॥

---

1 N SD °र्वं° । 2 SC देवेश । 3 CN प्रय°; D स ग° । 4 CN °त्तु यो । 5 CN °स्तु यो । 6 D SA SC °सिद्धि° । 7 SC °यशः° । 8 CN SD °स्तु यो । 9 SD omits two lines. 10 N बुध्य । 11 C DN SA SC SD स्थान° । 12 C omits two lines. 13 D °वतीं । 14 D SA SD °नं ।

तया संयोगवार्तायां जपे[1]न्निशि दिने दिने ।
लक्ष्मीयोगो भवेद्देवि नात्र कार्या विचारणा ॥ ११ ॥

तया संकेतवार्तां तु कृत्वा चैव जपं चरेत् ।
महाकामसमो भूयान्नात्र कार्या विचारणा ॥ १२ ॥

प्रसुप्तां तां समालोक्य जपेद्विद्यामनन्यधीः ।
कामरूपसमो देवि शिवरूपो भवेन्नरः ॥ १३ ॥

करौ वीक्ष्य जपेद्देवी व[2]रदां तां प्रपश्यति ।
पादौ वीक्ष्य जपेत्तारां नखचन्द्र[3]रसी नरः ॥ १४ ॥

सर्वकालं जपेद्देवि मासात् सिद्धीश्वरो भवेत् ।
ताम्बूलपूरितमुखीं वीक्ष्य यत्नेन संजपेत् ॥ १५ ॥

स[4]वैश्वर्यसमायुक्तः कामिनीकर्षको भवेत् ।
वीटिकाकरणे युक्तां दृष्ट्वा यत्नेन संजपेत् ॥ १६ ॥

वीटिकादाननिरतां वीक्ष्य रात्रौ जपेच्छिवाम् ।
शापानुग्रहसाम[5]र्थ्यं द्वितीयो बटुको भवेत् ॥ १७ ॥

[6]भोजनस्थां च संवीक्ष्य तत्र कालीं जपेच्छिवे ।
कालिका वरदा तस्य मासमात्रप्रयोगतः ॥ १८॥

अभ्यङ्गस्थां च संवीक्ष्य तत्र त्रिशतमादरात् ।
जपेद्यत्नेन देवेशि सूर्यतुल्यो नरो भवेत् ॥ १९ ॥

तां पाकस्थां च संवीक्ष्य कालीं तारां च यो[7] जपेत् ।
धनधान्यसमृद्धिः स्यान्नात्र कार्या विचारणा ॥ २० ॥

क्रीडासक्तां च संवीक्ष्य स[8]र्वकालमसंख्यकम् ।
सर्वसिद्धिमवाप्नोति देवानामपि दुर्लभाम् ॥ २१ ॥

नानास्थलस्थां संवीक्ष्य जपध्यानं समाचरेत् ।
समाधीनां कोटिसंख्या तस्य [9]पादगता भवेत् ॥ २२ ॥

---

1 D °त्यं । 2 SD omits वरदां…देवि in the third line. 3 D SD °न्द्रावली । 4 SD omits two lines. 5 CN SA SC °र्थ्यौ । 6 SD omits two lines. 7 SD योऽर्चयेत् । 8 D SA सर्वं । 9 SD हस्त° ।

मुखं वीक्ष्य जपेल्लक्षं महानीलसरस्वतीम् ।
नासां वीक्ष्य जपेन्मन्त्रं किन्नरादधिको भवेत् ॥ २३ ॥
नेत्रे[1] कर्णे च संवीक्ष्य स्वयमन्योन्यतोऽपि वा ।
दूरश्रुतिर्दूरदृष्टिस्तस्य हस्तगता भवेत् ॥ २४ ॥
हास्यं वीक्ष्य जपेल्लक्षं तारा[2]पतिसमो भवेत् ।
दन्तान् वीक्ष्य जपेन्मन्त्रं मासमात्रं निरन्तरम् ॥ २५ ॥
महायक्षी तस्य हस्ते सर्वदा सुव्यवस्थिता ।
शृङ्गारोद्युक्तहृदयां वीक्ष्य यत्नेन संजपेत् ॥ २६ ॥
महामधुमती सिद्धिस्तस्य हस्ते व्यवस्थिता ।
पर्वतौ वीक्ष्य संमर्द्य जपेल्लक्षम[3]तन्द्रितः ॥ २७ ॥
चिन्तामणिसमो भूयान्नात्र कार्या विचारणा ।
हृदयं वीक्ष्य च जपेत् त्रिसूत्रमण्डलं तथा ॥ २८ ॥
प्रजपेत् परमेशानि त्रिशक्तिसदृशो भवेत् ।
जङ्घां वीक्ष्य जपेद्देवि कालिकावरमाप्नुयात् ॥ २९ ॥
गुल्फौ वीक्ष्य जपेन्नित्यं दिक्सहस्रमतन्द्रितः ।
राजराजसमो भूत्वा त्रैलोक्यविजयी भवेत् ॥ ३० ॥
नानाविनोदसौख्यैश्च संस्थितां वीक्ष्य पार्वति ।
जपेदसंख्यं मासेन सर्वसौ[4]भाग्यमाप्नुयात् ॥ ३१ ॥
वस्त्राच्छादनसंयुक्तां तारां छिन्नां च कालिकाम् ।
यो जपेत् परमेशानि द्वितीया तारिणी भवेत् ॥ ३२ ॥
रजस्वलां च तां ज्ञात्वा विनोदेन जपं चरेत् ।
महाराजपदं भूयाल्लोकाग्रे न[5] पलायते ॥ ३३ ॥
रजस्वलां च संवीक्ष्य जपेद्यत्नेन पार्वति ।
महाकविवरो भूत्वा देवीतुल्यो नरो भवेत् ॥ ३४ ॥
तस्याश्चक्रं च संवीक्ष्य जपेद्दिनचतुष्ट[6]यम् ।
सर्वसिद्धीश्वरो भूत्वा सिद्धिदातृत्वमाप्नुयात् ॥ ३५ ॥

---

1 SD °त्र । 2 C °म° । 3 D SC SD °नन्यधीः । 4 N °सौख्यमवा° । 5 D ना° । 6 CN °ये ।

त[1]च्चक्रे तु मुखं दत्त्वा जपेन्नित्यं नि[2]यन्त्रितः ।
कालीरूपो नरो भूयात् सुन्दरी सैव कीर्तिता[3] ॥ ३६ ॥

तस्याश्चक्रं लिहन् देवि जपेन्मां [4]ध्याय यत्नतः ।
शतावधानसामर्थ्यः साधको भवति ध्रुवम् ॥ ३७ ॥

तया सह प्र[5]भुञ्जानो जपेद् यत्नेन वै मनुम् ।
षष्टिसिद्धीश्वरो भूयान्नात्र कार्या विचारणा ॥ ३८ ॥

तस्योच्छिष्टं स्वयं भुञ्जन् स्वस्य तस्यै समर्प[6]यन् ।
प्रजपेत् परमेशानि [7]महावि[8]भुवरो भवेत् ॥ ३९ ॥

तस्या मनोगतं कुर्वन् जपेद् यत्नेन पार्वति ।
दृष्टिवे[9]धी भवेद्देवि विपरीता[10] यदा भवेत् ॥ ४० ॥

तदा जपं[11] प्रकुर्वीत स एव कालिका स्वयम् ।
शिवं शिवामुखे दत्त्वा प्रम[12]भ्य बहुवारकम् ॥ ४१ ॥

जपेद् यत्नेन देवेशि महादेवाधिको भवेत् ।
तस्या वेशं स्वयं कृत्वा स्ववेशं [13]तत्र कारयेत् ॥ ४२ ॥

संयोगीभूय जप्तव्यं सर्वकामार्थसिद्धये ।
स्वमुखे × × × दत्वा निशि जप्यात् सदाशिवः ॥ ४३ ॥

स्वमस्तकं च तत्पा[14]दौ दत्वा यत्नपरो भवेत् ।
जपं तत्र प्रकुर्वीत देवीध्यानपुरःसरम् ॥ ४४ ॥

महाकालीसमो भूत्वा दिव्यौघसदृशो भवेत् ।
सुप्त्वा तस्याः समं देवि सर्वकालं जपेच्छिवे ॥ ४५ ॥

सि[15]द्धानपि च धिक्कृत्य वरदाता नरो भवेत् ।
तस्या हस्तौ करे कृत्वा दशलक्षं जपेच्छिवे ॥ ४६ ॥

वरदानत्वमाप्नोति कटाक्षदर्शनादपि ।
तस्या हस्तेस्व × × च दत्वा यत्नेन संजपेत् ॥ ४७ ॥

---

1 SD तस्याश्चक्रे । 2 SD निजान्वितः । 3 D SB °तः । 4 D SC SD °न्मध्यान° । 5 N सुभुञ्जन् वै; D SA SB CS SD प्रभुञ्जन् वै । 6 D SA SC SD °येत् । 7 SD नात्र कार्या विचारणा । 8 D °वित्त° । 9 SD °भेदी; C °वेशी । 10 SC °तप्रदा; C स° । 11 CN SA °पः प्रकर्तव्यः । 12 D प्रणम्य । 13 D SA SC SD तस्य । 14 D SA तस्यादौ । 15 CD omits two lines.

ख[1]ङ्गसिद्धिमवाप्नोति नात्र कार्या विचारणा ।
तस्या ×× करे कृ[2]त्वा निशि जप्याद् दिने दिने ॥ ४८ ॥

कालं धिक्कृत्य देवेशि मृतसंजीव[3]नीं लभेत् ।
×× नासां प्रदत्त्वा तु प्राणायामक्रमेण तु[4] ॥ ४९ ॥

त्रिसहस्रं जपेन्नित्यं मासमात्रं महेश्वरि ।
त्रिकालज्ञो नरो भूयान्नात्र कार्या विचारणा ॥ ५० ॥

स्वजिह्वां ××मध्ये तु दत्त्वा प्रतिदिनं जपेत् ।
×× यन्त्रं तु संचिन्त्य साङ्गं सावरणं प्रिये ॥ ५१ ॥

तत्र ध्यात्वा क्षिपे×× सम्यक् संम[5]र्द्य पार्वति ।
नवनीतं भवेद्यावत्तावत् संम[6]र्द्य यत्नतः ॥ ५२ ॥

तत्र यन्त्रं विलिख्याथ जिह्वां तत्र निधापयेत् ।
तद्रसं विलिहन् देवि जपेदयुतमादरात् ॥ ५३ ॥

वर्षमात्रप्रयोगेण त्रिकालज्ञो नरो भवेत् ।
अश्रुतानपि वेदादीन् समस्तान् पाठयेदपि ॥ ५४ ॥

मूकान् विवादयेद् देवि वृक्षानपि विवा[7]दयेत् ।
सर्वज्ञः साधको भूत्वा कालीरूपस्त्रिवर्षतः ॥ ५५ ॥

श्मशानस्थो महास्व[8]स्थो मुक्तकेशो दिगम्बरः ।
अर्कपुष्पसहस्राणि स्वपुष्पाक्तानि कारयेत् ॥ ५६ ॥

प्रत्येकं प्र[9]जपेत्तानि विद्याध्यानपरः सुधीः ।
पृथ्वीपतिसमो भूत्वा त्रैलोक्यविजयी भवेत् ॥ ५७ ॥

स्वयम्भुवाक्तं य[10]च्चक्रं तच्च ध्यात्वा महेश्वरि ।
पुरतः स्थाप्य यत्नेन जपेत् तद्गतमानसः ॥ ५८ ॥

गन्धर्वाधिपतिर्भूत्वा कवित्वामृतसागरः ।
तस्य वक्त्रे [11]वसेन्नित्यं महा[12]श्रुतिधरो भवेत् ॥ ५९ ॥

---

1 D सर्गं° । 2 D दत्वा । 3 D SC °विनीं । 4 D च । 5 N °ध्य । 6 N °ध्य । 7 D °दार° । 8 N °च्छो । 9 D पूजये° । 10 C SB °चोक्तं । 11 C भवे° । 12 C सहस्रश्रुतिगो ।

[1]सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥ ६० ॥

सूर्यास्तं च समारभ्य सूर्यास्तं यावदेव तु ।
तावज्जप्त्वा निरातङ्कः सर्वसि[2]द्धीश्वरो भवेत् ॥ ६१ ॥

सूर्योदयं समारभ्य यावदस्तमयं भवेत् ।
तावद्भक्त्या ज[3]पेद् देवि सर्वसिद्धीश्वरो भवेत् ॥ ६२ ॥

सूर्यास्तं च समारभ्य यावत् सूर्योदयो भवेत् ।
तावज्जपेन्महेशानि सर्वसिद्धीश्वरो भवेत् ॥ ६३ ॥

शरत्काले चतुर्थ्यादिनवम्यन्तं महेश्वरि ।
होमरूपां पुरश्चर्यां कुर्यात् सिद्धीश्वरो भवेत् ॥ ६४ ॥

अथ तर्पणरूपां च पुरश्चर्यां ब्र[4]वीमि ते ।
दुग्धेना[5]सवतोयेन रक्तैर्मज्जाभिरेव च ॥ ६५ ॥

मधुना गन्धतोयेन रक्तधाराभिरेव च ।
केवलं शुद्धतोयस्य तर्पणेन महेश्व[6]रि ॥ ६६ ॥

तथा मार्जनरूपां च पुरश्चर्यां चरन् शिवे ।
ब्राह्मणान् कुमारिका भोज्य ज[7]पात् सिद्धीश्वरो भवेत् ॥ ६७ ॥

पूजारूपां पुरश्चर्यां केचिदिच्छन्ति तान्त्रिकाः ।
शरत्काले चतुर्थ्यादिनवम्यन्तं म[8]हेश्वरि ॥ ६८ ॥

नित्यकृत्यं तथा पूजां दिवा कृत्वा निशामुखे ।
षट्सहस्रं जपेद्रात्रौ सर्वसिद्धीश्वरो भवेत् ॥ ६९ ॥

दिवा जपेत् षट्सहस्रं रात्रावपि तथा जपेत् ।
एवं क्रमेण देवेशि सर्वसिद्धीश्वरो भवेत् ॥ ७० ॥

दिवा जपेत् षट्सहस्रं तावद्धोमं चरेन्निशि ।
सर्वसिद्धीश्वरो भूयाद[9]तोऽन्यं शृणु पार्वति ॥ ७१ ॥

---

1 SD Omits six lines. 2 SB °ऋद्धी°। 3 SC यजे°। 4 C omits ब्रवीमि ते···पुरश्चर्यां in the fifth line. 5 SD °न सर्वे°। 6 N SD °रः। 7 C यथा; N तथा। 8 SA SC सुरेश्वरि। 9 SC SD °त्ततो°।

नित्यकृत्यं दिवा कृत्वा केवलं तिमिरालये ।
रात्रौ जपेद् गान[1]परः सर्वसिद्धीश्वरो भवेत् ॥ ७२ ॥

गानमण्डलगो ज[2]प्यात् त्रैलोक्याधिपतिर्भवेत् ।[3]
दिवा जपेद् दिक्सहस्रं रात्रौ पूजां चरन् जपेत् ॥ ७३ ॥

सहस्रमात्रं प्रजपेदामिषान्नपरायणः ।
सर्वसिद्धीश्वरो भूयाद्वेतालसिद्धिमाप्नुयात्[4] ॥ ७४ ॥

प्रतिपत्सु समारभ्य नवम्यन्तं महेश्वरि ।
एकान्ते पर्वते शून्ये केवलं तिमिरालये ॥ ७५ ॥

उदयास्तमयं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
पर्वते विपिने शून्ये नवरात्रं जितेन्द्रियः ॥ ७६ ॥

मुण्डोपरि भवेन्मुण्डं कपालं च ततोपरि ।
तत्र दीपं च प्रज्वाल्य दीपालोकनतत्परः ॥ ७७ ॥

न[5]वरात्रं जपेद् देवि दीपालोकनतत्परः ।
मूलयन्त्रं कपाले[6]षु कौमार्या बीजमुत्तमम् ॥ ७८ ॥

सिन्दूरेण कृतं यन्त्रं सर्वसिद्धीश्वरो भवेत् ।
महानीलप्रभा दे[7]वी प्रत्यक्षा वरदा भवेत् ॥ ७९ ॥

सदा प्रकाश[8]गो भूत्वा जपेन्नित्यमतन्द्रितः ।
सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा[9] ॥ ८० ॥

शरत्काले चतुर्थ्यादिनवम्यन्तं महेश्वरि ।
नित्यकृत्यं च संपाद्य ततो नैमित्तिकं चरेत् ॥ ८१ ॥

नववर्षं समारभ्य कामवर्षान्तकं शिवे ।
तावद् बालेति गदिता तारा शी[10]घ्रफलप्रदा ॥ ८२ ॥

तां देवपीठे संस्थाप्य देवीवत् प्रतिपूजयेत् ।
शतं भाले शतं केशे शतं सिन्दूरमण्डले ॥ ८३ ॥

शतद्वयं कुचद्वन्द्वे शतं नाभौ महेश्वरि ।
शतं त्रि[11]सूत्रे देवेशि उत्थाय च शतत्रयम् ॥ ८४ ॥

---

1 SA SC दीनकरः; SD ध्यान° । 2 C D जप्त्वा । 3 N SA SB adds अथवा । 4 N SA SB SC adds अथवा । 5 D omits three lines. 6 SD तु । 7 SC देवि । 8 C °को । 9 N SA SB adds अथवा । 10 C N SB SD सिद्धि° । 11 SD योनौ हि ।

अनेन क्रमयोगेन सहस्रेण पुरस्क्रिया ।
दिन[1]षट्कप्रयोगेण सर्वसिद्धीश्वरो भवेत् ॥ ८५ ॥

ए[2]कान्ते तिमिरावासे बालामानीय पार्वति ।
हस्तं धृ[3]त्वा जपेद् देवि सर्वसिद्धीश्वरो भवेत् ॥ ८६ ॥

बलिः पूजा तथा होमो रात्रौ च क्रियते यदि ।
तत्तदक्षय्यमायाति ताराकालीप्रसादतः ॥ ८७ ॥

नृत्यगानादिकं पश्यत् जपेत् त्रैलोक्यनायकः ।
सर्वत्र कामिनीयोगान्महाश्रुतिधरो भवेत् ॥ ८८ ॥

तत्पर्वते करौ दत्त्वा मुखचुम्बनतत्परः ।
प्रजपेद् दिक्सहस्रं यः शिवतुल्यो नरो भवेत् ॥ ८९ ॥

[4]तामालिङ्ग्य जपेद् देवि वज्रकायो नरो भवेत् ।
करं धृ[5]त्वा जपेल्लक्षं कलिकल्पद्रुमो भवेत् ॥ ९० ॥

शिवसंघट्टनं कृत्वा तद्देहे परमेश्वरि ।
प्रजपेल्लक्षमात्रं यः शिवतुल्यो नरो भवेत् ॥ ९१ ॥

तामुत्थाप्य करे धृ[6]त्वा जपेल्लक्षं स भूमिपः ।
[7]तां स्थाप्य स्व[8]कटौ देवि सहस्रं प्रजपेत् सदा ॥ ९२ ॥

महावादीश्वरो भूयान्नात्र कार्या विचारणा ।
तां च हास्यपरां कृत्वा वार्तया प्रजपेत् सदा ॥ ९३ ॥

महाकविवरो भूयाद् दशाहेन महेश्वरि ।
द्यूतक्रीडाग[9]तो भूत्वा तया सार्धं प्रियंवदे ॥ ९४ ॥

[10]तस्या × × तु संवीक्ष्य जपेल्लक्षं नराधिपः ।
संचुम्ब्य प्रजपेल्लक्षं साक्षात् किन्नररूपधृक् ॥ ९५ ॥

× × दत्त्वा जपेद् रात्रौ वाचस्पतिसमो भवेत् ।
ता[11]मालिङ्ग्य हसन् देवि जपेल्लक्षमतन्द्रितः ॥ ९६ ॥

---

1 D °नाष्टक° । 2 SD omits two lines. 3 C द° । 4 D omits this line. 5 C द° । 6 C कृ° । 7 SC omits two lines. 8 D शकटे । 9 SD °परो । 10 SC omits two lines. 11 N SA SB SC तत्रा° ।

राजराजो नरो भूयाद् वश्यसिद्धि[1]करी मता ।
तां च सुप्तां च संवीक्ष्य तस्याः सेवापरायणः ॥ ९७ ॥

जपेन्नि[2]रन्तरं लक्षसंख्यान्तं परमेश्वरि ।
कवित्वे व्याससदृशो धने धनपतिर्भवेत् ॥ ९८ ॥

तां जपस्थां च संवीक्ष्य जपेत्[3] तद्ध्यानतत्परः ।
देवीरूपो नरो भूयान्नात्र कार्या विचारणा ॥ ९९ ॥

संकेतस्थां तु[4] संवीक्ष्य त[5]त्संकेतपरायणः ।
त्रिसहस्रं जपेद् देवि देवीरूपो नरो [6]भवेत् ॥ १०० ॥

तां फलस्थां च संवीक्ष्य जपेल्लक्षं महेश्वरि ।
सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा ॥ १०१ ॥

[7]तस्याः करे शिवं दत्त्वा तथा मुष्टिं स्वयोनिवत् ।
× × × कारणीयं च जपेत्तत्र दिवानिशम् ॥ १०२ ॥

महादेवसमो भूयान्नात्र कार्या विचारणा ।
तां गर्भस्थां मध्यगर्भां वीक्ष्य × × ×माचरेत् ॥ १०३ ॥

मूकान् संवादयेद् देवि नात्र कार्या विचारणा ।
दिक्सहस्रं जपेत्तत्र पूर्वोक्तं फलमाप्नुयात् ॥ १०४ ॥

तामाद्यमासां संम[8]थ्य जपेद् [9]वादीश्वरो भवेत् ।
नेत्रमासां च संवीक्ष्य विपरीतं × × चरेत् ॥ १०५ ॥

जपेद् दशसहस्रं यः स सुरासुरपूजितः ।
तां वह्निमासां संवीक्ष्य सर्वकामान् जपाल्लभेत् ॥ १०६ ॥

[10]तां वेदमासां संमथ्य[11] जपेद् दिग्दिनमेव च ।
किं वर्ण्यं तस्य सौन्दर्यं सुन्दरीसदृशो भवेत् ॥ १०७ ॥

तां पञ्चमासां देवेशि ज्ञात्वा × × ×माचरन्[12] ।
जपेल्लक्षं महेशानि शिवतुल्यो नरो भवेत् ॥ १०८ ॥

---

1 C N SB °द्धिः प्रकीर्तिता । 2 SC °त्रिलक्षसंख्यान्तं योजयेत् । 3 D प्रजपेद् ।
4 SC च । 5 SD जपेत्तज्ज्ञानतत्परः । 6 D °रोऽपि च । 7 C omits this line.
8 D °र्द्य । 9 SB °ल्लक्ष्मीश्वरो । 10 SD omits two lines. 11 DN °र्द्य ।
12 C SA SB °रेत् ।

तां षण्मासां रतौ नीत्वा सम्यग् ××× माचरेत् ।
तत्तत्त्वेन परां कालीं तर्पये[1]त् क्रोधरूपिणीम् ॥ १०९ ॥

प्रसन्नरूपिणीं साक्षात् सं[2]पश्यति न चान्यथा ।
तां सप्तमासां संवीक्ष्य शनै××× माचरेत् ॥ ११० ॥

जपेद् यत्नेन देवेशि ब्रह्माण्डं वशमानयेत् ।
तत्तत्त्वेन परां देवीं प[3]ञ्चतत्त्वेन तर्पयेत् ॥ १११ ॥

महाराज्यमवाप्नोति दुःखितो न भवेत् क्वचित् ।
रक्तरूपं श्वेतरूपं श्लक्ष्णं परमचिक्कणम् ॥ ११२ ॥

तत्त्वं संजायते तस्याः कुण्ड[4]साराभिधं भवेत् ।
सर्वसिद्धिप्रदं राज्यप्रदं कालीप्रियङ्करम् ॥ ११३ ॥

तल्लिहन् प्रजपेद् देवि त्रिकालज्ञः कविः शिवः ।
जिह्वां दत्वा द्रा[5]वयन् हि जपेत् तत्स्वादतत्परः ॥ ११४ ॥

कालीतारामयो भूत्वा छिन्नारूपः स्वयं भवेत् ।
स्त्रीप्रभूणां गेहगं च जगदेतच्चराचरम् ॥ ११५ ॥

तथापि शुक्रं देवेशि स्त्रीयोनौ नास्ति पार्वति ।
शुक्रं यदि च वै भूयात् तदा तत्कामलोपनम् ॥ ११६ ॥

को हि कर्तुं प्रशक्नोति तच्छक्तो ब्रह्मगोलके ।
तस्याः पुष्पं प्रदत्तं हि रेतः पुरुषलिङ्गगः ॥ ११७ ॥

द्वयं मिलित्वा देवेशि सामरस्यं भ[6]वेच्छिवे[7] ।
एकरूपं समासाद्य सरूपत्वं रजो जये(? लभे)त् ॥ ११८ ॥

पिण्डो भूत्वा फलं तच्च जीवरूपं परं वरम्[8] ।
स्वस्वदेवांशतो बालः पूर्णकायस्ततो भवेत् ॥ ११९ ॥

अज्ञानादपि देवेशि फलमेव प्रयच्छति ।
अहो योनिर्महायोनिर्जगद्योनिरयोनिजा ॥ १२० ॥

ब्रह्मरूपा जगद्धात्री रमणानन्दराज्यदा ।
तस्याः संगभवं सौख्यं ब्रह्मान[9]न्देति संजगुः ॥ १२१ ॥

---

1 C SA SC °यन् । 2 N SA SB SD स । 3 C पङ्क°; N पक्क° । 4 D °लावा° । 5 C DN SA SD °यद्धि । 6 N SA SB SC SD गता । 7 SD शिवा । 8 D स्वयम् । 9 D स्नेहेति ।

यत्सौख्यार्थं महेशानि ब्रह्मानन्दाश्च कोटिशः ।
महानन्दाना[1]मानन्त्यं जायते परमेश्वरि ॥ १२२ ॥

एतावद्योगमासाद्य शक्तिसंयोगहेतवे ।
सिद्धो भवति पुल्लिङ्गरूपमासाद्य पार्वति ॥ १२३ ॥

××××भवं सौख्यं नाल्पस्य तपसः फलम् ।
सं[2]गजन्य[3]भवे सौख्ये निमज्जन्ति महेश्वराः ॥ १२४ ॥

महातपस्या चेद् भूयाद् बृ[4]हद्ब्रह्माण्डमेव हि ।
भिन्नं [5]भूयाद् यदा देवि तदा चैव महद्भवेत् ॥ १२५ ॥

स्वल्पा तपस्या देवे[6]शि फलं चैव महत्कथम् ।
ब्रह्माण्डप्रलयो देवि जायते तावदेव तत् ॥ १२६ ॥

तावत् तपस्या या जाता तत्फलं परमेश्वरि ।
××××भवे सौख्ये वाञ्छा भवति पार्वति ॥ १२७ ॥

ध्यानं तद्योगसौख्यस्य तत्फलं योग एव च ।
तपस्या नाधिका क्वापि न संयोगो महत्तरः ॥ १२८ ॥

सर्वैरुपायैर्देवेशि योगाभ्यासैरनेकशः ।
सर्वशास्त्रागमाद्यैश्च तपस्यानन्तकोटिभिः ॥ १२९ ॥

फलमेव परं लक्ष्यं स्वर्गो वा मोक्ष एव वा[7] ।
नि[8]र्गुणत्वं परत्वं च अ[9]बाध्यत्वं महेश्वरि ॥ १३० ॥

एवंरूपं समासाद्य योगार्थं यतते शिवे ।
संयोगश्चेत् करे याति किमहो भाग्यभाजनम् ॥ १३१ ॥

मुखालोको गानसुखं कलात्वं प्र[10]परञ्जनम् ।
अन्योन्ययो[11]गरूपत्वं नाल्पस्य तपसः फलम् ॥ १३२ ॥

संयोगस्तु परं ब्रह्म संयोगस्तु परं तपः ।
संयोगानन्दरूपार्थं ब्रह्मापि यतते शिवे ॥ १३३ ॥

---

1 D च नामानि; SA SC SD च नामानं । 2 N SA SB SC SD सांग° । 3 SD °न्यं भवेत्सौख्यं । 4 N चिद्रूपा त्विह । 5 C SD °न्नरूपा । 6 D तस्याश्च । 7 N SB SC SD च । 8 SD omits two lines. 9 D SD आराध्यत्वं । 10 C प्रवरं; DN SB SC परमं ज° । 11 C °भो ।

अहो ज्ञानवतां ज्ञानी संयोगार्चनपूजकः ।
राज्यं लभ्यं धनं लभ्यं न संयोगः[1] परात्परः[2] ॥ १३४ ॥

[3]अज्ञानादपि देवेशि फलमेव प्रयच्छति ।
पुत्रादिकं योगमात्रात् स्फुटमेव प्रदृश्यते ॥ १३५ ॥

तस्मात् संयोगसौख्यस्य [4]ज्ञानी कोऽस्ति महीतले ।
चेद् ज्ञानयुक्तो देवेशि नररूपः परात्परः ॥ १३६ ॥

अहो रूपमहो भाग्यं वेश्यालापनजं फलम् ।
अज्ञानादीदृशं देवि फलं भवति नान्यथा ॥ १३७ ॥

तस्य ज्ञानेन देवेशि किं तद् यन्न करे स्थितम् ।
अन्यकर्मणि देवेशि अज्ञानात् फलहारिता ॥ १३८ ॥

यथा वैद्यकशास्त्रे[5] तु विषाज्जीवनमारणम् ।
भवत्येव महेशानि शोधितं चामृतोपमम् ॥ १३९ ॥

अशोधितं जीवहरं विषं देवि यथा भवेत् ।
तथा योगो महाब्रह्म म[6]या संकीर्तितं प्रि[7]ये ॥ १४० ॥

अज्ञानाज्ज्ञानतो वापि फलमेव प्रयच्छति ।
संयोगस्य फलेनैव राज्यपीठेश्वरो भवेत् ॥ १४१ ॥

राज्यपीठे[8]श्वर्यस्य लक्षणं शृणु पार्वति ।
वाद्यानां तु महेशानि चतुर्विंशतिसंख्यया[9] ॥ १४२ ॥

गीतयुक्तं तालयुक्तं पुरस्तिष्ठति य[10]स्य वै ।
वेश्यागानध्यानपरो भक्तभक्तोऽपरः प्रभुः ॥ १४३ ॥

दाता भोक्ता विनीतश्च सौन्दर्यगुणगुम्फितः ।
वेश्याला[11]पी विनोदी च गुणग्राही कविर्बुधः ॥ १४४ ॥

चतुष्षष्टिकलावेत्ता कवीनां [12]मालिका पुरः ।
तारावल्यादिकी[13]र्त्यन्तो दक्षिणासु सहानुगः ॥ १४५ ॥

---

1 C °गात् । 2 C D °रम् । 3 C SA SC omits four lines. 4 SD ज्ञाता । 5 N SC °षु । 6 N SA SB न मया की°; SC यथा च की° । 7 SD शिवे । 8 D °ठस्य । 9 C SA SB SC °ता । 10 C °न्ति तत्र; SA SC यत्र । 11 C °लय° । 12 D मणि°; N मानि° । 13 C °कृत्य° ।

मध्ये क्रीडे[1]न्द्रजालादि चामरग्राहिणीकरात् ।
स्त्रियश्छत्रक[2]रा देवि परिचर्यश्च षोडश ॥ १४६ ॥

[3]महासाम्राज्यभोगाश्च गजवाजीननेकशः ।
रथबाणादिसंयुक्तः पञ्चविंशतिचिह्नधृक् ॥ १४७ ॥

मनोरथमयो देवि वेतालो यस्य तिष्ठति ।
ईदृग्विधो भवेद् देवि पात्रतोषणतत्परः ॥ १४८ ॥

अहो पात्रं च सत्पात्रं पात्रहीनं न किञ्चन ।
पात्रहीनमपात्रं स्यात् सर्वदेवबहिष्कृतम् ॥ १४९ ॥

विहीनत[4]त्त्वं तन्नि[5]न्द्यं भवत्येव महेश्वरि ।
वेश्यादर्शनमात्रेण देव[6]तादर्शनं मतम् ॥ १५० ॥

वेश्यालापेन देवेशि जपकोट्यर्बुदादिकम् ।
पुण्यं कृतं येन भवेत् तेनालापं(? पः)[7] प्रदृ(? श)श्यते ॥ १५१ ॥

वेश्यास्पर्शनमात्रेण सायुज्यं सुन्दरी स्वयम् ।
वेश्यासंगममात्रेण भक्तसान्निध्यकालिका ॥ १५२ ॥

वेश्यालिङ्गनमात्रेण द्रुतं सिद्धिकरी जटा ।
रतिं च विपरीतां च कृत्वा छिन्नाविभूतिमत् ॥ १५३ ॥

वेश्यातोषणदानेन महाश्रीसुन्दरी भवेत् ।
यशो वेश्यावतां लोके सौख्यं वेश्यावतां कलौ ॥ १५४ ॥

दुर्जनाः सु[8]जनायन्ते दरिद्रा धनवन्ति च ।
अज्ञानिनो ज्ञानव[9]न्तो हीनसत्त्वाश्च कामुकाः ॥ १५५ ॥

मृता अपि प्रजीवन्ति वेश्यादर्शनमात्रतः ।
वेश्याचन्द्रेण संयुक्तः सर्वदा पूजयेच्छिवाम् ॥ १५६ ॥

पूजाजपादिकं देवि साङ्गं भवति नान्यथा ।
आशी[10]रतस्याः सदा ग्राह्या तोषयेत् तां दिवानिशम् ॥ १५७ ॥

---

1 C काण्डेन्द्रजालादि । 2 C SA SB SC SD °धरा । 3 C omits two lines. 4 D °चक्रं । 5 CD °त्यं । 6 C omits देवता...मात्रेण in the fifth line. 7 SD °दृश्य° । 8 N SB SD स्व° । 9 D SC °रता । 10 D °स्यं तस्याः सदा ग्राह्यं ।

तदिङ्गितं चर[1]न् देवि कालीरूपो नरो भवेत् ।
तस्या ××× मात्रेण शक्तिपा[2]तेश्वरो भवेत् ॥ १५८ ॥

कृत्वा तां ×××× च जपेल्लक्षमतन्द्रितः ।
जपेद्यः परमेशानि साक्षान्नीलासमो भवेत् ॥ १५९ ॥

वे[3]श्यापर्वतमारुह्य जपेल्लक्षं स कालिका ।
वेश्यागारं समालोक्य लक्षं जपति तारिणी ॥ १६० ॥

वेश्यागानं तु संश्रुत्वा तस्यां ×××तत्परः ।
तस्याः संमथने जप्त्वा त्रैलोक्यविजयी शिवः ॥ १६१ ॥

वेश्यानर्तनगो भूत्वा त्रिलक्षं श्रीपतिर्भवेत् ।
साधनापटले देवि एतासां साधनैव सा ॥ १६२ ॥

[4]विधिः प्रोक्त[5]स्तु देवीनामेतासां च समाचरेत् ।
अष्टकन्याविधौ देवि तथैव च कुलाष्टके ॥ १६३ ॥

अकुलाष्टके तथा देवि षट्त्रिंशज्जातिमध्यतः ।
पञ्चाशत्पीटमध्ये वा पञ्चच[6]क्रक्रमेऽपि च ॥ १६४ ॥

चूडाचक्रत्रिके देवि महाविद्याविधौ तथा ।
सिद्धविद्याविधौ देवि साधनेयं प्र[7]कीर्तिता ॥ १६५ ॥

कथिता वक्ष्यमाणा या साधना परमेश्वरि ।
तद्देहे तु स्वयं सुप्त्वा विद्या स्वप्नावती भवेत् ॥ १६६ ॥

ताम्बूलरागं संवीक्ष्य निशि जापात्तु कालिका ।
नवप्रसूतां तां वीक्ष्य नायिकाभेदतः क्रमात् ॥ १६७ ॥

तत्कृत्वा [8]प्रजपेद् देवि महादेव[9]समो भवेत् ।
शक्तियुग्मं समानीय एकस्यां ××× च[10]रन् ॥ १६८ ॥

अन्यामा×× प्रजपेत् पू[11]र्वस्यां योगमाचरन् ।
अन्यामा×× प्रजपेत् कलिकल्पद्रुमो भवेत् ॥ १६९ ॥

---

1 SD चरेद् । 2 SA SC °त्रे° । 3 SD omits this line. 4 SD omits two lines. 5 N °क्ता तु या देवि सा एतासां स° । 6 SD °पञ्च° । 7 SC SD च। 8 C तु । 9 SC °वो भवेद् ध्रुवम् । 10 SC चरेत् । 11 SD omits पूर्वस्यां... प्रजपेत् in second line.

लक्षत्रयं भ[1]वेज्जाप्यं तेनैव तर्पयेच्छिवाम् ।
एकादिलक्षपर्यन्तं या[2]वती प्राप्यते शिवे ॥ १७० ॥

तत्र योगममुं ज्ञात्वा त्रैलोक्यविजयी कविः ।
महाभाष्यकरो भूयान्महाश्रुतिधरो भवेत् ॥ १७१ ॥

स्व× × तत्करे दत्त्वा त× × स्वकरे भवेत् ।
मुखे मुखं च संयोज्य गाढमा× × पार्वति ॥ १७२ ॥

संयोगीभूय जप्तव्यं कालीरूपो दिनत्रयात् ।
अथान्ययोगं वक्ष्यामि येन तारासमो भवेत् ॥ १७३ ॥

संमार्जनीं समानीय स्वबीजगलितं चरेत् ।
पुनश्चि[3]कुरमासाद्य मूलमन्त्रं समुच्चर[4]न् ॥ १७४ ॥

मध्याह्ने मध्यरात्रौ वा एवं यरतु जपं चरेत् ।
कु[5]लवारे समुत्सार्य प्रे[6]म्णा मन्त्रं जपेच्छिवे ॥ १७५ ॥

दिग्वासा वीरवेषश्च चितावह्नौ तु होमयेत् ।
पूजयन् चिन्तयन् भक्त्या त्रैलोक्यविजयी भवेत् ॥ १७६ ॥

सकेशाकर्षणं देवि मयोक्तं तव सन्निधौ ।
संमार्जनी प्रगलिता बीजं च गलितं तथा ॥ १७७ ॥

मुक्तकेशो महे[7]शानि दिग्वासा खड्गसंयुतः ।
मध्याह्ने तु महेशानि मूलमन्त्र[8]पुरस्सरम् ॥ १७८ ॥

कुजे यो होमयेद् देवि दीप्यमाने चितानले ।
त्रैलोक्याकर्षणं देवि स[9]केशाकर्षणं तथा ॥ १७९ ॥

नखं केशं स्वपुष्पं च सदा संमार्जनीगतम् ।
एतेन होमयेद् देवि त्रैलो[10]क्यविजयी भवेत् ॥ १८० ॥

शक्त्यालोक[11]नमासाद्य निशि लक्षं जपेच्छि[12]वे ।
स जपोऽक्षय्यमायाति नात्र कार्या विचारणा ॥ १८१ ॥

---

1 D च त°। 2 SD पार्वती। 3 D °द्गुरु°। 4 C °रेत्। 5 N SA SB कुज°। 6 C प्रणामं व्रजये°। 7 C निश मागे। 8 °न्त्रं समुच्चरन्। 9 D साधका°। 10 C Omits त्रैलोक्य···प्रणतो देवि in forth line. 11 D °कं समा। 12 D SA SC °त् सुधीः।

शीत्कारः प्रणवो देवि भाषणं जप एव च ।
तत्त्वानन्द× × × स्यात् × × × × शिवार्चनम् ॥ १८२ ॥

× × × × × ×दी[1]नि पुष्पमालादिपूजनम् ।
ताडनं हवनं विद्धि वीर्यपु[2]ष्पे विसर्जनम् ॥ १८३ ॥

तद्देहोद्वर्तनं गृह्य कारणाक्तं तु होमयेत् ।
त्रैलोक्यकवितासिद्धिस्तस्य हरते व्यवस्थिता ॥ १८४ ॥

कुण्डगोलोद्भ[3]वाक्तानि नागवल्लीदलानि च ।
चितावह्नौ निशाभागे होमयेन्मन्त्रमुच्चरन् ॥ १८५ ॥

एवं यः कुरुते देवि तस्य पुण्यफलं शृणु ।
ब्रह्मणा लिखितां रेखां मार्ज्य रेखान्तरं भवेत् ॥ १८६ ॥

तस्य भाले महेशानि किङ्करो राज्यमाप्नुयात् ।
जीवपुष्पान्वितं कृत्वा प[4]र्णानां शतकं सुधीः ॥ १८७ ॥

प्रत्येकं प्रजपेत् तत्र ततस्तद्धोमयेत् प्रिये ।
सर्वैश्वर्यसमायुक्तः कविराजः सुराधिकः[5] ॥ १८८ ॥

दाता भोक्ता राजराजो भवत्येव न संशयः ।
कुण्डलीलिङ्गकेशैश्च केशैश्चैव नखैः रसैः ॥ १८९ ॥

स्वदेहोद्वर्तनेनैव स्वशुक्रेणापि पार्वति ।
होमयेत् परमेशानि स्त्रीणामाकर्षणं भवेत् ॥ १९० ॥

मुखोपरि × × दत्त्वा जपेल्लक्षं स[6] वाग्विभुः ।
कुलशक्तिं समानीय प्रेममग्नां तपस्विनीम् ॥ १९१ ॥

तस्याश्चक्रे महा[7]कालीं ध्यानोक्तां पूजयेच्छिवे ।
तदाज्ञया तत्र × × दत्त्वा यत्नेन वै जपेत् ॥ १९२ ॥

सम्यक्[8] प्रमथ्य यत्नेन कुर्याच्च नवनीतवत् ।
तत्संगृह्य प्रयत्नेन देवार्थं तिलकेऽपि च ॥ १९३ ॥

स्थापयेद् यत्नतो देवि जलमध्ये [9]विनिःक्षिपेत् ।
स्नानपानभोजनादौ देवार्थमपि पार्वति ॥ १९४ ॥

---

1 SD देवि । 2 SD °पातो । 3 D °लामर° । 4 SA SC तर्पणानां शतं । 5 D °पः । 6 D N स्व° । 7 SC °हेशानीं । 8 SD °गामध्य । 9 C N °ऽपि ।

प्रदद्याद् यत्नतो देवि येन[1] पूतं चराचरम् ।
अभिमन्त्र्य पिबेत्तच्च सर्ववाक्सिद्धिकारकम् ॥ १९५ ॥

तत्तोयं प्रोक्षयेद् देहे सर्वरोगार्तिनाशनम् ।
तत्तोयं प्रोक्षयेद् बाह्ये सोऽपि पूतो भवेत् क्षणात् ॥ १९६ ॥

तत्तोयेन चरेत् पाकं देवता[2]र्थं निवेदयेत् ।
स्वयं तदन्नं भुञ्जीत त्रैलोक्यविजयी भवेत् ॥ १९७ ॥

कवित्वे व्याससदृश ऐश्वर्ये वासवोपमः ।
राजराजसमो द्रव्ये महाराजसमो भवेत् ॥ १९८ ॥

त्रिशतं षष्टिरोगाणामेतदेव महौषधम् ।
भगेनैव समा[3]लापात् सुभगः साधको भवेत् ॥ १९९ ॥

म[4]हाकामकलारूपो भवत्येव न संशयः ।
अन्यस्य सुरतं श्रुत्वा तद्ध्वनिध्यानतत्परः ॥ २०० ॥

जपेद् यत्नेन देवेशि वागीशसमतां व्रजेत् ।
स्वकुण्ड[5]ल्युद्भवैः केशैः सहस्रं होमयेत् प्रिये ॥ २०१ ॥

स्त्रीणां सगर्वज[6]तीनामाकर्षं कुरुते ध्रुवम् ।
शक्त्या सह प्रभुञ्जानः पर्वतस्पर्शनं चरेत् ॥ २०२ ॥

मध्ये मध्ये जपेद् देवि सर्वसिद्धीश्वरो भवेत् ।
शक्तिं × ×परि स्थाप्य बध्द्वा परिकरं दृढम् ॥ २०३ ॥

पञ्च × × ×मासाद्य × × धृत्वा × × चरेत् ।
× × × च × × देवि वारं वारं समाचरेत् ॥ २०४ ॥

सुरतासनमेतद्धि कालिकाप्रीतिकारक[7]म् ।
सुरतासनमासाद्य निशि जप्याद् दिने दिने ॥ २०५ ॥

महादेवसमो भूयात् किम[8]तः सिद्धिसाधनम् ।
निह्नवं च समासाद्य यो लक्षं प्रजपेत् सदा ॥ २०६ ॥

सर्ववाञ्छामयी सिद्धिस्तस्य हस्तगता भवेत् ।
हस्ताहस्तिकया योगो निह्नवः परिकीर्तितः ॥ २०७ ॥

---

1 SD तेन । 2 C °र्थै । 3 D °ले° । 4 C भक्ष्य । 5 C °ण्डाद्यु° ।
6 N °ता° । 7 N SB SD °णम् । 8 N SA SC °मितः ।

स्व × ×केशैर्जुहुयाद् युवत्याकर्षणाय च ।
स्त्री × ×केशैर्जुहुयाद् दूरस्थाकर्षणाय च ॥ २०८ ॥
ब्रह्माण्डात् कीटपर्यन्तं स्त्रीमाया परमेश्वरि ।
तस्या × × च संवीक्ष्य संजप्य परमेश्वरि ॥ २०९ ॥
कीटादिभाषणज्ञानं भवत्येव त्रिमासतः ।
राज्यलक्ष्मीकीर्तिलक्ष्मीवल्लभः सुरपूजितः ॥ २१० ॥
शक्तिशब्दं [1]च श्रुत्वा [2]तु जपे[3]त् तत्र यथा क्षणम् ।
त्रैलोक्यविजयी भूयान्नात्र कार्या विचारणा ॥ २११ ॥
हास्यं श्रुत्वा महाशक्तेर्जपहोमादिकं चरेत् ।
तत्तदक्षय्यमायाति कालीमन्त्रप्रजापतः ॥ २१२ ॥
शक्त्या विना शिवे सू[4]क्ष्मे नाम धाम न विद्यते ।
शक्तिमू[5]लं भवेत् सर्वं जगदेतच्चराचरम् ॥ २१३ ॥
तस्मात् कुमारीं संपूज्य यथाभावेन पार्वति ।
यद् यद् दत्तं कुमारीणां तदनन्तरवरूपकम् ॥ २१४ ॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

इति श्रीशक्तिसंगमतन्त्रे तारासोपाने तृतीयः पटलः ॥

---

1 C N SB SD तु। 2 CN SA च। 3 SD Omits जपेत् तत्र...महाशक्ते° in the third line. 4 N शून्ये। 5 N °मेळं।

चतुर्थः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि पुराणं पुण्यनिर्णयम् ॥ १ ॥

श्रीशिव उवाच

रहस्यमपि ते देवि कथ्यते शृणु सादर[1]म् ।
पञ्चाशत्तीर्थमध्यस्थां षट्त्रिंशज्जातिजां च वा ॥ २ ॥
अष्टकन्या[2]समुद्भूतां कुलाकुलाष्टकोद्भवाम् ।
दशविद्यासमप्रख्यां रक्षयेत् पुष्पकर्मणि ॥ ३ ॥
तरुणीं सुन्दरीं रम्यां रमणानन्ददीपिकाम् ।
च[3]ञ्चलां चारुनासां च सुन्दरीं मदिरेक्षणाम् ॥ ४ ॥
कामासक्तां कामलोलां मन्त्रशास्त्रविशारदाम् ।
गुरु[4]भक्तां मन्त्रभक्तां पुष्पकर्मणि रक्षयेत् ॥ ५ ॥
आद्या ऋ[5]तुमती शक्तिः सा साक्षादीश्वरी शिवा ।
ऋ[6]तुयोगे समुत्पन्ने ब्रह्माण्डं पुष्पिते(? तं) भवेत् ॥ ६ ॥
पुष्पिते सृष्टिरूपा स्यात् फलिते स्थितिरूपिणी ।
लयरूपा लिङ्गयुक्ता महाकामकला परा ॥ ७ ॥
त्रैलोक्याद्यखिलं शक्तिकोणे तिष्ठति पार्वति ।
कुण्डं कुलामृता[7]ख्यं च सर्वतीर्थोत्तमोत्तमम् ॥ ८ ॥
अम्बु श्रवति चान्द्री [8]सा पुष्पं श्रवति भानवी ।
बीजं श्रवति चाग्नेयी कुण्डनाडी त्रिधा मता ॥ ९ ॥
गङ्गा च यमुना चैव तृतीया च सरस्वती ।
इडा च पिङ्गला चैव सुषुम्ना मध्यवर्तिनी ॥ १० ॥
त्रियोगे तु प्रयागं स्यात् तीर्थराजाभिधं शिवे ।
वे[9]श्यागेहं प्रयागं स्यादेतत् सिद्धाभिधं शिवे ॥ ११ ॥

---

1 SD °रात् । 2 D N °कर्म° । 3 °प° । 4 C N SB °श° । 5 N धातु°; C मता रती । 6 SD तत्र । 7 D °र्थं । 8 D या । 9 C वेणुयोगे ।

पञ्चलिङ्गहता वेश्या पुष्पयोगे प्रयागकम् ।
ऋतुयोगे त्रयाणां च योगाद् दिव्यप्रयागकम् ॥ १२ ॥

स्थावरं जङ्गमं चेति स्थावरं पशुवर्तिनाम् ।
जङ्गमं दिव्यवीराणां प्रयागं परिकीर्तितम् ॥ १३ ॥

त[1]त्र नाडीप्रा[2]णयोगाज्जडो वाचस्पतिर्भवेत् ।
आद्ये श्रीसुन्दरी प्रोक्ता द्वितीयेऽह्नि तु कालिका ॥ १४ ॥

तृतीयेऽह्नि सोग्रतारा चतुर्थे सुमु[3]खी भवेत् ।
पञ्चमे छिन्नमस्ता स्यात् षष्ठे मातङ्गिनी भवेत् ॥ १५ ॥

सप्तमे बगला प्रोक्ता पुष्पादौ बालभैरवी ।
अष्टमे भुवना प्रोक्ता नवमेऽह्नि रमाभिधा ॥ १६ ॥

दशमे राजराजेशी रुद्रेऽह्नि श्रीपराम्बिका ।
चरणेशी द्वादशेऽह्नि कामेऽह्नि कामसुन्दरी ॥ १७ ॥

चतुर्दशेऽह्नि देवेशि महाधू[4]मावती भवेत् ।
अथ पञ्चदशे देवि प्रो[5]क्ता पद्मा[6]वती कला ॥ १८ ॥

षोडशे दिवसे दे[7]वी धनदा परिकीर्तिता ।
दि[8]वाक्रमः प्रकथितः शृणु रात्रिक्रमं शिवे ॥ १९ ॥

दक्षिणा भद्रकाली च श्मशानकाल(? ली) कालिका ।
गु[9]ह्यकाली पञ्चमी स्यात् षष्ठी कामकलाभि[10]धा ॥ २० ॥

सप्तमी धनकाली स्यादष्टमी चण्डकालिका ।
[11]नवमी सिद्धकाली च दशमी हंसकालिका ॥ २१ ॥

सिद्धयोगेश्वरी देवी श्रीरुद्रदिवसे भवेत् ।
द्वादशेऽह्नि योगकाली कामाह्वे वा[12]युकालिका ॥ २२ ॥

[13]चतुर्दशी ब्रह्मकाली [14] सांवेशी नवरूपि[15]णी ।
सिद्धराजेश्वरी विद्या षोडशी [16]सर्वरूपिणी ॥ २३ ॥

---

1 SA SB SC SD तत° । 2 C °समा° । 3 D SA SC SD सुन्दरी । 4 C N SA SB SC °मधुमती । 5 D ज्ञेया । 6 C D N प्रभा° । 7 SA SB SC देवि । 8 C N SA SB SC °व्य° । 9 C omits three lines. 10 SD मता । 11 SD omits this line. 12 C रिपु° । 13 SD Omits two lines. 14 C सा । 15 D °चण्डिका; N °चात्मिका । 16 D SA SC सिद्ध° ।

रात्रौ तु पुष्पिणीरूपं कीर्तितं परमेश्वरि ।
प्रतिमासे चतुर्थेऽह्नि व्याप्य देवेशि सुन्दरी ॥ २४ ॥

काली तारा छिन्नमस्ता सु[1]मुखी परिकीर्तिता ।
पञ्चमी सुन्दरी प्रोक्ता पञ्चवि[2]द्यात्मिका शिवा ॥ २५ ॥

ततो विद्यादिरूपा स्यात् क[3]न्यारूपाऽथवा शिवे ।
कुलाष्टकस्वरूपा वा अकुलाष्टकरूपिणी ॥ २६ ॥

पञ्चाशत्तीर्थरूपा वा पञ्चचक्रक्रमा च वा ।
षट्त्रिंशद्योगरूपा वा विधेयं परिकीर्तिता ॥ २७ ॥

पुष्पयु[4]क्तं × × वीक्ष्य पुष्परूपः स्वयं भवेत् ।
इति संक्षेपतः प्रोक्तं विवेकः पूर्वमीरितः ॥ २८ ॥

पुष्पज्ञानी पुष्पजपी पुष्पपूजापरायणः ।
पुष्पध्यानी पुष्पभू[5]षी पुष्पानन्दी सुपुष्पवान् ॥ २९ ॥

गङ्गा सरस्वती देवि प्रत्यहं परिकीर्तिता ।
यमुना रक्तवर्णा या मासि मासि महेश्वरि ॥ ३० ॥

सरस्वती वह्निरूपा तेन कृष्णा प्रकीर्तिता ।
एवंरूपा महायोनिर्ब्रह्मयोनिर्जगन्मयी ॥ ३१ ॥

योनिं विना महेशानि न किञ्चिज्जगतीगतम् ।
अहो न पूज्यते देवि अधमैर्मूर्खजन्तुभिः ॥ ३२ ॥

एतस्य(?) ज्ञानवान् लोके दुर्लभाद् दुर्लभो मतः ।
त[6]त्थूत्कृतिं च संलिह्य पूजयन् प्र[7]जपेन्नरः ॥ ३३ ॥

अ[8]नायासेन तद्वाणी सर्वभाषामयी भवेत् ।
पुष्पिणीहस्तजं नीरं संपीत्वा प्र[9]जपेन्नरः ॥ ३४ ॥

यं यं काममनुप्राप्य कुरुते साधनं नरः ।
तं तं काममवाप्नोति राज्यलक्ष्मीं च[10] विन्दति ॥ ३५ ॥

तदास्तरणजं वस्त्रं तस्य प्रा[11]वरणी नरः ।
शिवरूपो जपाद् भूयान्नात्र कार्या विचारणा ॥ ३६ ॥

---

1 D SA SC SD सुन्दरी । 2 D N °विंशा°; SB SD °बिन्द्वा° । 3 D काली° । 4 SC SD °ह्रपं । 5 °दर्शां । 6 SA °त्कू° । 7 SC °यतो न° । 8 C omits two lines. 9 C N पूजये° । 10 D SA SB SC SD स । 11 D संप्रावणी ।

तत्र स्थित्वा जपेद् देवि तारारूपाधिको भवेत् ।
सुप्त्वा तस्याश्र[1]यं रात्रौ जपेल्लक्षमतन्द्रितः ॥ ३७ ॥

कालीरूपो नरो भूयान्नात्र कार्या विचारणा ।
तदुच्छिष्टं च ताम्बूलं प्र[2]भक्ष्य प्रजपेन्मुदा ॥ ३८ ॥

राज्यलक्ष्मीमवाप्नोति नात्र कार्या विचारणा ।
तस्याः समर्प्य वीटिं च प्रजपेत् तत्र पार्वति ॥ ३९ ॥

वाक्सिद्धिं प्राप्नुयादिष्टां सर्वकामान् स विन्दति ।
भुक्त्वा तस्याः समं देवि साम्राज्यदीक्षिताधिकः[3] ॥ ४० ॥

नानाभरणभूषाद्यैर्नानारत्नादिभूषणैः ।
मौक्तिकैर्मण्डलं कृत्वा मण्डपं तत्र कारयेत् ॥ ४१ ॥

मृदङ्गभेरीवादित्रवीणावाद्यादिभिः शि[4]वे ।
महोत्सवं तत्र कुर्याद् दिव्यस्त्रीपरिवेष्टितः ॥ ४२ ॥

तत्र स्थित्वा जपं कृत्वा सर्वसिद्धिं स विन्दति ।
पुष्पिणीमु[5]खमालोक्य त्रैलोक्ये जयमाप्नुयात् ॥ ४३ ॥

पुष्पिणीक्षालनजलं सर्वकर्मणि योजयेत् ।
त्रैलोक्यं पावनं कुर्यान्नात्र कार्या विचारणा ॥ ४४ ॥

इति संक्षेपतः प्रोक्तं रहस्यं शृणु चापरम् ।
दशविद्याक्रमेणैव कुलाष्टकक्रमेण च ॥ ४५ ॥

अकुलाष्टक[6]मार्गेण वसुकन्याक्रमेण च ।
पञ्चाशत्पीठमार्गेण साधनं शृणु पार्वति ॥ ४६ ॥

दशविद्याक्रमे स्थित्वा स्वेष्टां मध्ये[7] समर्चयेत् ।
पञ्चमुद्रासमायुक्तः पञ्चप्रेतेश्वरो भवेत् ॥ ४७ ॥

तत्र संपूज्य साङ्गां तु नव × × × तत्परः ।
यया यदुच्यते तत्र तदेव कारयेत् प्रिये ॥ ४८ ॥

तस्याश्चक्रं विकसितं कृत्वा संपूज्य सावृतिम् ।
किञ्चिज्जप्त्वा तत्र हुत्वा सर्वसिद्धीश्वरो भवेत् ॥ ४९ ॥

---

1 D °मं । 2 SD भक्षयन् ; SA SC प्रजपेत् सिद्धिदं । 3 C °पः ।
4 D प्रिये । 5 D °णीं च स° । 6 C °योगेन । 7 D °ध्यम° ।

अष्टकन्यामण्डले तु स्थित्वा पञ्चमकारभुक् ।
दिनाष्टकं महेशानि ताभिरेव विहारवान् ॥ ५० ॥

पूजयेत् प्रजपेद् देवि ह्यहोरात्रं दिनाष्टकम् ।
अष्टसिद्धीश्वरो भूयाद् दिव[1]सक्रमयोगतः ॥ ५१ ॥

कुलाष्टके नरः स्थित्वा कामुकीं सा[2]ध्य यत्नतः ।
सर्ग ××× ××× यद्यदुक्तं तदाचरेत् ॥ ५२ ॥

समस्तयोगं कृत्वा तु तर्पयेत् कुलसुन्दरीम् ।
त्रैलोक्याधिपतिर्भूयान्नात्र कार्या विचारणा ॥ ५३ ॥

अकुलाष्टकयोगे तु प्रत्येकं ××× चरेत् ।
प्रत्येकं ×× सर्वा हि तत्त[3]त्त्वेन जपेच्छिवाम् ॥ ५४ ॥

कालिका वरदा तत्र दिवसत्रययोगतः ।
पञ्चाशत्पीठमासाद्य मध्ये चैकतमां भजेत् ॥ ५५ ॥

सर्वासां ×× योगं च कृत्वा वीक्ष्य प्रमथ्य च ।
[4]जपेत् तत्र महेशानि राजराजेश्वरो भवेत् ॥ ५६ ॥

पञ्चचक्रक्रमे स्थित्वा मध्ये चैकां प्रमथ्य च ।
[5]वेदयोनिं च संवीक्ष्य तामा ×× जपेच्छिवे ॥ ५७ ॥

दशविद्याधिपो भूयान्नात्र कार्या विचारणा ।
तिथिक्रमेण देवेशि प्रत्येकं वर्षमात्रकम् ॥ ५८ ॥

शक्तिं संपूज्य देवेशि तदिच्छायोगमाप्नुयात् ।
अनिच्छा चेत् तथा पूज्या उक्तं चेद्योगमभ्यसेत् ॥ ५९ ॥

शिवतुल्यो नरो भूयाद् ब्रह्माण्डादिप्रकारकः ।
अष्टमीनवमीसन्धावष्टोत्तरलतागृहम् ॥ ६० ॥

गत्वा पूज्य प्रयत्नेन कालीरूपो दिनत्रयात् ।
चतुःपञ्चाशच्छक्तीनां प्रत्येकं ×× दर्शनम् ॥ ६१ ॥

×××××× कृत्वा ×× मर्दनपूर्वकम् ।
प्रजपेत् तत्र देवेशि रूपं (? पे) तारासमो भवेत् ॥ ६२ ॥

---

1 D °वा सं° । 2 C N SA SB SC SD मध्य । 3 C °तस्ते° । 4 C omits two lines. 5 D देव° ।

नवशक्तीः समानीय नवानां मैथुनं चरेत् ।
स[1]कृत् त्रयाणां देवेशि वारं वारं प्रवेशयेत् ॥ ६३ ॥

पुनः सकृत् त्रयाणां च त्रयाणां च पुनः सकृत् ।
×× ×× प्रदत्त्वा तु द्वितीये तु पुनर्ददेत् ॥ ६४ ॥

पुनस्तृतीये संयोज्य वा[2]रं वारं पुनः पुनः ।
एवं क्रमेण देवेशि नवनाथाधिको भवेत् ॥ ६५ ॥

दीपोत्सवचतुर्दश्यामष्टोत्तरलतागृहम् ।
प्रविश्य पूजयेद् रात्रौ तत्कुण्डे स्नानमाचरेत् ॥ ६६ ॥

त्रैलोक्यनाथो भवति तावद्दिवसयोगतः ।
पक्षक्रमेण शक्तीनां प्रत्यहं पूजयन् शुचिः ॥ ६७ ॥

विलोक्य प्र[3]जपेत् पक्षं रत्नमालादिभिर्जपेत् ।
महेन्द्रसदृशो भूयात् पक्षमात्रेण कालिका ॥ ६८ ॥

महासिद्धिद्रुमलतावेष्टितः साधकोत्तमः ।
रात्रौ ×× जपेन्मन्त्रं सैव कल्पलता भवेत् ॥ ६९ ॥

[4]महादि[5]व्यद्रुमलता[6]घर्षणे जपपूजनम् ।
वेतालयक्षिणीयक्षसिद्धिदं परमेश्वरि ॥ ७० ॥

महा[7]दिव्यद्रुमलतापुष्पिणीसमवीक्षणम् ।
कञ्चुकी सकलं वस्त्रं स्वस्य भूषणहेतवे ॥ ७१ ॥

स्थापयेत् परमेशानि रात्रौ वे[8]षार्थमीश्वरि ।
वेषं कृत्वा जपेत्तत्र त्रिश[9]क्तिसिद्धिमाप्नुयात् ॥ ७२ ॥

वस्त्रवद् धारणं कार्यं तच्च वस्त्रान्तरे शिवे ।
पञ्चाङ्गे [10]धारयेद् देवि पञ्चरत्ने[11]श्वरो भवेत् ॥ ७३ ॥

इति संक्षेपतः प्रोक्तं पुष्पादिनिर्णयं शृणु ।
नववर्णमयं कृत्वा कालीं तारां समर्चयेत् ॥ ७४ ॥

---

1 C omits this line. 2 D omits वारं वारं...... रात्रौ in fourth line. 3 SA SC SD पूजयेत् । 4 DN SA reads verse 70 after 71. 5 SD °सिद्ध° । 6 C SD °कर्षणं । 7 SD °सिद्ध° । 8 D SA SC देवा° । 9 SA SB SC °र्क्तिं । 10 SA SC भाव° । 11 C °त्नव° ।

नवरत्नाधिकं देवि फलं भवति नान्यथा ।
रेतोयुक्तं भवेत् तत्र पुष्पं प्रोक्तं रजोयुतम् ॥ ७५ ॥

कमलं तु त्रिवर्णं स्यादेतत्कञ्जं [1]तु रन्ध्रकम् ।
नववर्णानि दे[2]वेशि पुष्पाणि प्रभवन्ति च ॥ ७६ ॥

येषां भेदोऽपि नास्त्येव नवधा ते प्रकीर्तिताः ।
नव पत्राणि देवेशि तद्वदेव भवन्ति च ॥ ७७ ॥

पत्राणि देवदेवेशि कथ्यन्ते शृणु साम्प्रतम् ।
केरले बिल्वतुलसीशमीदूर्वामुराजटा (:) ॥ ७८ ॥

विष्णुक्रान्ता जातिपत्रं महा[3]पत्रं जयन्तिका ।
मारीची ब[4]र्बरी देवि तथा दम[5]नकं शिवे ॥ ७९ ॥

अपामार्गो भृङ्गराजः से[6]वन्ती कुश[7]मेव च ।
मालती माधवी जाती यूथी कुन्दं च केशरे ॥ ८० ॥

बन्धुजीवमोड्रपुष्पं करवीरं कनी[8]यकम् ।
केतकी पाटला दिव्यराजपुष्पे च दाडिमी ॥ ८१ ॥

सेवन्ती राजसेवन्ती वरुबिल्वसुकामद[9]म् ।
आम्रपुष्पं तथा जम्बू एकवीरा तथैव च ॥ ८२ ॥

अवीरा चम्प[10]को देवि मल्लिका राजमल्लिका ।
जपापुष्पं पत्रभेदा राजमु[11]क्ताभिधं तथा ॥ ८३ ॥

कदम्बकुमुदाम्रा[12]तैरतथैव च कुरण्ट[13]कैः ।
सेफालिका तथा झि[14]ण्टी तगरश्चापराजिता ॥ ८४ ॥

जयन्ती कोविदारश्च शाल्मल्यशोकपुष्पकैः ।
अर्कपालाशधत्तूरपुन्नागकर्णिकारजाः ॥ ८५ ॥

द्रोणपुष्पे च तगरे पारिजातं तिलाख्यकम् ।
सर्वधान्यभवं पुष्पं रम्भानिम्बू[15]समुद्भवम् ॥ ८६ ॥

---

1 C चतुरस्रकम् । 2 C पुष्पाणि पत्राणि । 3 N मरु° । 4 SA चर्च° । 5 D SA मद° । 6 D वास° । 7 D SD °सुमेऽपि । 8 D °लीप° । 9 DN SD °कम् । 10 D SA SB SC °पञ्चके । 11 SD रक्तशुक्रा° । 12 SA SC °घ्रातै° । 13 N SA °रुन्दु° । 14 C SA सिण्टी । 15 D निम्ब° ।

तथा दमन[1]पुष्पं च बकुलोद्भवमेव च ।
नन्द्यावर्तं च मन्दारं तथा सौगन्धिकं शिवे ॥ ८७ ॥

नवमल्ली पार्थ[2]पुष्पे सर्जपुष्पं तथा प्रिये[3] ।
म[4]दन्ती चैव कह्लारं तथा मरुबकं शिवे ॥ ८८ ॥

शतपत्रं च वासन्ती दिव्यगन्धानि यानि च ।
सुदर्शनभवं पुष्पं काशपुष्पमथापरम् ॥ ८९ ॥

यथा युक्त्या तु पुष्पाणि नववर्णोद्भवानि च ।
कारयेद् यत्नतो देवि वर्ण[5]गन्धेन मिश्रितम् ॥ ९० ॥

अष्टगन्धेन तद्वस्त्रं संयुक्तं पुष्पमाह[6]रेत् ।
पूजने च लता[7]होमेऽ[8]प्येकमन्त्रसमं भवेत् ॥ ९१ ॥

सूत्रेण पट्टवस्त्रेण वीरवस्त्रेण पार्वति ।
काश्मीरवस्त्रसूत्रेण पट्टसूत्रेण पार्वति ॥ ९२ ॥

स्वयम्भूसंयुतं पुष्पं सिद्ध[9]पुष्पं विदुर्बुधाः ।
एतत्पुष्पं समासाद्य पूजयेत् कालिकाम्बिकाम् ॥ ९३ ॥

कालीरूपो नरो भूयाद् दिवसत्रययोगतः ।
एतत्पुष्पं समं कृत्वा पुष्पाणि होमयेच्छिवे ॥ ९४ ॥

पुष्पहोमफलात् कोटिगुणितं फलमाप्नुयात् ।
सर्ववर्णमयं पुष्पं कृत्वा सर्वफलं भवेत् ॥ ९५ ॥

वस्त्रादिकामनासिद्धिं वाञ्छामाप्नोति निश्चितम् ।
सदा शुद्धानि पुष्पाणि नवीनानि दिने दिने ॥ ९६ ॥

न निर्माल्यानि देवेशि न च पर्युषितानि च ।
सिद्धपुष्पाणि देवेशि गन्धर्वप्रीतिदानि च ॥ ९७ ॥

एतेन पूजयेद् देवि फलं पुष्पा[10]धिकं भवेत् ।
न स्वर्णैर्न च रत्नैश्च न[11] च वस्त्रा[12]म्बरादिभिः ॥ ९८ ॥

नहि तृप्ता वरारोहे तारिणी लोकतारिणी ।
यथावत् कारयेद् देवि देवता वरदा ध्रुवम् ॥ ९९ ॥

---

1 N मद°; SD दश°। 2 C °र्श्वे°। 3 SC °यम्। 4 N दम°। 5 N नाना°। 6 C °रमे°; N °चरे°। 7 N तथा। 8 C °नेक°; SD °प्येवं। 9 SD °द्धि°। 10 C °दि°। 11 C DN SD नव°। 12 D रक्ता°।

सदा शुद्धानि दिव्यानि सर्व[1]श्रेष्ठतराणि च ।
एतज्ज्ञानसमायुक्तस्त्रैलोक्याधिपतिर्भवेत् ॥ १०० ॥

विद्या कुले[2]ऽकुले तीर्थे चक्रकन्याक्रमेण च ।
पुष्पमेतन्महेशानि व्यत्ययादुत्तरोत्तरम् ॥ १०१ ॥

सिद्धिदं देवदेवेशि नात्र कार्या विचारणा ।
सिद्धस्वाराज्यवैराज्यं सा[3]म्राज्यं दिव्य[4]ऋद्धिदम् ॥ १०२ ॥

पुष्पाणि परमेशानि ज्ञातव्यानि यथार्थतः ।
स्वयम्भूगन्धसंतुष्टा कालिका तद्गृहे स्थिता ॥ १०३ ॥

यत्र पुष्पप्रयोगे[5] हि सामान्यहोमपुष्पवत् ।
रहस्यातिरहस्यं च कथितं परमेश्वरि ॥ १०४ ॥

इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

देव्युवाच

दे[6]वेश चानुकल्पस्य विधिं मे ब्रूहि सत्वरम्[7] ॥ १०५ ॥

सात्त्विको जीवहत्यां च न कदापि प्रकारयेत् ।
सात्त्विकोऽयं बलिर्देवि कथ्यते यत्नतः शृणु ॥ १०६ ॥

माहिषत्वेन कूष्माण्डं छागत्वेन च कर्कटीम् ।
वृन्ताकं कुक्कुटत्वेन मेषत्वेन च तुम्बि[8]काम् ॥ १०७ ॥

[9]रम्भापुष्पं बीजपूरपिण्डं वाजिबलौ भवेत् ।
मानुषत्वेन पनसं मत्स्यत्वेनेक्षुदण्डकम् ॥ १०८ ॥

[10]सूरणं शरभत्वेन तथा कोशातकं मृगे ।
पायसं तु गजत्वेन मार्जारत्वे कुलत्थकम् ॥ १०९ ॥

पटोलं शूकरत्वेन शर्करा वालु[11]कं तथा ।
खड्गत्वेन महेशानि मत्स्यत्वे कदलीफलम् ॥ ११० ॥

मूषत्वे मूलकं चै[12]व सारङ्गत्वे कलिङ्ग[13]कम् ।
कीरत्वे नारिकेलं च मत्स्यत्वे कदलीं च वा ॥ १११ ॥

---

1 CN SB °र्वात् । 2 C N °ला° । 3 D दिव्यर्षिसिद्धिदः शिवे । 4 SD °सि° । 5 SD °गो । 6 D द्रव्यस्य । 7 SD adds शिव उवाच । 8 C °र्वि° । 9 C omits this line. 10 C omits two lines. 11 D °का ; N °खं ; SA SC °घं ; SB SD °षं । 12 D देवि । 13 C °ङ्ग° ।

माषाः सर्वबलित्वेन सर्वेषां कृशरा[1]न्नतः ।
पायसापूपसंयावलड्डुकैः कृश[2]रान्नकैः ॥ ११२ ॥

शाकोदनैस्तथा[3] सूपैः पिण्याकार्द्र[4]कपोलिकाः ।
वटका लशुनं गृञ्जं कलिङ्गं[5] बीजसोदरम् ॥ ११३ ॥

नानोपायैः षड्रसैश्च बलिरेषः प्रकीर्तितः ।
क्रूरविद्याविधौ देवि पशुं पिष्ट[6]मयं चरेत् ॥ ११४ ॥

यवक्षोदमयं वापि यद्वा धान्यसमुद्भवम् ।
माषपिष्टभवं देवि सर्वकर्मणि कारयेत् ॥ ११५ ॥

गुडार्द्रके दधिगुडौ लवणं दुग्धमेव च ।
यथानुकल्पयोगेन योजनीयं महेश्वरि ॥ ११६ ॥

यथोक्तविधिमासाद्य यथोक्तफलमाप्नुयात् ।
इति प्रोक्तं भक्तिवशाद् गर्भान्तयोगके शृणु ॥ ११७ ॥

गर्भत्वं च समासाद्य सर्वकालं जपेन्निशि[7] ।
महाकालसमो भूयान्नात्र कार्या विचारणा ॥ ११८ ॥

योनिस्थं सर्वमेतद्धि भूमौ चैव निधापयेत् ।
तत्र स्थित्वा जपेत् कालीं कलि[8]कल्पद्रुमो भवेत् ॥ ११९ ॥

वस्त्रादिपूर्वप्रोक्तानि स्वयम्भूमासपुष्पतः ।
सिद्धपुष्पं [9]सुसिद्धाख्यं द्वितीयं परिकीर्तितम् ॥ १२० ॥

× × × × तु [10]प्रक्षिप्य रम्भापुष्पाणि होमयेत्
× × × सक्तहृदयो होमकर्मणि संस्थितः ॥ १२१ ॥

कालीरूपो नरो भूयात् षष्टिसिद्धीश्वरो भवेत् ।
विद्या मधुमती सिद्धिस्तत्करस्था भवेद् ध्रुवम् ॥ १२२ ॥

विपरीत × × कृत्वा दे[11]वि पुष्पाणि होमयेत् ।
धने धनेशतुल्यः स्यात् कान्त्या मदनसुन्दरः ॥ १२३ ॥

---

1 D °षरं त° । 2 D SA SC °ष° । 3 SD °पू° । 4 C °द्रे पिपीलिका ।
5 C °ङ्गं बीजमादरात् । 6 D SD पिण्ड° । 7 SD °च्छिवे । 8 D SD काली° ।
9 C DN तु । 10 C N नि° । 11 C °वी ।

कवित्वे तारिणीतुल्यो भोगे राजीवलोचनः ।
वेतालः किङ्करो भूयाद् भैरवो हि सदानुगः ॥ १२४ ॥

× × × × प्रदत्त्वा तु द्वितीयां नग्नरूपिणीम् ।
पूजयेद् देवताबुद्ध्या दिव्यचक्रं च तद्भवेत् ॥ १२५ ॥

[1]प्रपूज्य दिव्यचक्रं च चक्रराजो नरो भवेत् ।
× × × × प्रदत्त्वा तु द्वितीयां पुष्पिणीं यजेत् ॥ १२६ ॥

पुष्पिणीं मध्य द्वितीयां नग्नामाराध्य[2] पूज्य च ।
[3]प्रजपेन्मानवो यस्तु ब्रह्माण्डनायको भवेत् ॥ १२७ ॥

रहस्यातिरहस्यं च गोपनीयं प्रयत्नतः ।
गोपनीयं गोपनीयं न प्रकाश्यं कथञ्चन ॥ १२८ ॥

प्रकाशात् सिद्धिहानिः स्यादित्याज्ञा शाङ्करी स्मृता ।
न स्वर्णैर्न च रत्नैश्च न स्पर्शमणिभिः शिवे[4] ॥ १२९ ॥

नहि तृप्यति देवे[5]शि कालिका भक्तवत्सला ।
तस्माद् × × भवं पुष्पं पूजार्थे संग्रहेच्छिवे ॥ १३० ॥

इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।
इति श्री[6]शक्तिसंगमे श्रीतारासूक्ते चतुर्थः पटलः ॥

---

1 SD omits this line. 2 D °लोक्य पूजयेत् । 3 SB पूजये° । 4 N SB शिरैः । 5 SC °शी । 6 all Mss. omit this, except SD.

पञ्चमः पटलः ।

श्रीदेव्युवाच

विशेषपुष्पपटलं सूचितं न प्रकीर्तितम् ।
तन्मे कथय विश्वेश यद्यहं तव वल्लभा ॥ १ ॥

श्रीशिव उवाच

रहस्यातिरहस्यं च कथ्यते शृणु साम्प्रतम् ।
अवीरा पञ्चधा प्रोक्ता श्वेतपीतारुणक्रमात् ॥ २ ॥

श्वेतपी[1]ता पीतरक्ता रक्त[2]श्वेता परा मता ।
एवं भेदान्तरेणैव नवधा परिकीर्तिता ॥ ३ ॥

अवीराकुसुमेनैव पूजयेत् सर्वदेवताः ।
रतिपुष्पं कामपुष्पं देवपुष्पं क्रमेण च ॥ ४ ॥

सेवन्ती बहुधा ख्याता तद्भेदान् शृणु पार्वति ।
श्वेता पीता तथा रक्ता त्रितयं त्रितयं त्रिषु ॥ ५ ॥

सिन्दूरा दिव्यवर्णा च हारिद्रा च परा भवेत् ।
रतिपुष्पमिदं प्रोक्तं कामपुष्पं शृणु प्रिये ॥ ६ ॥

पीतं गु[3]च्छस्वरूपं च रक्तं गुच्छस्वरूपक[4]म् ।
पीतरक्तं रक्तपीतं सूक्ष्ममन्यन्महेश्वरि ॥ ७ ॥

षड्भेदाः सूक्ष्मभेदे तु अतिसूक्ष्मेऽपि षड् भवेत् ।
एवमष्टादशविधं कामपुष्पं महेश्वरि ॥ ८ ॥

देवपुष्पं प्रवक्ष्यामि येन देवीमयो[5]र्चनात् ।
श्वेतरक्तं दिव्यरूपं सिन्दूरसंनिभं तथा ॥ ९ ॥

अपरं श्वेतपीतं च पञ्चवर्णमथापरम् ।
रतिपुष्पं पञ्चवर्णं सुन्दरीलोकगोचरम् ॥ १० ॥

---

1 SR SC °नीला । 2 N रक्ता । 3 C पु° ; SD गन्ध° । 4 C °तः । 5 C SC भवेत् ।

कामपुष्पं पञ्चवर्णं कालिकालो[1]कगोचरम् ।
देवपुष्पं नन्दवर्णं तारिणीलोकगोचरम् ॥ ११ ॥

करवीरः पञ्चवर्णः कालीताराप्रगोचरः ।
चूडामणिं प्रवक्ष्यामि सर्वपुष्पोत्तमोत्तमम् ॥ १२ ॥

चूडामणिर्दशविधो नवरत्नप्रभेदतः ।
दशमं सर्ववर्णा[2]ढ्यं पुष्पेन्द्रसंज्ञकं भवेत् ॥ १३ ॥

केतकी द्विविधा प्रोक्ता पुंस्त्रीभेदक्रमेण च ।
पुंभेदेऽपि द्विधा प्रोक्ता पीतश्वेतप्रभेदतः ॥ १४ ॥

स्त्रीभेदेऽपि द्विधा प्रोक्ता पीतश्वेतप्रभेदतः ।
पुंभेदे कठिनः प्रोक्तः स्त्रीभेदे कोमला[3] मता ॥ १५ ॥

मल्लिका वे[4]दधा प्रोक्ता तत्क्रमं शृणु पार्वति ।
श्वेता द्विपुष्पा षट्पुष्पा पुष्पगुच्छा तथा परा ॥ १६ ॥

नवपुष्पा परा[5] प्रोक्ता रक्तपुष्पा परा[6] भवेत् ।
पीतपुष्पा मेचका च धूसरा पञ्चवर्णजा ॥ १७ ॥

मालती पञ्चधा प्रोक्ता तद्भेदान् शृणु[7] पार्वति ।
गन्धराजा सर्वगन्धा तथा श्रीखण्डगन्धि[8]का ॥ १८ ॥

कस्तूरीगन्धसंयुक्ता चतुर्थी केतकी मता ।
मालती स्वर्णभा जाती श्वेतर[9]क्ता शिवापरा ॥ १९ ॥

रक्तवर्णा परा ज्ञेया पञ्चवर्णा तथापरा ।
एते भेदा मया प्रोक्ता गोपिता **यामलादिके** ॥ २० ॥

डामरे गोपिता देवि तव स्नेहादिहोदिताः ।
गोपनीया महेशानि संक्षेपादेतदेव तु ॥ २१ ॥

यूथिका मालती जाती मल्लिका नवमल्लिका ।
कस्तूरीगन्धिका देवि तथैवागुरुगन्धिका ॥ २२ ॥

नखगन्धा मल्लि[10]काद्या मालती [11]वेदगन्धिका ।
स्वर्गे तु मालती प्रोक्ता रक्ता पातालगोचरा ॥ २३ ॥

---

1 N SB SC °गम° । 2 SC SD °ढ्यं । 3 N °लो मतः । 4 N SC SD वै द्विधा । 5 SA SC तथा । 6 SA SC SD तथा । 7 N संशृणु प्रिये । 8 D °खण्डिका; SA गण्डिका । 9 N °ता रक्तशिरा । 10 N °ला° । 11 C SD देव° ।

जाती यूथी तथा मल्ली [1]मृत्युलोके प्रकीर्तिता ।
[2]रक्तमल्ली पीतमल्ली वर्णपङ्कजरूपिणी ॥ २४ ॥

त्रिशक्तिरू[3]पे देवेशि सर्वदेवप्रपूजिते[4] ।
एतद्रूपं विरच्याथ पूजयेच्चीनसुन्दरीम् ॥ २५ ॥

एतद्रहस्यं संप्रोक्तं पुण्यानां निर्णयामृतम्[5] ।
जाता न तृप्तिर्देवेशि(? श) विशेषं वद सत्वरम् ॥ २६ ॥

मालती [6]राजमल्ली च जाती यूथी जयन्तिका ।
श्रीमाली लघुयूथी च मल्ली चेति क्रमः स्मृतः ॥ २७ ॥

श्वेता श्रीमा[7]ली गदिता जाती रक्तत[8]ला मता ।
मालती दलपत्रा च रक्तश्वेता तृषा[9] रसा ॥ २८ ॥

रा[10]जमल्ली महेशानि बहुपत्राणि गन्धिनी ।
शतपत्रा राजमल्ली कलापत्रा तु मल्लिका ॥ २९ ॥

पञ्चपत्रा भवेज्जाती सप्तपत्रा तु मालती ।
यूथी सूक्ष्मा तु[11] द्विविधा रसगन्धा मनोहरा ॥ ३० ॥

मालती स्वर्णभा जाती श्वेता रक्ता[12] शिवा मता ।
रक्तवर्णा पञ्चवर्णा पीतकृष्णा परा स्मृता[13] ॥ ३१ ॥

कस्तूरीगन्धिका देवि तथैवागुरुगन्धजा ।
अश्वगन्धा मल्लि[14]काख्या वेदयुक्ता तु मालती ॥ ३२ ॥

सर्वदे[15]वविधौ शस्ता पूजासाङ्गार्थहेतवे ।
धातकीबिल्वपुष्पे च धना[16]र्थे पूजने मते ॥ ३३ ॥

पत्रैः पुष्पैः फलैर्देवि पूजाद्यं सममेव हि ।
पीता कृष्णा कलौ त्याज्या श्वेता रक्ता प्रपूजने ॥ ३४ ॥

---

1 D SD मर्त्य° । 2 D नव°; C तगरं मल्लिका पीतवर्णपञ्चक° । 3 N °लोके । 4 N °जने; C °जयेत् । 5 C adds देव्युवाच । 6 C शत° । 7 C °ला; SC SD °लती । 8 SA SC SD °लता; SB °दला । 9 SD त्रिधा बला; D दशा बला । 10 SB गज° । 11 SB SD तद् । 12 N °क्तशिरा । 13 SD मता । 14 N °ला° । 15 N °वेद° । 16 SB SD °र्थं ।

काली तारा रोचना[1] वा विधौ पीतां विवर्जयेत् ।
कृ[2]ष्णा रक्तापि संवर्ज्या नान्या जाती न मालती ॥ ३५ ॥

पञ्चवर्णां राजमल्लीं श्रीविद्यायां विवर्जयेत् ।
हरिता[3] मालती त्याज्या सूर्ये शक्तौ[4] विशेषतः ॥ ३६ ॥

बिल्वैर्मरुबकाद्यैश्च तुलसीवर्जितैः शुभैः ।
तुलसीं मालतीं चैव काली[5]ताराविधौ त्यजेत् ॥ ३७ ॥

बिल्वं मरुबकं चैव वीरकर्मणि वर्जिते ।
कुन्दं मदन्ती जाती च सर्वविद्याविधौ स्मृताः ॥ ३८ ॥

केतकी करवीराणि यूथिका कर्णिकारकः ।
सर्वविद्याविधौ प्रोक्ताः कालीताराविधौ शुभाः ॥ ३९ ॥

इति संक्षेपतः प्रोक्तं विशेषः कथ्यते शृणु ।
देशपर्यायभेदेन सर्वं संकथ्यते ध्रुवम् ॥ ४० ॥

देशपर्यायभेदेन शृ[6]ण्वाम्नायकथानकम् ।
कादिहादिप्रभेदेन द्विधा चाम्नायपद्धतिः ॥ ४१ ॥

हादौ नवविधत्वं च कादौ नवविधत्वकम् ।
तदाम्नायक्रमेणैव तदाचारक्रमेण च ॥ ४२ ॥

तद्दे[7]शनिर्णयः संख्या परिमाणं निगद्यते ।
प्राक् प्रत्यग् दक्षिणोदक् च केरलादिक्रमेण च ॥ ४३ ॥

केरलश्चैव काश्मीरो गौडश्चैव तृतीयकः ।
विलासाख्यश्चतुर्थः स्यात् तत्क्रमं शृणु पार्वति ॥ ४४ ॥

अङ्गादि मालवान्तं च केरलः परिकीर्तितः ।
मरुदेशं समारभ्य नेपालान्तं महेश्वरि ॥ ४५ ॥
काश्मीराख्यः सम्प्रदायः कथितः परमेश्वरि ।
सिल[8]हट्टं समारभ्य सैन्धवान्तं महेश्वरि ॥ ४६ ॥
गौडमार्गो महेशानि कीर्तितस्ते मया शि[9]वे ।
विला[10]साख्यः सम्प्रदायः सर्वगः परिकीर्तितः ॥ ४७ ॥

---

1 N °नी च । 2 SC omits two lines. 3 D हरिणा । 4 D SD शम्भौ । 5 SD ताराकाली° । 6 D श्रुत्वा° । 7 SD omits two lines. 8 N शिला°; SA SB SD शिल°; C सिंह°; SC सिंहलदेशमारभ्य । 9 C DN SA SB SC तव । 10 N °शाला° ।

दिव्यकौलवाममार्गस्त्रिविधत्वं प्रकीर्तितम् ।
भावदिव्यः क्रियादिव्यस्त्वनुकल्पक्रमेण च ॥ ४८ ॥

काश्मीरो द्विविधो देवि गौडोऽपि द्विविधो भवेत् ।
मादियुक्तो भवेद् वामो तद्धीनो दक्षिणः[1] स्मृतः ॥ ४९ ॥

विला[2]साख्यः सम्प्रदायो द्विविधः परिकीर्तितः ।
हार्दबाह्यप्रभेदेन सम्प्रदायो द्विधा स्मृ[3]तः ॥ ५० ॥

देशपर्यायभेदेन तन्त्राणां गणनां शृणु ।
शतं तन्त्राणि चीने तु उपतन्त्राणि सप्त[4] च ॥ ५१ ॥

द्र[5]विडे विंशतन्त्राणि पञ्चविंशति पार्वति ।
उपतन्त्राणि देवेशि शृणु जैनक्रमं शिवे ॥ ५२ ॥

अष्टादश च तन्त्राणि उपतन्त्राणि विंश[6]तिः ।
केर[7]ले षष्टितन्त्राणि उपतन्त्राणि शा[8]रदे ॥ ५३ ॥

पञ्चाशदुपतन्त्राणि काश्मीरे शृणु पार्वति ।
शततन्त्राणि देवेशि उपतन्त्राणि वै दश ॥ ५४ ॥

गौडे द्विसप्त तन्त्राणि उपतन्त्राणि वै क[9]ला ।
तद्देशा[10]द् देशमारभ्य तन्त्राण्येतानि पार्वति ॥ ५५ ॥

व्याप्य तिष्ठति देवेशि रहस्यमिदमीरितम् ।
देशव्यवस्था तन्त्राणां नामानि परमेश्वरि ॥ ५६ ॥

अङ्ककोशे महेशानि मया पूर्वं प्रकाशितम् ।
संहितादीनि देवेशि कालपर्यायवद्भवेत् ॥ ५७ ॥

पूर्वा दक्षिणा पाशी च उत्तरा तु चतुर्थिका ।
ऊर्ध्वा तु पञ्चमी प्रोक्ता षष्ठी पातालसंज्ञिका ॥ ५८ ॥

येन वक्त्रे[11]ण यज्जप्तं स एवाम्नाय ईरितः ।
सभेदा त्रिपुरा देवि तथा सम्पत्प्रदा शिवे ॥ ५९ ॥

---

1 SA SC SD °णो भवेत् । 2 D °शाला° । 3 C मतः । 4 C विंशतिः । 5 C omits three lines. 6 SD वै दश । 7 SD omits three lines. 8 D omits शारदे...उपतन्त्राणि in forth line. 9 C दश । 10 D °शमेद° । 11 C SA SC चक्रेण ।

महेश्वरं तत्पुरुषं शैवं[1] दर्शनमेव च ।
पूर्वाम्नायो महेशानि दक्षिणं श्रृणु यत्नतः ॥ ६० ॥

अ[2]घोरं कालिका याम्ये वैष्णवं दर्शनं तथा ।
रौद्रा[3]श्च भैरवाः शैवाः पश्चिमस्थाः प्रकीर्तिताः ॥ ६१ ॥

चैतन्यभैरवी चैव सद्योजा[4]तस्तु पश्चिमे ।
गाणपं दर्शनं साङ्गमुत्तरं श्रृणु पार्वति ॥ ६२ ॥

कुबेरं भैरवं वामदेवं महेश्वरं तथा ।
तथा सौद[5]र्शनं देवि उग्रापत्तारिणी तथा ॥ ६३ ॥

उत्तराम्नाये महोग्रा च महाविद्या च शाङ्क[6]री ।
अयं देशाख्यपर्यायो निष्कलं त्वं श्रृणु प्रिये ॥ ६४ ॥

समेदा त्रिपुरा पूर्वे सौरगाणपवैष्णवाः ।
दक्षिणाम्नायगाः प्रोक्ताः पश्चिमे रौद्रभैरवाः ॥ ६५ ॥

शैवाश्च कथिता देवि उत्तरं श्रृणु पार्वति ।
उग्रापत्तारिणी चोग्रा महाविद्या च शाङ्करी ॥ ६६ ॥

ऊर्ध्वाम्नाये महेशानि सप्त[7] पातालगोचरा ।
शाक्तक्रमेण कथितः श्रृणु शैवक्रमेण च ॥ ६७ ॥

सम्पत्प्रदां तत्पुरुषं महेशं पूर्वगोचरम् ।
अघोरं शाकिनीं या[8]म्ये चैतन्यभैरवीं तथा ॥ ६८ ॥

सद्योजातं पश्चिमे च कुबेरं भैरवीं तथा ।
वामदेवं महादेवमुत्तराम्नायगोचरम् ॥ ६९ ॥

ऊर्ध्वाम्नायेऽर्धनारीशः प्रणवः परिकीर्तितः ।
पञ्चवक्त्र[9]क्रमेणैव कथितः परमेश्वरि ॥ ७० ॥

पूर्वक्रमो महेशानि षट्चक्रक्रमयोगतः ।
महापशुपतिः प्रोक्तः संवर्तेशः परात्परः ॥ ७१ ॥

षडाम्नायस्तत्क्र[10]मोऽयं पञ्चव[11]क्त्रे तु पञ्च च ।
देशाभिधः समाख्यातस्तद्देशस्था तु देवता ॥ ७२ ॥

---

1 D सौर°; SB SC SD शैव°। 2 C SB SC °रकालिनी। 3 SD गौडा°। 4 N °तं तु। 5 N °कं। 6 SA SB SC °रि। 7 N स्वमाया°। 8 N पार्श्वे। 9 D SA SC °चक्र°। 10 C °मेण। 11 SA SC °चक्रे।

अथ प्रवक्ष्ये देवेशि कालपर्यायसाधकम् ।
कस्मिन् काले तु का जाता तत्सर्वं कथ्यते श्रृणु ॥ ७३ ॥

काली तारा तथा छिन्ना षोडशी भुवनेश्वरी ।
मातङ्गी बगला लक्ष्मी सिद्ध[1]विद्या च भैरवी ॥ ७४ ॥

एता दश महाविद्याः सिद्ध[2]विद्या महेश्व[3]रि ।
यु[4]गादिसमये देवि शिवं परगुणोत्तरम् ॥ ७५ ॥

निर्गुणं निरहङ्कारं सच्चिदानन्दविग्रहम् ।
शाश्वतं सुन्दरं शुद्धं सर्वदेवयुतं वरम् ॥ ७६ ॥

आदिनाथं गुणातीतं काल्या संयुतमीश्वरम् ।
विपरीतरतं देवं सामरस्यपरायणम् ॥ ७७ ॥

पूजार्थमागता देवगन्धर्वाप्सरसाङ्गनाः ।
यक्षिणीं किन्नरीं चाद्या[5]मुर्वश्याद्यां तिलोत्तमाम् ॥ ७८ ॥

वीक्ष्य तां प्राह देवेशः सुन्दर्यः प्राणवल्लभाः ।
त्रैलोक्यसुन्दरि प्राणस्वामिनि प्राणरञ्जिनि ॥ ७९ ॥

किमागतं भवत्याऽद्य मम भाग्यो[6]दयो महान् ।
उक्त्वा मौनधरं शम्भुं पूजयन्त्यप्सराङ्गनाः ॥ ८० ॥

आदिशक्तय ऊचुः

संहा[7]रात्तारितं देव त्वया विश्वं जनप्रिय ।
सृष्टेरारम्भकार्यार्थ[8]मुद्युक्तोऽसि महेश्वर ॥ ८१ ॥

युगाद्यारम्भकालो हि वर्तते मृड शङ्कर ।
ब्रह्माणीकोटयः सर्वा माहेशीकोटिकोटयः ॥ ८२ ॥

इन्द्राणीकोटयः सन्ति वैष्णवीकोटिकोटयः ।
तव[9] सामरसानन्ददर्शनार्थं समागताः ॥ ८३ ॥

व[10]र्तते देवदेवेश चास्माकं सौख्यसागरः[11] ।
रतिं हित्वा कामिनीनां नहि सौख्यं महेश्वर ॥ ८४ ॥

---

1 SA SC SD °द्धि° । 2 SA SC SD °द्धि° । 3 C प्रकीर्तिता । 4 SC omits two lines. 5 C °द्या भुवनाद्या । 6 D °ग्यार्णवो । 7 SA SC °सा° । 8C SA °र्थं म° । 9 N नव° । 10 N D °न्ते । 11 N S °राः ।

सा रतिर्दृश्यते चात्र महाब्रह्मस्वरूपिणी ।
एवमेव तु चास्माभिः कर्तव्यं भर्तृणा सह ॥ ८५ ॥

एवं श्रुत्वा महादेवो ध्याना[1]वस्थितमानसः ।
ध्यानं हित्वा महादेवः प्रोवाच कालिकां प्रति ॥ ८६ ॥

कालि कालि मुण्डमालप्रिये भैरवनादिनि ।
शिवा[2]रूपधरे क्रूरे घोरदंष्ट्रे भयानके ॥ ८७ ॥

त्रैलोक्यभक्षणकरि सुन्दर्यः सन्ति तेऽग्रतः ।
सुन्दरीवीक्षणं कर्म कार्यं कालप्रिये शिवे ॥ ८८ ॥

ध्यानं मुञ्च महादेवि ता[3] गच्छन्ति गृहं प्रति ।
तव रूपं महाकालि मम भूतभ[4]यङ्करम् ॥ ८९ ॥

एतासां सुन्दरं रूपं त्रैलोक्यप्रियकारकम् ।
इति श्रुत्वा कालिका तु तत्रैवान्तरधीयत ॥ ९० ॥

त्रिंशन्निखर्वषट्वृन्दनवत्यर्बुदकोटिभिः ।
दर्शनार्थं तपस्तेपे सा वै कुत्र गता प्रिया ॥ ९१ ॥

मम प्राणप्रिया देवी[5] हा हा प्राणप्रिया[6] मम ।
किं करोमि क्व गच्छामि इत्येवं भ्र[7]मतोऽभव[8]त् ॥ ९२ ॥

देव्याः कृपा तदा जाता मम ध्यानपरः शिवः ।
यन्त्र[9]प्रस्तारबुद्धिस्तु शिवे जाता तु[10] सत्वरम् ॥ ९३ ॥

श्रीचक्रराजप्रस्ताररचनाभ्यासतत्परः ।
इतस्ततो भ्राम्यमाणस्त्रैलोक्यं चक्र[11]मध्यगम् ॥ ९४ ॥

चक्रपार[12]दर्शनार्थं कोट्यर्बुदयुगे गतम् ।
भक्तप्राणप्रिया देवी[13] महाश्रीचक्रनायिका ॥ ९५ ॥

तत्र बिन्दौ परं रूपं सुन्दरं सुमनोहरम् ।
रूपं जातं महादेवि महासाम्राज्यसुन्दरम् ॥ ९६ ॥

---

1 C °नसं° । 2 SC omits three lines. 3 SD आग° । 4 C SA SB SC SD °प्रिय° । 5 C SD °वि; SA SB SC °व । 6 C °ये । 7 SB °मि° । 8 D °वदत् । 9 D SB म° । 10 SC च । 11 C °मङ्गलम् । 12 C °द° । 13 SC SD °वि ।

महानिशासु संजाता भक्तभाग्यकुटुम्बिनी ।
रूपं[1] दृष्ट्वा तत्क्षणार्धाद् राजराजेश्वरः शिवः ॥ ९७ ॥

तस्याः कृपाकटाक्षेण तस्या रूपधरः शिवः ।
विना[2] शृङ्गारसंयुक्त्या तदा जाता महेश्वरि ॥ ९८ ॥

विना कृष्णांशतो देवि शृङ्गारो[3] नास्ति भूतले ।
विना काल्यंशतो देवि जगत् स्थावरजङ्गमम् ॥ ९९ ॥

एतदंशं विना देवि न शृङ्गारोऽस्ति भूतले ।
सदा[4] संप्रार्थिता सर्वैस्तदा यत्नोऽयमद्भुतः ॥ १०० ॥

अद्यापि देवदेवेशि नेत्रे केशे विराजते ।
सर्वेषां नेत्रकेशेषु ममांशो वर्तते शिवे ॥ १०१ ॥

स्वांशः काल्या[5] तदा दत्तः केशादौ सैव राजते ।
इत्येवं कालिकारूपं पूर्वरूपं महेश्वरि ॥ १०२ ॥

द्वितीयं सुन्दरीरूपं जातमित्थं महेश्वरि ।
चिदग्निकुण्ड[6]सम्भूतं सुन्दरं सद्गुणोत्तरम् ॥ १०३ ॥

रूपं जातं महेशानि महारात्रि[7]दिने शिवे ।
अवन्त्यां जातमेतद्धि कालीरूपं गुणोत्तरम् ॥ १०४ ॥

कादिरूपमिदं प्रोक्तं हादिरूपं शृणु प्रिये ।
एकस्मिन् समये पूर्वं ब्रह्मरूपः सदाशिवः ॥ १०५ ॥

राजराजेश्वरी काली कोटिब्रह्माण्डनायिका ।
देवानुग्रहणार्थं तु नानारूपं वितन्वती ॥ १०६ ॥

किं रूपं किं परं वर्ण्यं निर्गुणा[8]त्मा परात्मिका ।
लोकसंमोहनार्थं तु नानाभावान् वि[9]तन्वती ॥ १०७ ॥

सद्ब्रह्म[10]भावनां कृत्वा पूर्वं परशिवः स्थितः ।
सर्वसंहारकं कर्म कृत्वा दण्डं[11] विधाय च ॥ १०८ ॥

बृह[12]द्दण्डं विधायाथ शिवो ध्यानपरो ह्यभूत् ।
ध्यानस्य संच्यु[13]तिर्जाता सा ब्रह्मभावना मता ॥ १०९ ॥

---

1 C omits this line 2 SC omits two lines. 3 N SA SB न शृङ्गारोऽस्ति । 4 SD यदा । 5 C N °ल्यास्त° । 6 N °सद्रूपं । 7 N °मा° । 8 N °णा चाप°··कास्‌ । 9 N प्रवि° । 10 D सब्र° । 11 SA SC SD कुण्डं । 12 SA SC SD °त्कुण्डं । 13 D °ह्° ।

तदभ्यासनिमित्तार्थं शक्तेराकर्षणं कृतम् ।
देव्या[1] ज्ञानशिवः शुद्धो मार्गच्युतिपरायणः ॥ ११० ॥

शिवस्य बुद्धिस्मरणं दत्तं देव्या कृपा कृता ।
एवं बुद्धिः कृता देव्या शिवः पातु[2] ममा[3]न्तरम् ॥ १११ ॥

मा[4]नसे धृतमात्रेण शिवेनाकर्षणं कृतम् ।
शिवा[5]कर्षणकं कर्म मम मिथ्यात्वदायकम् ॥ ११२ ॥

इत्येवं मानसे धृत्वा मन्त्रः काल्या प्रदर्शितः ।
कालिका कामसुरसा महाकामकला परा ॥ ११३ ॥

स एव आदिनाथस्तु परब्रह्मेति गीयते ।
सच्चिदात्म[6]स्वरूपैवं ब्रह्मरूपाऽथ[7] निर्गुणा ॥ ११४ ॥

तया[8] स्वबालावस्थाख्या सखी तत्र प्रकाशिता ।
स्वरूपादधिकां मायां शिवाग्रे स्वर्गमार्गतः ॥ ११५ ॥

सा[9]धनार्थे मया दत्ता इत्येवं कालिकाऽब्रवीत् ।
तदा शिवः परशिवः पूर्वाभ्यासेषु तत्परः ॥ ११६ ॥

शक्तेः समरसानन्दात् कालीसाम्यमुपागतः ।
काल्यग्रे शिवशक्तिश्च या काल्या प्रकटीकृता ॥ ११७ ॥

तां दृष्ट्वा तु पुनर्दृष्ट्वा रूपानन्दपरायणः ।
अतिगर्वान्वितः शम्भुर्द्वितीया सुन्दरी मम ॥ ११८ ॥

पूर्वा काली ब्रह्मविद्या सुन्दरी सा[10] नहि प्रिये ।
एकस्मिन् समये देवि द्वे शक्ती समुपस्थिते ॥ ११९ ॥

प्र[11]पञ्चमूलो हि शिवः कालाभ्रसन्निभां वदेत् ।
द्वि[12]तीयवाक्येऽपि तथा घोरदंष्ट्रेति संवदेत् ॥ १२० ॥

तृ[13]तीयवाक्ये दे[14]वेशि द्वितीयां सुन्दरीं प्रति ।
त्रैलोक्यसुन्दरि प्राणप्रिये मम स्वरूपिणि ॥ १२१ ॥

---

1 SA SC °दान°; SD ज्ञानं। 2 SB SC या°। 3 C SA SB SC SD °ता°। 4 SC omits this line. 5 SD omits two lines. 6 C °कसंरूपैः। 7 D °थं°। 8 SC omits this line. 9 D omits three lines. 10 D मानसं। 11 SC omits this line. 12 SB omits this line. 13 SB द्वि°। 14 D द्वितीया सुन्दरी प्रतिपद्यते।

इत्युक्ते दक्षिणा देवी ब्रह्मरूपाऽद्यचण्डिका ।
आदिशक्तिः पूर्ण[1]रूपा क्रोधाक्रान्ता बभूव च ॥ १२२ ॥
तदैव सुन्दरं रूपं सौभाग्या[2]र्णवकं परम् ।
राजराजेश्वरीरूपं बिभ्रती परमेश्वरी ॥ १२३ ॥
तदा परशिवः शम्भुर्विस्मयान्वित[3]लोचनः ।
महाप्रपञ्चरूपा च महाब्रह्माण्डनायिका ॥ १२४ ॥
प्र[4]कर्षेण तु पञ्चानां संयोगो युगपद् भवेत् ।
प्रपञ्चेशी तेन विद्या सौन्दर्ये तु प्रपञ्चता ॥ १२५ ॥
श्रीषोडशी तदा जाता महासाम्राज्यनायिका ।
आद्या श्रीदक्षिणाकाली द्वितीया बा[5]लभैरवी ॥ १२६ ॥
तृतीया सुन्दरी विद्या महात्रैगुण्यगोचरा ।
तस्याः कृपाकटाक्षेण राजराजेश्वरः शिवः ॥ १२७ ॥
न्यासजालादिकं सर्वं पूजामन्त्रा अनेकधा ।
त[6]दैव तु षडाम्नायास्तथा श्रीपञ्चपञ्चिका ॥ १२८ ॥
पूर्वा प्रकृतिरूपा स्यान्मूलविद्या प्रियंवदे ।
अनेककोटिशो भेदास्तदा जाता महेश्वरि ॥ १२९ ॥
इति सत्यं परं प्रोक्तं मोहरात्रिस[7]मुद्भवा ।
महानिशामुखे जाता श्रीविद्या परमा कला ॥ १३० ॥
शिवकाञ्च्यां च श्रीशैले जाता श्री[8]त्रिपुराम्बिका ।
कालरात्रिदिने प्राप्ते निशायां मध्यभागके ॥ १३१ ॥
उग्रापत्तारणार्थं तु उग्रतारा स्वयं कला ।
कहेत्येवं महामन्त्रस्तूत्तराम्नायगोचरः ॥ १३२ ॥
तद्राज्ञी तेन श्रीताराविद्या राजेश्वरी परा ।
सर्वानुग्रहणार्थं च समुत्पन्ना महेश्वरी ॥ १३३ ॥
एकस्मिन् समये पूर्वं कालीरूपा स्वयं भवेत् ।
आदिशक्तिर्महाविद्या वेदोद्धारपरायणा ॥ १३४ ॥

---

1 C ब्रह्म° । 2 C °र्चन° । 3 D SB SD °श्चि°; SC °ङ्कि° । 4 SC omits this line. 5 C चापि । 6 SD °थै° । 7 SB omits समुद्भवा…कालरात्रि in forth line. 8 N हि ।

महोग्रतारा देवेशि जाग्रद्रूपा बभूव च ।
नष्टे सृ[1]ष्टे ब्रह्मगोले नष्टे स्थावरजङ्गमे ॥ १३५ ॥
बृहदण्डमभूदेकं सृष्टेः पूर्वं म[2]हत्तरम् ।
तत्र जज्ञे स्वयं विष्णुश्चतुर्भुजसमन्वितः ॥ १३६ ॥
शङ्खचक्रगदापद्मचतुर्भुजधरो हरिः ।
तस्य नाभौ तथा ब्रह्मा जज्ञे सृष्टेश्च वै क्षये ॥ १३७ ॥
ललाटदेशे तस्यैव रुद्रो जज्ञे स्वयं हरेः[3] ।
ब्रह्मा पप्रच्छ देवेशं विष्णुं त्रिभ[4]वमोचन[5]म् ॥ १३८ ॥
कां विद्यां सुसमाराध्य चतुर्वेदो निगद्यते ।
विष्णुना प्राह देवेशं हरं[6] पप्रच्छ शङ्करम् ॥ १३९ ॥
कथयाऽस्मान् त्वं देवेश नाम्ना नीलसरस्वतीम् ।
महोग्रतारां स[7]द्विद्यां श्रीमदेकजटां पराम् ॥ १४० ॥
ब्रह्मणो वचनं श्रुत्वा प्रजहास महेश्वरः ।
शृणुष्वावहितो विप्र महानीलसरस्वतीम् ॥ १४१ ॥
यस्याः प्रसादमालभ्य चतुर्वेदान् वदिष्यति ।
मेरोः पश्चिमकूले च[8] चोलनामा महाह्रदः ॥ १४२ ॥
तत्र जज्ञे स्वयं वेदमाता नीलोग्रतारिणी ।
एतस्मिन्नेव काले तु मेरोः शृङ्गपरायणः ॥ १४३ ॥
जपं जाप्यं समासाध्य त्रियुगं च त[9]तः स्थितः ।
ममोर्ध्ववक्त्रान्निःसृत्य तेजोराशिर्विनिर्गतः ॥ १४४ ॥
ह्रदे चोले निपत्यैव नीलवर्णाऽभवत् पुरा ।
ह्रदस्य चोत्तरे भागे ऋषिरेको मह[10]त्तरः ॥ १४५ ॥
अक्षोभ्यं नाम चाश्रित्य मुनिवेशधरः शिवः ।
येनादौ जप्यते जा[11]तु स तस्य ऋषिरी[12]रितः ॥ १४६ ॥
विश्वव्यापकतोये तु ची[13]नदेशे स्वयं शिवे ।
ओंकारोपरि टाङ्कारस्ततोपरि च हूँकृतिः ॥ १४७ ॥

---

1 SB स्प° । 2 D °हो° । 3 D SD °रः । 4 SD °भुवनेश्वरम् । 5 D °हनम् । 6 D SA °रिं । 7 D सा वि° । 8 N C SB तु । 9 C °पः । 10 D °हो° 11 D या । 12 N D °डि° । 13 D ध्या° ।

कूर्चबीजस्वरूपा सा[1] प्रत्यालीढपदा[2] भवेत् ।
महोग्रतारा संजाता चित्प्रभा श्रीमहाकला ॥ १४८ ॥
छिन्नोत्पत्तिं प्रवक्ष्यामि तारा सा[3] सैव कालिका ।

श्रीशिव उवाच

पुरा कैलासशिखरे देवदेवो महेश्वरः ॥ १४९ ॥
छि[4]न्नोत्पत्तिर्महेशा[5]न सूचिता न प्रकाशिता ।
तस्याः स्वरूपसद्भावं निखिलेन महेश्वर ॥ १५० ॥
कथयस्व महादेव छिन्ना वा सा कथं भवेत् ।
तस्यास्तद्वचनं श्रुत्वा विहस्य परमेश्वरः ॥ १५१ ॥
कथयामास विद्यायाश्छिन्नायाः संभवं शुभम् ।

श्रीमहादेव[6] उवाच

देवि शृणु महाभागे छिन्नायाः संभवं शुभम् ॥ १५२ ॥
पुरा[7] देव[8]युगे देवि कैलासे पर्वतोत्तमे ।
मया सह महामाया शृङ्गारे तत्परा ह्यभूत् ॥ १५३ ॥
ममोपरि समासाद्य विपरीतरता ह्यभूत् ।
शुक्रोत्सारणकाले तु चण्डमूर्तिरभूत् तदा ॥ १५४ ॥
उत्सृ[9]ज्य शुक्रमात्मीयं बहिर्देशं गता यदा ।
एतस्मिन्नेव काले तु स[10]ख्यौ तस्या[11] बभूवतुः ॥ १५५ ॥
तस्याः शरीरसंभूते द्वे शक्ती शुभदायिके ।
डाकिनी वर्णिनी देवी सर्वशक्तिसमन्विता ॥ १५६ ॥
सख्यौ सा समुपालभ्य चण्डदेवी महोदया ।
साधूनां च हितार्थाय दुष्टानां च वधाय च ॥ १५७ ॥
पुष्पभद्रानदीकूलं जगाम चण्ड[12]नायिका ।
उषःकाले तदा तत्र मज्जनं समुपालभत् ॥ १५८ ॥

---

1 D या। 2 C N SA SB SD °ऽभवत्। 3 °मानैव। 4 SD omits four lines. 5 D SA SB SC SD °नि। 6 SD omits महादेव…शुभम् in second line. 7 SD पुण्ये। 8 D कृत°। 9 N °त्सा°। 10 D सा ख्याता चण्डमूर्तिका। 11 C °स्यां। 12 SD च महोदया।

वर्णिनी डाकिनी तस्यां मज्जनं समुपालभत् ।
मध्याह्नसमये ते तु क्षुधायुक्ते बभूवतुः ॥ १५९ ॥
चण्डिकां पृच्छतस्ते तु भक्षणं परिकल्पय ।
तयोस्तद्वचनं श्रुत्वा विहस्य चण्डिका शुभा ॥ १६० ॥
चिच्छेद निजमूर्धानं निरीक्ष्य सकलां दिशाम् ।
वामनाड्या गलद्रक्तैर्डाकिनीं परितोष[1]यत् ॥ १६१ ॥
दक्षिणे वर्णिनीदेवीं पाययद् रक्तमात्मनः ।
ग्रीवामूलाद् गलद्रक्तैर्मस्तकं परितोषयत् ॥ १६२ ॥
एवं क्रीडां तदा कृत्वा सन्ध्यायां गृहमागता ।
आधाय निजमूर्धानं कबन्धोपरि पार्वति[2] ॥ १६३ ॥
निजमूर्तिं समासाद्य या पुरा परिकीर्तिता ।
विवर्णां पाण्डुरां दृष्ट्वा शिवो वचनमब्रवीत् ॥ १६४ ॥

श्रीशिव उवाच

शृणु देवि महामाये चण्डि चण्डपराक्रमे ।
इमे के तव संसर्गान्मम स्थानमिहागते ॥ १६५ ॥
विवर्णा त्वं कथमसि पूर्वाह्णे क्व गता ह्यसि ।
ब्रह्मविष्ण्वादिभिर्देवैर्गन्धर्वाद्यैर्महे[3]श्वरि ॥ १६६ ॥
अप[4]हृतासि केन त्वं तत्कथां कथयस्व मे ।

श्री[5]पार्वत्युवाच

ब्रह्मा विष्णुस्तथा रुद्रो गन्धर्वोऽपि महेश्वरः ॥ १६७ ॥
को वाऽपहर्तुं शक्तो मां पुष्पभद्रां गता ह्यहम् ।

श्रीशिव उवाच

मां परित्यज्य देवेशि पुष्पभद्रां कथं गता ॥ १६८ ॥
किं वा तत्र कृतं कर्म तत्कथां कथयस्व मे ।
क[6]थं त्वं वा[7] विवर्णाऽसि कारणं कथयस्व मे ॥ १६९ ॥

---

1 N SB °बोध° । 2 N °ती । 3 SC omits महेश्वरि…गन्धर्वोऽपि in forth line. 4 SA omits two lines. 5 C omits पार्वत्युवाच…यस्व मे in sixth line. 6 SA SC omit this line. 7 D °रिपू° ।

श्रीचण्डी उवाच

वीररात्रिदिने जाता दिनान्ते परमा कला ।
सखीभ्यां सह देवेश गताऽहं पुष्पभद्रिकाम् ॥ १७० ॥
जलक्रीडां समासाद्य सखीभ्यां सह शङ्कर ।
म[1]ध्याह्नसमये सख्यौ क्षुधा[2]युक्ते बभूवतुः ॥ १७१ ॥
पानार्थे याच्यमानाऽहं सखीभ्यां सह शङ्कर ।
छि[3]न्नां ग्रीवां तदा[4] कृत्वा पानं दद्यामनुत्तमम् ॥ १७२ ॥
पाययित्वा तदा रक्तं सखीभ्यां समुपागता ।
तस्मिन्नेव क्षणे देव विवर्णा सुन्दरी ह्यहम् ॥ १७३ ॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

इति श्रीअक्षो[5]भ्यतारासंवादे तारासूक्ते पञ्चमः पटलः ॥

---

1 SC omits two lines. 2 N शव° । 3 D °न्न° । 4 N °था । 5 SD omits अक्षोभ्य···सूक्ते ।

षष्ठः पटलः

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि बगलोत्पत्तिकारणम् ।

श्रीशिव[1] उवाच

पुरा कृतयुगे देवि[2] वातक्षोभ उपस्थिते ॥ १ ॥

चराचरविनाशञ्च सजलं ब्रह्मगोलकम् ।
दृष्ट्वा तु देवदेवेशि विष्णुश्चिन्तापरायणः ॥ २ ॥
हृ[3]रिद्राख्ये सिद्धकुण्डे तपस्यार्थं मनो दधे ।
स्वयं पीतेश्वरो भूत्वा जपध्यानपरायणः ॥ ३ ॥

सप्तार्बुदयुगं देवि श्रीपूजनपरायणः ।
तपस्यया तु संतुष्टा महाश्रीत्रिपुराम्बिका ॥ ४ ॥
हृ[4]रिद्राख्यं सरो दृष्ट्वा जले[5] क्रीडनतत्परा ।
महापीतह्रदाख्यो हि ह्रदो जागर्ति भूतले ॥ ५ ॥

सौराष्ट्रसारे जागर्ति तत्रस्था बगलाम्बिका ।
श्रीविद्यासम्भवं तेजो विजृम्भति इतस्ततः ॥ ६ ॥

चतुर्दशी भौमयुता मकरेण समन्विता ।
कुलऋक्षसमायुक्ता वीररात्रिः प्रकीर्तिता ॥ ७ ॥

तस्यामेवार्धरात्रौ तु पीतह्[6]दनिवासिनी ।
ब्रह्मास्त्रविद्या संजाता त्रैलोक्यस्त[7]म्भिनी परा ॥ ८ ॥

तत्तेजो विष्णुजं तेजो बिम्बप्रतिबिम्बयोगतः ।
स्तम्भनाख्यो महाबाण[8]स्तदोत्प[9]न्नो महेश्वरि ॥ ९ ॥

चतुर्दशी भृगुयुता कुम्भसंक्रमसंयुता ।
शिवऋक्षसमायुक्ता महानिशीथिनी कला ॥ १० ॥

---

1 C NSA SB SC SD omit शिव उवाच । 2 SA SB SC देव । 3 SA SB SC हा° । 4 SA SB SC हा° । 5 SA SB SC °ल° । 6 D °रुद्र° । 7 C D °म्भ° । 8 D °वाणी । 9 D °ज्ञा ।

शिवरात्रिः समाख्याता सर्वधर्मादिकर्मसु ।
अथ मातङ्गिनीं वक्ष्ये सर्ववश्यप्रवर्तिनीम् ॥ ११ ॥

पुरा कदम्बविपिने नानापक्षिसमाकुले ।
अतिक्रूरवि[1]भूतीनां वश्यार्थं परमेश्वरि ॥ १२ ॥

मा[2]तङ्गो मुनिराविष्टः कदम्बारण्यमध्यगः ।
शतवर्षसहस्राणि तपस्तेपे निरन्तरम् ॥ १३ ॥

तत्र तेजः समुत्पन्नं सुन्दरीनेत्रतः शि[3]वे ।
तेजोराशिरभूत्तत्र तत्र श्रीका[4]लिकाम्बिका ॥ १४ ॥

श्यामलं रूपमास्थाय राजमातङ्गिनी भवेत् ।
राजमातङ्गिनी विद्या त्रैलोक्यवशकारिणी ॥ १५ ॥

अथ श्रीभुवनां वक्ष्ये त्रैलोक्योत्पत्तिमातृकाम् ।
पुरा कृतयुगस्यादौ ब्रह्मा क्रूरतपा[5]वृतः ॥ १६ ॥

तपसा तस्य संतुष्टा सृष्टिशक्तिर्महेश्वरि ।
विश्वं जागर्ति यद्योनौ तत्रैव लयमेष्यति ॥ १७ ॥

चैत्रे मासि शुक्लपक्षे नवम्यां तारिणी कला ।
समुत्पन्ना महेशानि क्रोधरात्रिरिति स्मृता ॥ १८ ॥

सृष्ट्युत्पादनकार्यार्थं समुत्पन्ना महेश्व[6]रि ।
क्षीरोदार्णवसंभूता मथनादुद्भवा शिवा ॥ १९ ॥

त्रैलोक्यरक्षणार्थं च स्थितिशक्तिः प्रकीर्तिता ।
विष्णोर्वक्षःस्थलस्था च पद्मासनगता शि[7]वा ॥ २० ॥

कृष्णाष्टम्यां भाद्रपदे कोलासुरनिकृन्तिनी ।
एतत्तिथौ समुत्पन्ना महामातङ्गिनी कला ॥ २१ ॥

समाप्ते फाल्गुने मासे कृष्णैकादशिका तु या ।
भृगुभौमयुता चेत् स्यादबला रात्रिरीरिता ॥ २२ ॥

महालक्ष्मीस्तदा जाता सर्वसौभाग्यशालिनी ।
ए[8]तस्मिन्नेव काले तु महासंहा[9]रचञ्चला ॥ २३ ॥

---

1 SD °रा च भूता° । 2 SD मतङ्गश्च । 3 D SA SB SC °वः । 4 C °विश्वरूपकम् । 5 SA SC °मा° । 6 SB °री । 7 C SD °वे । 8 SB °क° । 9 C °सा° ।

दक्षप्रजापतेर्यज्ञे गौरीकुण्डसमुद्भवा(त्) ।
धूमाद् धूमावती जाता मुखात् कालमुखी मता ॥ २४ ॥
तद्धूमसंभवा विद्या सर्वशत्रुविनाशिनी ।
धूमावती तथा जाता भक्तानुग्रहकाङ्क्षया ॥ २५ ॥
प्राप्तेऽ[1]क्षय्यतृतीयायां भौमवारे निशामुखे ।
इति संक्षेपतः प्रोक्तं सिद्धविद्याविधौ शृणु ॥ २६ ॥
शृणु देवि प्रवक्ष्यामि मातङ्ग्युत्पत्तिकारणम् ।
सुधासिन्धौ शयानं वै हरिं परमदैवतम् ॥ २७ ॥
श्यामादेवीसमायुक्तं शेषपर्यङ्कशायिनम् ।
तत्र [2]यातौ महात्मानावुभौ नारदतु[3]म्बरौ ॥ २८ ॥
प्रणम्याञ्जलिबन्धेन रमानाथमपृच्छताम् ।
नारायण महादेव गीतज्ञानं वद प्रभो ॥ २९ ॥

श्री[4]नारायण उवाच

कस्मिंश्चित् समये पूर्वं गतोऽहं शङ्करं प्रति ।
तत्र दृष्टो महादेव उमया सह भूषितः ॥ ३० ॥
जयाजेय महादेव उमया सहित प्रभो ।
शिवेनालिङ्गितश्चाहमुमयालिङ्गिता प्रिया ॥ ३१ ॥
विचित्रमासनं दत्तं निविष्टोऽहं श्रिया सह ।
त[5]त्र दृष्टं महाचक्रं मारीचगणसंकुलम् ॥ ३२ ॥
[6]अनेकरससंयुक्तं विविधास्वादनैर्युतम् ।
सामरस्यं [7]यदा यातमुच्छिष्टं गलितं तदा ॥ ३३ ॥
अनेकगुणसम्प[8]न्ना तत्रोत्पन्ना कुमारिका ।
उच्छिष्टं देहि देहीति पार्वत्या शङ्करेण च ॥ ३४ ॥
उभाभ्यां दत्तमुच्छिष्टं प्रसादं प्रीतिपूर्वकम् ।

श्रीशिवशक्ती ऊचतुः

अनेकगुणसम्पन्नां तत्रोत्पन्नां कुमारिकाम् ॥ ३५ ॥

---

1 N शुक्ल° । 2 SA SD जा° । 3 C °म्बु° । 4 C omits this line; D omits four lines. 5 SC तव । 6 SD omits two lines. 7 C °स्यप्रदानान्त° । 8 C °संयुक्ता ।

त्वां ज[1]पन्ति च ये कन्ये जपहोमार्चनादिभिः ।
तेषां कर्माणि सेत्स्यन्ति वश्यादिकमभीप्सितम् ॥ ३६ ॥

तदाप्रभृति चोच्छिष्टा त्रिषु लोकेषु विश्रुता ।
अनेकगुणसम्पन्ना साधकानां वरप्रदा ॥ ३७ ॥

श्रुत्वा तद्वचनं सर्वे मरीचीनां गणैर्वृताः[2] ।
तदाप्रभृति विप्रेन्द्र कन्यां [3]सर्वे न्यवेदयन् ॥ ३८ ॥

गीतं नृत्यं च वाद्यं च अवादयन् कुमारिके ।
नानारूपाणि चाङ्गानि दर्शितानीह पार्व[4]ति ॥ ३९ ॥

तदाप्रभृति ना[5]म्ना सा जातोच्छिष्टमतङ्गिनी ।
सैव श्रीसुमुखी विद्या सिद्धविद्या महेश्वरि ॥ ४० ॥

भाद्रे मासि चतुर्थ्यां तु गणेशोत्पत्तिरीरिता ।
मासि मार्गशिरे प्राप्ते कृष्णाष्टम्यां महेश्वरि ॥ ४१ ॥

महाकालः समुत्पन्नो घोररात्रिः प्रकीर्तिता ।
ज्येष्ठे शुक्ल[6]दशम्यां तु बटुकोत्पत्तिरीरिता ॥ ४२ ॥

मार्गशीर्षचतुर्दश्यां द[7]त्तोत्पत्तिः प्रकीर्तिता ।
चिद[8]म्बनस्तदा जातः सर्वसिद्धिप्रदायकः ॥ ४३ ॥

महामहिषमर्दिन्या महादुर्गाष्टमी स्मृता ।
चैत्रे तु प्रतिप[9]च्छुक्ला ज्येष्ठे शुद्धा[10] तृतीयका ॥ ४४ ॥

माघे च सप्तमी शुक्ला वैशाखे च चतुर्दशी ।
[11]भाद्रे च द्वादशी शुद्धा तृतीया माधवे तथा ॥ ४५ ॥

चैत्रे च नवमी शुक्ला कृष्णाष्टमी नभस्य च ।
आषाढे शुक्लदशमी द्वितीया मार्गशीर्षके ॥ ४६ ॥

यथाक्रमेण ज्ञातव्या जयन्त्यः क्रमशो बुधैः ।
संक्रमो ग्रहणं देवि भौमतत्करसंयुतम् ॥ ४७ ॥

दारुणा तिथि[12]राख्याता त्रैलोक्यरक्षि[13]णी परा ।
तृतीया चैत्रमासीया चित्रया संयुता यदि ॥ ४८ ॥

---

1 SD यजिष्यन्ति । 2 °र्यु° । 3 C स चान्यवेदत् । 4 C D N °ती । 5 C D सा नाम्ना । 6 N शुद्ध° । 7 C SD दक्षो°; D SA SC दण्डो° । 8 C SD वृन्दाव°; D विदम्ब°; N विवन्द° । 9 SD °च्चैव । 10 D SA SB SC SD °क्ला । 11 C omits three lines. 12 SD निशि आ° । 13 SC °रक्षणं ।

अर्धरात्रौ यदा योगः सा तिथिर्नवमी भवेत् ।
कृते प्रभ[1]वचैत्रे च प्रतिपच्छुद्ध इन्दु[2]ना ॥ ४९ ॥

रेवतीयोगविष्कुम्भे दिवा द्वादशनाडिका ।
मत्स्यरूपी कुमा[3]रोऽयमवतीर्णो हरिः स्वयम् ॥ ५० ॥

शङ्खासुरवधार्थाय भूमेरुद्धरणाय च ।
ज्येष्ठशुद्ध[4]द्वितीयायां विभवे वत्सरे बुधे ॥ ५१ ॥

रोहिण्यां बुधयोगे च दिवा घटिचतुष्कके ।
हरिः कूर्मेण रूपेण ह्यवतारः प्रकाशितः ॥ ५२ ॥

वेतालस्य विनाशाय लोकसंरक्षणाय च ।
[5]कृते च वत्सरे शुद्धे माघमासस्य सप्तमी ॥ ५३ ॥

रविवारे तथाऽश्विन्यां साध्ययोगे महेश्वरि ।
दिवा च घटिकाष्टौ च वारा[6]हायां स्वयं हरिः ॥ ५४ ॥

हिरण्याक्षवधार्थाय भूमेरुद्धरणाय च ।
कृतेऽङ्गिरावत्सरे च माधवे च चतुर्दशी ॥ ५५ ॥

[7]शुद्धा च मन्दवारे च स्वा[8]तीनक्षत्रसंयुता ।
दशाष्टघटिकामध्ये दिवा स्तम्भे बुधे शिवे ॥ ५६ ॥

हिरण्यकश्यपार्थाय प्रह्लादस्थापनाय च ।
त्रेतायां वत्सरे जा[9]ता भाद्रे च द्वादशी सिता ॥ ५७ ॥

भृगुश्रवणयोर्देवि धृतियोगे तथैव च ।
दशपञ्चघटीमध्ये दिवा वामन एव च ॥ ५८ ॥

अवतारो बलेः का[10]र्याद् द्वारे तिष्ठति किङ्करः ।
प्रमाथीवत्सरे प्राप्ते तृतीया माधवे सिते ॥ ५९ ॥

त्रेतायां शनिरोहिण्यां रामोऽभूद् रेणुकासुतः ।
एकादशघटीमध्ये निशायां परमेश्वरि ॥ ६० ॥

अर्जुनस्य वधार्थाय ब्राह्मण्यपालनाय च ।
त्रेतायां तारणे देवि व[11]त्सरे मधुसंयुते ॥ ६१ ॥

---

1 C प्रवर°। 2 N चन्दना। 3 N °मार्याया°। 4 D °क्ल°। 5 C omits four lines; SA SC omit two lines. 6 SB SD °ह्यायां। 7 D मन्दवारे च देवेशि। 8 C °ति°। 9 SA SB SC धा°। 10 SC °र्यः। 11 SC पायस°।

तस्य शुक्ला च नवमी चेन्दुवारे पुनर्वसौ ।
शुक्लयोगे च मध्याह्ने दिवा रामो महेश्वरि ॥ ६२ ॥

रावणस्य वधार्थाय ह्यवतीर्णो हरिः स्वयम् ।
द्वापरे समनुप्राप्ते विरोधिवत्सरे शिवे ॥ ६३ ॥

श्रावणे चाष्टमी शुक्ला बुधरोहिणीसंयुता ।
वज्रयोगे मध्यरात्रौ पूर्णः कृष्णो हरिः स्वयम् ॥ ६४ ॥

कं[1]सस्य च वधार्थाय अर्जुनस्य हिताय च ।
कलौ च वत्सरे चैव खरे चाषाढके तथा ॥ ६५ ॥
शुद्धा[2] च दशमी देवि रविवारेण संयुता ।
शुक्लयोगे विशाखायां दिवा नाडी च षट् तदा[3] ॥ ६६ ॥

बौ(? बु)द्धोऽवतीर्णो देवेशि ततः कलियुगे शृणु ।
प्रवृत्ते दुर्मुखे देवि द्वितीया मार्गशीर्षके ॥ ६७ ॥

शुद्धायां शनिवारे च पूर्वाषाढाविधौ शिवे ।
वृद्धियोगे रजन्यां च घटिकात्रितये शिवे ॥ ६८ ॥

मल्ला[5]सुरवधार्थाय कल्किरूपो[6] हरिः स्वयम् ।
आश्विनस्य सिते पक्षे ह्यश्विन्या[7]मष्टमीदिने ॥ ६९ ॥

अर्धरात्रौ यदा प्राप्तिः सा तिथिः शङ्कराभिधा ।
ज्ये[8]ष्ठीया दशमी शुद्धा[9] दशयोगसमन्विता ॥ ७० ॥

भृगुवासरसंयुक्ता रात्रावेकादशी यदि ।
सा तिथिर्विमला रात्रिः सर्वकामार्थसाधिनी ॥ ७१ ॥

चतुर्दशी भौमयुता कर[10]नक्षत्रसंयुता ।
दिव्यरात्रिर्महेशानि संक्रमेण समन्विता ॥ ७२ ॥

भाद्रे मासि[11] कृष्णपक्षे भौमवारे कुलर्क्षगे ।
अर्धरात्रौ संक्रमश्च सा तारा रात्रिरीरिता ॥ ७३ ॥

कृष्णाष्टम्यां शुक्रवारे द्वितीयप्रहरोत्तर[12]म् ।
आषाढे मासि संजाता त्रैलोक्यविजया परा ॥ ७४ ॥

---

1 D किंकंसस्य । 2 D °क्ला° । 3 C °था । 4 C श्रृणु । 5 D मन्त्रा° ।
6 N C °पधरो हरिः । 7 C °न्यां नवमी° । 8 SA SC ज्यैष्ठी । 9 °क्ला ।
10 N °ण° । 11 C °स्यसिते । 12 D °रे ।

वीरभद्रस्य दंष्ट्रेति विख्याता पृथिवीतले ।
दक्षिणस्यां पूर्वयुगे भृगोरुत्पत्तिरीरिता ॥ ७५ ॥

तस्य योनौ स्थापनार्थं जाता प्रत्यङ्गिरा शिवा[1] ।
अन्येषां तु प्रसिद्धानां नोत्पत्तिर्गदिता शिवे ॥ ७६ ॥

पुराणादिषु तेषां च वेतालानां समीरिता ।
आगमेऽपि पुराणानि स[2]न्त्येव प्रियवादिनि ॥ ७७ ॥

कालीपुराणे देवेशि तथैकाव[3]रणे शिवे ।
बटुकोत्पत्तिराख्याता भैरवाणामपि प्रिये ॥ ७८ ॥

अयं तु कालपर्यायः कथितस्ते मया तव ।
वामदक्षिणमार्गो हि कालीताराविधौ स्मृतः ॥ ७९ ॥

छिन्नाविधौ वाममार्गो बगला वामदक्षगा[4] ।
सुन्दरी वामदिव्या च दक्षमार्गेऽपि संस्थिता ॥ ८० ॥

बाला विद्या दक्ष[5]मार्गो मातङ्गी वामदक्षि[6]णा ।
क[7]मला भुवना लक्ष्मीर्धूम्रा दक्षिणमार्गगा ॥ ८१ ॥

सुमुखी वामसंतुष्टा बटुको वामदक्षिणे ।
भैरवा वामयो[8]गस्था बगला वामदक्षिणा ॥ ८२ ॥

पूर्वाम्नाये दक्षवामौ दक्षिणे दिव्यवामके ।
कौलदक्षौ पश्चिमे तु कौलवामौ तथोत्तरे ॥ ८३ ॥

ऊर्ध्वे[9] दिव्यो महेशानि पाताले वाम एव च ।
शैववैष्णवसौरेषु[10] गाणे स्वायम्भुवे तथा ॥ ८४ ॥

चीने चान्द्रे तथा बौद्धे काले देशे[11]ऽपि पार्वति ।
वामदक्षौ महेशानि क्रूर[12]सौम्यक्रमेण च ॥ ८५ ॥

तदोत्पन्ना महेशानि तद्देशकालयोगतः ।
तदा चन्द्रो[13] महेशानि तेन कालः[14] प्रकीर्तितः ॥ ८६ ॥

---

1 D °वे। 2 D तान्ये°। 3 C वरदा। 4 D SA SC °क्षिणः; C °क्षिणे; SD °क्षिणा। 5 C °क्षिणा च। 6 D SB SC SD °णः। 7 SC omits this line. 8 D °दक्ष°। 9 N °र्ध्वेदिव्ये; SC SD दिव्यं। 10 N °राणां। 11 D देवेशि। 12 SD omits क्रूरसौम्य...महेशानि in third line. 13 N चा°; D रात्रौ। 14 SD °ली प्रकीर्तिता।

श्रीदेव्युवाच

इदं[1] संक्षेपतः प्रोक्तं सूचितं तद्व[2]द प्रभो ।

श्रीशिव उवाच

षडाम्नायक्रमेणैव शकुनं शृणु पार्वति ॥ ८७ ॥
जयो लाभो मनःखेदः सौख्यं गमनमेव च ।
मृतिर्यत्नेन देवेशि षट्सु स्थानेषु पार्वति ॥ ८८ ॥
षट्को[3]ष्ठं विलिखेद् यत्नाच्चत्वारः क्रमयोगतः ।
पूगीफलं च संमन्त्र्य स्थापयेत् तत्र पार्वति ॥ ८९ ॥
क्रूरसौम्यक्रमेणैव फलं प्रोक्तं महेश्वरि ।
यदि चेद्बहवो मन्त्रास्तत्क्रमं शृणु पार्वति ॥ ९० ॥
दशानां मण्डलं प्रोक्तं द्वितीयाम्नायवाचकम् ।
प्रथमस्तत्र[4] आदिष्टो यु[5]गत्रयक्रमेण च ॥ ९१ ॥
ज्ञेयं यत्नेन देवेशि दशहीने तदन्तकम् ।
तत्सत्यं भवति प्राज्ञे महाशकुन ईरितः ॥ ९२ ॥
कालपर्यायमार्गे तु तन्त्राणां गणनां शृणु ।
तन्त्राणां तु चतुष्षष्टिः कालपर्यायगोचरः ॥ ९३ ॥
उपतन्त्राणि देवेशि त्रिशतं र[6]सविंशतिः ।
संहितात्रिंशति शिवे चूडामणिशतं शिवे ॥ ९४ ॥
अर्णवानां च नवकं डामराणां चतुष्टयम् ।
यामलानामष्टकं च सूक्ते[7] द्वे च महेश्वरि ॥ ९५ ॥
पुराणषट्कं देवेशि उपवेदा[8] दिवाभिधम् ।
[9]कक्षपुटीत्रयं पञ्च[10] तथा विमर्षिणीत्रयम् ॥ ९६ ॥
कल्पाष्ट[11]के कल्पलताद्वयं चिन्तामणित्रयम् ।
एतच्छाक्ते महेशानि कालपर्यायतो भवेत् ॥ ९७ ॥
शैवकाले महेशान कथं भवति तद्वद ।
द्वात्रिंशच्चैव तन्त्राणि त्रिशतं पञ्चविंशतिः ॥ ९८ ॥

---

1 C इति । 2 SC वद मे । 3 SC °ष्ठान् । 4 C तत्रादिष्टः प्रथमतो; SD प्रथमस्तत्क्रमा° । 5 N पूग° । 6 SD °तमेक° । 7 D देवीत्युक्ते; C देवीसूक्त° । 8 C °दिभिः स्वयम् । 9 C omits this line. 10 N SA SC SD कं च । 11 SD °ष्टकं ।

उपतन्त्राणि देवेशि संहितादशकं भवेत् ।
अर्णव एक एव स्याद् वेदेन सु[1]विभूषितः ॥ ९९ ॥
यामलद्वितयं देवि डामराणां त्रयं भवेत् ।
उड्डा[2]लमेकं देवेशि उड्डीशद्वयमेव च ॥ १०० ॥
कल्पाष्टकं संहिता च उपसंख्याष्टकं शिवे ।
चूडामणिद्व[3]यं देवि तथा विमार्षि[4]णीद्वयम् ॥ १०१ ॥
अवतारणकं देवि बो[5]धानां पञ्चकं भवेत् ॥
सूक्तानि पञ्च देवेशि चिन्तामणिद्वयं तथा ॥ १०२ ॥
पुराणनवकं देवि उपसंज्ञत्रयं भवेत् ।
प्रोक्तं कक्षपुटीनां च युग्म[6]मत्र महेश्वरि ॥ १०३ ॥
कल्पद्रुमत्रयं देवि कामधेनुद्वयं तथा ।
सद्भावत्रितयं देवि तत्त्व[7]पञ्चक्रमं वरम् ॥ १०४ ॥
क्रमद्वयं महेशानि शैवतन्त्राणि वै जगुः ।
अथ वैष्णवतन्त्राणि कथ्यन्ते परमेश्वरि ॥ १०५ ॥
पञ्चसप्ततितन्त्राणि उपतन्त्राणि वै शृणु ।
द्विशतं पञ्चतन्त्राणि उपतन्त्राणि पार्वति ॥ १०६ ॥
विंशसंख्याकल्पयुक्तं संहिताष्टकसंयुतम् ।
अर्णवैकेन संयुक्तं कक्षपुट्याश्च पञ्चकम् ॥ १०७ ॥
चूडामण्यष्टकं देवि चिन्तामणिद्वयं तथा ।
उड्डा[8]लोड्डीशयुग्मे च डामरद्वयमेव च ॥ १०८ ॥
यामलैकेन सं[9]भूषं पुराणपञ्चकं भवेत् ।
तत्त्वबोधविमार्षिण्यास्त्रितयं परिकीर्तितम् ॥ १०९ ॥
अमृतं तर्पणं देवि काम[10]युक् कल्पपादपाः ।
एतद्वैष्णवतन्त्राणि सौर[11]तन्त्राणि वै शृणु ॥ ११० ॥
सौरे च त्रिंशत् तन्त्राणि तत्त्वसंख्यान्युप प्रिये ।
त्रिगु[12]णीकृत्य देवेशि रसयोगेन पार्वति ॥ १११ ॥

1 SB तु । 2 SA SC तज्जाल°; SD उड्डामरैकं । 3 SD °त्रयं । 4 C SC °र्षं° । 5 SA SC रो°; SD रा° । 6 D SD °त्रयं । 7 SB SD °त्त्वं । 8 C SB SC SD °ज्ज°; SA °ज्व° । 9 C °तं । 10 SA SC °पुष्कलपादने, D °पुष्कल्यपादपा । 11 SC शैव° । 12 C omits two lines.

संहिता वेदसंख्या च तथोपसंहिताद्वयम् ।
पुराणपञ्चकं देवि कल्पानां दशकं तथा ॥ ११२ ॥
कक्षपुटीद्वयं देवि तत्त्वत्रितयमेव च ।
विमर्षिणी तथा चूडामणिपञ्चकमीरितम् ॥ ११३ ॥
चिन्तामणिद्वयं देवि डामरं यामलं तथा ।
चन्द्रसंख्यं महेशानि उड्डा[1]लपञ्चकं तथा ॥ ११४ ॥
अवतारद्वयं देवि उड्डीशद्वयमेव च ।
अर्णवानां त्रयं देवि दर्पणामृतकल्पभूः ॥ ११५ ॥
सौरपर्यायभेदेन कथितं परमेश्वरि ।
अथ पञ्चाशत् तन्त्राणि गाणपत्ये महेश्वरि ॥ ११६ ॥
पञ्चविंशच्चोपतन्त्रं पुराणा[2]मृतसागराः ।
द्वयं द्वयं त्रयं चैव दर्पणामृतकल्पकाः ॥ ११७ ॥
त्रिपञ्चनवविख्यातास्तथा कक्षपुटीत्रयम् ।
विमर्षिणी तथा तत्त्वमुड्डा[3]लोड्डीशयुग्मकम् ॥ ११८ ॥
चूडाचिन्तामणीनां च त्रि[4]तयं च गणाः स्मृताः ।
एकं तु डामरं प्रोक्तं यामलं चन्द्रसंख्य[5]कम् ॥ ११९ ॥
पञ्चरात्राष्टकं देवि देशकालेषु[6] सर्वतः ।
इति संक्षेपतः प्रोक्तं रहस्यातिरहस्यकम् ॥ १२० ॥
गोपनीयं महेशानि रह[7]स्यातिरहस्यकम् ।
गोपनात् सिद्धिदं[8] भूयात् प्रकाशात् सिद्धिहानिकृत् ॥ १२१ ॥
अहो पुण्यवतां मध्ये एतज्ज्ञानपरायणः ।
एतज्ज्ञानी महेशानि शिव एव न संशयः ॥ १२२ ॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

इति श्रीमदक्षोभ्यतारासंवादे शक्तिसंगमपर्याये तारासूक्ते कालपर्यायः[9] षष्ठः पटलः ॥

---

1 SA °हान°; SC °न° । 2 C °नां तथा गणः । 3 N SB °ज्ज°; SA SC SD °ज्व° । 4 D त्रिंशपञ्च° । 5 D SA SB SC °ज्ञ° । 6 SA SC तु । 7 D omits रहस्यातिरहस्यकम्...महेशानि in fourth line. 8 SC °सं° । 9 °यो नाम; SC °यपटलः ।

सप्तमः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम्[1] ।

श्रीशिव उवाच

रहस्यमपि ते[2] देवि कथ्यते शृणु सा[3]म्प्रतम् ॥ १ ॥

गाय[4]त्र्यैन्द्री सौरविद्या ब्रह्मविद्या तुरीयका ।
चक्षुष्मती महेशानि गन्धर्वेशी ततः परम् ॥ २ ॥

पाथि षड्[5]रुद्रविद्या च जला[6]पच्छमनी तथा ।
नामत्र[7]यी महाविद्या महाग[8]णपतिस्तथा ॥ ३ ॥

अर्धनारीश्वरी विद्या तथा मृत्युञ्जयः शिवे ।
श्रुति[9]धरी मातृका च तथा सम्पत्सरस्वती ॥ ४ ॥

चण्डयोगेश्वरी विद्या शाम्भवी श्रीपराप[10]रा ।
बालान्न[11]पूर्णा देवेशि वा[12]जिवाहा गुरोः पदौ ॥ ५ ॥

कामराजेश्वरी विद्या तथा त्रिपुरभैरवी ।
चैतन्यभैरवी रुद्रशक्तिः कामेश्वरी तथा ॥ ६ ॥

महात्रि[13]पुरभैरवी च अघोरभैरवी तथा ।
त्रि[14]पुरकृ[15]न्तनभैरवी च षट्कूटा रिपु[16]भावतः ॥ ७ ॥

नि[17]कृन्तनभैरवी च भुवनाभैरवी तथा ।
अन्नपूर्णाभैरवी च त्वरिता कक्कुटा शिवा ॥ ८ ॥

त्रिकण्टकी भोगवती पूर्वाम्नायप्रकीर्तिताः ।
नित्यक्लिन्ना च त्वरिता माया मायावती रमा ॥ ९ ॥

---

1 SC Adds ब्रह्मविद्यां चैव देवभासये तव तत्परा । 2 D SD देवेशि । 3 N सत्वरम् । 4 SC °त्री सौरविद्या च । 5 C °ट्कर° 6 C D SA SC °पत्क्षपणी । 7 N °यं । 8 D SA SC गा° । 9 C °र्धा° । 10 N °यणा । 11 C तूर्णा च 12 C °ति°; SC °राही च । 13 D °रात्रि° । 14 D SC omits this line. 15 C °रा भै° । 16 C °प्र°; SA विप्रभारतः । 17 SC omits this line.

धनदा शबरी दुर्गा रेणुका कु[1]लरञ्जिनी ।
प्रोक्तोऽयं दक्षिणाम्नायः पश्चिमे शृणु सत्वरम् ॥ १० ॥

नवकोटिकुब्जि[2]का च तथा संकर्षिणी शिवे ।
क्रियासंकर्षिणी चैव कालसंकर्षिणी तथा ॥ ११ ॥

महाविद्या शूलिनी च परिघास्त्रा च माधवी ।
पश्चिमाम्नाय आदिष्टस्तूत्तरं शृणु सादरम् ॥ १२ ॥

चण्डयोगेश्वरी विद्या चामुण्डा ह्यणि[3]माष्टकम् ।
रत्नविद्या सिद्धविद्या उत्तराम्नाय ईरितः ॥ १३ ॥

साम्राज्यसुन्दरी विद्या राजराजेश्वरी तथा ।
महासाम्राज्यविद्या च उर्ध्वाम्नायः प्रकीर्तितः ॥ १४ ॥

यक्षिणी किन्नरी सिद्धी पूतना कवचा तथा ।
कूष्माण्डिनी महादे[4]वि पातालाम्नाय ईरितः ॥ १५ ॥

बटुकस्य मतं प्रोक्तं **महामूर्तिमतं** शृणु ।
लोपागस्त्यमनुर्देवि द्वितीयो[5]ऽपि मनुः शिवे ॥ १६ ॥

द्वितीयागस्त्यविद्या च चन्द्रश्चोत्तरदिक्पतिः ।
तृ[6]तीयागस्त्यविद्या च नन्दीन्द्रसूर्यशङ्कराः ॥ १७ ॥

विष्णुदुर्वासभेदेन पूर्वाम्नायः प्रकीर्तितः ।
वाग्वादिनी च चाण्डाली सुमुखी च मतङ्गिनी ॥ १८ ॥

माहेश्वरीति देवेशि दक्षिणाम्नाय ईरितः ।
राजमातङ्गिनी विद्या लघुवाराहिका तथा ॥ १९ ॥

श्रीतिरस्कारिणी स्व[7]प्नवाराही पादुकापि च ।
वाराहीपादुका चैव जम्बुकी कि[8]ष्किका शु[9]का ॥ २० ॥

वागीशी शुकतुण्डा च मोहिनी च किरातिनी ।
क्षेमंकरीति देवेशि पश्चिमाम्नायदेवताः ॥ २१ ॥

श्रीमूर्तिपादुका चैव वार्ताली श्रीमहागुरोः ।
पादुका परमेशानि श्रीमहातिमिरावती ॥ २२ ॥

---

1 C च करञ्ज° । 2 N °ञ्चि°; C °ञ्चिता । 3 D °सिता° । 4 D °विद्या । 5 SC °येऽपि । 6 SC द्वि° । 7 SC विद्या तथा त्रिस्वप्नसुन्दरी । 8 SD कुब्जिका । 9 SC तथा ।

कालमा[1]या वा[2]सनाख्या चा[3]मुण्डा भयहारिणी ।
उत्तराम्नाय आदिष्टस्तूर्ध्वं श्रृणु महेश्वरि ॥ २३ ॥

षोडशी श्री[4]परा विद्या तथा चरणरूपिणी ।
षट्शाम्भवं महेशानि उर्ध्वाम्नायः प्रकीर्तितः ॥ २४ ॥

चेटकादि महेशानि पातालाम्नायगोचरम् ।
अयं तु कालपर्यायो देशपर्याय एव च ॥ २५ ॥

कादिहादिमते सा[5]म्यं पर्यायद्वयगोचरम् ।
इति संक्षेपतः प्रोक्तमाम्नायाख्यं श्रृणु प्रिये ॥ २६ ॥

बाला पञ्चदशी चैव षोडशी पूर्वगोचराः ।
तन्त्राणां तु चतुष्षष्टिः पूर्वाम्नायप्रगोचरम् ॥ २७ ॥

सप्तत्युत्तरतो देवि षट्शतं चोपतन्त्रकम् ।
पराश्रीतत्परा चैव प्रासादपरमाऽथवा ॥ २८ ॥

पराप्रासादविद्या च बिन्दुयुक्ता ससर्गजा ।
तद्द्वयान्ता दक्षिणे स्यात् तन्त्राणि श्रृणु पार्वति ॥ २९ ॥

चतुःशतं च तन्त्राणि त्रिशतं पञ्चसप्ततिः ।
उपतन्त्राणि देवेशि यामलाद्यं च कालवत् ॥ ३० ॥

महानिर्वाणचरणौ तथा शाम्भवरूपिणौ ।
षट्शाम्भवं नवा[6]त्मेशो यथायोगेन योज्यताम् ॥ ३१ ॥

षण्णवत्युपतन्त्राणि तन्त्राणां भवति प्रिये ।
तन्त्राणि परमेशानि पश्चि[7]माम्नायगोचराः ॥ ३२ ॥

उत्तराम्नायो देवेशि मेधा दीक्षेश्वरी मता ।
पञ्चविंशति तन्त्राणि तथा नवशतानि च ॥ ३३ ॥

त्रिशतं च चतुष्षष्टिरुपतन्त्राणि पार्वति ।
सा[8]म्राण्मेधा महेशानि उ[9]र्ध्वाम्नायप्रगोचरा ॥ ३४ ॥

---

1 N °पाशो वासनाख्यः । 2 D सर्वे°; SA SB सर्त्रासनाख्या । 3 C चोभा भयहरा तथा । 4 SD च । 5 D नाद्यं । 6 D °म्बेशो । 7 N SC श्रीऊर्ध्वाम्नाय-गोचरः; C ऊर्ध्वाम्नायप्रगोचरः । 8 C स° । 9 D °र्ध्वे आम्नायगोचरः ।

चतुःषष्टिस्तु तन्त्राणि पञ्चाशीत्युपतन्त्रकम्[1] ।
महेन्द्रजालविद्या च परकाया च खेचरी ॥ ३५ ॥

पातालाम्नाय[2]विद्या च कीर्तिता परमेश्वरि ।
शतं पञ्च च तन्त्राणि ने[3]त्रसप्तशती शिवे ॥ ३६ ॥

उपतन्त्राणि देवेशि दी[4]क्षाम्नायगोचरम् ।
रहस्यातिरहस्यं च प्रोक्तमेतन्मया तव ॥ ३७ ॥

समयाम्नायनाम्ना तु विद्याम्नायः प्रकीर्तितः ।
श्री[5]विद्या भेदसहिता बाला च त्रिपुरा तथा ॥ ३८ ॥

भुवनेश्यन्नपूर्णा च पूर्वाम्नायः प्रकीर्तितः ।
दशतन्त्राणि देवेशि उपतन्त्राणि पञ्च च ॥ ३९ ॥

बगला व[6]शिनी देवि त्वरिता च कु[7]लेश्वरी ।
महिषघ्नी महाल[8]क्ष्मीस्तन्त्राष्ट[9]सहिता शिवे ॥ ४० ॥

[10]नवसंख्योपतन्त्राणि दक्षवक्त्रोद्गतानि च ।
महासरस्वती देवी तथा वाग्वादिनी शिवे ॥ ४१ ॥

प्रत्यङ्गिरा भवानी च पश्चिमाम्नायगोचराः ।
[11]विंशत्तन्त्राणि देवेशि उपतन्त्राष्टकं शिवे ॥ ४२ ॥

अथोत्तरं महा[12]वक्त्रं शृणु यत्नेन पार्वति ।
कालिका भेदसहिता तारा मातङ्गिनी तथा ॥ ४३ ॥

भैरवी छिन्नमस्ता च धूमावत्युत्तरेश्वरी ।
शततन्त्राणि देवेशि उपतन्त्राणि वै नव ॥ ४४ ॥

द्वाविंशत्यक्षरी भेदसहिता दक्षिणे[13]ऽपि च ।
पराप्रासादविद्या तु विंशत्तन्त्रसमन्विता ॥ ४५ ॥

उपतन्त्रत्रयं देवि पातालं शृणु पार्वति ।
नाग[14]शक्त्यादयो देवि पातालाम्नायगोचराः ॥ ४६ ॥

---

1 C adds रहस्यातिरहस्यं च प्रोक्तमेतन्मया तव । 2 D omits विद्या च... समयाम्नाय in fifth line. 3 N तेऽत्र। 4 SD पातालाम्नायगो°। 5 C omits two lines. 6 C वासिनी। 7 C करे°; SB कले°; D महेश्वरि। 8 D °माया। 9 C °सिद्धिदा। 10 D omits four lines. 11 SD omits nine lines. 12 C SC °चक्रं। 13 SB °णापि। 14 D °गेशाष्टा°।

भ[1]वतन्त्रसमायुक्तमुपतन्त्रद्वयं शिवे ।
विद्याम्नायो[2] महेशानि संक्षेपेण प्रकाशितः[3] ॥ ४७ ॥

शाक्तं पूर्वे महेशानि शततन्त्रसमन्वितम् ।
उपतन्त्राष्टकं देवि शैवं च दक्षिणे भवेत् ॥ ४८ ॥

पञ्चाशत्तन्त्रसंयुक्तमुपतन्त्राणि पञ्च च ।
वैष्णवं पश्चिमे प्रोक्तं तत्त्वतन्त्रसमन्वितम् ॥ ४९ ॥

उपतन्त्राणि तावन्ति दक्षिणाचारसंकुलम् ।
उत्तरे गाणपं देवि तन्त्रस[4]प्ततिसंयुतम् ॥ ५० ॥

[5]उपतन्त्रत्रयं चा[6]त्र श्रृणु सौरं महत्तरम् ।
सौरमूर्ध्वे महेशानि तन्त्रद्वादशसंयुतम् ॥ ५१ ॥

दशोपतन्त्रसंयुक्तं श्रृणु बौ[7]द्धं महेश्वरि ।
शततन्त्रसमायुक्तमुपतन्त्रं त्रिषष्टि च ॥ ५२ ॥

पाताले परमेशानि पञ्चायतनवद् भवेत् ।
य[8] एव मुख्यो देवेशि तदाद्याम्नायसंहतिः ॥ ५३ ॥

प्रत्येकं तु षडाम्ना[9]या दर्शनेष्वेव पार्वति ।
इति दर्शनपर्यायः शाक्ते वैदिकदर्शने ॥ ५४ ॥

योजने परमेशानि महानिष्कलदर्शनम् ।
आम्नायः कथितो देवि श्रीहा[10]दिमतगोचरः ॥ ५५ ॥

नवभेदेन कथितः श्रृणु कादिमहत्तरम् ।
श्रीशैवदर्शनं पूर्वे वैष्णवं दक्षिणे भवेत् ॥ ५६ ॥

गाणपं पश्चिमे प्रोक्तं सौरमुत्तरगोचरम् ।
ऊर्ध्वाम्नाये भवेच्छा[11]क्तं तन्त्राणि देववद् भवेत् ॥ ५७ ॥

षड्दर्शनस्य ष[12]ण्मन्त्रास्त्वेकैकस्थलयोजनात् ।
दर्शनाम्नाय आदिष्टो वैदिकस्य च योजनात् ॥ ५८ ॥

शाक्तस्थाने महेशानि महानिष्कलदर्शनम् ।
दिव्याम्नायो महेशानि महादिव्यत्वकारकः ॥ ५९ ॥

---

1 SD नव° । 2 SA SC °या । 3 SA SC °ताः । 4 C °सम्पत्ति° । 5 C omits two lines. 6 D चैव । 7 SC चोर्ध्वं । 8 C स ; SD एवं मुख्यो हि । 9 SC SD °य° । 10 D °महा° । 11 SD °त्स्थानं । 12 D देवेशि ।

श्रीबाला त्रिपुरा विद्या षोडशी पूर्वगोचरा ।
तन्त्राणि पूर्ववद् देवि दक्षिणं श्रृणु चा[1]परम् ॥ ६० ॥

पराप्रासादविद्या च प्रासादपरमाथवा ।
बिन्द्वन्विता च सर्गान्ता बिन्दुसर्गान्वितापि च ॥ ६१ ॥

परा विद्या च देवेशि दक्षिणाम्नायगोचरा ।
अथ च[2]रणदीक्षा च निर्वाणच[3]रणावपि ॥ ६२ ॥

पश्चिमाम्नाय आख्यातस्तूत्तरं श्रृणु सादरम् ।
श्रीशाम्भवाख्य[4]चरणौ तथा षट्शाम्भ[5]वं शिवे ॥ ६३ ॥

चतुःपञ्चान्वया देवि उत्तराम्नायगोचराः ।
मेधा साम्राज्यमेधा च सर्वसाम्राज्यरूपिणी ॥ ६४ ॥

दिव्यसाम्राज्यमेधा च ऊर्ध्ववक्त्रेण चिन्त्यते ।
तन्त्राणि चोपतन्त्राणि पूर्ववत् परमेश्वरि ॥ ६५ ॥

दिव्याम्नायस्त्वयं प्रोक्तो विद्याम्नायं श्रृणु प्रिये ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ६६ ॥

शान्तिश्च तदतीता च सर्वातीता च अष्टमी ।
नवमी दिव्यसाम्राज्यमेधा रा[6]ज्ञी महेश्व[7]रि ॥ ६७ ॥

क्रमेण देवदेवेशि म[8]तमेषां कहादिक[9]म् ।
आनन्दभैरवो देवि दक्षिणामूर्तिरेव च ॥ ६८ ॥

विरूपाक्षो महेशानि राजराजेश्वरस्ततः ।
सदाशिवस्ततः प्रोक्तः षष्ठः संवर्तकेश्वरः ॥ ६९ ॥

दिव्यौघश्चैव सिद्धौघो मानवौघः सरन्ध्रकः ।
एतेष्वधीशाः संप्रोक्तास्त्वेतद्भेदेन वै नव ॥ ७० ॥

अथ कादौ महेशानि अधीशान् श्रृणु यत्नतः ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ७१ ॥

भैरवो बटुकश्चैव महाकालस्त[10]थापरः ।
अक्षोभ्यो नवमः प्रोक्तो नवानां मतभेदतः ॥ ७२ ॥

---

1 D साद° । 2 D SA व° । 3 D SA °व° । 4 D वरणस्त° । 5 C °वे । 6 C ज्ञान° । 7 N °री । 8 C °न्त्र° । 9 N °के । 10 D °तः ।

नवा[1]म्नायो महेशानि महाकादिमते[2] भवेत् ।
कालश्चैव महाकालः करालश्च तृतीयकः ॥ ७३ ॥

अतिकालश्चतुर्थश्च प्रलयेशश्च पञ्चमः ।
क्रोधराजो भवेत् षष्ठः कालिका सप्तमी भवेत् ॥ ७४ ॥

अष्टमी श्रीमहातारा नवमी छिन्नमस्तका ।
एते[3] ह्यधीशाः संप्रोक्ता दिव्यौघाद्याश्च मध्यगाः ॥ ७५ ॥

आम्नायभेदो[4] देवेशि एतद्भेदप्रगोचरः ।
षड्वक्त्रपञ्चवक्त्राख्यभेदेन भेदभाजनम् ॥ ७६ ॥

विद्याम्नायो[5] महेशानि सू[6]चितः कथ्यते शृणु ।
भुवनेशी महालक्ष्मीः पूर्वाम्नायप्रगोचरा ॥ ७७ ॥

त्रिपुरा त्रिपुटा बाला विशालाक्ष्यन्नपूर्णिका ।
दक्षवक्त्रेण देवेशि मयाद्यापि प्रजप्यते ॥ ७८ ॥

बगला चैव मातङ्गी सिद्धलक्ष्मीररुन्धती ।
आम्नायः पश्चिमाख्यस्तु तद्वक्त्रेण प्रजप्यते ॥ ७९ ॥

तारा छिन्ना पिशाची च धूम्रा चोत्तरगोचराः ।
[7]कालिका भेदसहिता ऊर्ध्वाम्नायप्रगोचरा ॥ ८० ॥

उपविद्याश्च पाताले विद्याम्नायः प्रकीर्तितः ।
सिद्धानि चात्र तन्त्राणि पूर्वोक्तानि महेश्वरि ॥ ८१ ॥

सिद्धाम्नायं प्रवक्ष्यामि येन सिद्धं जगत्त्रयम् ।
चिन्तामणिः स्पर्शमणिस्तथा कल्पद्रुमः शिवे ॥ ८२ ॥

कामधेनुर्महेशानि पूर्वाम्नायप्रगोच[8]राः ।
चतुष्षष्टिस्तु तन्त्राणि उपतन्त्राणि षष्टि च ॥ ८३ ॥

चूडामणिश्[9]तद्वन्द्वमर्णवानां चतुष्टयम् ।
अन्यत् सर्वं महेशानि पूर्ववत् परमेश्वरि ॥ ८४ ॥

सिद्धकाली षोडशी च सभेदा कालकालिका ।
दक्षव[10]क्त्रे स्थिता नित्यं षडशीतिसमन्विता ॥ ८५ ॥

---

1 SD नवनाथो; D SA SC °या । 2 N °तं । 3 D SD °तेऽधीशाश्च ।
4 D SA SC °दा । 5 SD °ये । 6 C °तकं । 7 C omits this line.
8 C SC SD °रः । 9 D तत्त्व°; SA SC °तं त्वर्ध° । 10 N च° ।

तन्त्राणि देवदेवेशि उपतन्त्राणि सप्ततिः ।
हंसकाली पश्चिमे तु पञ्चाशत्तन्त्रसंयुता ॥ ८६ ॥

उपतन्त्राणि देवेशि पञ्चाशत् प्रभवन्ति च ।
महाकामकला गुह्या चोत्तराम्नायगोचरा[1] ॥ ८७ ॥

कलातन्त्राणि देवेशि उपतन्त्राणि विंशतिः ।
ऊर्ध्ववक्त्रस्थिता नित्यं विद्याराज्ञी महो[2]दया ॥ ८८ ॥

द्वात्रिंशत्तन्त्रसंयुक्ता तत्रतन्त्राणि चोप[3] च ।
पाताले यक्षिणी धातुवादविद्या महे[4]श्वरि ॥ ८९ ॥

तन्त्राणां नवतिस्तत्र उपतन्त्राणि वै शतम् ।
सिद्धाम्नायस्त्वयं प्रोक्तो दिव्याम्नायं शृणु प्रिये ॥ ९० ॥

हंसकाली चण्डकाली पूर्वाम्नायप्रगोचरा ।
भद्रकाली श्मशाना च दक्ष[5]वक्त्रेण [6]जप्यते ॥ ९१ ॥

गुह्यकाली कालकाली पश्चिमाम्नायदेवता ।
धनकाली सिद्ध[7]काली चामुण्डोत्तरगोचरा ॥ ९२ ॥

विद्याराज्ञी भवेदूर्ध्वं रसायनं रसातले ।
रत्नाम्नायो महेशानि कथ्यते शृणु साम्प्रतम् ॥ ९३ ॥

अयमेव महेशानि पर्यायो ह्यागमाभिधः ।
लक्ष्मीश्चैव महालक्ष्मीः कोश[8]विद्याचतुष्टयम् ॥ ९४ ॥

प्रणवः श्रीपराविद्या महानिष्कलदेवता ।
अजपा मातृका चैव त[9]थैव त्रिपुरेश्वरी ॥ ९५ ॥

ऊर्मि[10]णीति महेशानि सृष्टिः पूर्वप्रगोचरः ।
ललिता चैव का[11]मेशी रक्तनेत्रा परा स्मृता ॥ ९६ ॥

दक्षिणाम्नायदेव्यश्च स्थितिरूपेषु[12] संस्थिताः ।
संजी[13]विनी जया चैव मृत्युसंजी[14]विनी तथा ॥ ९७ ॥

---

1 SC रः; N °राः । 2 N °तो° । 3 C पञ्च; D चापरः । 4 N °री; SD महोदया । 5 N दश° । 6 SB जायते । 7 C °द्धि° । 8 D SA SD °ष° । 9 D omits तथैव त्रिपुरेश्वरी...जया चैव in fifth line. 10 C °ली°; SD दूर्मिली° । 11 SD °श्मीरो । 12 C °पेऽप्य° । 13 C SB °व° । 14 C SB SC °व° ।

वज्रप्रस्तारिणी देवी भैरवी पश्चिमे भवेत् ।
संहारश्चैव संप्रोक्तो भैरवी डामरेश्वरी ॥ ९८ ॥

चैतन्यभैरवी देवी षट्कूटाभैरवी तथा ।
नित्याख्या भैरवी चैव भयविध्वंसिनी तथा ॥ ९९ ॥

[1]उत्तरा भीम[2]घोरा च कालिकाभैरवी तथा ।
श्रीसम्पद्भैरवी दे[3]वी उत्तरे लयरूपिणी ॥ १०० ॥

पञ्चमी सुन्दरी चैव पारिजातेश्वरी शिवा ।
पञ्चबाणेश्वरी चैव पञ्चकामेश्वरी तथा ॥ १०१ ॥

कल्पलताऽन्नपूर्णा च मातङ्गी भुवनेश्वरी ।
षोडशीभेदसहिताऽनुग्रहार्थपरायणा ॥ १०२ ॥

बिन्दु[4]चक्रोर्ध्ववक्त्रेण मयाद्यापि प्रजप्यते ।
अयं प्रोक्तो महाम्नायो रत्नसंज्ञाभिधः शिवे ॥ १०३ ॥

देशागमाख्य[5]तन्त्राणि तदाम्नायो महेश्वरि ।
कथ्यते देवदेवेशि शृणु सावहिता भव ॥ १०४ ॥

चीनागमे सप्ततन्त्र[6]मक्षोभ्यतन्त्रसंयुतम् ।
बौद्धागमे चैकविं[7]शदुपतन्त्राष्टकं शिवे ॥ १०५ ॥

जैनागमे कलाशी च उपतन्त्राणि पञ्च च ।
अथ पाशुपते देवि नवतन्त्राणि सादरम् ॥ १०६ ॥

उपतन्त्राणि षड् देवि तथा कापालिके शृणु ।
सूर्यतन्त्रं चोपतन्त्रं वेदसंख्याभिधं शिवे ॥ १०७ ॥

अथ पाषण्डतन्त्राणि त्रिपञ्चोपप्रभेदतः ।
पा[8]ञ्चरात्रागमे देवि द[9]श सप्तोप[10]भेदतः ॥ १०८ ॥

अघोरागमतन्त्राणि दशाष्टौ चोपभेदतः ।
[11]मञ्जुघोषागमे देवि विंशत्रिंशन्महेश्वरि ॥ १०९ ॥

---

1 C omits this line; N °मा। 2 SB घोररूपा। 3 C चैव। 4 C °श्व°। 5 D SA SC SD °ख्यं। 6 D omits सप्ततन्त्र...बौद्धागमे in second line; all mss. read °न्त्रं यक्षोप° except SD. 7 C °बिन्दुबिन्दुपत्रा°। 8 SA SC पञ्च°। 9 C विंशत्याम्नायभेदतः। 10 D °प्र°। 11 SA SC omits three lines.

भैरवागमतन्त्राणि शतसप्ततिभेदतः ।
बटुकागमतन्त्राणि द्विशताशीतिभेदतः ॥ ११० ॥

[1]संजीविन्यागमे देवि त्रिसप्त चोपभेदतः ।
सिद्धेश्वरागमे देवि दशाष्ट चोपभेदतः ॥ १११ ॥

नीलवीरागमे सप्तदश तिष्ठन्ति पार्वति ।
अ[2]थाष्टादश[3]तन्त्राणि मन्त्रसिद्ध्यभिधागमे ॥ ११२ ॥

मृत्युञ्जयागमे देवि विंश द्वादश पार्वति ।
मायाविहारागमके त्रि पञ्च चोपभेदतः ॥ ११३ ॥

विश्वरूपागमे देवि नव सप्त महेश्वरि ।
योगरूपागमे देवि पञ्चाशद्[4] दशभेदतः ॥ ११४ ॥

[5]विरूपागमपर्याये सप्ताष्टभेदतः शिवे ।
यक्षिण्यागमतन्त्राणि पञ्चसप्ततिभेदतः ॥ ११५ ॥

निग्रहागमतन्त्राणि शतद्विशतभेदतः ।
अयमागमपर्यायः सिद्धरूपः[6] प्रकाशि[7]तः ॥ ११६ ॥

मण्डलाम्नायो देवेशि कथ्यते शृणु सादरम् ।
आदौ ज्ञेया महालक्ष्मीस्ततो वागी[8]श्वरी मता ॥ ११७ ॥

अश्वारूढा च मातङ्गी नित्यक्लिन्ना ततः परम् ।
भुवनेशी ततो[9]च्छिष्टचाण्डाली भैरवी तथा ॥ ११८ ॥

शूलिनी व[10]नदुर्गा च त्रिपुरा त्वरिता ततः ।
अघोरेति महेशानि पूर्वाम्नायः प्रकीर्तितः ॥ ११९ ॥

जयलक्ष्मीर्महेशानि वज्रप्रस्तारिणी तथा ।
धूमावत्यन्नपूर्णा च कालसंक[11]र्षिणी तथा ॥ १२० ॥

धनदा कुक्कुटी भोगवती च श[12]बरेश्वरी ।
कुब्जिका सिद्ध[13]लक्ष्मीश्च बाला च त्रिपुरा ततः ॥ १२१ ॥

---

1 D omits this line; SD सन्ति विद्या° । 2 D त° । 3 SA SB SC SD °य° । 4 C °दष्टप्र° । 5 SD omits two lines. 6 SD °पस्तु । 7 N °दिकः; N °के । 8 D SA SB SC गे । 9 D °ऽपि स्यात्; SC देवी । 10 D नव° । 11 N °र्ष° । 12 D शा° । 13 D SD °द्धि° ।

दक्षिणाम्नाय आख्यातः पश्चिमं शृणु पार्वति ।
ततो नीलपताका च चण्डघण्टा त्रिकण्टकी ॥ १२२ ॥

चण्डेश्वरी भद्रकाली गुह्यकाली महेश्वरी ।
अनङ्गमा[1]ला चामुण्डा वाराही बगलाऽपि च ॥ १२३ ॥

जयदुर्गा नारसिंही पश्चिमाम्नाय ईरितः ।
ब्रह्माणी वैष्णवी चैव मा[2]हेश्यैन्द्री महेश्व[3]रि ॥ १२४ ॥

हरसिद्धा च फेत्कारी बगलेशी च नाकुली ।
श्रीमृ[4]त्युहारिणी दे[5]वि चिन्तामणिनृसिंहकौ ॥ १२५ ॥

हयग्रीवो भैरवश्च भैर[6]वश्चरणायुधः ।
क्षेत्रपालो महाकालस्त्रिजटैकजटा तथा ॥ १२६ ॥

महोग्राख्या महोच्छुष्मा हे[7]लक्की नीलशारदा ।
वामा महोल्का देवेशि श्रीमहाकालसुन्दरी ॥ १२७ ॥

चाण्डाली ध[8]रणी कर्णपिशाची ब्रह्मतारका ।
चाण्डाली च तथा श्यामा प्रल[9]यत्रिपुरा तथा ॥ १२८ ॥

सुरवल्लभा सुन्दरी च रक्तचाण्डालि[10]नी तथा ।
उत्तराम्नाय आदिष्टस्तूर्ध्वाम्नायं शृणु प्रिये ॥ १२९ ॥

काली तारा छिन्नमस्ता तथा कामकलाऽपि च ।
श्रीमहाषोडशी चेति ऊर्ध्वाम्नायः प्रकीर्तितः ॥ १३० ॥

रसातलाम्नायरूपं शृणु यत्नेन शाम्भवि ।
स[11]मस्तं शाबरं देवि समस्ताघोरजतायः ॥ १३१ ॥

चीनबौद्धागमौ जैनाः समस्तं चेटकादिकम् ।
पातालसंज्ञे देवेशि सर्वमन्तर्गतं भवेत् ॥ १३२ ॥

पितृभूवासिनी देवि चण्डकात्यायनी तथा ।
महामण्डलयुग्मं च यक्षिण्यष्टौ महेश्वरि ॥ १३३ ॥

---

1 C °ता । 2 SD महेन्द्री च । 3 CD N SD °री । 4 C °मूर्ति° । 5 CD N °वी । 6 D महेभ° । 7 C °डम्बी । 8 SC धा° । 9 C °या । 10 C °का । 11 D SC repeat समस्तं शाबरं देवि ।

कालकूटसर्प[1]भूपाः किन्न[2]र्यश्चेटका अपि ।
पातालाम्नाय आख्यातः कलौ तूर्णफलप्रदः ॥ १३४ ॥

पञ्चक्[3]स्याम्नायरूपं शृणु यत्नेन शाङ्करि ।
पूर्वाम्नायः सृष्टिरूपो मन्त्रयोगो महेश्वरि ॥ १३५ ॥

चतुर्विंशतिसंकेतैर्मन्त्रैस्तन्त्रैर्विभूषितः ।
अथ वै दक्षिणाम्नायः स्थितिरूपः सनातनः ॥ १३६ ॥

भक्तियोगो महेशानि पञ्चविंशतितन्त्रयुक् ।
सं[4]हृतिः पश्चिमाम्नायः कर्मयोगः सनातनः ॥ १३७ ॥

द्वात्रिंशत्तन्त्रमन्त्रैस्तु संयुक्तः परमेश्वरि ।
वि[5]धानमुत्तराम्नायोऽनुग्रहो ज्ञानयोगवान् ॥ १३८ ॥

षट्त्रिंशन्मन्त्रतन्त्रै[6]श्च संकेतैः परिभू[7]षितः ।
सर्वत्राम्नायसंकेतैर्मन्त्रतन्त्रैरपि प्रिये ॥ १३९ ॥

ब्रह्मानन्दस्वरूपोऽय[8]मूर्ध्वाम्नायः प्रकीर्तितः ।
साम्राज्ययोगो देवेशि पराप्रासादरूपधृक् ॥ १४० ॥

यक्षिण्याद्यप्सराद्यन्ताः पातालाम्नायगोचराः ।
संयोगयोगो देवेशि मन्त्रतन्त्रैश्च भूषितः[9] ॥ १४१ ॥

सहस्रसंकेतयुतः सिद्धव[10]र्यः प्र[11]पूज्यते ।
अयमाम्नायसं[12]दोहो रहस्यातिरहस्यधृक् ॥ १४२ ॥

केवलं कालिकायां च षडाम्नाया महेश्वरि ।
दशवक्त्रा गु[13]ह्यकाली राजराजेश्वरी म[14]ता ॥ १४३ ॥

कालिकाम्नायपर्यायः स्वतन्त्रः परिकीर्तितः ।
ऊर्ध्ववक्त्रं महेशानि दीपकाख्यं प्रकीर्तितम् ॥ १४४ ॥

विंशतिर्म[15]न्त्रतन्त्रैस्तु भूषितं परमेश्वरि ।
चण्डयोगेश्वरीरूपं तदेव परिकीर्तितम् ॥ १४५ ॥

---

1 C समुद्भूत°; SA SB °पो; SD °मौ। 2 C कीटक°। 3 SD °कूटा°। 4 D SD सद्वतिः। 5 SC उत्तराम्नायोऽनुग्रहो ज्ञानयोगवान् भवेत्। 6 C °वर्गैस्तु; D N SB °स्तु। 7 D N °पूरितः। 8 D SA °यं पूर्वा°। 9 C °तैः। 10 SB SC °र्ये। 11 D °यु°; N °पूजि°। 12 D सस्नेहो। 13 C ब्रह्म°। 14 D स्मृ°; SD तथा। 15 SD °स्तन्त्रमन्त्रैस्तु।

सिंहवक्त्रं तु तदधः श्रीसिद्ध[1]कालिका मता ।
दशतन्त्रसमायुक्ता तदधो हरवक्त्रकम् ॥ १४६ ॥

कृष्णं संकर्षणं देवि तन्त्राणां तु त्रयोदश ।
वामे क[2]पीन्द्रवक्त्रं च कुब्जि[3]काख्यं महेश्वरि ॥ १४७ ॥

पञ्चविंशतितन्त्राणि दक्षे शूकरवक्त्रकम् ।
त्रैलोक्यडामरं तच्च तन्त्राष्टकसमन्वितम् ॥ १४८ ॥

ता[4]र्क्ष्यं वामे पिङ्गचण्डं सुन्दरीवक्त्रमीरितम् ।
तन्त्राणां तु चतुष्षष्टिस्तत्र तिष्ठति पार्वति ॥ १४९ ॥

हरितं मकरं दक्षे महासंहारिणी स्मृता ।
कलातन्त्राणि देवेशि शु[5]भ्रं च गजवक्त्रकम् ॥ १५० ॥

प्रत्यङ्गिरा च संप्रोक्ता नवतन्त्रसमन्विता ।
[6]दक्षे श्यामं हयास्यं च सिद्ध[7]योगेश्वरीमुखम् ॥ १५१ ॥

षट्त्रिंशत्तन्त्रसंकेतैः संयुता परमेश्वरि ।
महासिद्धकराला च कलातन्त्रसमन्विता ॥ १५२ ॥

द्वि[8]द्विक्रमेण देवेशि षडाम्नायाः प्रकीर्तिताः ।
एकमूर्ध्वे च पाताले चन्द्रसंख्या महेश्वरि ॥ १५३ ॥

चतुर्दिक्षु भवेदष्टौ वक्त्राणि परमेश्वरि ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥ १५४ ॥

गोपनीयं गोपनीयं गोपनीयं स्वयोनिवत् ।
[9]महाराज्यं च स्वाराज्यं सर्वम[10]न्त्रैर्ध्रुवं भवेत् ॥ १५५ ॥

एतज्ज्ञानेन देवेशि त्रैलोक्यविजयी भवेत् ।
प्राणाः देयाः शिरो देयं नेदं[11] वाच्यं च कुत्रचित् ॥ १५६ ॥

पर्यायागमरूपत्वं कथ्यते श्रृणु साम्प्रतम् ।
देशपर्यायभेदो हि पूर्वाम्नायः प्रकीर्तितः ॥ १५७ ॥

---

1 C N °द्धि° । 2 D °री° । 3 C °ण्डि° । 4 SB SD °क्ष्यं । 5 D भ्रुभ्रं । 6 C omits three lines. 7 D SD °द्धि° । 8 D सिद्धि° । 9 C omits this line. 10 N °न्त्रधु्° । 11 SD न वाच्यं यत्र ।

अथ वै कालपर्यायो दक्षिणाम्नाय ईरितः ।
[1]अथ आगमपर्यायः पश्चिमाम्नाय ए[2]व च ॥ १५८ ॥

एवं दर्शनपर्यायस्तूत्तराम्नाय एव हि ।
अथायतनपर्यायः पा[3]तालाम्नायगोचरः ॥ १५९ ॥

विद्यापर्यायनामाख्यस्तूर्ध्वाम्नायप्रगोचरः ।
पर्यायाम्नाय आख्यातः किमन्यच्छ्रोतुमिच्छसि ॥ १६० ॥

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि बटुकाम्नायमुत्तमम् ।

श्रीशिव[4] उवाच

पूर्वाम्नाये तु भुवना त्रयोविंशतित[5]न्त्रयुक् ॥ १६१ ॥

सृष्टियोगः पूर्ववत् स्याद् दक्षि[6]णं श्रृणु सादरम् ।
स्थितिर्लक्ष्मीर्दक्षिणे च चतुर्विंशतित[7]न्त्रयुक् ॥ १६२ ॥

पञ्चविंशतितन्त्रैश्च बगला पश्चिमे लयः ।
विधानमुत्तरे छि[8]न्ना षट्त्रिंशत्तन्त्रसंयुता ॥ १६३ ॥

ऊर्ध्वे काली[9] ग्रहोऽस्तीति सप्तसप्ततितन्त्रयुक् ।
विराड्रूपा मधुमती पाता[10]ले राज्ययोगधृक् ॥ १६४ ॥

अष्टाविंशतितन्त्रैस्तु संयुता परमेश्वरि ।
इदं रहस्यं देवेशि गोपनीयं स्वयोनिवत् ॥ १६५ ॥

तारा काली छिन्नमस्ता त्रिशक्तिमात्र[11]गोचरः ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ १६६ ॥

इति श्रीमदक्षोभ्यतारासंवादे शक्ति[12]संगमतन्त्रे तारासूक्ते आम्नायप[13]टलः सप्तमः ॥

---

1 C omits three lines. 2 SA SC SD ईरितः । 3 SD omits पातालाम्नायगोचरः···आख्यातः in third line. 4 C N SA SB SC omit this line. 5 SC °तत्त्व° । 6 D SA SC °णां । 7 SC °तत्त्व°; SD °तथ्य° । 8 N तारा । 9 SC °लानुग्रहो हि । 10 SA SC °ल° । 11 D SC SD °त्मगोचरा । 12 N °स्वंगमागमे । 13 D °कथने सप्तमः पटलः; SD °निरूपणं नाम सप्तमः पटलः ।

अष्टमः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि रहस्यं पूर्वसूचितम् ।

श्रीशिव उवाच

रहस्यातिरहस्यं च कथ्यते शृणु साम्प्रतम् ॥ १ ॥
आदिनारायणः साक्षात् परशम्भुः स एव हि ।
तदेव निर्गुणं ब्रह्म बृहत्त्वाद् ब्रह्म कीर्तितम् ॥ २ ॥
शुद्धस्फटिकवद् देवि सैव श्री[1]प्रकृतिर्वरा ।
वासुदेवो हरो ब्रह्मा तारिणी प्रकृतिः स्वयम् ॥ ३ ॥
यां विचिन्त्य महादेवि जलशायी स्व[2]यं हरिः ।
ज[3]लापच्छ[4]मनी तारा सैव प्रोक्ता महेश्वरी ॥ ४ ॥
आपो नारायणः प्रोक्तस्तारां [5]तोयप्लवे स्मरेत् ।
स्मरणादेव विद्याया निर्गुणो योगप[6]द्दधृक् ॥ ५ ॥
आदिमध्यान्तरहिता गुणातीता महोज्ज्वला ।
आदर्शवत् स्व[7]च्छरूपा महाशक्तिः प्रकीर्तिता ॥ ६ ॥
उभयोर्मध्यभागे तु प्रतिबिम्बं च यद् भवेत् ।
त[8]स्य चास्याः प्रबि[9]म्बं तु शिवे संदृश्यते स्फुटम् ॥ ७ ॥
शिवस्य प्रतिबिम्बं तु प्रकृतौ दृश्यते स्फुटम् ।
केचिच्छक्तीति सं[10]प्राहुः केचिच्छिव इ[11]तीरिरे ॥ ८ ॥
केचिन्नारायणं प्राहुः सैव काली च तारिणी ।
उभयोः प्रतिबिम्बं तु ह्यर्धनारीश्वरो मतः ॥ ९ ॥
पराप्रासादविद्या तु सैवात्र परिकीर्तिता ।
प्रतिबिम्बं भवेन्माया ततो ब्रह्म[12] महेश्वरः[13] ॥ १० ॥

---

1 D सर्वं परात्परा । 2 SD हरिः स्वयम् । 3 C °म्भा° । 4 N °द्दमनी । 5 SD °रा तारा च यः । 6 SD °रूप° । 7 D शुद्ध° । 8 SC °स्या । 9 SD प्रतिबिम्बं । 10 D तत्प्रा° । 11 D °ति प्रिये । 12 D °ह्मा; C जम्भा । 13 SD °रि ।

विष्णुरीश्वर इत्याद्या लोकपालादयः शिवे ।
सृष्टिर्जाता महेशानि तयोरंशसमुद्भवा ॥ ११ ॥

अविनाशी सदा स्थायी शम्भुश्च प्रकृतिस्तथा ।
आद्यन्तरहिता पूर्णा चिद्घना सत्स्वरूपिणी ॥ १२ ॥

सर्वोत्तरं तदाम्नाय.[1] सर्वं[2] तत्र[3] प्रतिष्ठितम् ।
महोग्रतारा सा विद्या महाक्रूरा प्रकीर्तिता ॥ १३ ॥

कादिहादिमतावीशस्तारोपासनतत्परः ।
अन्यथा नाधिकारीति म[4]हामतमिदं शिवे ॥ १४ ॥

अन्यथा विक[5]लो भूयान्नात्र कार्या विचारणा ।
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता ॥ १५ ॥

तेजःप्रभावसंदर्शी भवेद्यत्रान्यथा कथन् ।
हंसतारा महाविद्या योग[6]पट्टेश्वरी मता ॥ १६ ॥

जैनाः प्र[7]भावतीं प्राहुः शाक्ताः शक्तिं समूचिरे ।
बौद्धास्तारां च संप्राहुः कौलाश्चक्रेति संविदुः ॥ १७ ॥

चीना महोग्रां संप्राहुः काद्याः कालीं समूचिरे ।
हाद्याः श्रीसुन्दरीं प्राहुः कादिहादिमतेश्वरीम् ॥ १८ ॥

कहेत्येवं महा[8]मन्त्रस्तूत्तराम्नायगोचरः ।
जीवमात्रे महेशानि कहेत्येवं सरस्वतीम् ॥ १९ ॥

जीवो हंसेति संप्राहुर्हंसः सोहंस्वरूपिणी ।
हकारः प्रथमः पक्षः सकारस्तु द्वितीयकः ॥ २० ॥

पक्षद्वयविनिर्मुक्ता तारा कामकला मता ।
वा[9]गनुत्तरविद्या तु तत्रोत्पन्ना महेश्वरि[10] ॥ २१ ॥

सोकारे परमेशानि सकारः प्रथमो भवेत् ।
हकारस्तु द्वितीयः स्यात् तेन प्रणवरूपिणी ॥ २२ ॥

प्रणवो निर्गुणः प्रोक्तः सर्वाद्यो वेदगोचरः ।
वेदमाता तु गायत्री तदाद्यः प्रणवः स्मृतः ॥ २३ ॥

---

1 D °याः । 2 N °वैतन्त्र° । 3 SD तन्त्रे । 4 N मत्सं° । 5 D °क° ।
6 C °यज्ञे° । 7 SD पद्मा° । 8 N समापन्न° । 9 D °गित्यनुत्तरा । 10 SC °री ।

प्रणवोपासिनां प्रोक्ता निर्गुणोपासना भवेत् ।
गायत्रीं जपमाना[1]स्ते सर्वे शाक्ता द्विजातयः ॥ २४ ॥

गायत्री वेदमाता या सैव काली च तारिणी ।
छिन्ना प्रेमा[2]स्पदा [3]सैव विश्वामित्रप्रसाधिता ॥ २५ ॥

शूद्राश्च पशवः प्रोक्ताः शाक्ताः सर्वे[4] द्विजातयः ।
अपि चाण्डालजातिरथ[5]स्तारोपासनतत्परः ॥ २६ ॥

पूर्णदीक्षासमायुक्तः सैव श्रीकालिकाम्बिका ।
त[6]व यत्नेन जातित्वे कारणं न मयेरितम् ॥ २७ ॥

अत्रार्थे प्रत्ययो देवि ध्रुवं पूर्वे यथा भवेत् ।
वर्षमात्रभवो बालः पूर्णदीक्षासमन्वितः ॥ २८ ॥

तदन्यो हि ऋषिर्देवि वर्षस[7]हस्रभागपि ।
ऋषिः कनिष्ठो देवेशि बालः श्रेष्ठः प्रकीर्तितः ॥ २९ ॥

द्विसप्ततिसहस्रासु देहसंस्थासु नाडिषु ।
मुख्या सहस्रद्वितयी तन्मध्ये त्रितयी वरा[8] ॥ ३० ॥

काली तारा त[9]था छिन्ना नाडीत्रितयरूपिणी ।
जीवमात्रे महेशानि सदा तिष्ठति नित्यशः ॥ ३१ ॥

अज्ञानात् फलदा[10]पि स्याद् ज्ञानाद्राज्यमवाप्नुयात् ।
पृष्ठवंशस्थितो दण्डो मे[11]रुदण्डः प्रकीर्तितः ॥ ३२ ॥

तदाधा[12]राद् ब्रह्मतारा दण्डमाश्रित्य नाडयः ।
तिष्ठन्ति देवदेवेशि तत्त[13]द्योगेन सिद्धयः ॥ ३३ ॥

खट्वाङ्गेति स एवोक्तः पृष्ठवंशः प्रकीर्तितः ।
शक्तिन्यासे महेशानि खट्वाङ्गात्तु यतः स्मृतः[14] ॥ ३४ ॥

तत्तन्नाडीना[15]दयोगाद् भूयस्यः स्युर्हि सिद्धयः ।
ब्रह्मताराभ्यासयोगान्नादयोगः प्रजायते ॥ ३५ ॥

---

1 D °स्तु । 2 SD °मप्र° । 3 D SA SB SD चै° । 4 N प्रोक्ता द्विजाः शिवे । 5 SD °श्च ता° । 6 N न° । 7 C SD °सा° । 8 SA SC परा; SD स्मृता । 9 SD छिन्नमस्ता । 10 D SC SD °यी । 11 C गण°; N वीणा° । 12 C वीणा । 13 SB °त्र यो° । 14 C SB °ता; D °ताः । 15 SD °न्यास° ।

ना[1]दो ध्वनिरिति प्रोक्तः सप्तधा स हि कीर्तितः ।
तदेव निर्गुणं ब्रह्म ध्येयं परगुणोत्तरम् ॥ ३६ ॥

यथाकारस्तु वीणायां पृष्ठवंशे तथा भवेत् ।
सगुणा ध्यानयोगात्तु यथा निर्गुणतां व्रजेत् ॥ ३७ ॥

यथा वीणाभ्यासयोगान्नादयोगः प्रजायते ।
तथा ता[2]राजापयोगाद् देहे नादः प्रवर्तते ॥ ३८ ॥

देहनादे जायमाने सिद्धभूमिः प्रकीर्तिता ।
सि[3]द्धभूमिर्महेशानि मेधादीक्षाप्रगोचरा ॥ ३९ ॥

विद्याभ्यासान्महेशानि जीवः कीटो भवेद् ध्रुवम् ।
कीटो भ्रमरतां प्राप्य यथा विशति निर्गुणे ॥ ४० ॥

आश्चर्यं तु महेशानि जीवो जी[4]वप्रवेशकः ।
परकायप्रवेशो[5] हि सैव प्रोक्तो महेश्वरि ॥ ४१ ॥

मेधादीक्षां समासाद्य साम्राज्यदीक्षयाऽन्वितः ।
साधको भवति प्राज्ञे नान्यथा शाङ्करं वचः ॥ ४२ ॥

सर्वसाम्राज्यमेधाभिः संयुक्तो यस्तु मानवः ।
दिव्यसाम्राज्यदीक्षायामधिकारी भवेद् ध्रुवम् ॥ ४३ ॥

दिव्यसाम्राज्यदीक्षा तु ताराविद्याप्रगोचरा ।
[6]ऊर्ध्वाम्नायेश्वरी देवि महोग्रा[7] तारिणी स्मृता ॥ ४४ ॥

ब्रह्मविद्या तु सं[8]प्रोक्ता वेदोपास्या निरन्तरम् ।
तदाम्नायं प्रवक्ष्यामि येन तन्मयतां व्रजेत् ॥ ४५ ॥

आदौ तु स्पर्शताराऽ[9]त्र चन्द्रवर्णा प्रकीर्तिता ।
चन्द्रघण्टा घण्टिका च द्वात्रिंशद्वर्णगोचरा ॥ ४६ ॥

त्रैलोक्यविजया विद्या पूर्वाम्नाये प्रकीर्तिता ।
सृष्टिरूपो मन्त्रयोगः पूर्वाम्नाये प्रकीर्तितः ॥ ४७ ॥

चिन्तामणिः सिद्धजटा त्रिजटा क्रूरमारिका ।
क्रूरचण्डा महाचण्डा च[10]तुर्वेदो[11]दरी शिवे ॥ ४८ ॥

---

1 D SD °दाद् । 2 SD तथा राज° । 3 SC 'द्धि° । 4 C ज्ञान° । 5 SD °शश्च । 6 C omits five lines. 7 SC SD °ग्र° । 8 SC सा । 9 SD °रा च । 10 D °ण्ड° । 11 SD °दयः ।

माहेश्वरी भयंकार्यो नारसिंही तथैव च ।
वज्रतारा ब्रह्मतारा मणि[1]तारा परा शिवे ॥ ४९ ॥

दक्षिणाम्नाय आख्यातः स्थितिरूपः सनातनः ।
भक्तियोगो महेशानि कुल्लुकाष्टकसंयुतः ॥ ५० ॥

उग्रतारा महेशानि सा[2] तु सप्ताक्षरी शिवे ।
चतुरशीतिभेदा च हंसतारा महेश्वरि ॥ ५१ ॥

पश्चिमाम्नाय आख्यातः संहारः कर्मयोगवान् ।
अष्टौ तारामन्त्र[3]षट्कं विधानं ज्ञानयोगवान् ॥ ५२ ॥

विद्याभेदाश्च सकलाश्चोत्तराम्नायगोचराः[4] ।
[5]महोग्रतारा देवेशि महानीला तथैव च ॥ ५३ ॥

श्रीमच्छाम्भवतारा च श्रीमहानीलशारदा ।
श्रीचीनसुन्दरीविद्या श्रीनीलसुन्दरी तथा ॥ ५४ ॥

महानीलसुन्दरी च ऊर्ध्वाम्नायप्रगोचराः ।
अनुग्रहो हि स्वाराज्ययोगश्चात्र प्रकीर्तितः ॥ ५५ ॥

रसायनं च वेतालो व[6]ह्निवेताल एव च ।
यक्षिण्याद्या[7] अप्सरान्ताः पातालाम्नायगोचराः ॥ ५६ ॥

संभोगयोगो देवेशि पञ्चकृत्यं सकृच्छिवे ।
पातालाम्नाय इत्युक्तस्त्रैलोक्योत्पत्तिरूपधृक् ॥ ५७ ॥

गोपितं सर्वतन्त्रेषु तव स्नेहात् प्रकाशितम् ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥ ५८ ॥

गोपनीयं गोपनीयं गोपनीयं पुनः शिवे ।
एतत्त्र[8]यसमायुक्तस्त्रिशक्तिः स्यान्न संशयः ॥ ५९ ॥

उत्पत्स्यमानरूपो हि सम्प्रदायः प्रतन्यते ।
कलौ पापसमाकीर्णे नान्ये[9] योगा महेश्वरि ॥ ६० ॥

आम्नायाश्चैव पूर्वोक्ता गोपितव्या महेश्वरि ।
वक्ष्यमाणो महेशानि प्रकाश्यः सर्वजन्तुषु ॥ ६१ ॥

---

1 C चिन्तामणिः । 2 SB SC यः; D पातु । 3 D °न्त्राष्टकं । 4 SA SC °रम् ।
5 D omits four lines. 6 C बुद्धि° । 7 D SA SB SC SD °ह्यप्सराद्यन्ताः ।
8 D °यं । 9 D SD °न्य° ।

कलौ युगे च संप्राप्ते जम्बुद्वीपे महेश्वरि ।
खण्डे भरतसंज्ञे तु श्रीशैलगिरिग[1]ह्वरे ॥ ६२ ॥

परिधावीवत्सरे तु सप्तम्यां शनिवासरे ।
उद्दण्डवर्षातीते तु[2] दिननित्योदये शिवे ॥ ६३ ॥

स[3]कारोदयवेलायां मध्याह्ने शा[4]ङ्करे गृहे ।
बौद्धोत्सादनकार्यार्थं शङ्करो म[5]र्त्यरूपधृक् ॥ ६४ ॥

अवतीर्णो महेशानि पञ्चप्रेतसमन्वितः ।
यदा यदा सतां हानिर्धर्मग्लानिर्महेश्वरि ॥ ६५ ॥

तदावतारो देवेशि हरेर्भवति पार्वति ।
हरिगर्वापहारार्थं भक्तानुग्रहणाय च ॥ ६६ ॥

धर्मसंस्थापनार्थं हि शङ्करोऽवतरिष्यति ।
वाराहवक्त्रनृहरी यथा गर्वेण तर्पितान् ॥ ६७ ॥

तथा कलियुगे प्राप्ते शङ्करः [6]कलिशङ्करः ।
चतुर्दिक्षु चतुः[7]प्रेता म[8]ध्यरूपेण पार्वति ॥ ६८ ॥

मध्ये स्वयं शङ्करो हि सदा तिष्ठति पार्वति ।
वर्ष[9]षोडशपर्यन्तं समरतं च करिष्यति ॥ ६९ ॥

दक्षिणामूर्तिरूपो हि सोहङ्कारद्विप[10]क्षधृक् ।
निर्वाणचरणान्ते तु पुनरुद्धारकारकः ॥ ७० ॥

निर्वाणचरणौ देवि सक[11]लौ निष्कलौ शिवे ।
पराप्रासादसं[12]युक्तः सकलः श्रीसदाशिवः[13] ॥ ७१ ॥

निष्कलः शङ्करो देवि व्यासो नारायणो यथा ।
महानीलोपासको हि पूर्वव्यासः प्रकीर्तितः ॥ ७२ ॥

कलौ युगे शङ्करो हि दिव्यसाम्राज्यदीक्षितः ।
तत्क्रमः परमेशानि कथ्यते शृणु साम्प्रतम् ॥ ७३ ॥

---

1 SD °कन्दरे । 2 SD नु । 3 SA SC सा° । 4 SA SC SD श° । 5 All Mss. expect SB read नृत्य । 6 SD काल° । 7 SD °श्वेति । 8 N सव्य°; SB भव्य° । 9 SC षोडशं वर्ष° । 10 D °विपङ्क° । 11 D प्रासादसकलौ । 12 C °प्रोक्तः । 13 N °वे; SA SC °व ।

महाप्रण[1]वदीक्षाख्यश्चाम्नायः परमेश्वरि ।
शङ्करस्तु मुखं देवि चत्वारः परि[2]तः पद[3]म् ॥ ७४ ॥

पञ्चप्रेतां[4]शिनरते च शङ्करः शङ्करः स्वयम् ।
पूर्वाम्नायो भवेत् पूर्वभागे गोवर्धनो मठः ॥ ७५ ॥

सम्प्रदायो भोगवा[5]रो वनाश्रमपदे शिवे ।
जगन्नाथो देवतात्र क्षेत्रं तु पुरुषोत्तमम् ॥ ७६ ॥

देवी तु विमला देवि तीर्थं चैव महोदधिः ।
बलभद्रप्र[6]भाचार्यौ रक्षकौ परिकीर्तितौ ॥ ७७ ॥

भुवनेशी महाविद्या सभेदा परिकीर्तिता ।
[7]सृष्टिरू[8]पी मन्त्रयोगरतत्त्वसंकेतत[9]न्त्रवित् ॥ ७८ ॥

दक्षिणे दक्षिणाम्नायः शृङ्गेरीमठ एव च ।
भूवाराख्यः सम्प्रदायः पदं चैव सरस्वती ॥ ७९ ॥

श्रीपुरी भारती देवि क्षेत्रं रामेश्वराभिधम् ।
आदिवाराहरूपी तु देवता परिकीर्तिता ॥ ८० ॥

श्रीमहाचोल[10]कामाक्षा[11] देवी श्रीसुन्दरी परा ।
ऋषिः शृङ्गी तथा पृथ्वीश्रीधराचार्य इत्यपि ॥ ८१ ॥

तुङ्गभद्रा भवेत् तीर्थं ब्रह्मचारी तु तत्र [12]च ।
देवता कमला प्रोक्ता विष्णुशैवाख्यका[13]म्बिका ॥ ८२ ॥

चैतनाख्यः सिद्धपू[14]र्वो भक्तियोगो महेश्वरि ।
स्थितिरूपो महेशानि पञ्चविंशतितन्त्रयुक् ॥ ८३ ॥

अथ वै पश्चिमाम्नाये शारदामठ ईरितः ।
सम्प्रदायः कीर[15]वारतीर्थाश्रमपदे भवेत् ॥ ८४ ॥

क्षेत्रं तु द्वारकाख्यं च[16] सुसिद्धेश्वरदेवता ।
भद्रकाली भवेद् देवी ब्रह्मा तत्र प्रतिष्ठति ॥ ८५ ॥

---

1 SA SC °ल्य° । 2 SD °र° । 3 C SA SC SD °दे । 4 C तासनरतेन । 5 D SA SC SD °चा° । 6 N °यमा° । 7 D omits five lines. 8 SD °पो । 9 SC SD °म° । 10 D चीन° । 11 D SD °ख्या । 12 SD वै । 13 D SA SD चाम्बि° । 14 C °वें; SD °र्वा । 15 C °ट° । 16 SD तु ।

श्रीविश्वरूपाचार्यस्तु गङ्गा श्रीगौत[1]मी मता ।
तीर्थं तु परमेशानि संहारः कर्मयोगधृक् ॥ ८६ ॥

पञ्चसप्ततितन्त्रैस्तु विद्या श्रीत्रिपुराम्बिका ।
उत्तरे चोत्तराम्नायः श्रीज्यो[2]तिर्मठ इत्यपि ॥ ८७ ॥

सम्प्रदायो नन्दवारो गिरिपर्वतसागराः ।
पदं प्रोक्तं महेशानि क्षेत्रं बदरिका भवेत् ॥ ८८ ॥

देवता श्रीपूर्णगिरिः सर्वसिद्धिप्रदो महान् ।
श्री[3]नरस्त्रोटकाचार्यो मन्त्रशास्त्रविशारदः ॥ ८९ ॥

अलकनन्दा भवेत् तीर्थं सर्वतीर्थोत्तमोत्तमम् ।
रक्षकाश्च महाचीना बौ[4]द्धशास्त्रविडम्बकाः ॥ ९० ॥

अधिष्ठात्री भवेत् तारा वि[5]धानं तत्र तिष्ठति ।
ज्ञानयोगो भवेत् तत्र ब्रह्मचारी च नन्दकः ॥ ९१ ॥

ऊर्ध्वाम्नायं सु[6]मेरुश्च विज्ञानं च पदं भवेत् ।
का[7]श्मीरसम्प्रदायो हि क्षेत्रं कैलाससंज्ञ[8]कम् ॥ ९२ ॥

निरञ्जनो देवताऽत्र मायादेवी प्रकीर्तिता ।
ईश्वराचार्य इत्युक्तस्तीर्थं च मानसं सरः ॥ ९३ ॥

स्वरूपश्च प्रकाशश्च चैतन्यानन्दव्यत्ययात् ।
विद्या श्रीदक्षिणा काली ह्यणिमाष्टकयोगवित् ॥ ९४ ॥

महापद्मागमानां च पा[9]रवेत्ता स्वयं शिवः ।
रहस्यातिरहस्यं च कथितं तत्र भक्तितः ॥ ९५ ॥

अयमेको महेशानि कलौ क्वापि भविष्यति ।
दिव्यौघद्वारतो देवि प्रकाशत्वं गमिष्यति ॥ ९६ ॥

एतद्भेदा महेशानि कथ्यन्ते शृणु सादरम् ।
चतुर्युगाश्च चत्वारः स्वयं तदपि यो महान् ॥ ९७ ॥

---

1 SA SB °गो°; SC SD गोमती । 2 D SA SC SD °षीम° । 3 D °न्द° । 4 C रक्षः । 5 D SA SB SC पि° । 6 SD स° । 7 D SA SC °शीतः । 8 N °ज्ञितम् । 9 C परि° ।

चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यति ।
शङ्करः शङ्करः साक्षाद् व्यासो नारायणो हरिः ॥ ९८ ॥

शङ्करश्च त[1]तो देवि नारदः परिकीर्तितः ।
दत्तात्रेयो बृहत्सेनो जैगीषव्यश्च कश्यपः ॥ ९९ ॥

वशिष्ठश्च रथाङ्गश्च शौनकः कण्व एव च ।
शातातपो दिग्विधः स्यादे[2]वं देवि प्रकीर्तितः[3] ॥ १०० ॥

ज्ञानकाण्डं क्रियाकाण्डं धर्मकाण्डं तथैव च ।
योगकाण्डं चतुर्थं स्याद् भावकाण्डं तु[4] पञ्चमम् ॥ १०१ ॥

ज्ञानयो[5]गो राजयोगो[5] लययोग[5]स्तृतीयकः ।
हठयोग[5]श्चतुर्थः स्यान्मन्त्रयोगस्तु पञ्चमः ॥ १०२ ॥

मन्त्रयोगो द्विधा देवि भावक्रियाक्रमेण च ।
एते योगा म[6]या प्रोक्ताः संन्यासक्रममार्गतः ॥ १०३ ॥

सरस्वती भारती च पर्वतारण्यसागराः ।
गिरिः पुरी वनस्तीर्थश्चाश्रमो दशमः स्मृतः ॥ १०४ ॥

दशनामक्रमेणोक्तं पञ्चकं दशकं भवेत् ।
दशानां द्विविधत्वं च शृणु यत्नेन साम्प्रतम् ॥ १०५ ॥

आन[7]न्दसरस्वती देवि तथेन्द्राख्यः सरस्वती ।
चैतन्यश्च[8] प्रकाशश्च स्वरूपानन्द एव च ॥ १०६ ॥

अपरश्च परश्चैव स[9]त्प्रज्ञः प्रसादकः ।
नित्यः[10] सत्यश्चिद्ध[11]नश्च कैवल्यश्च त्रयोदश ॥ १०७ ॥

विश्वरूपो विराट् चैव विला[12]सश्चित्स्वरूपवान् ।
शाश्वतश्च ततो देवि न्यासभेदा मयेरिताः ॥ १०८ ॥

कलह[13]ट्टो गोमुखश्च विज्ञानवल्लभादयः ।
आद्यस्तु केरलः प्रोक्तो द्वितीयो गौड एव च ॥ १०९ ॥

---

1 D °था । 2 SD °द्देवदेव । 3 N SA SC °ताः । 4 C च । 5 All Mss. expect SD reed °गी । 6 SD महेशानि प्रोक्ताः । 7 C नन्दा°; N तथानन्द° । 8 D °न्यः सु°; SC °न्येश° । 9 C सत्य° । 10 D °त्योऽनि° । 11 SD °दानन्दः । 12 C कैलाश°; D °नाश° । 13 C SC SD °दो ।

केरलो दक्षिणः प्रोक्तो गौडो वामः प्रकीर्तितः ।
केरलो वेदमार्गस्थो निगमाद्[1] वाम एव च ॥ ११० ॥

एते संक्षेपतः प्रोक्ता ब्रह्मा[2]त् सादा[3]न्तकं शृणु ।
कलौ युगे शङ्करो हि ह्यवतीर्णो महेश्वरि ॥ १११ ॥

शङ्करश्च महेशानि हस्तामलक एव च ।
सुरेश्वरस्ततः प्रोक्तस्त्रोटकस्तदनन्तरम् ॥ ११२ ॥

पद्मपादः पञ्चमः स्यात् पञ्चप्रेतानुक[4]ल्पनम् ।
मुख्या परम्परा दे[5]वि मया प्रोक्ता हिताय च ॥ ११३ ॥

विच्छिन्ना तु ततो भूयात् पुनः सा वै भविष्यति ।
शङ्करस्य तु योगेन भविष्यति स्फुटं शिवे ॥ ११४ ॥

इति संक्षेपतः प्रोक्तं **दक्षिणामूर्ति**संमते ।
जटी मुण्डी शिखी चे[6]ति त्रैविध्यं परिकीर्तितम् ॥ ११५ ॥

प्रणवोपासना देवि निर्गुणाख्या प्रकीर्तिता ।
विशेषरूपयोगेन भेदं श्रीच[7]क्रके शृणु ॥ ११६ ॥

मेरुकैलासभू[8]कञ्जकूर्मश्रीरत्नगर्भकम् ।
एवं क्र[9]मेण संयोगात् प्रस्तारपञ्चकं भवेत् ॥ ११७ ॥

पूर्णापूर्णक्रमेणैव न[10]राणां भेदभाजनम् ।
प्रस्तारे मेरुसंज्ञे तु श[11]क्तिचक्राणि पञ्च वै ॥ ११८ ॥

प्रोक्तान्यूर्ध्वमुखान्यत्र शक्तिचक्राण्यधः क्रमात् ।
कैलासाख्ये महेशानि किञ्चिदाकुञ्चितं भवेत् ॥ ११९ ॥

भूप्रस्तारे महेशानि द्विविधत्वं क्रमेण तु ।
ऊ[12]र्ध्वपातालभेदेन द्विविधत्वं प्रकीर्तितम् ॥ १२० ॥

पातालरेखा देवेशि पूजने गर्हिता भवेत् ।
पातालरेखा वि[13]श्वेशि स्थापने च[14]ररूपके ॥ १२१ ॥

---

1 D °मागम° । 2 SC °णं दान्तकं । 3 D सन्ध्योत्तरं । 4 C °कूल° । 5 N °वी । 6 SD चैव । 7 SC °क्रि° । 8 C संभूतं । 9 C कर्मेण । 10 D °वानां; SB °वार्णां । 11 SA SC शाक्त° । 12 N SB SC °र्ध्वा° । 13 D SA SC SD देवे° । 14 D तव; SC SD वर° ।

शु[1]भदं कथितं देवि न[2] मया पूजने मतम् ।
ऊर्ध्वरेखां समा[3]रभ्य मे[4]वन्तं महदु[5]त्तमम् ॥ १२२ ॥

पूजने कथितं देवि रचनां शृणु यत्नतः ।
चतुर्वह्निं समुत्पाद्य पञ्चशक्तिं ततः प्रि[6]ये ॥ १२३ ॥

प्राक् प्रत्यक् क्रममार्गेण मर्मसन्ध्यादिकं भवेत् ।
अष्टादश तु मर्माणि चतुर्विंशति सन्धयः ॥ १२४ ॥

चतुर्भिश्चैव श्रीकण्ठैः पञ्चभिः शिवशक्तिभिः ।
चक्र[7]क्रमेण युक्ताभिः संबद्धाभिः परस्परम् ॥ १२५ ॥

[8]एवं चक्रस्वरूपेण श[9]म्भोस्तु भवशक्तिभिः ।
चत्वारिंशत्त्रयः को[10]णा वृत्तं चाष्टदलं तथा ॥ १२६ ॥

पुनर्वृत्तं कलापत्रं त्रिवृत्तं भूपुरत्र[11]यम् ।
चतुर्दशान्त(?र)मारभ्य भूपुरान्तं महेश्वरि ॥ १२७ ॥

चत्वारि शिवचक्राणि शक्तिचक्राणि वै शृणु ।
चतुर्दशारमारभ्य त्रिको[12]णानां महेश्वरि ॥ १२८ ॥

पञ्च वै शक्तिचक्राणि **दक्षिणामूर्ति**संमते ।
आनन्दभैरवमते चक्राणि शृणु यत्नतः ॥ १२९ ॥

चतुर्दशारमारभ्य भू[13]पुरान्तं महेश्वरि ।
[14]चत्वारि शिवचक्राणि शाक्तानि शृणु यत्नतः ॥ १३० ॥

बहिर्दशारमारभ्य बिन्द्वन्तं परमेश्वरि ।
पञ्च वै [15]शक्तिचक्राणि त्रिवृत्तरहितं प्रिये ॥ १३१ ॥

रहस्यातिरहस्यं [16]हि मयोक्तं तव सुव्रते ।
अल्पो[17]च्चारादधर्मत्वाद् [18]भ्रष्टत्वाद् देवि सुव्रते ॥ १३२ ॥

कूटोच्चारणकं कर्म कलौ कस्य भविष्यति ।
तस्मात् सर्वप्रयत्नेन योग्यं योग्याय दापयेत् ॥ १३३ ॥

---

1 C भ्रम°। 2 SC मया च। 3 D °मभ्यस्य। 4 SA SC SD मेऽर्चितं; D सेवितं। 5 D °त्तमैः; SD °दद्भुतम्। 6 N शिवे। 7 SD चतुष्क°। 8 C SB तव; N नववक्त्र°। 9 SD शाम्भवी नव°। 10 SD °ष्ठा। 11 SC SD °द्वयम्। 12 C भूपुरा°। 13 त्रिकोणा°। 14 C omits this line. 15 D शिव°। 16 SD च। 17 SD °ल्पाच्चा°। 18 N दु°।

बालोपास्या सदा देवि कामोपास्या तु[1] कर्हिचित् ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ १३४ ॥[2]

श्री[3]देव्युवाच

देवश श्रोतुमिच्छामि रहस्यं पूर्वसूचितम् ।

श्रीशिव उवाच

रहस्यातिरहस्यं च कथ्यते शृणु साम्प्रतम् ॥ १३५ ॥

कादिहादिमतत्वेन कहरूपत्वभेदनात् ।
यन्त्राणि देवदेवेशि प्रस्तारत्वेन कृत्स्नशः ॥ १३६ ॥

कथ्यन्ते परमेशानि रहस्यातिरहस्यकम् ।
हादिप्रस्तारः पूर्वोक्तः कादावपि कहे[4]ऽपि च ॥ १३७ ॥

कथ्यते परमेशानि गोपनीयं स्वयोनिवत् ।
पूर्णमेरुर्मध्यमेरुः सा[5]ध्यमेरुस्तथैव च ॥ १३८ ॥

कलामेरुः शक्तिमेरुर्मातृका योगिनी तथा ।
शम्भुमेरुः परामेरुर्नवमो बिन्दुसंज्ञकः ॥ १३९ ॥

पूर्णमध्यकनिष्ठादिभेदः सामान्य ईरितः ।
पूर्णमध्यकनिष्ठादिभेदात् कैलास एव हि ॥ १४० ॥

भूप्रस्तारो द्विधा देवि ऊर्ध्वपातालभेदतः ।
त्रिस्त्रिः क्रमादु[6]त्तरं स्यात् क्रमो[7]त्क्रममथापि वा ॥ १४१ ॥

द्वित्रिक्रमादुन्नतोऽपि द्वित्रि[8]क्रममथापि वा ।
यवान्तरं यवार्धं वा तिलयुक् तिलमेव वा ॥ १४२ ॥

तण्डुलार्धं तच्च वा स्यात् तद्[9]द्वयक्रमभेदतः ।
भूभेदा[10]दपि च शिवे द्वैविध्यं परिकीर्तितम् ॥ १४३ ॥

मेरुः स्वर्गे च कैला[11]से मृत्युलोके प्रकीर्तितः ।
भूप्रस्तारस्तु पाताले त्रि[12]तयं कीर्तितं मया ॥ १४४ ॥

---

1 C नु । 2 D adds इति...अष्टमः पटलः । 3 SA SB शिवा । 4 SA च सुन्दरी; SC महेश्वरि । 5 SD कनिष्ठस्तु । 6 C °न्नतं । 7 C °मा° । 8 D SA SB SC SD °द्वि° । 9 SC °दुप° । 10 D SB SD °व° । 11 N °शो । 12 SB °रूपं ।

कञ्जकूर्मरत्नगर्भाः सर्वत्र पूजने शुभाः ।
शुभाः सर्वे महेशानि सर्वसिद्धिप्रदायकाः ॥ १४५ ॥

ऊर्ध्वरेखाभिधो यस्तु पूजार्थं मृ[1]त्युगोचरः ।
स्थापनार्थं तु पाता[2]लरेखा च कुत्रचिन्मता ॥ १४६ ॥

केसरद्वययुक्तं च दलं प्रोक्तं महेश्वरि ।
दण्डाकारं बिन्दुच[3]क्रं तद्द्वयात्कं महेश्वरि ॥ १४७ ॥

पातालरेखाप्रस्तारे के[4]सरे मुखबिन्दुता ।
ऊर्ध्वरेखाविधौ देवि रेखाकेस[4]रता मता ॥ १४८ ॥

श्रीविद्यायां कालिकायां के[4]सराणि क्वचिच्च वा ।
श्रीविद्यायां तत्र देवि के[4]सराणि न[5] कारयेत् ॥ १४९ ॥

बीजहीनं तु यद्यन्त्रं तद्यन्त्रं शववद्भवेत् ।
[6]अथवा च दलाकारं यन्त्रं त्रिः[7] सप्त[8]मीयुतम् ॥ १५० ॥

दलेष्वपि महेशानि केसराणि न[9] चात्र वै ।
कादावपि महेशानि प्रस्तारनवकं भवेत् ॥ १५१ ॥

बीजयुक्तं मध्यबिन्दुं बीजबिन्दुविभूषितम् ।
यन्त्रं मन्त्रं समासाद्य पूजयेत् कालिकाम्बिकाम् ॥ १५२ ॥

महाशङ्खे शिलायां च न[10] च य[11]न्त्रविचारणा ।
शालग्रामे बाणलिङ्गे कोणे वा परमेश्वरि ॥ १५३ ॥

नावाहनं न वा प्राणस्थापनं न विसर्जनम् ।
पीठं पू[12]ज्य प्रयत्नेन ततो यन्त्रं विचारयेत् ॥ १५४ ॥

यन्त्रं विलिख्य यत्नेन तत्र पीठं प्रपूजयेत् ।
पीठयुक्ता भवेन्मूर्तिर्न मूर्तिस्त्वितरा भवेत् ॥ १५५ ॥

प[13]श्चावरणपीठाद्यैर्भूषिता परमेश्वरि ।
सा मूर्तिर्वरदा प्रोक्ता क्षणमात्रेण सिद्ध्यति ॥ १५६ ॥

---

1 D SA SC SD श्रृणु । 2 SD °ले । 3 N °वक्त्रं । 4 SA SD °श° । 5 SD तु । 6 C omits this line. 7 D SA SB SC SD निः । 8 N सत्पति° । 9 SC °वा° । 10 N नव° । 11 C यत्र; SD मन्त्र° । 12 D संपूज्य य° । 13 C पीठा°; N या चा° ।

नावाहनं न पीठं च न कुर्यात् तद्विसर्जनम् ।
यन्त्रे यदीदृशी मूर्तिस्तस्य भाग्यपरम्परा(म्) ॥ १५७ ॥

वक्तुं शक्नोति कश्चात्र त्रैलोक्यविजयी स तु ।
सदाशिवमतं प्रोक्तं श्रृणुष्वानन्द**भैरव**म् ॥ १५८ ॥

प्रस्तारत्रितयं देवि पूर्वमेव प्रकाशितम् ।
तन्मध्ये त्रितयं देवि स्थलत्रितयकं भवेत् ॥ १५९ ॥

स्वर्गे मेरुर्महेशानि कैलासो मृ[1]त्युलोकके ।
भूप्रस्तारस्तु पाताले संक्षेपात् कीर्तितं मया ॥ १६० ॥

अथ वै **दक्षिणामूर्ते**[2]र्मतं श्रृणु च पार्वति ।
पूर्णमेरुः श्रीपु[3]रे स्यात् कैलासे[4] पूर्णसंज्ञकः ॥ १६१ ॥

मृ[5]त्युलोके मया प्रोक्तः पूर्णभूः[6] [7]सुतले भवेत् ।
विरूपाक्षमतं देवि कथ्यते श्रृणु साम्प्रतम् ॥ १६२ ॥

स्वर्गे मेरुर्महेशानि भूप्रस्तारस्तु मानवे ।
पाताले चैव कैलासस्त्रितयं कीर्तितं मया ॥ १६३ ॥

बटुकस्य मतं देवि कथ्यते श्रृणु साम्प्रतम् ।
नित्याषोडशतादात्म्यं मेरुप्रस्तार ईरितः ॥ १६४ ॥

मातृकायाश्च तादात्म्यात् कैलासाख्यः प्रकीर्तितः ।
वाग्देवतायास्तादात्म्याद् भूप्रस्तारः प्रकीर्तितः ॥ १६५ ॥

सृष्टिस्थितिलयत्वेन सुन्दरीयन्त्रपूजनम् ।
सृष्टिसंहारमार्गेण कालिकायन्त्रपूजनम् ॥ १६६ ॥

सृष्टिसंहारमार्गेण तारा छिन्ना च पीत[8]मा ।
पर्यायप्रस्तारत्वेन **खेचरीसिद्धिना**[9]मके ॥ १६७ ॥

चूडामणौ महेशानि यन्त्राणि पूर्वमेव तु ।
चतुःकालमतत्वेन बटुकः पञ्चमो मतः ॥ १६८ ॥

एतद्भेदेन श्रीकाल्या यन्त्राणि संश्रृणु प्रिये ।
आदौ शक्तिं समुत्पाद्य शक्तीनां तु चतुष्टयम् ॥ १६९ ॥

---

1 D SD मर्त्य° । 2 D °र्तिम° । 3 D °रः । 4 N °सः । 5 D SD मर्त्य° ।
6 SD °र्णं मृत्यु° । 7 C स्रक्° । 8 SD धीमता । 9 C SA SC °य° ।

बाह्याबाह्यक्रमेणैव मध्ये बिन्दुं लिखेच्छिवे ।
य[1]न्त्रं विलिख्य देवेशि भूपुरैकेन संयुतम् ॥ १७० ॥

क्वचिद् भूपुरशब्देन चतुरस्रं प्रकीर्तितम् ।
अत्र भूपुरशब्देन चतुर्द्वारात्मकं भवेत् ॥ १७१ ॥

त्रिकोणत्रयमालिख्य षट्कोणं च ततोपरि ।
वृत्ताष्टदलवृत्तं च भूपुरेण समन्वितम् ॥ १७२ ॥

बिन्दुमन्ये तु श्रीमाया का[2]लीयन्त्रं [3]सुसिद्धिदम् ।
मतमन्यं शृणु प्राज्ञे योनिचक्रं लिखेत् सुधीः ॥ १७३ ॥

योनिद्वयं ततो लिख्य षट्कोणं च ततो भवेत् ।
ततश्चाष्टदलं पद्मं भूगृहेण समन्वितम् ॥ १७४ ॥

यन्त्रमेतन्महेशानि महासाम्राज्यदायकम् ।
आदौ योनिं समालिख्य योनिं च तद्बहिर्लिखेत् ॥ १७५ ॥

योनि[4]त्रयं तद्बहिस्तु ततो वृत्तं समालिखेत् ।
ततश्चाष्टदलं पद्मं वृत्तं चैव ततोपरि ॥ १७६ ॥

धरणीगृ[5]हमालिख्य यन्त्रमेतन्मयेरितम् ।
शक्तिमाद्यां समुत्पाद्य ततः शक्तिद्वयं लिखेत् ॥ १७७ ॥

वह्निशक्तिं समुत्पाद्य बाह्यशक्तिं विभेदयेत् ।
[6]ग्रन्थिभेदक्रमेणैव वह्निं प्रस्तारयेदधः ॥ १७८ ॥

अग्निभेदक्रमेणैव श[7]क्त्यूर्ध्वं [8]चापि भेदयेत् ।
[9]ऊर्ध्ववह्निविभेदेन अधोऽग्निं च विभेदयेत् ॥ १७९ ॥

[10]त्रयं योनेर्द्वयं वह्नेः कालीयन्त्रं सुसिद्धिदम् ।
षट्को[11]णवृत्ताष्टदलं षडस्रं वज्रलाञ्छितम् ॥ १८० ॥

तद्बहिर्भूपुरं यन्त्रमावृ[12]त्तत्रयसंयुतम् ।
शक्त्यग्निभ्यां च षट्को[13]णं तत्र योनित्रयं भवेत् ॥ १८१ ॥

---

1 C यद् भूयं विलिखेद् देवि; D इदं; SA SB SC SD इमं। 2 C काल्या। 3 N तु। 4 N यन्त्रं। 5 C °गुरु°। 6 D omits three lines. 7 N SC SD °क्तो°। 8 N वा°। 9 SA SC omit this line; 10 C अ°। 11 SA SC °णं। 12 N °त्ति°। 13 C °णे।

पद्ममष्टदलं [1]वृत्तं भूश्चतुर्द्वारभूषितम् ।
यन्त्रं श्रीदक्षिणाकाल्या मध्ये मायाविभूषितम् ॥ १८२ ॥
मतभेदेन बीजानां निर्णयः[2] कथ्यते श्रृणु ।
कं [3]विराड्रूपमित्युक्तं त[4]द्रूपः कालिकामनुः ॥ १८३ ॥
यन्त्रं तु गृहमित्युक्तं बिन्दुस्था परमेश्वरी ।
ब्रह्मरूपो भवेद् बिन्दुस्तत्र बिन्दुं विभावयेत् ॥ १८४ ॥
विराड्रूपं वह्नियुतं ततः कामकलायुतम् ।
नादबिन्दुयुतं चेत् स्याच्चिच्छक्तिः परिकीर्तिता ॥ १८५ ॥
विराड्बीजक्रमेणैव बीजय[5]न्त्रं विभावयेत् ।
लेखने तु महेशानि त्वर्धबिन्दुः प्रकीर्तितः ॥ १८६ ॥
साङ्गं यन्त्रं विभाव्याथ ततो बिन्दुं विभावयेत् ।
विराड्रूपं भवेद् यन्त्रं बिन्दुः साम्राडितीरितः ॥ १८७ ॥
[6]स्वाराड्रूपं भवेद् बीजं बिन्दुमध्ये विभावयेत् ।
पूर्णबिन्दुर्यदा देवि बिन्दुत्रयविभावना ॥ १८८ ॥
[7]मध्यबिन्दुर्यदा देवि विराड्बीजे तु शून्यक[8]म् ।
अर्धबिन्दुर्यदा देवि बिन्दुबीजं विराड् विना ॥ १८९ ॥
अधिकार[9]क्रमेणैव क्रमाद् यत्नेन तोषयेत् ।
महाकालमते देवि बिन्दुस्वाराड्विभावना ॥ १९० ॥
सम्प्रदायक्रमेणैव त्रित[10]यं त्रितयं भवेत् ।
अतिकालमते देवि बिन्दुवै[11]राड्विभावना ॥ १९१ ॥
ककारोदरमध्ये तु विन्दुं द[12]त्वा महेश्वरि ।
यन्त्रमध्ये लिखेद् बीजं बिन्दौ बीजं च[13] भावयेत् ॥ १९२ ॥
त्रि[14]तयं कथितं देवि सम्प्रदायक्रमेण च ।
इति संक्षेपतः प्रोक्तं रहस्यातिरहस्यकम् ॥ १९३ ॥
[15]गोपनीयं प्रयत्नेन तारायन्त्राणि वै श्रृणु ।
बिन्दुत्रिकोणाष्टदलं भूपुरं वज्रचिह्नितम् ॥ १९४ ॥

---

1 N पद्मं। 2 SA SC °यं श्रृणु पार्वति। 3 D काश्मीराट्°। 4 C omits तद्रूपः...गृहमित्युक्तं in second line. 5 N °न्त्रे। 6 D स्व°। 7 C omits six lines. 8 SD °के। 9 SA SC °रः। 10 N °ये। 11 D N °वैं°। 12 D स श्री। 13 N वि°। 14 SB °क्षमं; SC °तपः। 15 SD omits three lines.

यन्त्रमेतन्महेशानि रहस्यातिरहस्यकम् ।
बिन्दुषट्कोणवृत्तं च पद्मभूगृहभूषितम् ॥ १९५ ॥

यन्त्रं प्रोक्तं महाप्राज्ञे भूपुरद्वयतोऽन्यक[1]म् ।
बिन्दुत्रिकोणषट्कोणं वृत्तत्रयमनन्तरम् ॥ १९६ ॥

चतुरस्रं ततो वृत्तं दलाष्टकं ततोपरि ।
वृत्तत्रयं समालिख्य भूपुरत्रयकं ततः ॥ १९७ ॥

त्रिशूलटङ्कितं यन्त्रं श्रीमहातारिणीमनोः ।
बिन्दुत्रिकोणष[2]ट्कोणं [3]भूगृहं वृत्तमेव च ॥ १९८ ॥

ततो दलाष्टकं लिख्य भूपुरैकेन संयुतम् ।
बिन्दुत्रिकोणषट्कोणं [4]वृत्ताष्टदलभूषितम् ॥ १९९ ॥

षोडशारं दन्त[5]पत्रं चतुष्षष्टिदलं तथा ।
भूपुरत्रयसंयुक्तं यन्त्रं श्रीतारिणीमनोः ॥ २०० ॥

बिन्दुषट्कोणपद्मे च भूगृहं धारणाविधौ ।
बिन्दुवृत्ताष्टदलकं भूगृहेण समन्वितम् ॥ २०१ ॥

यन्त्रं नीलसरस्वत्या धारणार्थं महेश्वरि ।
बिन्दुत्रिकोणषट्कोणं चतुर्दलसुशोभन[6]म् ॥ २०२ ॥

त्रितत्त्वं त्रितयं देवि त्रि[7]तयं च ततः परम् ।
त्रिकोणस्य महेशानि मायां पूर्वदले लिखेत् ॥ २०३ ॥

दक्षे स्त्रीं विलिखेद् देवि पश्चिमे फं[8] लिखेत् सुधीः ।
[9]टमुत्तरे लिखेद् देवि कूर्चं मध्ये लिखेत् सुधीः ॥ २०४ ॥

तारायन्त्रमिदं प्रोक्तं केवलं वा चतुर्दलम् ।
यन्त्रमेतन्मया प्रोक्तं **गन्धर्वेशमतं** शृणु ॥ २०५ ॥

षट्कोणा[10]ष्टदलं पद्मं षोडशारमथापरम् ।
दन्तपत्रं च भूबिम्बत्रितयं तारिणीमनोः ॥ २०६ ॥

यन्त्ररूपं तु छिन्नायां बगलायां च वा[11] भवेत् ।
कलाशतं च सुन्दर्यां पूर्वमेव प्रकाशितम् ॥ २०७ ॥

---

1 SB °के। 2 C °भूगृह्यं। 3 SD omits भूगृहं...षट्कोणं in third line. 4 C omits वृत्ताष्ट...षट्कोणं in seventh line. 5 N °द्मं। 6 C °भित°। 7 D निबतं। 8 N पुं; SD फट्। 9 SD उत्तरे विलि°। 10 D °णषड्°। 11 D भावयेत्।

रहस्यातिरहस्यं च तत्र स्नेहात् प्रकाशितम् ।
प्रकृत्या[1] तु विना देविं न संसारः क्वचिद् भवेत् ॥२०८॥
पुरुषं च विना देवि न विद्या सिद्धिदायिनी ।
[2]तस्मात् कारणतो देवि द्वितयं प्रभ[3]जेच्छिवे ॥२०९॥
कालिकायां महाकालः सुन्दर्यां ललितेश्वरः ।
तारायां च तथाऽक्षोभ्यश्छिन्नायां विकरा[4]लकः ॥२१०॥
भुवनायां महादेवो धूम्रायां कालभैरवः ।
नारायणो महालक्ष्म्यां भैरव्यां बटुकः स्मृतः ॥२११॥
मातङ्ग्यां च मतङ्गः स्यादथवा स्यात् सदाशिवः ।
मृत्युञ्जयस्तु बगलाविद्यायां परिकीर्तितः ॥२१२॥
भैरवं वा शिवं वापि स्वर्णाकर्षणभैरवम् ।
बटुकस्य तु संयोगाद् विद्याः सिध्यन्ति नान्यथा ॥२१३॥
पार्षन्मण्डलसंयोगात् तथा भैरवयोगतः ।
क्रोधभैरवसंयोगाद् यक्षिण्यः सिद्धिदा यथा ॥२१४॥
तथा विद्याः प्रसिद्ध्यन्ति पुं[5]योगादेव पार्वति ।
रहस्यातिरहस्यं च गोपनीयं स्वयोनिवत् ॥२१५॥
गोपनीयं महे[6]शानि प्रकाशात् सिद्धिरोधकृत् ।
प्राणान्तेऽपि न वाच्यं च तत्र स्नेहात् प्रकाशितम् ॥२१६॥
शङ्करोत्पत्तितो देवि महाकलियुगे शिवे ।
[7]वर्षसाहस्रकस्यान्ते त्रिंशद्वर्षोत्तरं शिवे ॥२१७॥
तन्त्रस्यास्य महेशानि प्रकाशोऽत्र भविष्यति ।
न वक्तव्यं न वक्तव्यं प्राणान्तेऽपि महेश्वरि ॥२१८॥
अन्यथा कुरुते यस्तु तस्य पातो भविष्यति ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥२१९॥

इति श्रीमदक्षोभ्यतारासंवादे तारासूक्ते [8]यन्त्रभेदनिर्णयो[9] नामाष्टमः पटलः ॥

---

1 D °तिं । 2 C तद्भ्रमात् कामतो । 3 C °वे । 4 C °लात्मक; D °लात्मकः । 5 SD प्र° । 6 SD प्रयत्नेन । 7 SD omits this line. 8 SA SC SD पञ्च° । 9 N °यप° ।

नवमः पटलः ।

श्रीदेव्युवाच

देवे[1]श सर्वविद्येश वृषभध्वज शङ्कर ।
सर्वं त्वया निगदितं सूचितं यद् रहस्यकम् ॥ १ ॥

तन्मे कथय देवेश यद्यहं तव वल्लभा ।

श्रीशिव उवाच

कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा ॥ २ ॥
लोकसंमोहनार्थाय स्वरूपं बिभ्रती प[2]रा ।
वेणुनादसमारम्भा सर्वसंमोहनक्षमा ॥ ३ ॥

कदाचिदाद्या श्रीकाली सैव ताराऽस्ति पार्वति ।
कदाचिदाद्या श्रीतारा पुंरूपा रामविग्रहा ॥ ४ ॥

रावणस्य वधार्थाय देवानां स्थापनाय च ।
दैत्यसंहरणार्थाय रूपं संबिभ्रती पर[3]म् ॥ ५ ॥

आद्या तारा महाशक्तिः सैव काली महेश्वरि ।
या महावैष्णवी माया सा महासुन्दरी मता ॥ ६ ॥

सर्वे भेदाः कालिकायाः[4] सैवाद्या परिकीर्तिता ।
[5]महाविद्या सिद्धविद्या विद्याभेदैः प्रतिष्ठिता ॥ ७ ॥

उपविद्यादिभेदैश्च कालिका संस्थिता भुवि ।
ताराद्याः सकला विद्याः कालिकां[6]शादजायत ॥ ८ ॥

सर्वा विद्याः कालिकायां संस्थिता एव पार्वति ।
महाकालो भैरवश्च स एव हि सदाशिवः ॥ ९ ॥

स एव हि महाविष्णुः सैव तत्त्वेन गीयते ।
गणेशो द्वि[7]तयं देवि वर्तते तच्छृणु प्रिये ॥ १० ॥

---

1 N °वादि । 2 SD यदा । 3 D SA SC SD परा । 4 C °द्या । 5 D omits this line. 6 D °कायाम°; C संप्र° । 7 N °ती° ।

विष्णुशैवात्मकं रूपं गणेशे तिष्ठति प्रिये ।
पार्वत्यंशाद् वैष्णवत्वं शैवांशाच्छिवरूपता ॥ ११ ॥
वस्तुगत्या तु चैतन्यमेकं सर्वत्र तिष्ठति ।
सर्वे[1]व्याप्यं परब्रह्म सर्वं च व्याप्य तिष्ठति ॥ १२ ॥

रा शक्तिरिति विख्याता मः शिवः परिकीर्तितः ।
शिवशक्त्यात्मकं ब्रह्म राम रामेति गीयते ॥ १३ ॥

योगासनसमारूढं जटापटलमण्डितम् ।
विभूतिभूषितं दे[2]वं त्रिनेत्रं चन्द्रशेखरम् ॥ १४ ॥

चतुर्भुजं वा द्विभुजं सकलं निष्कलं च वा ।
सर्पैर्विभूषितं देवं व्याघ्राम्बरविभूषितम् ॥ १५ ॥

तेजःपुञ्जनिभं देवि सीतां तेजःस्वरूपिणीम् ।
गौरीरूपां परां सीतां महासाम्राज्यनायिकाम् ॥ १६ ॥

रामः परशिवो ज्ञेयो नावतारो नरोऽपि न[3] ।
य[4]त्परं ब्रह्म विख्यातं तद् रामेत्यक्षरद्वयम् ॥ १७ ॥

श्रीदेव्युवाच

[5]इ(? ने)दं मया ज्ञातमस्ति रामः को वा शिवश्च कः ।
ऐक्यं वा भिन्नता वापि उपास्या वा विभावना ॥ १८ ॥
तन्मे कथय देवेश यद्यहं तव वल्लभा ।

श्रीशिव उवाच

प्रश्नः कृतस्त्वया यो हि गोप्याद् गोप्यतरः शुभः ॥ १९ ॥

तारासर्वस्वविज्ञानं कथं तत्कथ्य[6]तां शिवे ।
तथापि तव संप्रीत्या कथ्यते शृणु सा[7]म्प्रतम् ॥ २० ॥

एकस्मिन् समये पूर्वं विष्णुरुद्रावुभावपि ।
वि[8]ष्णोः स्वरूपसिद्ध्यर्थं तपस्तेपे हरः स्वयम् ॥ २१ ॥

शिवस्वरूपसिद्ध्यर्थं तपस्तेपे हरिः स्वयम् ।
षड्वृन्दयुगसंख्यात[9]मुभौ तपःपरौ शिवे ॥ २२ ॥

---

1 N °र्वं व्याप्य । 2 N °वि । 3 SD वा । 4 D SD त°; SC तत्पर° ।
5 SD °मं । 6 D °ते । 7 N °दर° । 8 SA SC °ष्णु° । 9 DN °ताबु° ।

शिवो विष्णुस्वरूपत्वं विष्णुः शम्भुस्वरूपताम् ।
उभौ हरिहरात्मानौ ह्यर्धनारीश्वरौ[1] परौ ॥ २३ ॥

मुख्यरूपमिदं देवि द्व[2]योः संजातमम्बिके ।
तेजःपुञ्जमिदं देवि ब्रह्मरूपं सनातनम् ॥ २४ ॥

तेजःपुञ्जादेकभूतं जगदेतच्चराचरम् ।
रामो जातः शिवो देवि राजराजेश्वरः शिवः ॥ २५ ॥

श्रीशौ[3]वसुन्द[4]रं रूपं विष्णुर्जातो महेश्वरि ।
लक्ष्मीपतिर्यो देवेशि स च वै पार्वतीपतिः ॥ २६ ॥

गौरीपतिर्यो देवेशि स लक्ष्मीपतितामियुः ।
[5]उभयोर्व्यत्ययं देवि जातमेवं महेश्वरि ॥ २७ ॥

गौरीलक्ष्म्योर्व्यत्ययं हि रूपत्वेन शृणु प्रिये ।
सीता जाता स्वयं गौरी लक्ष्मीः श्रीकालसुन्दरी ॥ २८ ॥

एवं जातं महेशानि शिवरा[6]मात्मकं महः ।
क्वचित्तु विष्णुवद्[7] ध्येयं क्वचिच्छैवात्मकं प्रि[8]ये ॥ २९ ॥

अत्रार्थे प्रत्ययो देवि शिवराम(ा)द्वयं शिवे ।
विष्णुध्यानं शिवध्यानं गौरीलक्ष्म्योर्महेश्वरि ॥ ३० ॥

ध्यानं संकथ्यते देवि शिवरात्मात्ममेव च ।
शिवरामात्मकं ज्ञानं ब्रह्मज्ञानं सनातनम् ॥ ३१ ॥

यो रामः स शिवः प्रोक्तो यः शिवः स हि रामताम् ।
उभयोरन्तरं देवि यः पश्यति स[9] मूढधीः ॥ ३२ ॥

तस्य नाशो भवत्येव नात्र कार्या विचारणा ।
यथा वाञ्छाकल्पलता ग[10]णशैवात्मका मता ॥ ३३ ॥

जपेत् षोडशसाहस्रं षट्सहस्रं च वा प्रिये ।
षोडशे तद्दशांशेन षट्सहस्रे तु [11]षड् भवेत् ॥ ३४ ॥

अधिकारक्रमेणैव छन्दोविद् ध्यानयोजनम् ।
पूर्वं ब्रह्म तु यत्प्रोक्तं तदेव निर्गुणं महः ॥ ३५ ॥

---

1 SC रः शिवः; SD °रोत्तमौ । 2 C शरं । 3 SA °सै°; SC °से° । 4 SD °री । 5 D omits this line. 6 SD °तत्त्वा° । 7 C °ज्ज्ञे° । 8 SA SC SD शिवे । 9 N वि° । 10 N °णे । 11 C यद् ।

तद्योगसौख्यं देवेशि को हि जानाति पार्वति ।
अज्ञानं [1]सर्वलोकानां ज्ञानं देवि तथैव च[2] ॥ ३६ ॥

श्रृङ्खलाद्वितयं देवि[3] आद्या लोह[4]मयी मता ।
द्वितीया स्वर्णजा देवि तृतीया प्रेमजा भवेत् ॥ ३७ ॥

चतुर्थी लयजा प्रोक्ता[5] विज्ञानं शृणु यत्नतः ।
परा कुण्डलिनी या तु तथा परशिवः शिवे ॥ ३८ ॥

बीजाङ्कुरन्याययोगाज्ज[6]पास्फटिकवच्छिवे ।
कुण्डलिन्यां तु तस्यां वै शैवतत्त्वानि वै दश ॥ ३९ ॥

पञ्चविंशतितत्त्वानि षट्त्रिंशच्छैवभेद[7]जे ।
पराप्रासादविद्यायां शाम्भवेष्वपि पार्वति ॥ ४० ॥

एकपञ्चाशत्तत्त्वानि कीर्तितानि मया तव ।
एका कुण्डलिनी दे[8]वि सार्धत्रिवलया शिवा ॥ ४१ ॥

तत्त्वान्येतानि देवेशि कथं तिष्ठन्ति शारदे ।

श्रीशिव उवाच ।

नाडीवायुप्रभेदेन क्षेपणा[9]ङ्कुरणे शिवे ॥ ४२ ॥
प्रसारणं रोधनं च गतिर्जुम्भा रतिर्धृतिः ।

प्रीतिरित्यादि देवेशि वायुगत्या प्रजायते ॥ ४३ ॥

वायुभक्षी भवेत् सर्पो वायुभक्षी तु कुण्डली ।
तथा नाडीनिरोधेन स्वाधिकारवशेन तु ॥ ४४ ॥

तथाऽऽभासो महेशानि तस्यां भवति नित्यशः ।
अत एव वायुरोधात् खेचरत्वं लयोऽपि च ॥ ४५ ॥

ईदृग्विधं यत्र भवेदाश्चर्यं किं प्रव[10]र्धते ।
एकै[11]व कुण्डली दे[12]वि स्वे[13]च्छया गुणिता भवेत् ॥ ४६ ॥

---

1 SB omits सर्वलोकानां...विज्ञानं in foruth line. 2 SC हि । 3 C °यमाद्या तथा । 4 D सोम° । 5 SD देवि । 6 C SA SB SC °वा° । 7 C °ने । 8 SA SB SC °वी । 9 C शेषना°; D °त्राण्य°; SA SC °त्राणाङ्कुरने; SD °त्राणां साकले । 10 C D N °र्तं° । 11 N °क; SA SC SD °कं । 12 SA SC °वी । 13 C omits स्वेच्छया···देवि in third line.

तथा समस्तं त्रैलोक्यं सैव सूते हि वर्णतः ।
एकैव कुण्डली देवि सर्वतत्त्वेषु संस्थिता ॥ ४७ ॥

कुण्डलीशिवयोरैक्यं यस्मिन् काले प्रजायते ।
विज्ञानं च तदेव स्यात् तयोरैक्यं महेश्वरि ॥ ४८ ॥

[1]लयस्य भूमिकायां तु स्थितिः प्रथमभूमिका ।
भूमिकानां तु पञ्चाशत् तदा योगेश्वरो भवेत् ॥ ४९ ॥

षट्चक्रभेदनं कृत्वा कीटो भूत्वा महेश्वरि ।
ततो भृङ्गी भवेद् देवि ततः स्वानन्दरूपता ॥ ५० ॥

कीटो भृङ्गीत्व[2]मायाति भृङ्गीतः कीटता नहि ।
भृङ्गी भूत्वा महेशानि विज्ञानं लभते नरः ॥ ५१ ॥

ततः समरसानन्दा चन्द्रकुण्डे महेश्व[3]रि ।
कला सप्तदशी यत्र तथा चाष्टादशेश्व[4]री ॥ ५२ ॥

पायं पायं सुधां[5] पीत्वा तत्कलातो महेश्वरि ।
विज्ञानवान् शिवो[6] भूत्वा मेधादीक्षां लभेत् ततः ॥ ५३ ॥

मे[7]धादीक्षा तु देवेशि पूर्णानन्दस्वरूपिणी ।
पूर्णानन्दे समुत्पन्ने क्षुद्रानन्देन किं फलम् ॥ ५४ ॥

ज्वालास्वरूपं देवेशि तेजःपुञ्जस्वरूपताम् ।
तत्पुञ्जरूपतां गत्वा ब्रह्मरूपः शरीरधृक् ॥ ५५ ॥

तल्लेशश्चा[8]नुवाहेन [9]यथान्यत्र निपात्यते ।
[10]तथैव देवदेवेशि क्षुद्रानन्दः प्रकीर्तितः ॥ ५६ ॥

अविद्यावेष्टितो भूत्वा क्षुद्रानन्दपरो नरः ।
ब्रह्मविष्णुमहेशाद्यास्त्विन्द्राद्याः किमु चापरे ॥ ५७ ॥

क्षुद्रानन्दपरा ह्येते मर्त्यानां तत्र का कथा ।
ब्रह्मानन्दो महाकालः पूर्णं[11] ब्रह्म सनातनम् ॥ ५८ ॥

---

1 C omits this line. 2 N° तां। 3 SA SB SC SD °री। 4 N °रि। 5 C °धी गलात्। 6 SA सुरो। 7 D omits four lines and adds ब्रह्मरूपः स विज्ञानी सर्वसिद्धशरीरधृक्। 8 N °ण्ड°। 9 N अ°। 10 C °था वै। 11 SD °र्वैरूपं।

[1]विज्ञानरूपं तद्ब्रह्म खण्डाखण्डविवर्जितम् ।
कलां सप्तदशीं वामां महाकुण्डलिनीं पराम् ॥ ५९ ॥
तेजःपुञ्जां सूक्ष्मरूपां विस[2]तन्तुतनीयसीम् ।
प्रसुप्तभुजगाकारां सार्धत्रिवलयां पराम् ॥ ६० ॥
सूर्यकोटिप्रतीकाशां चन्द्र[3]कोटिसुशीतलाम् ।
तटित्परार्धलावण्यामग्न्यर्बुदसुदीपिनीम् ॥ ६१ ॥
[4]नीवारशूकवत् तन्वीं कलाषोडशधारिणीम् ।
महाशैवे स्वतःसिद्धे स्वयम्भूनामवाचके ॥ ६२ ॥
[5]मूलाधारे महेशानि बीजाङ्कुरस्वरूपतः ।
शिवशक्त्यात्मकं स्थानं मूलाधारं विदुः शिवे[6] ॥ ६३ ॥
गुदस्य द्व्यङ्गुला[7]दूर्ध्वं स्वाधिष्ठानादधः शिवे ।
गु[8]ह्यस्थानं च तत्प्रोक्तं गु[9]दस्थानं च भिन्नतः ॥ ६४ ॥
विभाव्यते यत्र यत्र तत्रैव कुण्डली परा ।
तथा स्वयम्भूलिङ्गं च पञ्चसूत्रविवर्जितम् ॥ ६५ ॥
ब्रह्माण्डसूत्रसहितं [10]कलैकेन समन्वितम् ।
द्विपत्रे बिन्दुच[11]क्रे तु कटाहे चन्द्रसं[12]ज्ञके ॥ ६६ ॥
सहस्रारस्थितं शम्भुं कलान[13]न्तस्वरूपिणम् ।
ऊर्ध्ववक्त्रादधोवक्त्रं शिवं सं[14]सारयेच्छिवे ॥ ६७ ॥
कुण्डलीयोगतो देवि द्वयोरैक्यं प्रजायते ।
तयोर्योगा[15]मृतं देवि कलां सप्त[16]दशीं विदुः ॥ ६८ ॥
कलां सप्तदशीं पीत्वा पूर्णरूपत्वतां व्रज ।
भावनायोगमात्रेण सर्वं संसा[17]धयेत् प्रिये ॥ ६९ ॥
मेधादीक्षाविधौ देवि प्रोक्तेयं पू[18]र्वभूमिका ।
इति संक्षेपतः प्रोक्तं मालाभेदान् शृणु प्रिये ॥ ७० ॥

---

1 N omits two lines. 2 C विंशत्तन्तुबलीयसीम् । 3 N °न्द्रानन्द°; SB °न्द्रानन्त° । 4 C omits this line. 5 C omits this line. 6 D प्रिये । 7 D °लस्योर्ध्वं । 8 SD गुद° । 9 SD गुह्य° । 10 C कलौं; SD फ° । 11 N वक्त्रे; SD चन्द्रे । 12 N °न्ति°; D °मन्ति° । 13 N °तन्त्र° । 14 C वक्त्राच्छिवं प्रिये; D SA SC सङ्क° । 15 C °द्भुतं । 16 C °मद° । 17 D °धार° । 18 D र्व° ।

द्विविधत्वं च प्रत्येकं सृष्टिसंहारभेदतः ।
अनामा[1]मूलमारभ्य अनामामूलपर्वणि ॥ ७१ ॥

त्रिपर्व च कनिष्ठाया अनामाग्रं महेश्वरि ।
मध्यमाग्रा[2]च्च तर्जन्या मूलपर्वान्तिमं शिवे ॥ ७२ ॥

शक्तिमाला त्वियं प्रोक्ता संहाराद् वैष्णवी भवेत् ।
मध्यमामध्यमारभ्य तदग्रात् परमेश्वरि ॥ ७३ ॥

अनामामध्यकस्याथ प्रदक्षिणमनुव्रजन् ।
तर्जन्यग्रान्तकं देवि वसुपर्वाच्छिवाभिधा ॥ ७४ ॥

संहाराद् भैरवी माला तर्जन्यग्रान्तकं य[3]दि ।
[4]सौरी माला तु सं[5]प्रोक्ता संहाराद् गा[6]णपी भवेत् ॥ ७५ ॥

अनामामध्यमारभ्य मध्यमामध्यतः शिवे ।
अग्रक्रमेण देवेशि तर्जन्यग्रान्तकं शिवे ॥ ७६ ॥

गायत्रीमालिका प्रोक्ता संहाराद् बटुकाभिधा ।
अनामामध्यमारभ्य मध्यमामध्यभागतः ॥ ७७ ॥

मूलभागक्रमेणैव प्रदक्षिणामनुव्रजेत् ।
चीनमाला तु संप्रोक्ता संहारात् क्षेत्रपालजा ॥ ७८ ॥

मध्यमामध्यमारभ्य तर्जनीमध्यभागतः ।
अग्रक्रमेण देवेशि तर्जनीमूलतः शिवे ॥ ७९ ॥

ग[7]न्धर्वमालिका प्रोक्ता संहाराद् व[8]टवासिनः ।
तर्जनीमूलमारभ्य चाग्रभागक्रमेण च ॥ ८० ॥

प्रदक्षिणक्रमेणैव मध्यमामूलपर्वणि ।
मञ्जुघोषमालिका तु संहारात् खेचरीविधौ ॥ ८१ ॥

कनिष्ठा[9]ग्रं समारभ्य मूला[10]ग्रान्तं क्रमेण च ।
तर्जनीमूलपर्यन्तं माला प्रोक्ता तु शाम्भवी ॥ ८२ ॥

---

1 SC °मध्य° ।   2 D SA SC SD °याश्च ।   3 D शिवे ।   4 D omits three lines.   5 C सा ।   6 C रा गानमयी; SA SC SD भानवी ।   7 N गा° ।   8 C °ड्ड° ।   9 C °याः ।   10 C °का° ।

संहाराद् वारुणी माला धनदस्य प्रकीर्तिता ।
[1]कनिष्ठामूलमारभ्य सर्प[2]दण्डक्रमेण च ॥ ८३ ॥

तर्जन्यग्रान्तकं देवि यक्षिणीमालिका मता ।
संहारात् किन्नरीमाला महागानकरी परा ॥ ८४ ॥

कनिष्ठामूलमारभ्य पङ्क्तिमार्गक्रमेण च ।
कनिष्ठाग्रान्तकं देवि जैनमाला प्रकीर्तिता ॥ ८५ ॥

संहारा[3]ज्जैनमाला स्यादनामामूलतः शृणु ।
प्रदक्षिणक्रमेणैव तर्जनीमध्यमान्त[4]कम् ॥ ८६ ॥

माला चान्द्री तु संप्रोक्ता संहाराद् विधिमालिका ।
माला प्रोक्ता महेशानि आधिक्यायुधके शृणु ॥ ८७ ॥

खड्गमुण्डवराभीतिकपालं य[5]त्र चाधिकम् ।
व[6]रस्थाने कपालं तु तत्र ज्ञेयं महेश्वरि ॥ ८८ ॥

शङ्खचक्रगदापद्मखड्गं यत्र [7]तु वर्तते ।
तत्र खड्गं बाहुमूले ज्ञेयं यत्नेन पार्वति ॥ ८९ ॥

एवमन्यानि देवेशि ज्ञा[8]तव्यान्यायुधानि च[9] ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ९० ॥

इति श्रीमदक्षोभ्यतारासंवादे तारासूक्ते मालाभेदो[10] नाम नवमः पटलः ।

---

1 C omits three lines. 2 N पङ्क्तिमार्ग°; SD °दन्त° । 3 SA SC °रा जै° । 4 N °ङ्क° । 5 SD यन्त्र यद्भवेत् । 6 C च° । 7 D प्र° । 8 C दा° । 9 D adds करमालापि देवेशि अनुलोमविलोमिका । अनुलोमेन देवेशि विलोमेन सदाशिवे ॥ करमाला प्रशस्ता तु सर्वत्र जपकर्मणि । मालाविधानं देवेशि इदमेव प्रकीर्तितम् ॥ 10 D °दकथने ।

दशमः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि रहस्य[1]मपरं शिव ।

श्रीशिव उवाच

रहस्यं कथ्यते देवि [2]श्रृणु सावहिता भव ॥ १ ॥

कालिकायां महेशानि शय्यायां गुरुचिन्तनम् ।
सुन्दर्यां तु महेशानि रात्रिवासं परित्यजेत् ॥ २ ॥

छिन्नायां देवदेवेशि संयोगीभूय संस्मरेत् ।
तारायां देवदेवेशि शक्त्या सह गुरुं स्मरेत् ॥ ३ ॥

गुरुं स्मृत्वा कुण्डलिनीं सम्यग् योगेन योजयेत् ।
[3]स्मृत्वा कुण्डलिनीं देवीं गुरुं ध्यायेद् विचक्षणः ॥ ४ ॥

दक्षहस्ते गुरोश्चैव जपं चैव समर्पयेत् ।
इष्टदेवी मूलदेवी यत्र चैव पदद्वयम् ॥ ५ ॥

मूलविद्या त्विष्टदेवी मूलदेवी कलात्मिका ।
देव्या वामकरे देयं सदा जपफलं शि[4]वे ॥ ६ ॥

शैवशाक्त[5]क्रमेणैव पा[6]परूपं स्मरेच्छिवे ।
शैवे दक्षक्रमेणैव शाक्ते वामक्रमेण च ॥ ७ ॥

वैष्णवे तद्द्वयत्वेन [7]पापध्यानं प्रकीर्तितम् ।
प्रतिमाला मालिका च द्विविधा मालिका स्मृता ॥ ८ ॥

शाक्तशैववैष्णवार्कगा[8]णपक्रमयोगतः ।
दशविद्याक्रमे देवि भिन्न एव क्रमो भवेत् ॥ ९ ॥

अथवा [9]मालिका कार्या गणनार्थं महेश्वरि ।
पूर्णाभिषेकहीनानां षट्कर्माणि भवन्ति [10]नो ॥ १० ॥

---

1 D °स्यं परमं । 2 D omits श्रृणु सावहिता···देवदेवेशि in fifth line. 3 D ध्या° । 4 D SA SC प्रिये । 5 C °वैष्णवे च । 6 D omits पाप°···क्रमेणैव in second line. 7 C ज° । 8 C °वैष्णव° । 9 N मणि° । 10 D न ।

षट्कर्मदेवताः षड् वै कथं तद्धस्तगा भवेत् ।
पूर्णाभिषे[1]के देवेशि सर्वेषामुपदेशन[2]म् ॥ ११ ॥

पूर्णाभिषेकसंयुक्तो यं[3] कश्चिद्वै जपन्मनुम् ।
स एव सिद्धिदो भूयान्नात्र कार्या विचारणा ॥ १२ ॥

पूर्णाभिषेको(? कं) देवेशि गणेशादौ समाचरेत् ।
पूर्णाभिषेकयुक्तानामधिका[4]रो हि सर्वतः ॥ १३ ॥

पूर्णाभिषेकसंयुक्तस्त्यजेदेतद्द्वयं शिवे ।
अहन्ताममता[5]त्यागः प्रथमं बुद्धिलक्षणम् ॥ १४ ॥

अहमिति महेशानि प्रथमोऽध्यास ईरितः ।
[6]ममेति च महेशानि द्वितीयोऽध्यास ईरितः ॥ १५ ॥

अहन्ताममताहीनः पूर्णदीक्षायुतो भवेत् ।
कुल्लुकाया जपेनापि पूर्णदीक्षाफलं लभेत् ॥ १६ ॥

विद्यानां कुलपूज्यत्वात् कुल्लुका तेन कीर्तिता ।
विद्यासंबन्धिदोषाणां भक्षयित्री यतः शिवे ॥ १७ ॥

विख्याता कुल्लुका तेन सर्वदोषहरा परा ।
कुल्लुकाजपयुक्तानां विद्यासिद्धिर्भवेद् ध्रुवम् ॥ १८ ॥

अजप्त्वा कुल्लुकामन्त्रमजप्त्वा श्रीपतिं हरिम् ।
तारामन्त्रं जपेद् यो हि रौरवं नरकं व्रजेत् ॥ १९ ॥

[7]ओजोधातुमयं देवि सहस्र[8]दलमीरितम् ।
यस्य वर्णस्य संभा[9]सस्तद्वर्णस्य प्रकाशता ॥ २० ॥

सर्ववर्णव्यापकत्वाच्छक्तिद्वादशयोगता ।
नपुंसकानि संत्यज्य शक्तयः परिकीर्तिताः ॥ २१ ॥

तत्स्थानं कुल्लुकादेव्या गुरुस्थानं प्रकीर्तितम् ।
त[10]त्र संचिन्त्य देवे[11]शि सर्वसिद्धीश्वरो भवेत् ॥ २२ ॥

इति संक्षेपतः प्रोक्तमथा[12]न्तर्मातृकां शृणु ।
विना बीजैर्महेशानि नहि सिध्यन्ति मातृकाः ॥ २३ ॥

---

1 SD °कं । 2 C °क° । 3 D यत्कि° । 4 SA °रा । 5 C °त्युग्रः । 6 SA SC omits this line. 7 C ते° । 8 SD °सं देव° । 9 SA SC °व° । 10 SA तन्त्रं । 11 N omits देवेशि । 12 D °र्णमा° ।

बीजयोगं वि[1]ना देवि यः कश्चिन्मातृकां न्यसेत् ।
इह दुःखमवाप्नोति परत्र नरकं व्रजेत् ॥ २४ ॥

तस्मात्तु बीजयोगे[2]न सम्प्रदायक्रमेण [3]च ।
केरलश्चैव काश्मीरो गौडश्चैव तृतीयकः ॥ २५ ॥

आद्यं व[4]क्ष्ये महेशानि यथा दीक्षानुसारतः ।
विशुद्धिचक्रमारभ्य द्विपत्रान्तं महेश्वरि ॥ २६ ॥

योगिभि[5]श्चैव कर्तव्यो मूलाधाराद् द्विपत्रके ।
अ[6]न्येन नैव कर्तव्यः संक्षेपाद् गदितं मया ॥ २७ ॥

अ[7]यं साधारणः प्रोक्तः सर्वसिद्धिप्रदायकः ।
शिवबीजं शक्तिबी[8]जं चेन्दुबिन्दुसमन्वितम् ॥ २८ ॥

पराप्रासादविधेयं साद्या हाद्या यथाक्रमात् ।
आदौ बीजं समुच्चार्य तदन्ते मातृकार्णकम् ॥ २९ ॥

संयोज्य विन्यसेद् देवि त्वथवा संपुटीकृतम् ।
त्रितारैः पञ्चतारैर्वा सप्ततारैरथ प्रिये ॥ ३० ॥

पुटिताऽथ प्रयोगेण यथायोगेन योजयेत् ।
काश्मीरं शृणु देवेशि र[9]हस्यातिरहस्यकम् ॥ ३१ ॥

[10]प्राणमन्त्रेण वा देवि सोहंमन्त्रेण वा पुनः ।
प्रणवेनापि देवेशि संपुटं योजनं च वा ॥ ३२ ॥

[11]अनेन क्रमयोगेन किं न सिध्यति भूतले ।
गौडक्रमं शृणु प्राज्ञे केवलां मातृकां न्यसेत् ॥ ३३ ॥

मूलमन्त्रेण पुटितां बीजेन पुटितां च वा ।
बिन्दुयुक्तां स सर्गाद्यां, न्यस्यते गौडसंमते ॥ ३४ ॥
मुख्यक्रमं परित्यज्य योऽन्यक्रममभीप्सति ।

स दरिद्रो महादुःखी भवत्येव न संशयः ॥ ३५ ॥

इदं प्रोक्तं मया देवि जपान्तिकविधिं शृणु ।
गुह्यातिगुह्यमन्त्रेण वामहस्ते निवेदन[12]म् ॥ ३६ ॥

---

1 SA SC SD महा° । 2 D SB SD च । 3 N तु । 4 SC वीक्ष्य । 5 SD °नीभिश्च । 6 D °नेनैव तु । 7 SD °थ । 8 C omits बीजं । 9 SD omits रहस्या…देवेशि in third line. 10 N °णा । 11 C उड्डीने । 12 C °येत् ।

साधकः स्वस्य दक्षेण हस्तेन विनिवेदयेत् ।
दक्षहस्ते दानकर्म वामहस्ते न तद् भवेत् ॥ ३७ ॥

देवतादानदानं तु साधकस्य कथं भवेत् ।
तस्मात्तु देवदेवेशि वामहस्ते समर्पणम् ॥ ३८ ॥

[1]उत्कोचो वामहस्ते स्याद् दानं दक्षे प्रकीर्तितम् ।
वरदानाधिकारो हि देवतानिकटे स्थितः ॥ ३९ ॥

वामभागे तु वामा तु सर्वत्र परिकीर्तिता ।
दक्षभागे तु पुरुषः पुं[2]रूपस्तु सदाशिवः ॥ ४० ॥

वैष्णवाद्यागमे देवि दक्षहस्ते समर्पणम् ।
वरस्तु कालिकापार्श्वे तेन वामे समर्पणम् ॥ ४१ ॥

पञ्चभूतानि संशुद्धिस्तत्र नानाविधा भवेत् ।
विद्यामात्रे वामकुक्षौ भूतशुद्धिः प्रकीर्तिता ॥ ४२ ॥

दक्षकुक्षौ महेशानि कुत्रचित् परिकीर्तिता ।
प्राणायामक्रमाद् देवि वामकुक्षौ प्रकीर्तिता ॥ ४३ ॥

कुण्डल्युत्थापनं देवि कूर्चमन्त्रेण कारयेत् ।
[3]हंसमन्त्रेण तत्त्वानां स्थापनं परिकीर्तितम् ॥ ४४ ॥

पुनरानयनं देवि सोहंमन्त्रेण कारयेत् ।
कुत्रचिद् देवदेवेशि चैतद्व्यत्यय एव च ॥ ४५ ॥

प्रणवेनाथवा कार्यं सर्वमेव प्रकीर्तितम् ।
सर्वत्र प्रथमो देवि केर[4]लः परिकीर्तितः ॥ ४६ ॥

गौडवामप्रभेदेन [5]पानकर्म तु पापवत् ।
वामे पानं गौडमार्गे काश्मीरे वामहस्तके ॥ ४७ ॥

संस्थाप्य चा[6]भिमन्त्र्याथ दक्षे[7] स्थाप्य पिबेत् सदा ।
दक्षकुक्षौ पुमांस्तिष्ठेद् वामे रा[8]मा तु चञ्चला ॥ ४८ ॥

वायौ जले महेशानि गतिजातौ तु साम्यता ।
वाति प्रवहतीत्यादिप्रयोगः साधुगोचरः ॥ ४९ ॥

---

1 D तत्कथं; SA SC तत्कचो । 2 C सु° । 3 C omits two lines. 4 SD °ले । 5 D SA SC यति° । 6 C वा° । 7 C °णापि । 8 D वा° ।

नाडीत्रयं नरे देवि स्त्रीणामपि तथैव च ।
स्त्रीणां क्रियाऽन्यथा प्रोक्ता पुरुषे चान्यथा क्रिया ॥ ५० ॥

योनौ नाडीत्रयं स्त्रीणां पुरुषस्यापि पार्वति ।
स्त्रीणामन्या गतिर्देवि पुरुषेऽन्या प्रकीर्तिता ॥ ५१ ॥

अत्रार्थे प्रत्ययो देवि **कालिकासाधने** स्मृतः ।
काली तारा छिन्नमस्ता तथा **षट्शाम्भवे** शिवे ॥ ५२ ॥

दिक्कालनियमो नास्ति स्थित्यादिनियमो नहि ।
पाताले कुहरे दुर्गे पर्वते तटिनीतटे ॥ ५३ ॥

अन्त[1]रीक्षे तथा भूमौ सर्वत्र जपमाचरेत् ।
अत्यन्तोत्सववेलायां स्तोत्र[2]मन्त्रं सदा जपेत् ॥ ५४ ॥

तत्तदक्षय्यमायाति ताराविद्याप्रसादतः ।
न शङ्का न च वै शङ्का स्वेच्छया जपमाचरेत् ॥ ५५ ॥

पञ्चभूतक्रमेणैव श्मशा[3]नोक्तक्रमेण च ।
कालीत्रिबीजमा[4]र्गेण ताराबीजत्रयेण च ॥ ५६ ॥

भूतशुद्धिश्च[5]तुर्थेयं सामान्यत्वेन पार्वति ।
अत्रापि मतबाहुल्यं शाम्भवादौ स्फुटं च[6] तत् ॥ ५७ ॥

वाञ्छा षट्कर्मसिद्धिस्तु संकल्पाख्या द्वितीयका ।
क्रिया तृतीया गदिता षट्कर्म त्रि[7]विधं भवेत् ॥ ५८ ॥

अष्टदिक्षु महेशानि चन्द्रसूर्याष्टकं शिवे ।
प्रोक्ता सिद्धिरियं देवि कालिकामनुगोचरा ॥ ५९ ॥

दिग्विदिक्क्रमयोगेन चन्द्रसूर्यादिदर्शनम् ।
दिवारात्रिव्यत्ययश्च मध्यमा परिकीर्तिता ॥ ६० ॥

षट्कर्माणि स्वविद्यायां सिद्धत्वेन भवन्ति च ।
राजसत्वाज्जाड्ययोगात् षट्कर्मदेवताः स्मृताः ॥ ६१ ॥

इच्छा [8]काल्पनिका दे[9]वि मनोरथमयी तथा ।
मन्त्ररूपा चतुर्थी स्यात् प्रत्येकं त्रिविधा भवेत् ॥ ६२ ॥

---

1 N °रि°। 2 N °त्रं। 3 C N SA SB SC शास°। 4 D °त्रे°। 5 C शुद्धे°। 6 C चरेत्। 7 C वि°। 8 D SA SC SD क°। 9 SA SC SD °वी।

तन्मुद्रायोगमालादितत्तन्मण्डलयोगतः ।
ए[1]ककर्मयुतानां च विधिरेषा सनातनी ॥ ६३ ॥

वश्यार्थहोमो देवेशि [2]सामान्यत्वेन यत्र वै ।
तत्र तत्र च देवेशि त[3]त्तत्कुण्डानि कारयेत् ॥ ६४ ॥

मारणं त्वरितायां [4]च मारणाख्या क्रिया मता ।
एकक्रियाख्यविद्यायां न षट्कर्मादिदेवताः ॥ ६५ ॥

महाविद्याविधौ देवि सिद्धविद्याविधौ तथा ।
षट्कर्मदेवताः प्रोक्ता भिन्नयोगविधानतः ॥ ६६ ॥

राजसत्वमिदं प्रोक्तं स्वकर्मत्वं च सात्त्विकम् ।
मुख्यक्रियाप्रसिद्धत्वमन्यत्र परिशीलनम् ॥ ६७ ॥

तामसत्वमिदं देवि संक्षेपात् परिकीर्तितम् ।
क्रियै[5]कत्वान्महेशानि सि[6]द्धविद्या प्रकीर्तिता ॥ ६८ ॥

यथा पञ्चाङ्गुली चा[7]र्द्रप[8]टिकाद्याः पुरोदिताः ।
पारम्पर्यक्रमाशक्तः परापूजनतत्परः ॥ ६९ ॥

चतुश्चरणसम्पन्नः स परः परिकीर्तितः ।
नित्यानन्दस्वरूपत्वाच्चिद्घनत्वान्महेश्वरि ॥ ७० ॥

स[9]दसद्व्यक्ति[10]रूपत्वात् पूर्णरूपा तु या भवेत् ।
सा नित्या गदिता देवि कलाषट्कसमन्विता ॥ ७१ ॥

ताम्रपात्रे जलं गृह्य जले चैव जलं क्षिपेत् ।
पितृतर्पणकं देवि कुशभूमौ वि[11]निःक्षिपेत् ॥ ७२ ॥

ऋषितर्पणकं देवि पात्रे वा जलगोचरम् ।
जले मूर्तिं च वा यन्त्रं विभाव्य तर्पयेच्छिवे ॥ ७३ ॥

देवर्षिपितृतीर्थेन तर्पयेत् क्रमदेवताम् ।
स्ववामे भूतपूजा च स्वदेवदक्षयोश्च वा ॥ ७४ ॥

देवताबलिरादिष्टः सर्वकर्मप्रसिद्धये ।
पात्रे जलं तु संस्थाप्य तत्र स्फा[12]टिकमालिकाम् ॥ ७५ ॥

---

1 SD °वं । 2 C omits सामान्यत्वेन…देवेशि in second line. 3 SA SC SD तत्र कु° । 4 N तु । 5 D °क्य° । 6 SA SC °द्धि° । 7 N °र्ध° । 8 D °पाट° । 9 SA SC SD सद्स । 10 D °क्त° । 11 D जलं । 12 N स्फ° ।

जले स्थाप्य जपेद् देवि सर्वकामाप्तये भवेत् ।
धृत्वा मालां वामहस्ते जपं कुर्यादन[1]न्यधीः ॥ ७६ ॥

सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा ।
इत्यादि देवदेवशि संक्षेपात् परिकीर्तितम् ॥ ७७ ॥

षडङ्गक्रमविन्यासं मार्गत्रयक्रमाच्छृणु ।
हृदयास्त्रं हृदि न्यस्य शिरसे तु तदस्त्रकम् ॥ ७८ ॥

शिखास्त्रं तु शिखायां च कवचास्त्रं तु तत्स्थले ।
नेत्रास्त्रं नेत्रत्रितये दे[2]व्यस्त्रं हस्ततालके ॥ ७९ ॥

नाराचक्रममार्गेण खड्गदण्डक्रमेण च ।
एवमस्त्रान् सुविज्ञाय सर्वसिद्धीश्वरो भवेत् ॥ ८० ॥

यथोक्तस्थाने विन्यस्य फलभागी नरो भवेत् ।
इ[3]यमस्त्रादिजातिस्तु हृदादिषट्क[4]के न्यसेत् ॥ ८१ ॥

हृदयास्त्रपुरश्चर्यामृषिच्छन्दादिदैव[5]तम्
न्यासादिकं समाचर्य ध्यात्वा तु हृदयास्त्रका[6]न् ॥ ८२ ॥

नियुतं पूर्वं संजप्य हृदयेष्वेव विन्यसेत् ।
जपं कृ[7]त्वा न्यसेद् देवि पञ्चास्त्रं त्वेवमेव तु ॥ ८३ ॥

हृदयास्त्रेण देवेशि जातैरै[8]क्यान्महेश्वरि ।
हृदयेष्वेव विन्यस्य हृज्जातौ यत्नतः शिवे ॥ ८४ ॥

करादिष[9]ट्कन्यासे[10] तु हृदयास्त्रं प्रविन्यसेत् ।
हृदयास्त्रं नम इति तत्करेष्वेव विन्यसेत् ॥ ८५ ॥

एकजात्या हृदास्त्रेण त्वङ्गुष्ठाभ्यां नमो वदे[11]त् ।
हृदयास्त्रं विधायाथ नान्यास्त्रं तु करे न्यसेत् ॥ ८६ ॥

गौडे जातिस्तु सर्वत्र गृह्यते व्यक्तिभेदतः ।
केरलेऽङ्गुष्ठष[12]ट्कादौ न[13]त्यस्त्रं तु प्रयोजयेत् ॥ ८७ ॥

---

1 D N SA SB SC SD °न्वितः । 2 D दिव्या°; SA SC °वा° । 3 C अ° । 4 D °का । 5 SD °ताः । 6 SC °कम् । 7 C कुर्याद् । 8 C तत्त्वे वा च म° । 9 N °ट्कं । 10 C °सो हि; SA SC °न्यसेद्धि । 11 C न्यसेत् । 12 SD °पत्रा° । 13 SD नित्या° ।

अङ्गुष्ठादिषडङ्गं च न[1]त्यस्त्रेण विना नरः[2] ।
यः करोति महेशानि तस्य दुःखं पदे पदे ॥ ८८ ॥

तस्य न्या[3]सस्तु वि[4]फलो जायते सर्वथा प्रिये ।
हृदयास्त्रं विधायाथ हृदयादिषडङ्गकम् ॥ ८९ ॥

यः करोति महेशानि तस्य नाशो भविष्यति ।
कर्तव्यं कार्यसिद्ध्यर्थं पञ्चास्त्रं चान्यदे[5]शके ॥ ९० ॥

करन्यास[6]स्य मुद्रा तु प्रसिद्धा कालनाशिनी ।
हृदादिन्यासमुद्रां तु शृणु यत्नेन साम्प्रतम् ॥ ९१ ॥

त्रिद्व्येकदश[7]कं त्रि द्वे हृदये विन्यसेत् सदा ।
सांख्यायनमतं देवि प्रोक्तमेतद् विधानतः ॥ ९२ ॥

सृष्टिः स्थितिर्लयश्चैव हृदयादिषडङ्गके ।
अङ्गुष्ठ[8]न्यासष[9]ट्के तु न शि[10]वास्त्रं प्रयोजयेत् ॥ ९३ ॥

शि[11]वास्त्रादौ न चाङ्गुष्ठः कीर्तितः परमेश्वरि ।
षडङ्गादिपुरश्चर्या प्राणस्थापनवद् भवेत् ॥ ९४ ॥

सिद्धे[12]ऽस्त्रे न्यसनं कार्यं नान्यथा सिद्धिदायकम् ।
[13]अस्त्रे सिद्धे मन्त्रसिद्धिर्भविष्यति न संशयः ॥ ९५ ॥

इति संक्षेपतः प्रोक्तं शृणु पीठरहस्यकम् ।
द्वाराष्टकं तथा देवि सोपाना[14]नि तु षोडश ॥ ९६ ॥

पीठं चैव तु संपूज्य स्वस्वक्रान्तक्रमेण च ।
[15]लयाङ्गं चैव संपूज्य पा[16]द्यस्नानान्तकं चरेत् ॥ ९७ ॥

सिंहासनाख्यपीठे तु संनिवेश्य ज[17]पेच्छिवे ।
पीठपूजां च संपूज्य लयाङ्गं चैव पूज्य च ॥ ९८ ॥

---

1 C त्व°; SD नान्य° । 2 C adds कर्तव्यं कार्यसिद्ध्यर्थं यच्चान्यत् कठिनोत्तरम् । 3 C नाश° । 4 C °मू°; N °पु° । 5 SA SC °शि°; SD °र्दं° । 6 D SA SC °स्तु । 7 SA SC ‘क° । 8 SD °ष्ठे । 9 SD °ट्कं । 10 C N SB °रा° । 11 C N SB °रा° । 12 C °श्व; D °द्धास्त्रान्° । 13 SB omits two lines. 14 C SA SC SD °नां । 15 SB omits three lines; SC °ङ्गे । 16 SA SC यद्यस्नाना°; SD °द्यान्माना° । 17 D SA SC SD यजे° ।

पाद्यादिपूजां कृत्वा च गन्धं दद्याद् विधानतः ।

श्रीदेव्युवाच

जलादुत्तारणं चेत् स्यात् तदा पीठं न चास्ति वै ॥ ९९ ॥
नोत्तार्यते यदा देव जले पजां कथं चरेत् ।
तस्मात् कारणतः स्वामिन् पी[1]ठं वद मम प्रभो ॥ १०० ॥

श्रीशिव[2] उवाच

पीठं तु द्विविधं प्रोक्तं शृणु तत्क्रममद्य वै ।
स्नानपीठं भोगपीठं यथायोगेन पार्वति ॥ १०१ ॥
कालिकायां तथा ताराविद्यायां श्रीविधौ शिवे ।
छिन्नायामपि देवेशि यथायोगेन संशृणु ॥ १०२ ॥
महाकला[3]कलारश्मिनाथ[4]सोपानमार्गतः ।
धर्मादिके भवेत् सा[5]म्यं प्राकारा रत्नसंभवाः ॥ १०३ ॥
श्रीविद्यायां महेशानि काल्यां ब्रह्माण्डभू[6]तजे ।
यथोक्तासनमासाद्य दिग्बन्धादिप्रपूर्वकम् ॥ १०४ ॥
आविसर्जनपर्यन्तमासनव्यत्ययो नहि ।
प्रदक्षिणानमस्कारौ कथं कार्यौ महेश्वरि[7] ॥ १०५ ॥
चतुष्षष्ट्युपचाराणां मध्ये शङ्का प्रजायते ।
तन्निवृत्तिं महातारे मम नाशय साम्प्रतम् ॥ १०६ ॥
उत्थिते चासनध्वंसस्त्वनुत्थाने नमस्क्रिया ।
कथं भवति भो देव तन्मे कथय साम्प्रतम्[8] ॥ १०७ ॥
धूपदीपादिताम्बूलैरुपचारो यथा भवेत् ।
मु[9]द्रादिदर्शनं देव यथा भवति शङ्कर ॥ १०८ ॥
प्रदक्षिणानमस्कारौ तथा मुद्रास्वरूपिणौ ।
समकायशि[10]रोत्युक्तं तत्तु प्रदक्षिणे नहि ॥ १०९ ॥
प्रदक्षिणा नमस्कार उपचारान्तरे भवेत् ।
तथा पीठान्तरे देवि सन्निवेशः प्रकीर्तितः ॥ ११० ॥

---

1 D पूजां । 2 C N SA SB SC omit this. 3 SA SD °काला काल°; SC °कालो । 4 SC °नाम° । 5 D °द्यं । 6 C °मूर्ति° । 7 All MSS. except D read after this शिव उवाच । 8 All MSS. except D read after this शिव उवाच । 9 शुद्धा° । 10 D °वे° ।

साधका[1]दारभवन्तं पीठमाद्यं प्रकीर्तितम् ।
स्नानपीठं द्वितीयं च तृतीयः सिंहविष्टरः ॥ १११ ॥

हार्दबाह्यप्रभेदेन भेदबाहुल्यमीरितम् ।
खखसोपानमध्ये तु पीठानां तु चतुष्टयम् ॥ ११२ ॥

हृदयाद् देवदेवेशि स्नानपीठे समागता ।
मूर्ध्नि चेद्धि तथायाता यथायोगक्रमेण च ॥ ११३ ॥

स्नानोत्तरं [2]सिंहपीठे ततः[3] समरसात्मके ।
सामरस्ये तथा हार्दे पीठपूजा तु विस्तरा ॥ ११४ ॥

सोपानानि महेशानि द्वारि तस्याः स्थितानि च ।
अन्तरान्तरयोगेन पीठपूजां समाचरेत् ॥ ११५ ॥

पू[4]ज्यं पी[5]ठं विष्टराख्यं पूज्या ताराम्बिका परा ।
श्रीदेवीविष्टरो देवि ध्याने तस्याः स्फुटोऽस्ति च ॥ ११६ ॥

विष्टरः साधकस्याथ कथ्यते शृणु साम्प्रतम् ।
भूतपत्राणि यस्मिन् वै स[6] कुशेत्यभिधीयते ॥ ११७ ॥

हस्ते पादे दशपरिमिता दिग्यु[7]गं हृत्सरोजे
विंशत्संख्या सकलवर[8]दे मस्तके कीर्तिता[9]श्च ।
गुह्ये जिह्वार[10]दनवदनघ्राणकर्णस्तनेषु
लिङ्गे चन्द्रे युगपरिमिता योजनीयाः कुशाश्च ॥ ११८ ॥

इत्येष विष्टरः ख्यातः सर्वसिद्धिप्रदायकः ।
कुशैर्वा बन्धनं कार्यं ना[11]ड्यां वा परमेश्वरि ॥ ११९ ॥

रक्तमिश्रितसूत्रेण पट्टसूत्रेण वा पुनः ।
विष्टरं परिकल्प्याथ तस्योपरि जपं चरेत् ॥ १२० ॥
इति विष्टरपद्म[12]स्य विधिः प्रोक्तो मया तव ।
शवरूपं प्रकल्प्याथ कविर्वाग्मी भवेन्नरः ॥ १२१ ॥

स्वयम्भुवाक्तं सूत्रं च कर्तव्यं सर्वसिद्धये ।
शवाभावे विष्टरस्तु शवरूपः प्रकीर्तितः ॥ १२२ ॥

---

1 C °भेजप्तुं; D °दाव°; SD °दि° । 2 SA SC तथा सिंहपीठे सम° । 3 D omits ततः समरसात्मके···योगेन in forth line. 4 CD पूजा° । 5 C °ठे । 6 C साङ्कु° । 7 C °भुजं । 8 D °णे । 9 SD °ता च । 10 C SA SC वदननयने । 11 D °ड्या । 12 D °संक्षेप° ।

साक्षात्तु शिवरूपो हि विष्टरः परिकीर्तितः ।
विष्टरः शिवरूपः[1] स्यात् स्वस्य शक्तित्वकल्पना ॥ १२३ ॥
शिवशक्तिसमायोगात् किं न सिध्यति भूतले ।
शववीरोत्तमवस्त्रं द्वितीयो विष्टरः स्मृतः ॥ १२४ ॥
तृतीयं श्रृणु देवे[2]शि सर्वसिद्धिप्रदायकम् ।
विष्टरः श[3]म्भुरूपः स्यात् स शि[4]वाशिवविष्टरः ॥ १२५ ॥
सिंहासनं च पर्यङ्को विष्टरस्तु तृतीयकः ।
चतुष्पादे महादेवि ब्रह्मविष्णुमहेश्वराः ॥ १२६ ॥
ईश्वरस्तु चतुर्थः स्यात्तन्मध्ये तु सदाशिवः ।
मध्ये तु आ[5]सनस्थानं महासमरसात्मकम् ॥ १२७ ॥
हस्तौ पादौ प्रकल्प्याथ मस्तकं हृदयं तथा ।
साङ्गं सावयवं देवि शवं वा परिकल्प्य च ॥ १२८ ॥
स[6]पादशतपत्रेण भू[7]तपत्रकुश[8]क्रमात् ।
अस्थि[9] वा तत्र संस्थाप्य शवांशं[10] चापि सुन्दरि ॥ १२९ ॥
[11]नारीरजो[12]ऽन्वितं सूत्रं तेन वा ग्रथनं चरेत् ।
पट्टसूत्रेण सूत्रेण यथायोगेन वा पुनः ॥ १३० ॥
जीवन्यासं तत्र कृत्वा ध्यात्वा तारां जपं चरेत् ।
अनेन क्रमयोगेन किं न सिध्यति भूतले ॥ १३१ ॥
सदाशिवः प्रेतरूपो विष्टरः कथितो मया ।
गायत्र्या त्रोटनं कार्यं मूलेन ग्रथनं चरेत् ॥ १३२ ॥
यत्रानुक्ता तु गायत्री तत्क्रमं श्रृणु ता[13]रिके ।
तन्नामपददे[14]व्यन्ता गायत्री शम्भुसंमता ॥ १३३
तन्नामकर्मदेव्य[15]न्ता गायत्री **तारिणीमते** ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ १३४ ॥

इति श्रीमदक्षोभ्यतारासंवादे सामान्यभाषा[16]विवरणं नाम दशमः पटलः ॥

---

1 D °पो हि । 2 C °श । 3 D N शिव° । 4 SD °वविष्टरः परः । 5 D चा° । 6 SB अ° । 7 C °र्जं° । 8 SD °शैः । 9 C °पि । 10 C वासनाना° । 11 SD omits two lines. 12 D °क्ता° । 13 D SD °र°; N °का । 14 C °ब्या°; SD दातव्यं । 15 C °व्या° । 16 N °षापटलः ।

एकादशः पटलः ।

श्रीदेव्युवाच

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।

श्रीशिव उवाच

श्रृणु देवि प्रवक्ष्यामि यन्नोक्तं यत्र कुत्रचित् ॥ १ ॥
स्त्रियो दीक्षा शुभा प्रोक्ता सर्वकामफलप्रदा ।
पतिः संदीक्षयेत् स्वस्त्रीं मातृना[1]म्नीं न कामिनीम् ॥ २ ॥
[2]भर्तृनामा न च भ्राता तत्सं[3]सर्गं न कारयेत् ।
देवीबुद्धया तु सर्वत्र संसर्गं कारयेदपि ॥ ३ ॥
स्वस्त्रीं तु दीक्षयेद् भर्ता न [4]तत्र भगिनीत्वता ।
मन्त्रशास्त्रे बहुविधा मार्गाः पूर्वं मयेरिताः ॥ ४ ॥
अन्यत्र दीक्षणं चेत् स्यात्[5] स्वमार्गस्तत्र वै कथम् ।
स्त्रीणां मार्गस्तु को देवि महाशङ्का प्रवर्तते ॥ ५ ॥
एतद्भ्रमनिवृत्त्यर्थं स्वयं संदीक्षयेत्[6] पतिः[7] ।
या दीक्षिता सा तु कन्यासमाना परिकीर्तिता ॥ ६ ॥
तत्र स्त्रीत्वं कथं देव स्त्रीणां दीक्षा कथं मता[8] ।
गुरोः सकाशाद् दीक्षा तु कर्तव्या स्त्रीविधौ यदि ॥ ७ ॥
गुरुकन्या तु सा जाता सा प्रोक्ता भगिनी वरा ।
भगिन्यां गमनं नेष्टं स्त्रीषु संयोजनं वरम् ॥ ८ ॥
शिवेन दीक्षा पूर्वं तु गौर्य्यै दत्ता शुभावहा ।
सा [9]च पुत्र्यथवा भा[10]र्या तद्वदत्रापि पार्वति ॥ ९ ॥
न पुत्री गदिता सा तु वीरभार्या प्रकीर्तिता ।
शिवदूत्यादयो देवि तथा मातङ्गिनी शुभा ॥ १० ॥

---

1 C °म्ना च; N SB omit °म्नी···नी । 2 C omits this line. 3 D °सङ्गं न च । 4 C गतत्रयसमन्विता । 5 SA SC °दमा° । 6 SD यत्यपि । 7 D adds after this श्रीदेव्युवाच । 8 SD तथा; D adds after this श्रीशिव उवाच । 9 SA SC SD तु । 10 C °मा ।

इति ज्ञात्वा महेशानि भर्ता संदीक्षयेत् स्वयम् ।
स्त्रीणां सकाशाद् या दीक्षा सा दीक्षा सर्वका[1]मदा ॥ ११ ॥

माता पुत्री तथा भार्या भगिनी परकन्यका ।
स्वसा च मातुलानी च तासां दीक्षा शुभा[2]वहा ॥ १२ ॥

अत्रार्थे संशयो मा[3]ऽस्तु तारिण्या गदितं स्वयम् ।
वीरकौलपरा दीक्षा पशुं वै न च दीक्षयेत् ॥ १३ ॥

स्वमा[4]तृमपि गच्छन्तं कौलिकं न निवारयेत् ।
साक्षात्तु भगिनी या तु चूडाचक्रे शुभावहा ॥ १४ ॥

स्व[5]पुत्री च शुभा प्रोक्ता [6]**उर्मिलाचक्रसंमते** ।
वीरपत्नी शु[7]भा प्रोक्ता **रतिश्रीचक्रसंमते** ॥ १५ ॥

इति कारणतो देवि भर्ता संदीक्षयेत् स्वयम् ।
गुरोः सकाशाद् दीक्षा तु कार्या सापि महेश्वरि ॥ १६ ॥

भर्तुर्दीक्षाप्रदाने[8] तु न दोषः **कालिकागमे** ।
[9]इति संक्षेपतः प्रोक्तं पुष्पभेदाहुतिं शृणु ॥ १७ ॥

पुष्पं पत्रं तथा वस्त्रमूर्णा स्वर्ण[10] च व्री[11]हयः ।
पक्षमात्रं वस्त्रपु[12]ष्पमूर्णा मासत्रयं शिवे ॥ १८ ॥

बिल्वपत्रं च तुलसीपुष्पं स्वर्णसमुद्भवम् ।
उत्तारणाद् भवेच्छुद्धं पुनर्दे[13]व्यै निवेदयेत् ॥ १९ ॥

स्वयम्भू[14]कुसुमे[15] देवि नाधिकारोऽस्ति कुत्रचित् ।
मारणे मो[16]हने वापि स्तम्भनोत्सादनेऽपि वा ॥ २० ॥

वश्याकर्षणयोः शान्तौ पायसं होमयेत् सदा[17] ।
[18]परराष्ट्रज[19]यध्वंसे स्वरक्षायां विशेषतः ॥ २१ ॥

---

1 D N °र्थ° । 2 N मता; SD तथा । 3 मेऽस्ति in all MSS. except SD. 4 D °तर° । 5 SA SC सुपुत्रीव । 6 D SB ऊ° । 7 D SA SC SD omit शुभा प्रोक्ता···भर्तुर्दीक्षा° in fourth line. 8 N °नेन; D °प्राशने तु । 9 SC पुष्पभेदाहुतिं चैव शृणु पार्वति सादरात् । 10 SD omits स्वर्णं च···°पुष्पं in third line. 11 D वीरजः । 12 C °युग्मं । 13 SA SC °दैवे । 14 N SB SD °म्भु° । 15 C °मैदें° । 16 D SA SC वाहने । 17 D शिवे । 18 SC omits four lines. 19 C SB °ये ।

षट्पुष्पक्रमयोगेन होतव्यं सिद्धिमिच्छता ।
पा[1]यसे देवदेवेशि सर्वाः सिध्यन्ति सिद्धयः ॥ २२ ॥

पुष्पैः पर्युषितैर्नष्टैः कृमिकीटविदारितैः ।
न पूजयेद् होमयेच्च देवताशापमाप्नुयात् ॥ २३ ॥

बिल्वपत्रं च तुलसी स्वयम्भूस्वर्णपुष्पके ।
न पर्युषितरूपत्वं निर्माल्यत्वं महेश्वरि ॥ २४ ॥

चतुर्णां देवदेवेशि न मया कीर्तितं भु[2]वि ।
नृसिंहं च शिवं चैव न केतक्या समर्चयेत् ॥ २५ ॥

श्वेतकृष्णतुलस्या[3] च कालिकां न स्पृशेत् क्वचित् ।
कमलं दशरात्रं च जाती दिनत्रयं तथा ॥ २६ ॥

चम्पकः[4] पञ्चरात्रं च किंशुको दिनसप्तकम् ।
करवीरोऽष्टदिवसं केतकी दशपञ्च च ॥ २७ ॥

कुन्दो नेत्रदिनं देवि मु[5]निपुष्पं च दाडिमी ।
जपा[6]पुष्पं ततो [7]द्राक्ष्यं दिवसद्वयगोचराः[8] ॥ २८ ॥

शतपुष्पं पुष्पराजो गन्धराजस्तथैव च ।
भगपुष्पं महेशानि वेदरात्रं न दुष्यति ॥ २९ ॥

नारदस्य मतेनै[9]वं कथ्यते शृणु साम्प्रतम् ।
बिल्वापामार्गौ धात्री च तुलसी त्रिंशदादितः ॥ ३० ॥

षट्त्रिंशान्तं महेशानि न च पर्युषितानि च ।
[10]एकेन करवीरेण सहस्रेण शतेन च ॥ ३१ ॥

मां च संपूज्य देवेशि मम रूपो नरो भवेत् ।
एकेन करवीरेण मां च संपूजयेत् प्रिये ॥ ३२ ॥

तेन संपूजितं देवि जगत् स्थावरजङ्गमम् ।
करवीरे शक्तिबिन्दौ तत्राहं निवसाम्यहम् ॥ ३३ ॥

---

1 C SD °सं । 2 SD शिवे । 3 N °श । 4 SA SC °कं । 5 D शाल° ।
6 D SA SC °वा° । 7 C °संख्यं; N °द्राख्यं; SA द्राक्षं; SB °ड्राख्यं । 8 SA SB SD °रा । 9 SD °व । 10 SD omits two lines.

इति प्रोक्तं महेशानि शृणु हो[1]मं महत्तरम् ।
[2]दिव्यवर्णैर्होमयेद् यत् सहस्रं वसुसंमितम् ॥ ३४ ॥

दिव्यरूपो नरो भूयाद् देवीरूपो न संशयः ।
वर्णोत्तमेन देवेशि सर्वदा होमयेच्छिवाम् ॥ ३५ ॥

पक्षमात्रान्महेशानि शिवतुल्यो नरो भवेत् ।
सुरया होमयेद् देवि शिवतुल्यो नरो भवेत् ॥ ३६ ॥

मां[3]सीहोमेन देवेशि किं तद् यन्न करे स्थितम् ।
रोचनाहोममात्रेण सर्वसिद्धिं स विन्दति ॥ ३७ ॥

लोहबाणस्य होमेन दिव्यकायो नरो भवेत् ।
सौगन्धिक[4]मुकं हुत्वा कामतुल्यो नरो भवेत् ॥ ३८ ॥

एलाहोमेन राज्यं स्याल्लवङ्गैर्वरदानता ।
संविद्धोमेन देवेशि किं तद् यन्न करे स्थितम् ॥ ३९ ॥

घुसृणेन महेशानि वाञ्छासिद्धिमवाप्नुयात् ।
मार्जारमेदहोमेन किन्नरीमेलनं भवेत् ॥ ४० ॥

एकपुष्पे[5] फले पत्रे फ[6]लपञ्चककं भवेत् ।
संकल्पोक्तफलं देवि उक्त**मानन्दभैर**[7]**वे** ॥ ४१ ॥

[8]उक्तकार्यार्थसिद्ध्यर्थं **दक्षिणामूर्तिसंमतम्** ।
देवताप्रीतयेत्युक्ते[9] कार्यमात्राणि साधयेत् ॥ ४२ ॥

सर्वकार्यार्थसिद्ध्यर्थं काश्मीरे होमकर्म च ।
मन्त्रमात्रे महेशानि भू[10]तमण्डलभेद[11]तः ॥ ४३ ॥

होमे[12] पूजाविधौ देवि फलपुष्पाणि पार्वति ।
न मण्डलक्रतूनां च नियमो नास्ति पार्वति ॥ ४४ ॥

सिन्दूरै[13]र्मोहनं देवि नखेनाकर्षयेत् स्त्रि[14]याम् ।
चन्दनेन भवेत् काव्यं कपूरै राज्यसाधनम् ॥ ४५ ॥

---

1 SD प्रोक्तं । 2 C omits this line. 3 SD °स° । 4 C °म° । 5 D °ष्पैः फलैः पत्रैः । 6 C °लं तु पञ्चकं । 7 N °वः । 8 SD omits two lines. 9 SC °क्तं । 10 C °मण्डलप्र° । 11 D °ता; SD °नी । 12 C SD °म° । 13 D °रे मो° । 14 C SD °ये; N स्त्रियः ।

विषेण सर्वसंहारस्त्वहिफेनैर्निरा[1]कृतिः ।
शिलाजतुप्रहोमेन सर्वसिद्धिं स विन्दति ॥ ४६ ॥

हरि[2]तालैः स्तम्भनं च ब्रह्मादीनां महेश्वरि ।
अभ्रकेण कीर्तिलक्ष्मीर्गन्धकेन धनागमः ॥ ४७ ॥

पनसं कदलीं हुत्वा तारारूपो नरो भवेत् ।
इति संक्षेपतः प्रोक्तं सं[3]ख्या वि[4]षमजे शृणु ॥ ४८ ॥

समसंख्याक्रमेणैव विषमाख्यक्रमेण च ।
पञ्च[5]दशाक्षरो मन्त्रः शूलिन्याः[6] परिकीर्तितः ॥ ४९ ॥

तत्र द्रव्याणि देवेशि तिथिसंख्यानि सन्ति च ।
सर्वेषामेकभावो वा भिन्नभावोऽथवा प्रिये ॥ ५० ॥

प्रत्यक्षरेण वा होमः कथं कार्यश्च तद् वद ।
ऋषिच्छन्दादि ध्यानं च तदा प्रत्यक्षरेण च ॥ ५१ ॥

होमसंख्यां समाचर्य चांशेन भागमा[7]हरेत् ।
[8]अंशभागक्रमेणैव केरले होमकर्म च ॥ ५२ ॥

[9]त्रिःस्वादुतिलधान्यादावै[10]क्यभावेन चाहुतिः ।
पञ्चामृते पञ्चगव्ये त्वैक्येन होमकर्म च ॥ ५३ ॥

पञ्चामृतं दशविधं त[11]त्र स्मार्तादिभागतः ।
समसंख्याविधौ प्रोक्तं यथोक्तं चे[12]त्तथा चरेत् ॥ ५४ ॥

विषमाख्यं होमकर्म कथ्यते शृणु साम्प्रतम् ।
चतुर्लक्षमिदं जप्त्वा बगलाचतुरक्षरम् ॥ ५५ ॥

पञ्चपी[13]तेन जुहुयात् तत्क्रमं शृणु पार्वति ।
पञ्चानां समभागं च चूर्णत्वांशप्रभेदतः ॥ ५६ ॥

जुहुयाद् यत्नतो देवि च[14]रमेणा[15]न्त्यभागकम् ।
विद्याचतुष्टये देवि होमक[16]र्माणि प[17]ञ्च चे[18]त् ॥ ५७ ॥

---

1 D °वाहुतिः । 2 °विर्लजैः । 3 SD साक्षात् । 4 C रिपुजये । 5 N °ञ्चा° । 6 SC °न्यां । 7 N °च° । 8 SB अथ । 9 C omits this line and SD omits two lines. 10 D SA SC °कभागेन । 11 C तत्तत् । 12 SD च तथा । 13 C °ङे°; N °ले° । 14 C क्रमेण नान्य° । 15 SB °ज्य°; SD °न्य° । 16 D SD °र्मं° । 17 SA SC यं चरेत्; SD माचरेत् । 18 C वै ।

चतुर्धा विभजेद् द्रव्यं तेन होमं समाचरेत् ।
पञ्च द्रव्याणि देवेशि प्रतिविद्याक्रमं यथा ॥ ५८ ॥

चतुर्णां समभागश्च चरमे वेदभाजनम् ।
चरमांशक्रमेणैव केरलादिक्रमाद् भवेत् ॥ ५९ ॥

एका विद्या यदा देवि षडष्ट दश षोडश ।
विंशत्त्रिंशच्च द्रव्याणि तत्क्रमं शृणु पार्वति ॥ ६० ॥

त्रिकूटं चे[1]न्महेशानि त्रिभागं च समाचरेत् ।
[2]त्रितत्त्वानि तथा चेत् स्युस्तथा भागं समाचरेत् ॥ ६१ ॥

सर्वेषामैक्यभावेन **सप्तशत्यां** भवेत् प्रिये ।
त्रयोदशाध्यायमध्ये द्रव्याणि तु त्रयोदश ॥ ६२ ॥

प्रत्येकं होमयेद् देवि मिश्रभा[3]वेन वा भवेत् ।
तथा कार्यो महेशानि संख्याभावक्रमोऽपि च ॥ ६३ ॥

होमसंख्यां समाचर्य्य द्रव्यसंख्यां समाचरेत् ।
होमं[4] तेन प्रकुर्वीत प्रत्येकं समिधो हु[5]नेत् ॥ ६४ ॥

मिश्रयोगो यत्र यत्र तेन मिश्रं [6]प्रहोमयेत् ।
प्रतिद्रव्येण होतव्यं तत्संख्यापूर्तिमात्रकम् ॥ ६५ ॥

भुवनेश्यां महेशानि समिद्धोमस्तु भिन्नतः ।
अन्येषां मिश्रभावेन प्रत्येकं होममेव वा ॥ ६६ ॥

समिद्धोमं समाचर्य्य तद[7]न्ते चरुहोम च ।
पत्रैः पुष्पैः फलैर्धान्यैः पूजने यत्फलं मतम् ॥ ६७ ॥

तत्फलं होमकर्मादौ कीर्तितं परमेश्वरि ।
इति संक्षेपतः प्रोक्तं पूजाभेदं शृणु प्रिये ॥ ६८ ॥

गुरुदैवतमन्त्राणामैक्यं संभावयेद्[8] धिया ।
मन्त्रार्थं हृदि निश्चित्य गुरुं मूर्ध्नि परामृशन् ॥ ६९ ॥

[9]हार्दावकाशजं चैव तथा बाह्यावकाशजम् ।
द्विविधं यजनं प्रोक्तमन्योन्या[10]श्रयरूपकम् ॥ ७० ॥

---

1 C च म° । 2 C omits this line. 3 C °गे° । 4 D SA SC °मान्ते । 5 SD धु° । 6 C तु । 7 C °दंशचक्रहोमतः । 8 D SC °यन् । 9 C महाद्रोचकसंज्ञं वै वृत्तान्तं ब्रह्मगोचरम् । 10 C °शृत्य° ।

अन्तःशुद्धिर्यदा भूयाद् बहिःशुद्धिस्तदा भवेत् ।
पूजा बहुविधा प्रोक्ता तत्र सारं शृणु प्रिये ॥ ७१ ॥
हार्दबाह्यप्रभेदेन पूजा प्रोक्ता महेश्वरि ।

श्रीदेव्युवाच

बाह्यपूजां विना स्वामिन् कथमन्तःप्रपूजनम् ॥ ७२ ॥
पूजाज्ञानं यदा [1]जातं तदान्तःपूजनं भवेत् ।
सामग्रीज्ञानहीनत्वात् कथमन्तःप्रपूजनम् ॥ ७३ ॥

श्रीशिव उवाच

सत्यमेतन्महेशानि रहस्यं शृणु यत्नतः ।
विष्ठापूर्णे मृद्घटे तु बहिःशुद्धौ तु किं फलम् ॥ ७४ ॥
अन्तःशुद्धिं समासाद्य बहिःशुद्धिं समाचरेत् ।
बहिःपूजाविधौ देवि सामग्री दुर्मिला कलौ ॥ ७५ ॥
व्यङ्गता जायते सत्यं सर्वत्र पूजने शिवे ।
तत्साङ्गतासिद्धिहेतोरन्तःपूजा प्रकीर्तिता ॥ ७६ ॥
[2]भावनामात्रगम्येयं कोटिरत्नानि कल्पयेत् ।
अन्तःपूजाविहीनेन कृतं त[3]दफलं भ[4]वेत् ॥ ७७ ॥
संयोगं तु विना देवि यो गर्भाधानमिच्छति ।
स चान्तःपूजनं त्यक्त्वा बहिःपूजां स[5]माचरेत् ॥ ७८ ॥
[6]स दरिद्री महारो[7]गी कथमत्र [8]शुभं लभेत् ।
अन्तःपूजां समासाद्य बहिःपूजां समाचरेत् ॥ ७९ ॥
सं[9]भाव्य पूजनं देवि तथैव रचयेद् बहिः ।

श्रीदे[10]व्युवाच

तथ्यमुक्तं त्वया देव संशयो मेऽस्ति शङ्कर ॥ ८० ॥

---

1 D याति; SC ज्ञातं । 2 SD omits three lines. 3 C °च्च; D य° । 4 N C D लभेत् । 5 C D SA SB SC °मिच्छति; SD °मिच्छसि । 6 D N omits two lines. 7 C °घोरी । 8 SA SB SC SD सुखं । 9 D omits three lines. 10 All except C omit this.

बहिःपू[1]जनमासाद्य चान्तःपूजां समाचरेत् ।
एवंक्रमेण देवेशि(श)पूजा किं न भविष्यति ॥ ८१ ॥

श्रीशिव उवाच

मृद[2]पक्वां समासाद्य यथा देवि घटो भवेत् ।
[3]घटः पक्वमृदा देवि पूर्ववत् किं भविष्यति ॥ ८२ ॥
अप[4]क्वां मृत्समानीय यथा देवि घटो भवेत् ।
ततः पक्वः प्रकर्तव्यः सुन्दरः स तु जायते ॥ ८३ ॥
अन्त[5]र्न्यूने बहिः पूर्णे बहिर्न्यूनेऽ[6]न्तरा भवेत् ।
अन्योन्याश्रयसंयोगात् पू[7]जनं सफलं भवेत् ॥ ८४ ॥
देवो भूत्वा यजेद् देवं नादेवो देवमर्चयेत् ।
तस्माद् देवत्वमासाद्य चान्तःपूजादिमार्गतः ॥ ८५ ॥
अत एव महेशानि श्री[8]चक्रन्यास ईरितः ।
अत एव महेशानि पीठन्यासोऽपि कीर्तितः ॥ ८६ ॥
पूर्वं देहमये पीठे संपूज्य परमेश्व[9]रीम् ।
दै[10]वी पूजा महेशानि सिद्धैव स्वान्तगोचरा ॥ ८७ ॥
तत्संस्मृतौ महेशानि यथा संकल्पतः फलम् ।
त[11]थान्तःपूज[12]ने देवि भावतः फलमश्नुते ॥ ८८ ॥
भावं विना महेशानि ब्रह्मापि दुर्गतिं व्रजेत् ।
भावनावशमापन्नो भावयोगी भवेन्नरः ॥ ८९ ॥
इति संक्षेपतः प्रोक्तं रहस्यमपरं शृणु ।
पूजा[13] जपं समासाद्य सिद्धमन्त्री भवेद् ध्रुव[14]म् ॥ ९० ॥
अथवा शाबरं देवि द्विविधं साधयेन्नरः ।
दीपावल्यां महेशानि अथवा फाल्गुनोत्सवे ॥ ९१ ॥
अमाचतुर्दशीसन्धौ शिवशाबरसाधनम् ।
दीपोत्सवचतुर्दश्यां साधयेदपि वा प्रिये ॥ ९२ ॥

---

1 SA SD °जां स° । 2 C हृदयोक्तां; SA SC SD °पङ्कां । 3 D omits two lines. 4 SA SC °पङ्कां । 5 SD °न्तः पूर्णे । 6 D °थवा; SD °हिः पूर्णे° । 7 C पूर्णं च । 8 SD omits श्रीचक्र···महेशानि in second line. 9 C SB SD °रि । 10 C SD दे°; SA SC देवि । 11 N अ° । 12 C °नं । 13 C °यन्त्रं । 14 D °वेच्छिवे ।

प्रतिपच्च कुहूसन्धौ पूर्वरात्रावपि प्रिये ।
साधयेद् देवदेवे[1]शि भाषासाधनमुत्तमम् ॥ ९३ ॥

पूर्णिमाप्रतिपत्सन्धौ साधयेच्छाबरं द्विधा ।
पौर्णमास्यां महेशानि साधयेच्छाबरं शुभम् ॥ ९४ ॥

तेन शाबरमन्त्रेण सर्वदोषान् निवारयेत् ।
अष्टौ षण्ढास्त्वष्ट वन्ध्यास्त्वपस्माराष्टकं तथा ॥ ९५ ॥

क्रमेण कथ्यते देवि यथावदवधारय ।
हीनवीर्यो लिङ्गहीनस्तथाऽ[2]नवहितस्तथा ॥ ९६ ॥

प्रवेशमात्रस्खलनाच्चतुर्थः परिकीर्तितः ।
[3]दृष्टे शान्तिर्य[4]स्य भवेत् स च पञ्चम ईरितः ॥ ९७ ॥

अङ्गुष्ठमात्रलिङ्गाख्यः षष्ठः स परिकीर्तितः ।
गर्भषण्ढः सप्तमः स्याद् दृष्टिच्युतिरथाष्टमी ॥ ९८ ॥

मृतवन्ध्या गर्भवन्ध्या पुष्पवन्ध्या तृतीयका ।
काकवन्ध्या महेशानि तथा गर्भो[5]पघातिनी ॥ ९९ ॥

गर्भे जाते पुत्रहरा षष्ठी सा परिकीर्तिता ।
ध्व[6]जवीर्या तथा प्रोक्ता कन्यागर्भा च या भवेत् ॥ १०० ॥

पुष्पश्रावी त्वष्टमी स्यादपस्मारान् शृणु प्रिये ।
मूर्छी प्रलापी तन्द्रार्तस्तथा फेनमुखः प्रिये ॥ १०१ ॥

भूमिभागी भूतचेष्टी जलवह्निप्रकोपधृ[7]क् ।
कालाख्यो नवमः प्रोक्तो मैथुनी दशमो भवेत् ॥ १०२ ॥

लिङ्गदर्शी रुद्रसंख्या[8]स्त्वपस्माराः प्रकीर्तिताः ।
मन्त्रवक्ता वेदपाठी भयहीनः प्रपी[9]डकः ॥ १०३ ॥

पुंपीडाकारकः स्त्रीणां तथा पीडाकरः स्मृ[10]तः ।
चत्वारिंशत्प्रभेदेन ब्रह्मराक्षसजातयः ॥ १०४ ॥

पूर्वक्रमेण संसाध्य दुष्टानेतान् विनाशयेत् ।
गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ॥ १०५ ॥

---

1 SA SB SC °श । 2 SA SB SC SD °था नर° । 3 C omits two lines. 4 D °र्भवेद्यस्य । 5 SA SC °र्भा° । 6 C धव° । 7 D °दृक्; N °त् । 8 N °ख्य° । 9 SD °पाठ° । 10 SA SC SD स्थितः ।

रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ १०६ ॥

इति श्रीमदक्षोभ्यमहोग्रतारासंवादे तारासूक्ते ब्रह्मजातिवर्णने एकादशः पटलः ॥

शुभमस्तु

परिशिष्ट १

शक्तिसङ्गमे समागतानि ग्रन्थनामानि

[The figure in Roman indicates the number of the *Khaṇḍa*, while the next two figures in *Devanāgarī* refer respectively to the nos. of the *Paṭala* and the verse.]

अक्षोभ्यकक्षपुटी II ५४. ४२
अङ्ककोश IV ५. ५७
अङ्कचूडामणि II ५४. ४२
अङ्कार्णवसर्वस्व II ५४. ४२
अनुत्तरगुणार्णव III ३. ८६
अर्णव II २. २७; ५८. २५
आगम IV ६. ७७
उड्डीश (द्वय) IV २. २
उत्तराम्नाय III १८. ५२
कादितन्त्र II ८. ८; III १६. ६५
कादिहादिविनिर्णय I ६. १२७
कामरूपागम II ११. ३७; २४. ८
कालिकागम II १. ९; ५. ११; ६३. १४;
IV ११. १७
कालिकापरिशिष्ट II ९. १५
कालिकाम्नायतन्त्र I ६. ५६
कालिकासंहिता II ९. ३७
कालिकासाधन IV १०. ५३
कालीक्रमागम II १. १५८
कालीपुराण IV ६. ७८
कुलचन्द्रोदय II २. २७
कुलार्णव II १. १२३, १५९
कोटिविनायक III १९. २
खेचरीसिद्धि II ५४. ४२.; IV ९; १६७
गर्भकौलागम II २४. ७
गुप्तकौलागम II २४. ८
गोपालपाञ्चरात्र I ८. ८३
चित्तस्कन्ध I २. १३
ज्ञानार्णव II १. १२४
डामर (द्वय) II २. २८; IV २. २; ५. २१
तन्त्रकौल II १. १२३
तन्त्रराज I १. ४, ९; २. ९७; II ५८. ७८
तन्त्रार्णव I १. ४
तरङ्गिणी II २. २७
तारासूक्त I ६. १४४; ८. ८८
त्रिस्कन्ध I २. १२
त्रैपुरसिद्धान्त II १. १२४
देवीपरम्परा I ६. १८४
नित्याषोडशतन्त्र I २. ९७
नीलसारस्वततन्त्र I ३. ५२; III ३. १४६
पराताण्डवतन्त्र II ८. १०
पातञ्जल II २. २६
पुराण IV ६. ७७
पूर्वतन्त्र III १६. ३; IV २. ३२
प्रकाश II २. २७
बृहत्श्रीक्रमतन्त्र II ८. ९
भास्कर II २. २७
मन्त्रसिद्ध्यागम I १. ६; IV ७. ११२
मुण्डरहस्य II ९. ८
मोहशक्तीश्वर I ८. ८४
यन्त्रसिद्धितन्त्र II ५४. ४१
यामल IV ५. २०
रहस्य II ३३. ३०
लक्षणसंग्रह II १. १३

वर्णोद्धार III ३. ६६
वाराहीसंहिता II ६९. ३१
विमर्षिणी II २. २६
वीरचूडामणि II १. १२३
व्यङ्कटेशाख्य III ११. ४२
शक्तियोगक्रम II १७. ५५
शक्तिसङ्गम I १. ५, १३; २. ९९; ५. १००; ११. २७; II १. १३९; ८. १०; ६०. ३०; III १०. १
शम्भुताण्डव III ११. २२
शिवतत्त्व II १. ३६
शिवताण्डव II ५४. ४१; III ३. ९६
शेखर II २. २७
श्रीगोपीपरिशिष्ट I ८. ८४
श्रीमत्तोत्तरतन्त्र II ३१. ९
श्रीमत्पञ्चकतन्त्र III १. ५१
श्रीमूर्तिसंहिता II १. १२४
षट्शाम्भव I ५. ९९; ८. ८३; १०. ५९; IV १०. ५२, ५७
षट्शाम्भवरहस्य I ८. ८४
षडन्वयमत I ८. ८३; III ३. १९८
संहिता II २. २७
सप्तशती IV ११. ६२
समयार्णव II १. १२४
सर्वतन्त्र III २१. ५९
साधनापटल IV ३. १६२
सिद्धान्तसार II २. २६
सिद्धामत I ५. १००
सिद्धिकेरल I ३. ३१
सुधाशाम्भवतन्त्र II ८. ९
सुरेन्द्रसंहिता I ८. ८३
सूक्त II १. १२२; २. २६
सूर्यसिद्धान्त II १८. २०

परिशिष्ट २

शक्तिसङ्गमे समागतानि तान्त्रिकमतमतान्तराणि

अक्षोभ्यमत I १०. ३२; II २१. ३७; III ६. २२; IV १. ४५

अतिकालमत I ६. १८; IV ८. १९१

अवधूत (सप्तविध) I ६. १३७; III १. १५२-१५५

आगम (संख्या) II १. १०-२३; III ३. ९०-९४

आनन्दभैरवमत I ५. २७, ४०; ६. १३५, १६६; II ३२. ५; III १. ६८, ८३; ३. ३१; ११. १३२; IV ७. ६८; ८. १२९, १५८; ११. ४१

आनन्दमत I ४. ९३; II १८. ४३

आनन्दवीरदेवक्रम I ४. ९८

आम्नाय (पञ्चविध) I ४. ६७-६८; (अष्टादश०) I ६. ९७; (नवविध) I १९. ५६; II ४. १; (त्रिविध) II १ ११५-१२५; ४. ३-७; (षड्विध=षडाम्नाय) II ४. ३-१४; (नानामत, तन्त्रगणना) IV ५. ४०-१७४, ६. १-१२३, ७. १-१६६

आराध्य (अवधूत) III १. १५५

आर्हत I ६. १५५

उन्मत्तभैरवमत II १. ६४

करालमत I १०. ४७; II १८. ४५; ३८. १९; IV १. ४६

कहाद्यमत I ६. १, २५; १६-२०; II ५. ४०; ६. ३५-५०; ५८. ८२; III ३. ६७; IV १. २४

कादिक्रम I ६. ९-१५, १२३

कादिमत I १६. ४-८; II १. १२२ ,१३९; ३. १४; ५८. ८१; IV १. २१

कादिषट्क III ४. १५

काद्यमत I ६. १२५; II १. १३२; ४. ८; ५. ३९; ५८. ८१-८२; III ३. ५०; १६. ६५; IV १. २१-२३

कापालिक (द्वादशधा) I ६. १३७; ८. ८-१०; III १. १९२-१९३ माया° II १. ३०

कापालिकमत I ४. ४२

कालनाथक्रम IV १. १०८

कालमत I २. १४१; III ६. २३; IV ७. ७३; ८. १६८

कालमुख I ५. ९३

मन्त्रकाल° II १. ११९

कालरुद्रमत III ६. ४०

कालवीरमत II ६१. ९१

कालिकामत III ६. २३; IV १. ४४

कालीमत II ५८. ८२

काश्मीरमत I ३. ४८; ४. ११५; II १३. १८६; १४. ५९-६१; III ६. २७. ६७; IV ११. ४३; भेदोपभेद° I ७. १७-२४, ५०-५५; ९. २८-३०; II ११. ३०-३२; ४५. १९; III १. १७९; IV ५. ४४-५१; महा० II १४. ५९-६१

काश्मीरमार्ग I ४. ६

कुब्जामत II १. ५०

कुल I ३. ३२

कुलनाथमत I ४. १०५

कुलाकुल I ३. ३७

केचित् II १४. ३९, ४४; III ३. ४१, १४२; ६. १६; ११. १४३; IV ३. ६८; ८. ८-९
केरलमत I ३. ४९; II १. २५; १४. ५८; III ६. २७ (मेदोपमेद) I ४. १७९-१८१; ६. १४२-१४३, १६९-१७९; ७. २-१६, ३६-४९; ९. २४-२६; II ११. ३५; ४५. १७-१९; III ६. ३७, ३८, ४८; ११. ४२; IV ५. ४४-४५; ८. १०८-११०
केरलमार्ग I ४. ३-५
केरलाख्यक्रम I ५. ११३
कौल I ४. १७२; ५. ३७; ६. १३८ (मेदोपमेद) I ७. ४७; ८. २; II १. ३२; ३३. १९
गणेश (गाणप, गाणपत्य) I ४. १७०; ६. १३९; II १. २४; ५८. ५६
गन्धर्वेशमत IV ८. २०५
गारुड II १. २५
गोकुलेश I ८. ३८, ४५-४८, ७०-७४
गौड I ३. ४८; ४. १६७ (°मेदोपमेद) I ४. १४१, १५१, १५५; ७. २४-३५, ५५-६४; ९. ३०-३३; II १३. १८६; १४, ६२-६७; १८. ५०, ८६, १०७; ४५. १९; IV ५. ४४-४७; १०. २५, ३३-३५
गौडमार्ग I. ४. ३-४, १३५
घोर (एकादश) II १. २८-३०
चण्ड I ६. १३७
चतुःकालमत IV ८. १६८
चान्द्र I ८. २९; II १. २५
चिदानन्दसम्प्रदाय I ४. ९०, ९६
चिद्घनमत II १९. २०; III ६. ३८
चीन I ८. ११-१२; II १८. ५६ °मेद (द्विशत) II १. ३१; २१. ३
चीनमार्ग (क्रम) I ४. १८६; II १८. १८; ३८. २
चैतन्याख्यमत I ६. १५५-१६०; II १२. ८; १८. २४, ११०; १९. १९; III ६. २९
जटी (पाशुपत) दशविध I ८. ४०, ८९-९१; IV ८. ११५
जैन I ८. १६८; ६. १३९ (मेदोपमेद) I. ८. १२-१६; II १. ३१
तारिणीमत I ४. १८६; ९. ६६; IV १०. १३४
त्रिदण्डी (पाशुपत) I ८. ४०
दक्षिण I ४. ६८; IV ६. ७९-८४
दक्षिणाख्यमत I १८. ४७
दक्षिणामूर्तिमत I ५. २६; ६. १९; II ३२. ६; III १. ६९, ८४; ३. ३१; ६. २१; ११. १३१; IV ७. ६८; ८. ११५, १२९, १६१; ११. ४२
दिव्य II ५८. ५६
दिव्यचीनक्रम II २. ३३
दुर्वाससोमत II २४. ३४
देवीमत II ११. ४
दौर्ग I ८. ३१
द्विदण्डी (पाशुपत) I ८. ४०, ९१
नन्दनाथ (मत) II. १९. १९
नन्दनाथी I ५. ३५
नाथमार्ग II १८. २४
नारदमत IV ११. ३०
नित्यामत II १. ५०
निम्बार्क I ८. ३९, ५६-५८, ७९
निरञ्जनमत III ६. ३२
निवापाख्यमत I ४. १०८
नीलचीनक्रम I ४. ४३
नीलाक्रम I १६. ८
नीलामत I १०. ३६
पञ्चचक्रमत I ४. ९८; II २०. २३
पञ्चमानन्दनाथमार्ग I ४. १००

पाञ्चरात्र I ८. ३-६, ५१; II १. २५
पाञ्चरात्रक्रम I १८. १५
पार्वतीमत III ६. ३२
पाशुपत I ५. ९३; ६. १४०; II १. २४; ५८. ५६, ७४; III १. ९५, १०७; (सप्तविध) I ८. ४०-४१, ८५-९६; III १. १४९, १५१, १८३-१८५; (दशविध) II १. ३२
पाषण्ड I ८. ६-८
बटुकमत I २. १४१; ६. १८८; II १४. ७१; १८. ४३; IV ७. १६; ८. १६४, १६८
बौद्ध I ४. १६८; ६. १३९; ८. १४; II १. ३० भेद (शत) II १. ३२
ब्रह्मकौलमत I ७. ४७
भद्रनाथमत I ६. १८
भागवत I ८. ४०, ५८-६१; III १. १८८
भैरव I ४. १६८; ६. १५२
भैरवमत I ४. १०५; II ११. ३; १९. २०; ६१. ६८
भोगचार I ४. ९५
मञ्जुघोष I ४. १८६; II ३८. २, ११
मतङ्गमुनिमत II २४. ३५
महाकालमत I १०. १४; II ११. ११; III ७. १२; IV १. ७, ४०; ८. १९०
महाकौल II ३३. १८
महाचीनक्रम II २. ३३; २१. १-३, २०-२१
महादेवमत II १८. ४६
महानीलक्रम II २. ३२; २०. ३, १८; ३१. १०
महाभैरवमत II १८. ११०
महामूर्तिमत IV ७. १६
महावीरमत II १. २४; ३८. ३८
मुण्डी (त्रिंशद्विध) I ६. १४०; ८. ४०, ८८-८९; IV ८. ११५
मृडमत III ६. ३७
योगरूप I ४. १०२
रत्नगर्भक्रम I १०. ५३
राजराजेश्वर IV ७. ६९
राधावल्लभ I ८. ३८, ४३-४५, ७४-७९
रामानन्दी I ८. ३९, ५२-५३
रुद्रवीरमत III ६. ३२
वटवासिमत I ६. १४२-१४३; II १८. ४८; IV १. ४६
वटेशमत I ६. १३५; II १. १३३
वाम II १. १००-१२०; ३. ५-६; ३३. १७, २१; IV ६. ७९-८४
वामगौड II ३३. २०
वामी I ५. ३६
विकरालमत II १८. ४५
विज्ञानकेरल I ४. २३-२७
विराड्मत I २. ९८; ८. १०४
विरूपाक्षमत I ८. १०३; ९. १०; II ११. ३; १८. १५, ३८; III १. ७८; IV ७. ६९; ८. १६२
विलास I ४. ६८, १८४; ५. ३३; ९. ३४-३५ (त्रिविध) II ४५. २०; III ३. २३०; IV ५. ४४-४८
विश्वरूप I २. १०३; ४. १०१, १८४
वीर (पञ्चविध) I ६. १३८; III १. १९७-२००
वीरचक्र I ६. १६६-१६९
वीरनाथमत I ६. १९; II १. ४६
वीरभद्रमत II १८. ३८
वीरवैष्णव I ८. २८-२९, ५१; II १. २४
वीरशाक्त I ४. १५६
वीरशैव I ८. २७-२८, ४१, ९२; II १. २५; III १. १०८
वीरागम II १. ३०
वृन्दावनी I ८. ३८, ४८-५०

वैखानस I ८. ३८, ६८-६९, ८०
वैष्णव I ६. १३८; ८. २६, ४२; II १. २४
(दशविध) I ८. ३८-४०, ८०-८५
(अष्टविध) III १. १८५-१८७
व्यङ्कटेशमत III ११. ४२
शङ्करमत II १४. ७१
शम्भुनाथमत I ४. १०८; IV १०. १३३
शाक्त I ४. १५६; ८. २६; II १. २४; III १. ९४
शाबर II ४३. १०-१५; ४९. ६४ (भेदोपभेद) I १६. १८-१९; II १. २५, २८
शाम्भव I ८. ९३-९६ (भेदोपभेद) III १. ११५; IV १. १०९
शास्त्र (परस्परनिन्दा) I ५. ९-१३; II ५. ४८-६४ (भेदोपभेद) I २. ७२-७९, ८५-१००; ५. ६, २०-२१; ६. १३७-१८९; II १. २४-२५, ३०-३२, ९२-९५, ९९-१००; २. १८-३१; ३३. १७-२९; III १. १४५-२००
शिखी (पाशुपत) I ८. ४०, ८६-८९; IV ८. ११५
शून्यवाद II ४७. ७३
शैव I ८. २७; II १. २४; २. ३०
श्रीक्रम I ५. ११२
षट्शाम्भवक्रम I ३. ४६; III १. ६१
षड्दर्शन I ६. ९८; II ४. ३-४
छिन्ना° I २. ८७-८८
तारा° I २. ८५-८६
त्रिपुरा° I २. ८६-८७
संवर्तेशक्रम I ११. १३; IV १. १०७; ७. ६९
सदाशिवमत II १८. ९९; IV ७. ६९; ८. १५८
समताष्टकमार्ग II १८. २१
सम्प्रदाय (भेदोपभेद) III १. १४५-२०४
सांख्यायनमत II ११. २४, २६; २४. ९, ३२; IV १०. ९२
सिद्धचैतन्यमार्ग I ४. ९७
सिद्धान्तमत III ३. १९०; ११. ४०
सिद्धेश्वरीमत II १७. ९
सुन्दरीमत II ३. २३; ५८. ८२
सौभाग्यक्रम II २४. २२-२३
सौर I ४. १६७; ६. १३९; ८. ३०; II १. २४; ५८. ५५
स्मार्तमत I ८. ६१-६८
स्मार्तवैष्णव (वैखानस) I. ८. ४३, ६८-६९, ८०
स्वायम्भुव I ४. १७१; ६. १३८; ८. ३०; II १. २५; ५८. ५५
हरिव्यासी I ८. ३९, ५३-५५
हादिक्रम I. १६. १-४
हादिमत II १. १२२, १३२; ४. ८; ५. ३९; ५८. ८१; III ३. ५०; IV १. २१
हायमत I ६. १२५; II ५८. ८२; III १. ७७; ४. १७; IV १. २१-२३

परिशिष्ट ३

शक्तिसङ्गमे संदृष्टा विशिष्टाः शब्दा विषयाश्च

अकाराक्षरतत्त्व I १. १३२

अकुल I ३. ४१-४३

अकुलचक्र I ६. २०

अकुलाष्टक IV ४. ४६, ५४-५५

अक्षरोदय III ३. ४१-४३

अक्षोभ्य I १. ८४; १३. ३१; II १. १; १०. ३०; III १९. ६०; IV १. ३५; ५. १४६; ७. ७२

अचूलक (आसन) II ६७. ७

°विशोधन II ६८. १-५

अथर्ववेद I ९. २३

°च्छाया II ६१. ११०

अधिकारी II ५८. २८-३५; III ३. ७०-८३. २७३-२७८

अधिवासन I १८. १३, १७, ५३; III ११. १४७-१५०

अध्यास IV १०. १४-१६

अनन्तपादुकाक्रम III ३. २६५

अनुकल्प I ९. १६-१९, ३७-५६; IV ४. १०५-११६

अन्तर्धानविधि III ११. २४५-२५८; १२. १

अन्तर्मातृका III ३. २२९-२६२; IV १०. २३-३६

अपस्माराष्टक IV ११. ९५, १००-१०२

अभिमानाष्टक IV २४. २३

अभिषेक (पूर्णा°) I ३. ४९-५१; ६. २२-११३; ९. ७३-७५; II १. १४६-१६३; ४६. ८-४१; III १. ३०-४०, १११-१४४; ३. २०९; IV १०. १०-१६

°फल I ६. ११२-११६; ९. ८१-८२

°स्तुति II २. १-१०

°षिक्तकर्तव्य I ११. २९-६२

°गुरुपूजन I. ६. ११६-१२२

अमृतान्दोलिका II १३. ६७

अर्घ्य II १८. २७-६४, ११५-१२१

अवधानी II १५. ३०-४१

अश्व (पञ्चविध) II ४७. ३६

अश्वपति III ११. १९-२०

अष्टार्गल (चक्र) III ११. २७

अष्टाष्टक (चक्र) I ३. ११७-१४२; IV २. ८७

शैवाष्टक I ३. १२०-१२९

वैष्णवाष्टक I ३. १३०-१३२

आनन्दभैरवाष्टक I ३. १३३-१३५

आईपल्लवित I ३. १३; III ३. ३६, ४५-४७

आणव्य I २. ४३

आनन्द II ३३. २१

(भेद) IV ३. १९२; ९. ५६-५८

°तूलिका II १३.७२

°भुवनयोग III ९. ४१

°व्रत II १३. ६८

आयुध IV ९. ८७-९०

आरार्तिकविनिर्णय II १९. १-७

आर्द्रपटेश्वरी (विद्या) III २१. २-२०; IV १०. ६९

आसन (३२ भेद) II ४. २७-२८; ९. १-६, २२-२३, ४९; २०. २३-३०; ३९. १-१८; ४७. १४-७९; ४८. १-३६; ४९. १-६९; ५०. १४-५६; ५२. ११; ६०. २-२१; ६७. १-१०; ६९. १-९, ३१-३६; ७१. २-२१; IV १०. १०४-१०५

°विशोधन II ६७. ८; ६८. १-५, १७-२४
°संस्कार II ६७. ६, ११-५५
इन्द्र III ११. ९०-१०४
उग्रतारा I २. १; II ५२. २४; IV ५. १३२; ८. १५
उच्छिष्टमातङ्गी IV ६. २७-४०
उत्कीलन III २. ५८-८०
उत्कोच IV १०. ३९
उत्तराम्नाय III १८. ५२
उत्सर्जन I १७. ३
उदयाक्षर III २. ८९-९६
उद्भ्रान्तधूलि II ७०. ४०-४४
उपचार (६४) IV १०. १०६
उपाकर्म I १७. ३, ७, ११-१२, १५; १८. १२, २४, २८
ऊर्ध्वपुण्ड्र I ८. १११-११२
ऋणधनचक्र I ५. ४४-६४
ऋणी III ३. १२८
ऋतुशाम्भवनिर्णय I ३. २०-३०
ऋद्धिकामुक II १३. ७५
एकलिङ्ग I ८. १११
ओड्यात (पीठ) I ४. १०३; III ११. २४७
कज्जल (भेद) II ७०. ३८-३९
कदम्बारण्य IV ६. १२-१३
कन्याष्टक II १४. २-३; IV ४. ५०-५१
कपर्दिक I ४. ४३
कपर्दीश I ४. ४४
कपिल I १७. ३९
करण I ३. ४
करवीर III ११. २४७
कर्म (भेद) I १७. ७-९; १८. ३२, ५४; II ३९. २७-३३; ६०. २१-२६; III २. १-२१
कलाशृङ्खलिकायोग III ३. ३०७, ३११
कलासप्तक I ३. ६६-७७
कल्पलतायोग I २१. ३०-३८
कश्मल III ११. १७८
काण्डपञ्चक IV ८. १०१
कामकला I ३. ७७-७९, ८७-९५; II ६१. १६-२६; III ३. ५६-५८
कामचक्र I ३. ११९
कामधेनुयोग I २१. ३८-५१
कामबिल II १३. ६६
कामरूप I ४. १०२
कामाख्या II १५. ४८-४९
काम्यार्चन III २. १-२१
कार्मण I २. ४३
काल I १. ३७; २. ३३-४२, १०३-१०६
कालनित्या I २. ११०
कालपर्याय IV ५. ७३-१७४; ६. १-७९
कालमोहन II ६१. ९१
कालवादिनी (मन्त्र) III २१. ४३-५१
काली I १. ३७-४८; ५. २३; II १. ६७-८२; ३७. ७८-८८, १३०; २. ११-१२; III ११. ५३-१०३; IV ५. ७६-१०२; ९. ४-९
°अन्तर्धान I १. ४५-४७; IV ५. ९०-९३
°नित्या III. १२. ३६-५९
°माहात्म्य II ५. १७-३८; ५८. ५२-८५
°मोहन II १३. ७७
°योग II ५९. १-४४; ६१. ९०
°विद्या° IV १. ९-२०
°सिद्धिलक्षण III ११. १०३
कालीकृता सृष्टिः I १. १९-८९
किरातवाराही (मन्त्र) III २१. ३७-४३
कीट I १. ११७; ६. ८१; IV ८. ४०-४१; ९. ५०-५१
कुण्ड (कुलामृत) IV ४. ८

(प्रस्तार) I १०. १-३९; ११. ६-२५; II १८. ८७-९४
कुण्डली I १. ५५-५६; II ३२. २८-३८; III २. ११७-१४२; IV २. ७६-७७; ९. ३८-७०; १०. ४, ४४
°सृष्टि I १. ५६-८९
कुण्डसार IV ३. ११३
कुतप (पात्र) I ४. ३५
कुबेर III ११. ६५-७३
कुब्जिका IV १. १०४
कुमारीपूजन II ५९. ३०-३७; IV २. ८०-११५; ३. ६४-६६; ११४-११५; ४. १-३, २६-२७, ४५-७३ चक्रदशक द्रष्टव्य।
कुरुक्षेत्र II १३. २६, ६३
कुल I ३. ३१-३७; II ३६. १८
कुलगन्धाष्टक II १८. ७१
कुलचक्र I ६. २०; II ३६. ३४
कुलदर्भ II ६३. ९-१८
कुलद्रव्य II १८. ७७
कुलपथ II ३५. २३
कुलवृक्ष II ५०. ३-१४
कुलाकुल I ३. ३७-४१; ६. २०
कुलाकुलाष्टक II १४. ८
कुलाचार II ३६. २१
कुलाष्टक II १४. ३-१०; IV ४. ४५, ५२-५३
कुल्लुका (द्र० नित्यानिर्णय)
कुल्लुकार्चाविधि II ६. १६-३५
कूटोच्चार II २. १४-१५; III ३. ६५; IV ८. १३२-१३३
कृष्णमातङ्गी (कौतुक) III १९. ६६-७३
केलिकुञ्ची II १३. २८-२९, ७५
(भेदोपभेद) II १३. ८८-१०३
(दश स्थान) II १३. १०३-१०४
केलिगेहिनी II १३. २८
कौतुक III १९. ३२-७३; २०१-५३; २१. १-५९
कौल II ३३. १७, १९
कौलतीर्थ II १३. ८-२४
क्रमदशक II २. ३८; २०. १; IV ४. ४५-७३
कमला° II २७. १-१०
काक° (धूमावती°) II २८. ७
केरलाख्य° I ५. १०२, ११३
गन्धर्वाख्य° II २२. १-११
चीन° II २३. १-२
छिन्नमस्ता° II २३. १-२९
दिवा° IV ४. १४-१९
दिव्य° II २३. १-२
धूमावती° (काक°) II २८. १-७
पञ्चचक्र° II २०. २३; IV ४. ५७-५८
बगला° II २४. १-३७
ब्रह्ममार्ग° II २९. १-१०
भुवनेशी° II २६. १-१०
महाचीन° II २१. १-६४
महानील° II २०. २-६०
महाराज° II २५. १-१४
रात्रि° IV ४. १९-२४
श्री° I ५. ११२
सौभाग्याख्य° II २४. २२
स्वपुष्पाख्य° II २३. ६
क्रमदशकफल II ३१. १-२४
क्रममालाविनिर्णय II ३०. १-३६
क्रोधरात्रि IV ६. १८
क्षपणक III २१. ५४
खेचर्यादि III ११. २४८-२४९
गजपति III ११. २०-२१
गणेश III ११. ३०
°उत्पत्ति IV ६. ४१
गन्धाष्टक I २०. १३-१४
गर्भान्तयोग IV ४. ११७-११९
गवाक्षयोग II १५. २४-६०; २३. २३
गायत्री IV १०. १३२-१३४

गुरु III १. १५५-१५६; २. १२३-१३४; ३. ४-१८; ११. ५५
°चिन्तन IV १०. २-५
गुह्यकाली IV १. १०१-१०३, १०५-१०८
गृहवास्तु I ३. ९५
गोल I १. ११०-१११; २. ८
गौतम I १७. ३८
गौरीमुख II १३. २६, २९, ६३
ग्रन्थलक्षण II १. १४
ग्रहणयोग (पुरश्चरण) II १४. २९-४९; १७. २-५५; ४६. २५; ४७. २६; ६१. ७६-७७
घटसरस्वती I १२. १२
घटसिद्धि II १९. २४-२९
घण्टाख्यशृङ्खला II ५१. ४२
चक्रदशक I ५. १०२-११३; IV ३. १६४-१६६; ४. २-३, २६-२७, ४५-४७
अकुलाष्टक° I ५. १०७; IV ४. ५४-५५
अष्टकन्या° I ५. १०५; IV ४. ५०-५१
ऊर्मिला° I ५. १०८-११०; IV ११. १४
कुलाष्टक° I ५. १०७; IV ४. ५२-५३
चूला° I ५. ११०-११२; IV ११. १४
दशविद्या° I ५. १०६; IV ४. ४७-४९
पञ्चचक्र° IV ४. ५७-५८
पञ्चाशत्पीठ° I ५. १०६; ६. ७१, II १५. ३; IV ४. ५५-५६
मातृकाष्टक° IV २. ९५-९६
षट्त्रिंशज्जाति° I ५. १०६; IV ४. ५५-५६
°फल I ६. १-८
चक्रभेद IV ९. ५०
चण्डघण्टा (विद्या) II ५७. ११
चत्वरलक्षण I १०. ६५; ११. ३-२२
चन्द्रग्रन्थि I १७. २२
चरणविद्या III १. ६१
चित्तस्कन्ध I २. १३
चिन्तामणियोग I २१. ५२-५४
चीनदेश IV ५. १४७
चीनवेष III ९. ३१
चीनस्नान II २१. ५४
चीनसुन्दरी IV ५. २५
चीनाचार II १८. ७३
चुम्बन (पञ्चविध) IV ३. २०४
(सप्तविध) II १३. २१४
चूडामणि IV ५. १२
चैतन्य II ३३. २०; IV ९. १२
चोटिका I १९. ३८
चोलहृद IV ५. १४३-१४५
छिन्नाङ्गमन्त्र IV १. ४६-५१
छिन्नोत्पत्ति IV ५. १४९-१७४
जगद्धूलि II ७०. ३९-४०, ४४
जप I ९. ५४-५५; II ८. १२; ४६. ४१; IV १. ९१-९३
°फलनिवेदन IV १०. ५-८, ३६-४१, ५३-५५, ७६
जयदुर्गा II २०. ३९
जयन्ती IV ६. ४४-४९
दशावतार° IV ६. ५०-६९
जल I ९. २१-२५
जाति II १. ५४-५५
जात्यष्टक II ३५. ३६
जालन्धर I ४. १०३
जिह्वासम्प्रोथन II १६. २९-३०
जीव I १. ११७; ६. ८१; IV ८. ४०
जीवक्रीडाविनिर्णय III ११. १०५-११८
जीवचक्र I ३. ११९-१२०; II १३. १९८-२१५; ४९. ६९
जीवन्यास (पञ्चधा) III ११. १०६
जीवमेरु I ३. १२०
झोटिङ्ग III ११. १७९
डाकिनी IV ५. १५६

तत्त्वन्यास III ४. ६४-८०
तत्त्वपञ्चक (मकारपञ्चक) I ९. १४-१८; II ३२. १६-३८; IV ९. ३९-४१
तन्त्र I ३.३
तप्तमुद्रा I ८. २०
तरुणी II ६२. ७
तर्पण (१६ भेद) II ३३. २९; IV १०. ७२-७४
ताम्बूल II ३७. ७०-७१
(नागवल्ली) उत्पत्ति I २१. २०-२६
°समय I २१. २-३०
तारा I १. १९; ५. २३; ६. ४२; १४. १-३६; II १. १३०, १४५, १६०; २. १२; ३. १; III ७. १२; IV ८. ४, २१, २६, ३१; ९. ४
°ङ्गमन्त्र IV १. २४-४६
°जप I १२. ३-१३
°यन्त्र IV ८. १९४-२०५
°योग I १२. ३-४५
°ष्टक I १८. ५२
°रोत्पत्ति IV ५. १३२-१४९
तिथि II ६१. ३२-४५, ५१-६५
तिरस्करिणीविधान III १९. १-३१
तिलक I ८. १११-११३; II १८. १२१; २३. २५; २५. १२; २६. ९
तोरणलक्षण I १०. ६४
त्रिपुण्ड्र I ८. १११-११३
त्रिपुरदाहकथा I १९. १२-६१
त्रिपुरा I ५. २४
त्रिपुराम्बिका IV ५. १३१
त्रिशक्ति IV ९. ४८; १०. ३; ११. ४-५; IV १. ४४-४६; ८. ५९
दक्षिणा (काली) I १. ५१; II १. ८२
दत्तोत्पत्ति IV ६. ४३
दन्तमालाविधान II ७०. २८-३८
दशनामकर्म (द्विविध-संन्यासिभेद) IV ८. १०४-१०८
दिनहोराचक्र III ११. २२-२६
दीक्षा I ६. १००-१०५; ९. ८३-८९; II १. १४५; ८. ८-२१; IV ११. १३
कर्म° विनिर्णय I १६. १-४०
चरण° II ४६. १३-१४; III १. ११८-११९; २. ३१-३८
पूर्णाभिषेक° III १. ३०-४०, १११-१४४; IV ७. २-३
मेधा° I ३. ४६; ६. १२३; II १३. १६२-१७२; ३४. २; III ३. २६७-२९१; ११. ४३-५१; IV ८. ४२-५९; ९. ५३, ७०
मेधाषट्क II १३. १६३-१८६; ४२. १७-२५; ५९. ३९
दिव्यसाम्राज्यमेधा° II १३. १८०; ४२. २३
महासाम्राज्यमेधा° II १३. १८१
सर्वसाम्राज्यमेधा° I ६. ८८; II १३. १७३-१७९; ३४. ४
दीक्षापरम्परा I ६. ४४-५५, १२८-१३४; III २. २१-५७
दीक्षामाहात्म्य IV ८. २६-२९
दीपरेखा III २. ८०-९७
दीपेश (दीपनाथ) पूजन III ६. १-८
दूतीयाग I २१. २२
दूषणत्रय II २४. २३
देशव्यवस्था III ७. १५-७३; IV २. १६-३२
द्रव्यभेद I ९. ११-३८
धर्मपीठ II ६०. ४०-५४
धर्माष्टक II ६०. २८-३९; ६१. ९९
धूप (दशाङ्ग-पञ्चाङ्ग) II ४४. २९-३४; ४७. ८-१४; III १८. ५३-५७
धूमावती III २१. ५१-५९
°अङ्गमन्त्र IV १. ८९-१००

°उत्पत्ति IV ६. २३-२६
धूम्रकेतु III १०. १-३२; ११. २-१३
ध्यानभेदक्रम II ६३. १८-२१; III ७. १-५
नति (नमस्कार) II ३८. २-४; IV १०. १०९-११०
नरपति III ११. २१
नवदुर्गा II ६२. ४
नवरात्रनिर्णय II १६. १-६२
नागपाश I १७. २१
नाडी II २३. १६-१७; IV ४. ९-११; ८. ३०-३५; ९. ४२-७०
नाथनवक I २. ८४; II ४३. १५; III ११. ६०; IV ४. ६५
नादयोग IV ८. ३५-३८
नाम II ४६. ४९
°दान I ५. ६४-१००; II १. १५२; III १. १२४-१४४; २. ५०-५७
°माहात्म्य I ५. २८, ४३, ६६; ६. २१; ७. ६९; III १. १४४
नित्यदीप II ६४. २०
नित्या IV १०. ७१
नित्यानिर्णय III ११. २२४
उग्रप्रभा° III १५. ४४-४६
उग्रा° III १५. २४-४३
कपालिनी° III १३. १-२७
काल° I २. १०९-११३; III २. ४७
काली° III १२. ३६-५९
कुरुकुल्ला III १४. १-३५
कुल्लुका II ६. १६-३४; १०. ३०; III ११. २००-२२२; १३. २८-५२; IV १०. १६-२२
घना° III १७. १-७
दिन° I ३. ५-१५
दीप्ता° III १६. १-२८
नीला° III १६. २९-६५
बलाका° III १७. १८-३२
महाकाल° III ११. २२४-२५८
मात्रा° III १७. ३३-४८
मिता° III १८. १-५२
मुद्रा° III १७. ५०-७१
विप्रचित्ता III १५. १-२४
विरोधिनी° (पञ्चमी°) III १४. ३६-६६
नित्यापञ्चक III ३. २७
नित्यामण्डल III. १२. ३६-३८
नित्याषोडश I १८. ५२
निर्वाणचरण IV ८. ७०-७१
निर्वाणदीक्षित I ३. ४५
निह्नव IV ३. २०७
नीलसरस्वती IV ५. १४०; ८. २०२
नैवेद्य (नानामत) II ३९. १९-२६
न्यास I ११. २५-२८; II १. १५६; III ३. २३०; IV ११. ८६
पञ्चकृत्य I २. ४६
पञ्चतत्त्व I ९. १४-१५
पञ्चभद्र II १३. ६४
पञ्चमेरु I ९. ६४-६५
पञ्चरत्नेश्वर IV ४. ७३
पञ्चविद्याविधि I ४. ४४; II ४२. १७
पञ्चसिद्धिविधि I १७. २५
पताकालक्षण I १०. ६३
पथिषद्रुद्र (मन्त्र) III २०. ३३-५३
पद्मान्तक II १०. ३०; III १५. ३८
पर IV १०. ७०
परकायप्रवेशन III १२. १-३५
परब्रह्म II ५. १०; ८. ३१; IV ५. ११४
परशिष्य III १०. ३२
पराज्ञादिनिषेध I ३. १०१-१११
पराप्रासाद III २. ३९; IV ८. ७१; ९. ४०; १०. २९
पर्जन्य II ५९. ६-२१

पर्यायनिर्णय (सप्त पर्याय) IV २. १५-४८; ७. १५७-१६०
आगम° IV २. ४४-४६; ७. ९४-११६
आम्नाय° IV २. ३८-३९; ५. ४०-७२; ७. १-१०३, ११६-१६६; ८. ४५
आयतन° IV २. ४२-४४
काल° I ३. १४; IV २. ३७; ५. ७३-१७४; ६. १-१२३; ७. २५
दर्शन° IV २. ४१-४२; ७. ५४
देश° IV २. ३४-३६; ५. ४०-७२; ७. २५
विद्या° IV २. ३९-४०
पर्वदिन I १३. ३८-४२
पर्वराज I १३. ३१-३३
पवित्रारोपण I १३. ४०; १७. ३-४४; १८. ३, १८-२९, ३४-६१
°माहात्म्य I १९. १-४३; III ११. १४६-१४९
पशु II ३३. १५
पात्रभेद I ३. ५८-६१; II १८. २८-६४, १०१-१२०
पात्रविनिर्णय I ४. १-१९१
पात्रशोधन II ६८. २५-४२
पात्रसिद्धि II १९. ८-१५
पादुका II ४६. १५-१६; IV १. ५८-६०
पानक्रम I ५. ३३-३७; ६. १६-१९; IV १०. ४६-५३
पाननिषेध I १९. ३६-३८, ५१
पानभेद II ३३. २-१४
पारम्पर्यक्रम III १. ६३-९०
पारायण I ६. ७२-७३, १३१-१३२; II १२. १९-२२; III ३. २६३-२६७, २८२; ४. ४४-५४
पार्श्वनाथ IV १. ३७
पिशुन (मन्त्र) III २१. ३०-३६
पीठ (भेदोपभेद) I ३. १६-२०; ६. २७; II १३. ३-४, २५-४२, ६२-७९; ३६. ३०-३३; ५४. ३३-३७, ५२-५५; ६०. २७-२८; III ३. १२०; ११. १३८-१४२; IV २. ४-१५, ५४-५५; १०. ११०-११६
पीठन्यास IV ११. ८६
पीठरहस्य IV १०. ९६-१०५
पुण्योद्भवा II १३. ६७
पुरश्चरण I ३. ११५-११६; II ११. ८-४९; III ३. १४७-१६६; ११. १५२-१५३; IV ३. ६४-६८
पुष्प (भेदोपभेद) II ३०. ३०-३५; IV ४. २८-२९; ११. १७-३३
पुष्पनिर्णय IV ४. ७४-१०५, १२०-१३०
पुष्पपटल IV ५. १-४०
पुष्पभद्रा (नदी) IV ५. १५८
पूजा I ३. ५५-५७; II २४. ६९
गुरु° I ६. ११६-१२२; II १८. २२-२७
त्रिकोण° II ६. ३९-५०
निशा° II ३६. १-५२
पीठ (यन्त्र°) II १८. ६४-८५
शक्ति° II १४. १-८४
स्त्री° II ३७. १-९२
स्त्रीपूजाधिकार II ३७. १५-५४
°चिह्नविधि II १८. १-१२३
°द्रव्य I ९. १-५६; II १३. ३०-४१, १०५-१६२
°पात्र II १३. १८७-२००
°भेद IV ११. ६८-८९
°यन्त्र I ९. ५-११; IV ११. ९०
°सिद्धि II ४२. १-२६
पूर्णगिरि I ४. १०३
पूर्णचक्र I ३. ४४
प्रणवनिर्णय I ३. ६२-८६; IV ८. २३
प्रतिग्रहनिषेध I ३. १०१-१११

प्रतिनिधि (द्रव्य) I ३. १६-१९, ३७-५६; IV ४. १०५-११६
प्रतिनिधि (व्यक्ति) II ५३. ८-१३
प्रत्यालीढ III ७.९
प्रदक्षिणा IV १०. १०५-११०
प्रदोष II ६१. ४७-५०
प्रपञ्च I ५. ६-१९; II ५८. ७१
प्रपञ्चेशी I १. १०२, १०६; IV ५. १२५
प्रस्तार III ३. १९३-२०७; ४. ५-४४; IV ८. ११६-१३३, १४०-१६५
कूर्म° IV ८. ११६
कैलास° III ३. २०३; ४. ६-७; IV ८. ११७-११८
भू° III ४. ५-६; IV ८. ११७, ११९-१२०
मेरु° III ३. २०३; ४. ७; IV ८. ११६-११७
रत्नगर्भ III ३. २०४-२०५; IV ८. ११७
प्रस्थव्यवस्था III ८. १-२२
प्राचीनिर्णय II १८. १-२१; III ६. २७-६२, ६५-७२
प्राणायाम I ४. १२७-१२८; III ३. २९६-३३०
प्रायश्चित्त II ६४. १२-३०
प्रेताष्टक II ६०. २८
बगला-अङ्गमन्त्र IV १. ६९-७४
°उत्पत्ति IV ६. १-११
बटुक I १२. ४८-८१; II ४३. १६-२१; IV ८. २१३
°उत्पत्ति I १२. ७४; १३. १४-१५; IV ६. ४२, ७८
बलिदान I १२. ४४-४८; II १८. ८५-८६; IV १०. ७५
बाला II ६२. ५; IV ३. ८२
बिन्दु I १. ३४; IV ८. १८४
बीज I १२. १४-४८; IV १०. २३-२५
बीजनिर्णय IV ८. १८३-१९३
बृहद्गुरु I ८. १५
बौद्धनाथ IV १. ३७
ब्रह्म I १. ९०-१३१; २. ११; II ५. १-८; १०. ४१-४८; IV ८. १-४१, १८४, २०८-२१५; ९. २-३६
ब्रह्मकूर्च II ६३. १३
ब्रह्मकौल I ७. ४७
ब्रह्मग्रन्थि I १७. २१
ब्रह्मरन्ध्र II ११. १४
ब्रह्मराक्षस IV ११. १०३-१०४
ब्रह्मराजयोग II ६३. २-३०
ब्रह्मवासना I ५. २-५, १८; IV ५. १०८-११०
ब्रह्माण्डरचना I २. ४९-७२
ब्रह्मानन्द IV ३. १२२; ९. ५८
भक्ति I ५. ६१-६३
भावना III २. ११४-१२८; ३. ३-१८, २२०-२६३
भुवना-अङ्गमन्त्र IV १. ८०-८३
°उत्पत्ति IV ६. १६-२१
भूकम्प III ११. १-१८
भूगोल I २. १५
°रचना I २. ४९-७२
भूतशुद्धि II १२. १-१९, २३-२४; III ३. ३२६-३३०; IV १०. ४२-४६, ५६-५७
भृगूत्पत्ति IV ६. ७५-७६
भृङ्गावली I ६. ८७
भृङ्गी I १. ११७; ६. ८२, ९०; IV ९. ५०
भैरवाष्टक III ११. २५३-२५८
भैरवी-अङ्गमन्त्र IV १. ८६-८९
मकारपञ्चक II ३२. १६-३८
मङ्गला III ११. २४७
मञ्जुघोष IV १. १५, ३८, ७३

मण्डप I ६. ३१-४०; १०. ६०-६९
मण्डल II ३८. ४१; ४२. ५; IV १. ५५-५७
अप्सरो° II ८. २-७
नवचक्र° III १. ५०
महाविद्या° III ११. १८५-१९५
महासाम्राज्य° III १३. ७३
यक्षिणी° II ७. १-१८
वैराज्य° II १३. ७४
साम्राज्य° III ११. १५३-१७४
स्वाराज्य° II १३. ७४
मदनपूजन I १३. ४१
मदनारोपण I १७. ४; १८. ३४; २०. ९-५७
मधुमती (सिद्धि) I १४. ५-३६; १५. १-३१
मन्त्र I १२. १४-४८; II ३८. ४५; III ३. १६७-२१९
°चैतन्य III ३. १५९
°जापविधान II ४६. १-४५
°दोष III ३. १५५-१६६
°(भाषा) साधन IV ११. ९१-९५
मन्त्रयोग I १. १२६; ६. ९३
मन्त्रोदय III २. ९६
महाकाल III ११. २५८; IV ६. ४२
महाकाली I १. ३६; III ११. २४५-२५७
महाचीनद्रुमलता III १५. ४१
महातारुण्यकौमुदी II ६२. ७
महादिव्यद्रुमलता IV ४. ७०
महानन्दाभिध I ५. ३६
महानीलोपासक IV ८. ७२
महापथ II १३. ६६
महापशु II ३३. १७
महामेरु I ११. ८-२३
महालक्ष्मी-अङ्गमन्त्र IV १. ७५-७८
°उत्पत्ति IV ६. २२-२३
महाशङ्ख (माला) II ९. ३१; २१. ४६
महासंवर्तेश्वर III १. ५०
महासिद्धिमुख II १३. ६९
मातङ्गिनी-अङ्गमन्त्र IV १. ७९-८०
उच्छिष्ट° IV ६. २७-४०
राज° IV ६. १५
°उत्पत्ति IV ६. ११-१५
मातृका (५०) I १. ३८, ५६-८२
मार्ग (त्रिविधभाव) I ६. २१
°निर्णय II १. ८३-११५
माला (भेदोपभेद) II ३. ६-८; ९. ३०-४४; ३०. १-७; ४१. ३०-४३; ५५. १८-२५; IV ९. ७०-८८; १०. ८-१०
°ग्रथन II ४१. १-१८; III ६. ९. १५
°धारण II ३. २०-२६
°फल II ५६. १-२१; ५७. १-२१
°रहस्य II ४१. १९-२९
°विधान II ४०. १-१३
°विनिर्णय II ३०. १-७
°सिद्धि II ७०. ४५; III ६. ८-१७
मालारात्रिविधान II ७०. २-२७
मालाशङ्खलिकायोग III ३. ३०४-३०७
मास (पञ्चविध) I २. १३१-१४२
मुक्ति II ५. २, ९
मुण्ड II ९ ६-२१, ५०; ३७. ८९-९२; ६७. १०
°कोपासन (मुण्डदुर्गा) II १०. ४-३२
°विशोधन II ६७. १-१०; ६८. ५-१७
°साधन II ६९. ३२-३६
°ण्डासन II ३९. १-१९
मुद्रा I ४. १२९-१३१; ८. ३६; IV १०. ९१, १०९
°धारण II ६३. ३२-४५
°धिकारी I ८. १६-२५
°भेद I ८. १९; II ६३. २१-३२; III १. ५५-६२
°संकेत II ३२. १-३८

मूलाधार III २. ११९; IV ९. ६३-६५
मृतहट्ट III १४. ५८
मृत्युञ्जय (मन्त्र) III २०. २१-३३
मेरु (भेद) I ९. ५८-९३
°साधननिर्णय I ६. ४१-४३, ५५-५६; १०. १-१९; ११. ५-२५; III १०. १, १३-१५, २८-२९; IV ८. १३७-१३९
°साधनफल I ९. ९४-१०४
मोक्ष II १३. १६०
यक्ष (८४) III १६. ५४-५८
°सिद्धिफल III १६. ५८-६५
यक्षिणी (३६) III १६. ५२
°मण्डल II ७. १-१८
°सिद्धिफल III १६. ५८-६५
यन्त्र I ९. ५-११; १७. २४-३७; II १३. २०३; III ११. १४१-१४५; IV ३. ७७-७८; ८. १८४-२०५
°धारण II ५१. २-५४; ६३. ३५-४५
°ध्यान III २. ९७-११३
°प्रस्तार III ४. १-८०; IV ५. ९३-९६; ८. १३५-२०७
°प्रायश्चित्त II ६४. १-३०
°भेद II ५४. २-५६
°लेखन II ५३. २-८
°लेखनप्रतिनिधि II ५३. ८-१३
°संस्कार II ६५. १-१९; ६६. १-४१
°सिद्धि II १९. १६-२३; ५२. २-३०; ५५. २-१७, २६; ६५ १९
°स्थापनानिर्णय II ४७. १-८
°न्त्राधार I १७. २९-३३; II ५३. १४-३२; ५४. ४-३१
तारा° IV ८. १९४
नीलासरस्वती° IV ८. २०२
युगनिर्णय I ३. १-१५
योग II १३. ४७-६१, ८०; १४. ३०-३६; ६१. १-११७
°पञ्चक III १. १९७-२००; IV ८. १०२-१०३
नाद° IV ८. ३५-३९
ब्रह्मवीरा° II ४. ५-२७
रहस्य° II ६३. ३-९
स्पर्शमणि° I २१. ५५-५७
स्वाराज्य° II ६१. ८२-८८
योगपट्ट I ६. १३६; ७. ६९
योगवीणा II १३. ७०
योगिनी (६४) III ११. ३०, ४९
योनि IV ४. ३१-३४
रक्षा I १८. २-३३; १९. १-६७
(दशविधा) I १८. ८-१०; १९. ५३
रक्षाबन्ध I १७. ३-४७
रजतादिधारण II ५५. २-२६
राजदन्त II ९. ३४-३९; III ११. ८२-८४
राजयोग IV २. ४८
रात्रि I ६. २३-२५; IV ६. ७०-७५
अबला° I. ६. २५; १३. २, १२; IV ६. २२
क्रोध° I ६. २४; १३. २, १०; IV ६. १८
घोर° I ६. २४; १३. २, ११; IV ६. ४२
वीर° I ६. २३; १३. १-४; IV ६. ७
शिव° I १३. ३, १७; IV ६. १०-११
रात्रिनिर्णय I १३. १-३८
रात्रिपूजा II ६१. ४६
राम IV ९. १३-३३
रुद्राक्षधारण III ११. ११८-१२८
रूपगन्धक्रम II १६. ६३-६४; ३०. ८-९; ३५. १८; IV २. १०२, ११०
रूपप्रशंसा I ३. १४५-१४६; IV २. १०६-१०८

रेखानिर्णय III ४. ५६-६४
रेखोदय III २. ९६
लता II १६. ७१-११४
°रूप II ३५, ९-५५
°संकेत II ३४. १-२०
लय IV ९. ३८, ४९
ललिता IV ९. २
लिपिमातृका III १७. ४८
लेखनसमय I २१. २-५
लोक I २. ५५-६७
वज्र II ६१. १९, २६
वन्ध्या IV ११. ८९-१०१
वर्ण (धर्म) I २. ८०-८२; II १. ३३-३५
वर्णिनी IV ५. १५६
वसन्तपञ्चमी I १३. ३८-३९
वसन्तपूजन I २०. ५२
वह्नि III ११. ७३-९०
वागीश्वरी II १५. ४६-४७
वाग्भव II ८. २२-३२
वाग्भेद II १६. ६५-७१
वाञ्छाकल्पलता II ६१. ११९-१२६; IV ९. ३३
वाञ्छामणि II १३. ६६; १९. २६
वाणी I १८. ५२
वार्तायक्षी III २१. २१-३०
वास्तु I ८. ८३, ९९-१००
वास्तुसर्प I ३. ९६-९८
विद्या (भेदोपभेद) II १. ३६-९१, १६३-१७४; ११. २-६; ३७. ८१; IV १. ३-८
त्रैलोक्याकर्षिणी° I १४. ५-३६
°फल I १५. १-३०
दशमहा° II १. ३७-४७; २. २५-३९; ६. १६-१७; ७. १३; III १. ९८-१११; IV ५. ७४-७५
°क्रम II ३०. १-२८
°मार्गभेद IV ६. ८०-८७
°पीठनिर्णय IV २. ३-१५
°सिद्धिनिर्णय II ४३. १-३६
विद्याराज्ञी I १९. ५५; II १. ७८
विराट्चक्र I २. ३६
विशालाक्षी II १५. ४८-४८
विश्वभद्र (पीठ) II १३. ६५
विश्वामित्रकपाल I ४. ७, ४०-५०
विष्टर IV १०, ११६-१३२
विष्णुचक्र I ३. ११९
वीतिवर्ण (मन्त्र) III १७. ५४
वीतिसंख्य (मन्त्र) III १६. ५
वीर II ४. २९; ६९. ५
°भार्या IV ११. १०, ५५
°रात्र्यादिनिर्णय I १३. १-३८
°साधन II १०. ३३-४०; ३८. १-५२; ३९. १-३३; ४३. ३१-३६; ४४. २-६३
वीरभद्रदंष्ट्रा IV ६. ७५
वृत्ति (३६) IV २. ४८-४९
वेदप्रशंसा I ८. ३१-३५
वेध (पञ्चविध) I ६. १०१; II ३४. १०-११
वेश्या (सप्त°) IV २. ६२-६६, ७८-८०; ३. १५०-१६२; ४. १२
वैरोचनाष्टक II १०. २९; III १५. ३८
वैष्णवादिव्रतनिर्णय I ८. ६१-८५
व्यापक (न्यास) III २०. ६
शकुनविचार I ८. ९६-१०१; IV ६. ८७-९२
शक्ति I १. ९८; ३. ५५-५७; II १५. १२; ३७. ७९; III १. २०१-२०४; IV ३. २१३; ४. ४-७३
°कोणनिर्णय II ६. १-१५
°नाम IV ८. १६-१८
°भेदोपभेद II ३. १-६; ४. १४-२६; १३. ४३-१२४; १५. ५०-६०; IV २. ८५
°योग II ५. १७; ६०. ५४-८०; ६१.

२-४६; IV २. ४८-११५; ३. २-२१५; ४. ४-७३
°लक्षण II १५. ४-१२
°सङ्गम II ६१. २८
शक्तिपात (भेदोपभेद) I ३. ५१-५४; II ४४. ५३; III ४. ७८
शङ्कर I १७. ३९
शङ्कराचार्य (शिष्यादि) IV ८. ६०-११४, २१७-२१८
शनिप्रदोष I ८. ९६-१०१, १०९-११३
शवस्वरूप III ७. १०
शवाष्टक II ४४. ११
शाखारण्ड III २. २५
शापोद्धार III २. ५८-८०
शाबर I ६. १२६; १२. ७२; १६. १८-१९
शाबरमन्त्रसाधन IV ११. ९१-९५
शिरःसंप्रोथन II १६. ३२
शिव II ४३. २१-३०
शिवकाञ्ची IV ५. १३१
शिवचक्र I ३. १६९
शिवाकर्षण II ५. १७-२३; IV ५. ११२
शुक्र III ११. ५४-६४
शून्य I २. ३७, ४२
शृङ्खला IV ९. ३७-४२
शृङ्खलिकायोग II १. १६८
श्मशानाष्टक I २. ६९; ६. २७; III ११. २३२
श्यामा II ६३. ६
श्राद्ध II ६१. ६६-७३
श्रीचक्र II ४. ३-५; ११. १२८-१३८; IV ८. ११६-१३४; ११. १५, ८६
°पूजन III २. ३९
°लेखन III १. २५-३४
श्रीचक्रवाटिका I २. २१
श्रीपञ्चपञ्चिका I ६. ७२; IV ५. १२८
श्रीविद्या I ६. ४२-४४
श्रीशैल IV ५. १३१
षट्कर्म I ८. १०२-१०९; १२. १७; IV १०. ५८-६८
षट्चक्र I ५. ७२-७५
षडङ्गक्रमविन्यास IV १०. ७८-९६
षडध्वा I २. ४७-४८
षण्ढ (अष्टविध) IV ११. ९५-९८
संवर्तेश III १. १९; IV १. १०७; ५. ७१
सङ्कल्पप्रयोजन III ३. १९-२६
सङ्ख्या I २. १७-१९; II १. ४-१०; IV ११. ४८
सन्ध्यावन्दन I ६. ७४; III ५. ४७-५२
सप्तदशी (कला) IV ९. ६८-६९
समयी I २०. २८
सम्पत्सरस्वती III २०. १-२१
सम्प्रदाय II १४. ५१
सम्मोहाञ्जन III १३. २६
सर्वराट् I २. ३६
साध्यजाड्यता III ७. १-१५
सामरस्य I १. २९; II ५. २; III ३. ८४-८७; IV ३. ११८; ९. ५२; १०. ११४
साम्राज्यगुटिका II १३. ७१
साम्राज्यमण्डल III ११. १५३-१७४
सिंहासन II ११. ४६; १४. १६
सिद्ध (८४) I २. ८४; ५. ४२; ७. २०, ४०, ५२, ५८; ९. १३; II १४. ६०; ४३. १५; III ११. ५९; १६. ५४
सिद्धविद्या II १. ३७-४२; IV २. १०२-१०३; ६. २६, ४०
°अङ्गमन्त्र IV १. ८३-८६
°दिनिर्णय II १. ५३-१७४
सिद्धान्त १. ३. २
सिद्धि (भेदोपभेद) I ६. २-७; २१. ४८-४९; II १. १; १०. २; १३. १२४; १४. १७-

२१; १८. ५३-५५; ३४. १३-१७; ४४. ५४-५९; ५९. २३-२५; ६०. ८१-८३; ६१. १२५-१२६; ६८. ४०-४२; III ३. १००-१०३, २९२-२९३; ४. ४१-४३; १२ ३२-३३; १६. २७, ५९-६२; १७. १७; १८. ३७-४०; IV ३. ३-११२; ४. १२२
सिद्धेश्वरी I १५. ४४-४५
सुधासागर (पीठ) II १३. ६८
सुन्दरी I १. ३६; ९. ११; II २. १४; IV ५. १०३-१३१
°अङ्गमन्त्र IV १. ५२-६९
°साधनक्रम II ४४. १-६३
सुन्दरीमोहन (पीठ) II १३. ७७
सुरतासन IV ३. २०५-२०६
सुरा II ३७. ६३-६८; ४४. ६०
सूतक I ३. १११-११५; II ४५. ६. २६; ४६. १७; III ३. १५१-१५६
सृष्टिप्रक्रिया I १. १९-८९; २. १-१४२
सोपान II ६०. २६
सौभाग्यकमल (पीठ) II १३. ७२
सौभाग्याभरण (यन्त्र) II ५१. १-५४
सौराष्ट्र IV ६. ६
स्तम्भचतुष्क II ६१. ९९-१०९
स्त्रीदीक्षानिर्णय II ५१-५५; ५२. १-२; ५८. १-५०; III १. ९१-९८; IV ११. २-१७
स्त्रीप्रशंसा I ३. १४२-१४४; II १३. ४३-४९; २३. १०-११; ३६. ३४-५२
स्थानदशक II १३. १०४
स्नान II ३८. २-५, ४८-४९; III ५. २-४६
स्पर्शमणि I २१. ५५-५७; II १. ७५
स्वप्नमन्त्रविवेचन III ३. ८८-१४६, १६७-१८१
स्वप्नवाराही III १९. ३३-६६
स्वयम्भू II ३०. ३०; IV ९. ६२; १०. १२२
स्वराट्चक्र I २. ३६
स्वर्गद्वार II १३. ६६
हनुमान् III ११. १८६
हरिद्राख्यसिद्धकुण्ड IV ६. ३-६
हस्त (परहस्त-स्त्रीहस्त) II १४. ७२-८४
हादिकादिक्रमनिर्णय I ७. १-७१
होडा (राक्षसी) II ६९. ११-२४
होम II १८. ८७-८९; III ३. २०८ २१५; IV ११. ३४
°द्रव्यनिर्णय I १०. ६९-७१; III ६. १८-२६; IV ११. ३४-६८

परिशिष्ट ४

शब्दपूर्तिः

Page	stanza	for	read
24	43	xxx	तद्भगं
24	47	xx	-लिङ्गं
25	48	xx	योनिं
25	49	xx	योनौ
25	51	xx	भग-
25	51	xx	भगे
25	52	xx	°लिङ्गं
28	95	xx	योनिं
28	96	xx	लिङ्गं
29	102	xxx	सुरतं
29	103	xxx	मैथुन°
29	105	xx	रतं
29	108	xxx	मैथुन°
30	109	xxx	मैथुन°
30	110	xxx	°मैथुन°
31	124	xxxx	योनिलिङ्ग-
31	127	xxxx	स्त्रीसंयोग-
34	158	xxx	°श्चुम्बन-
34	159	xxxx	विपरीतां
34	161	xxx	मैथुन-
34	168	xxx	मैथुनं
34	169	xx	°लिङ्गय
34	169	xx	°लिङ्गय
35	172	xx	-लिङ्गं
35	172	xx	°योनिः
35	172	xx	°लिङ्गय
36	182	xxx	°श्चुम्बनं
36	182	xxxx	कुचमर्दः

Page	stanza	for	read
36	183	××××××	नखदन्तक्षता°
36	191	××	भगं
36	192	××	लिङ्गं
37	203	××	लिङ्गो°
37	204	×××	-चुम्बन°
37	204	××	कुचौ
37	204	××	रतिं
37	204	×××	चुम्बनं
37	204	××	रतं
38	208	××	-लिङ्ग-
38	208	××	-योनि-
38	209	××	योनिं
41	28	××	रजो
42	48	×××	-चुम्बन-
43	52	×××	°नालिङ्ग्य
43	52	×××	संचुम्ब्य
43	54	×××	मैथुनं
43	54	××	चुम्ब्य
43	56	××	भग-
43	57	××	°लिङ्ग्य
43	61	××	भग-
43	62	××××××	चुम्बनालिङ्गने
43	62	××	कुच-
44	64	××	भगे
44	64	××	लिङ्गं
44	69	××	योनौ
48	121	××××	भगे लिङ्गं
48	121	×××	मैथुना°
48	123	××	-रतं
49	125	××××	भगे लिङ्गं
49	126	××××	भगे लिङ्गं
49	130	××	योनि-

शुद्धिपत्रम्

उपोद्घातभागे

अशुद्धम्	शुद्धम्	पृ.	पं.
तत्र	ततः	१	३१
तन्त्रमिदं	तन्त्रमिदं प्रकाशितमभूदित्यङ्गीकर्तव्यम् । तत्र कृष्णानन्देन आगमवागीशेन तन्त्रमिदं	८	९
श्रूते	श्रूयते	८	१६
यित्वा	यिकत्वा	९	१
तत्तख	तत्त्तख	१०	१
तद्गतिः	तद्‍गतिः	११	२१
वीणा-शिव्	वीणाशिख	११	३०
मन	मत	१५	२९
आगामिका	आगमिका	१८	४
रायवधि	रथ्यावधि	१८	२४
ग्रन्थः तु	ग्रन्थः	२०	६
द्धति	द्भृति	२०	१५
तन्त्रा	तत्त्वा	२०	१५
हर्य	ह्रय	२०	२०
तमं	तमद्	२४	२६
हनतन्त्रं	हतन्त्रं	२४	२८
तन्त्र	तान्त्रिक	२४	२९
गाणणा	गाणपा	२७	७
रव्यं	रव्यं	२९	२६
विद्या	विधा	३०	३०
तया	नया	३१	२६
त्रम्	त्रयम्	३३	२५
विद्यं	विधं	३५	५
नियं	निन्ध्यं	३५	१२
प्रशिदतः	प्रदर्शितः	४०	९
कृतः	दत्तः	४०	१६
गेन	गमेन	४०	२६
१६२-१६५	१५८-१६९	४०	३२

अशुद्धम्	शुद्धम्	पृ.	पं.
च	न	४१	८
पढि	पठि	४१	२२
नाम	वाम	४२	२७
गण्य	गणग्य	४३	३
काम	वाम	४३	३
कोल	केरल	४३	६
तन्त्रा	तन्त्र	४३	२९
साख्या	साख्य	४५	२५
संख्याप्य	संव्याप्य	४६	२
ब्राह्मणो	ब्रह्मण	४८	७
स्तूयते । तारा	स्तूयते तारा ।	५०	२४
आन्तर-वरिवस्या	द्वितीयानुच्छेदस्य शीर्षकमेतत्	५१	९
पानेन	पातेन	५३	७
नर	नव	५३	३२
रस	समरस	५६	३
विधय:	विधया	५६	१३
श्री	स्त्री	५६	२४
भास्ये	भाष्ये	५६	३३
गुरू:	गुरु:	५७	१८
परान्त	परान्न	५८	११
नित्यानित्या	मितानित्या	६६	२२
नाष्टके	नके	६९	८
समुद्रा	समुद्र	७०	२६
मेरु	मेरू	७१	७
कन्न	कञ्ज	७४	२
कञ्च	कञ्ज	७४	२७
परान्तं	परान्नं	७६	१४
चिन्तत्वं	चित्तत्वं	८९	३४

ग्रन्थभागे

मा	या	१०	६
भोगांर्थ	भोगार्थं	१७	१२
दशा	दश	१८	२
दशा	दश	१८	११

अशुद्धम्	शुद्धम्	पृ.	पं.
सन्दृरी	सुन्दरी	३३	१८
पञ्चा	पञ्चा	३४	१५
तर्पपे	तर्पये	३५	२
बध्द्वा	बद्ध्वा	३७	१९
दूररथा	दूरस्था	३८	३
क्रक्ष	ऋक्ष	६५	१७
पाथि षड्	पथिषद्	७५	८
कक्कुका	कुक्कुटा	७५	१९
जतायः	जातयः	८५	२१
गारूड	गारुड	१४०	I-२०
ओज्यात	ओज्यान	१४४	I-२३
मेरू	मेरु	१५०	I-१७
गुरू	गुरु	१५०	II-४

SV
S.
Su
S